# SELF STUDY REPORT

## FOR

## 2nd CYCLE OF ACCREDITATION

# CENTRAL SANSKRIT UNIVERSITY, DELHI

**CENTRAL SANSKRIT UNIVERSITY, 56-57 INSTITUTIONAL AREA, JANAKPURI 110058**

**www.sanskrit.nic.in**

**SSR SUBMITTED DATE: 20-11-2022**

**Submitted To**

**NATIONAL ASSESSMENT AND ACCREDITATION COUNCIL**

**BANGALORE**

**November 2022**

## Executive Summary

***Introduction:***

Today's children are tomorrow's citizens and the role of educational institution is paramount in moulding the students. Moreover, the onus and responsibility on the Sanskrit institutions is much more as they work in not only chiselling the students as future ideal citizens, but also protecting, preserving, promoting and popularizing study of Sanskrit, which is the base or backbone of the Indian culture. Central Sanskrit University, Delhi is a premier institution in this regard with its proven track record dating back to five decades ago.

***Devavani Sanskrit****,* which has undergone through many vicissitudes in history like River Saraswati, is replenished with new vigor and vitality, with the establishment of Rashtriya Sanskrit Sansthan on Oct. 15, 1970 on the recommendation of Sanskrit Commission, under the aegis of Ministry of Education, Government of India, with the mandate to establish campuses in the country for the protection, preservation, promotion and propagation of Sanskrit language and learning, and also to serve as a nodal agency for implementation of Sanskrit Policies and Schemes of the Government of India.

Rashtriya Sanskrit Sansthan, functioning initially from various rented accommodations in New Delhi, set about on the arduous task of establishing / acquiring campuses like Ranbir Campus at Jammu (established by Maharaja Ranbir Singh of Jammu and Kashmir at Raghunath Temple, Jammu) in 1858 and Shri Sadashiva Campus, Puri, Odisha, (started as a Teaching of Oriental Languages school during the British Raj in 1918), in 1971. With passage of time, the Sansthan got its own building, and more and more campuses were added. Later, in 1987, Lal Bahadur Shastri Kendriya Sanskrit Vidyapeetha, New Delhi, and Kendriya Sanskrit Vidyapeetha, Tirupati, Andhra Pradesh hitherto campuses under Rashtriya Sanskrit Sansthan became Deemed Universities. Rashtriya Sanskrit Sansthan, too, was declared a Deemed to be University in June, 2002.

On 25 March, 2022, the Parliament of India, passed the **Central Sanskrit Universities Act 2020**, whereby Rashtriya Sanskrit Sansthan transformed as Central University, under the name 'Central Sanskrit University, Delhi.' At present it has the following campuses at various significant locations in India as notified in **Gazette of India**: In addition, it has also 26 Adarsh Mahavidyalayas including four Adarsh Sodh Sansthans and many affiliated Sanskrit institutions.

The total area of all the campuses combined together is **123.66 acres** (500442.80 sq.m.). It has spacious playgrounds, 22 seminar halls, 342 class-rooms, 111 ICT enabled class-rooms with features like smart boards etc. So, the teachers are able to deliver lectures, using Power Point Presentations, audios, videos, and the internet

resources. The staff rooms, HoDs' Office Chambers, Directors' Chambers, libraries, and offices are equipped with computers etc. numbering to 983.

All the campuses have well-equipped libraries. The total number of books on accession is 3 lakh, 54 thousand, 7 hundred and 85. These libraries also house rare manuscripts. Among them, Prayagraj Campus has 56475, Jammu Campus has 23, Sringeri Campus has 164 and Puri Campus has 177 manuscripts.

The University offers **56** programmes. There are **247** regular teachers,contract and guest teachers **206**, i.e. **453 teachers** in total. Total number of students on roll is **5950**. (Excluding students enrolled in distance mode.)

***Vision:***

वैश्विकस्तरे भारतस्य गरिमाणं ख्यापयितुं विश्वगुरुत्वेन भारतं प्रतिष्ठापयितुं च क्षमस्य विश्वस्तरीयविश्वविद्यालयस्य रूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिवर्धनम्।

Transformation of Central Sanskrit University as a world-class university for establishment of the glory of Sanskrit learning in the global context in the order to make Bharat as "Vishwa guru".

***Mission:***

- संस्कृतपरम्पराश्रितस्य नवज्ञानराशेः अवाप्तये अपेक्षितायाः वेदिकायाः सर्जनम्।
- सम्बद्धक्षेत्रेषु सर्वेषु भारतीयज्ञानप्रणाल्याः प्रोन्नयनम् ।
- मुख्यधारायां संस्कृतमाध्यमेन शिक्षणाय व्यवस्थापनम्।
- संस्कृतबन्धुत्वस्य आधुनिकजगता सह जोडनम् ।
- बहुविषयकानुसन्धानस्य जीवत्क्षेत्ररूपेण संस्कृतस्य ख्यापनम्।
- संस्कृतज्ञानकेन्द्रत्वेन के.सं.वि. ( सिएसयु) इत्यस्य विकाससम्पादनम् ।

- To create a platform for new knowledge based on Sanskrit heritage.
- To promote Indian Knowledge system in all relevant fields.
- To bring Sanskrit as a medium in mainstream Education.
- To connect the Sanskrit fraternity to the modern academia.
- To make Sanskrit as a vibrant field of multidisciplinary research.
- To develop CSU as an accredited Sanskrit based knowledge hub.

**SWOC**

***Institutional Strength :***

- The **world's largest** and the only **multi-campus** Sanskrit University.

- 12 campuses, each capable of qualifying as a university in itself, spread across the country. Each campus is like Mini India and promotes one nation, one country and one culture.
- **Highly qualified and experienced faculty** with a majority of them holding Ph.D. degrees.
- Existence of **Women's Cell**, **Career Counselling cell**, **Committee against Sexual Harassment, Anti-Ragging Cell**, etc.
- **Centre for Dramatics** at Bhopal Campus, **Women's Study Centre** at Balahar Campus, **Prakrit Study Centre** at Jaipur campus and **Pali Study Centre** at Lucknow campus.
- Special coaching centres for **NET-JRF/CTET/State TET/JCO/** other competitive exam.
- Free education, free lodging facilities at the **hostels** within the campuses.
- **Liberal scholarships**.
- **ICT facilities** in the classrooms, well-equipped computer labs for computer education.
- Modern campus buildings and **well-ventilated classrooms** with comfortable seating for students.
- **Vast playgrounds, badminton courts, volleyball courts, gymnasiums** etc.
- **Well-equipped campus libraries**, departmental library in each department in campuses, in addition to **central library at the Headquarters**.
- **Wi-Fi** enabled campuses.
- All India **Sanskrit Elocution contest** held annually.
- All India **Sanskrit Natyamahotsavah** is conducted every year.
- Inter campus **Youth festival** is organized every year to motivate the students in academic, cultural games and sports activities.
- Dedicated Faculty with spirit of team work.
- Multi-disciplinary and inter-disciplinary research facility.

***Institutional Weakness :***

1. Students from backward areas, with poor backgrounds and financially challenged sections of the society.
2. Many campuses in remote/hard/hilly and backward areas.
3. Covid-19 slows down pace of the university.

***Institutional Opportunity :***

1. With the **emergence of India** as a force to reckon with, there is a **global resurgence** of interest in India and everything Indian, including its **ancient knowledge systems**, of which Sanskrit has the most celebrated repository. The University can emerge at the global level as the **'go to' knowledge centre.**
2. It has a great role to play in **propelling India as Big Brother at global level**.
3. It enters into **MoUs with universities** of repute and soon in other countries in the near future.
4. There is a growing realization that Sanskrit provides better employment opportunities as compared to other disciplines. Courses like Vastu, Jyotisha, Yoga, Ayurveda Literature and Sanskrit Journalism provide ample job opportunities.

***Institutional Challenge :***

1. The University trying to **restore normalcy** in its academic sessions to **pre-Covid** time.
2. Easy availability of **computer software** for performing various ***Jyotisha*** **and** ***Karmkanda*** works is a major challenge, but the students can overcome it with their super manual skills.
3. Fierce competition among the Sanskrit institutions is another challenge which **spurs this premier Sanskrit institution** to emerge as the winner without any doubt.
4. **Implementation of NEP-2020,** Simple Standard Sanskrit at UG & PG level, interdisciplinary and multidisciplinary research and MOOCs etc.

**Criteria wise Summary**

***Curricular Aspects :***

- The mission and vision of the University is the essence in designing the curricula of the University. The Committees, constituted for the purpose, take all important measures in this regard.
- The Board of Studies constituting the faculty, schools and departments have significant role in planning and developing curricular aspects. Employability, innovation and research needs are important factors continuously assessed to re-orienting the existing curricula and designing the future ones.
- Special attention is given to quality sustenance and scope of future.
- Admission to the programmes is through Central University Entrance Test (CUET).
- Choice Based Credit System has been introduced in the university
- Feedback from all the concerned stakeholders is regularly obtained and their observations and inputs play a vital role in designing the future curricula.
- Programme, Programme Specific and Course outcomes are available on the official wall.
- Indepth shastric learning, creative writing entrepreneurship, skill development, interdisciplinary, 64 kalas and Indigenous knowledge passed on to students through modern applications.
- All the traditaional courses along with texts and the examinations are conducted in Sanskrit medium.
- Content of all the courses is in line with **Simple Standard Sanskrit.**
- Indian knowledge systems are blended with modern knowledge systems to suit with **Simple Standard Sanskrit.**
- CSU has innovative courses in combination with Yoga, Ayurveda literature, Ancient and modern Mathematics, Computer science, Vastu-shastra, Natya-shastra & Sanskrit journalism etc.,
- The dual mode of face to face teaching and MOOCs is being pursued - a unique feature of CSU.
- Skill oriented courses are given importance.
- Gender equality is followed in the strictest manner.
- Human values are promoted along with professional ethics.
- Modern subjects like- History, Pol.Science, Economics, Computer Science, English literature, Hindi literature and Regional languages (Dogri, Kannada, Oria, Tamil, Telugu and Malayalam etc.,) are taught alongwith the traditional subjects.
- Feedback obtained from all the stakeholders is analysed, assessed and adapted through the apex bodies like- academic council & executive council.
- CSU maintains high standard in teaching and research in all the programmes, which is evident from the publication of theses and books.
- SLMs for distance student learners are of very high standard and also available on digital platform.

***Teaching-learning and Evaluation :***

- The University charges reasonable tuition fee.
- The admission process is totally transparent and student compatible. The University has a centralized admission process, and all applications for admission including payment of fees are done online.
- Reservation for seats for the **SC/ST/OBC/EWS/Physically disabled** etc. is as per the central government guidelines.
- Provisions are in place for preparing students for entrance test to B.Ed. and other competitive examinations of **NET/SLET/UPSC/PSC/CTET/State TET** and for other government, non-government and quasi-government jobs.
- The University has a zero-tolerance policy with regard to ragging and sexual harassment at the campuses and offices of the University.
- Students’ representation in various advisory, academic, administrative bodies & IQAC of the University is ensured in order to make them effective stakeholders.

- Frequent national seminars, conferences and special lectures by eminent personalities and subject experts are organized so as to update the students and the teachers to the latest trends and emerging technologies of the present world.
- The slow learners are **diagnosed through evaluation** of assignments and tests and **special remedial classes** are conducted to bring them at par with the advanced learners.
- Students belonging to backward and under-privileged sections of society, as well as from remote and rural background are given special encouragement.
- Student survey is periodically conducted through online and offline.
- The university has a robust and efficient Examination Section which conducts all the examinations and declares results within a strict timeframe. Perfect confidentiality is ensured in preparation of question papers and conduct of central evaluation process. All the results are displayed on the University and Campus websites. Hardcopies of the Marks Sheets and Degrees are dispatched to the concerned campuses in time. A proper provision for review and redressal of candidates' grievances is in place.
- Examinations and evaluation for traditional subjects are conducted in **Sanskrit medium**.
- Even during the COVID-19 time the CSU conducted online teaching-learning, examinations and evaluation in successful and innovative way.
- The **GURU-SHISHYA PARAMPARA** of Gurukul tradition is implemented by CSU in its **mentor-mentee** system.
- The **MUKTASWADHYAYPEETHAM** KENDRAS located in all the campuses provide extra assistance to its learners in a very dedicative & effective manner.

***Research, Innovations and Extension :***

- The University has a **Campus Research Committee** in each campus of the University, headed by the Director of the Campus. All the heads of the Departments of the Campus are its members. All the research proposals from the campus are placed before this committee for consideration and necessary action. The Local Committee forwards the cleared research proposals to the **Central Research Board** which weighs each proposal as per merit and grants approval to the deserving ones.
- The University strictly adheres to the UGC specified minimum standards and procedures for the award of **Ph.D. Degree Regulations 2016/2022.**
- Research - incentives, seed money, ethics, minor & major projects including Ashtadashi, PDF, innovations and consultancy are pursued.
- After the successful completion of the research, a copy of the thesis in PDF format is forwarded to INFLIBNET and another copy of the thesis in PDF format on CD is forwarded to the UGC, New Delhi, under rules, while keeping 6 hard copies of the theses and a soft copy in PDF Format on CD for University record.
- The University campuses provide a number of ICT enabled facilities like computer systems for browsing, printers, scanners and Wi-Fi internet etc., to research scholars.
- The faculties of the University are the best in the country in their respective fields. They frequently publish books and articles in reputed peer reviewed journals. Almost all the campuses of the University have their own magazines, research journals and **14 journals** have also been included in the **CARE list of the UGC**.
- In line with the **NEP-2020,** attempts are being made to create linkages, collaborations, etc. with mainstream educational institutions to create educational atmosphere conducive to interdisciplinary and multidisciplinary research. For this purpose, **MOUs have been signed with IGNOU** and others to explore the possibilities of dual degree systems, multiple entry and exit systems, CBCS etc.
- The students and faculty members regularly attend national and international seminars and conferences and webinars at national and international levels. They get exposure to the speeches of eminent personalities in the various subjects.
- The campuses organize department-wise weekly, monthly and yearly lectures, *sangoshthis, Vagvardhini Sabhas* etc.

***Infrastructure and Learning Resources :***

- The CSU has adequate teaching learning facilities and sufficient IT infrastructure.
- All the campuses, except Mumbai campus, have spacious class-rooms, smart classes, auditoriums, playgrounds, badminton courts, volleyball courts, separate gyms etc.
- All the campuses have sufficient number of computers, for the use of the teachers, students, and office. They also have **computer labs, technology labs, psychology labs, language labs**, **Jyotish labs** etc.
- All the campuses have **seminar /assembly/conference halls & Natyanusandhan kendra** with modern seating arrangements and sound and lighting systems for organizing academic, social and cultural events.
- Most of the campuses have **hostels for boys and girls with mess.** Nominal fees are charged for lodging, except electricity charges and mess expenses.
- There are common rooms with amenities for girl students.
- **Staff quarters** facility is available in some of the campuses.
- Some of the campuses have health centres for healthcare of students and staff, where a doctor is available on designated dates.
- All the campuses have well-equipped, automated and well-furnished libraries, with reading rooms. In addition, there are departmental libraries at the campus-level.
- There is also a well-equipped and well-furnished library at the New Delhi Headquarters of the University.
- The CSU has association with **INFLIBNET, Shodhaganga, E-Shodhasindhu, Bharat Vani portal, e-PGpathshala, MOOCs - SWAYAM, CEC & NPTEL.**
- The library assets of CSU are as below:-

1. Total No. of Books :- 3,18,108
2. Total No. of Reference Books :- 50,421
3. Total No. of Manuscripts - 56,775
4. Total No. of Rare books - 5,945
5. Total No. of Journals subscribed :- 753
6. Total No. of E-resources - 215
7. Total No. of (Ph.D.) Theses :- 766
8. Total No. of CD & Video collections :- 483

- The University allocates sufficient funds for the purchase, upgradation and maintenance of the infrastructure and equipment at the Headquarters and campuses.
- Qualitative IT tools and ICT enabled classrooms and smart classrooms are provided in all campuses.
- 48 Laptops and 983 computers are used by Teaching, Non-Teaching staff and students.
- The CSU has 120 episodes of **Sanskrit Learning Video** contents on its website.
- CSU has **1GBPS** bandwidth using fibre optic connectivity.
- It spends large amount in the beautification of the campuses.

***Student Support and Progression :***

The University has a **liberal scholarship policy** under which scholarships are available to the students of the University as per following table (at the campus level) –

| Programmes | Number of Scholarships available | Amount |
|---|---|---|
| Prak Shastri I & II | 60% +60% | Rs. 600/- pm |
| Shastri I, II & III | 60% +60% + 60% | Rs. 800/- pm |

| | | |
|---|---|---|
| Acharya | 15 per Subject | Rs. 1000/- pm |
| Vidyavaridhi | - | Rs. 8000/- pm |
| Siksha Shastri | 60% | Rs. 800/- pm |
| Siksha Acharya | | Rs. 1000/- pm |

- The university has important bodies like **Anti-ragging Committee, Committee against Sexual Harassment** etc. They operate in a proactive way and keep vigil and take prompt action, wherever and whenever necessary.
- The University has active **SC/ST cells and Equal Opportunity Cells** at all levels to ensure that rights of students and staff are well taken care of.
- Many campuses of the University have **NSS units** which organize various activities for the students. They organize camps in and around areas nearby to make the public aware of various activities and cleanliness drives etc.
- It has number of development schemes like guidance for **competitive exams, career, personal & professional counselling, training for deciphering ancient manuscripts, proof reading of Devnagari texts, training of Karmakanda & Vedic recitation with correct intonation, fine arts and theatre** to enhance the capability of students.
- Each campus has a Physical Education department under Assistant Director of Physical Education to organize various sports activities and competitions to prepare the students for **sports events and competitions** like Intercampus **Youth Festival,** Inter-university and national level etc.
- All India **Sanskrit Drama fest** is being organized every year.
- All India S**anskrit Elocution contest** is being conducted every year to promote the academic talent of students at national level.
- **Students' feedback** is obtained through online and offline modes and followed the inputs and observations for the future development.
- The central government prescribed programmes like **Sanskrit Saptaha, Swaccha-Bharat, Vigilance awareness week, Unity Day, IWD, IYD, Hindi Pakhawada and other activities conducted.**
- The CSU sponsors various activities in the **NGOs and other Sanskrit institutions.**
- It promotes students' involvement in excellent manner for their priceless contribution to the **university's dynamic nature**.

***Governance, Leadership and Management :***

- The Vision and Mission of the University have been set in accordance with the mandate as envisioned by the Sanskrit Commission 1956-57. As such, the University is trying its best to implement it and to open new campuses whenever and wherever it becomes possible.
- The President of India is the Visitor of the University.
- The Union Minister for Education is the ex officio Chancellor of the University and acts as University-Government interface.
- It provides Ministry's grant for 22 *Adarsh Mahavidyalayas* and 04 research institutions established under the central scheme across the country. These are independently managed educational institutions, which teach the University syllabi and whose examinations are conducted by the university. The inspection teams from CSU often visit these institutions to oversee the kind of teaching being imparted and also as Observers during the examinations. In addition, there are many affiliated institutions of the university located throughout the country.
- It has a robust Research and Publication Department which brings out high-class publications by eminent scholars and young research scholars in Sanskrit and allied fields. The Department also provides financial assistance to Sanskrit scholars for publication of their works. The Department follows IQAC guidelines in its functioning to create and maintain a high level of excellence in University publications.
- Social values of the University are reflected in the social service activities undertaken by the University, such as, campus cleanliness drives, green campus drives, NSS activities, voter Awareness Campaigns etc.

- It engages with the neighbouring communities by adopting villages, organizing *Nukkad Natakas* for promotion of unity and integration of the Nation and spreading social awareness.
- Establishment of IQAC at the University and campus levels has given a great fillip to the quality enhancement in the University functioning. Online admission process, online enrolment, online exam and testing etc. have become the norm during Corona period and now.
- The University finances are managed primarily through the Finance Department, headed by the Finance Officer. The accounts are routinely audited by internal auditing teams and the external teams from the Accountant General's office at the Headquarters as well as at campuses to ensure transparency and accountability.

***Institutional Values and Best Practices :***

- **Gender equity** is reflected in the harmonious atmosphere which is the perfect ambience for both boys & girls to pursue their studies.
- It organizes all **important events, festivals, days, regional, cultural and social activities** with a lot of fervour.
- CSU conducts **Green, Energy & Environment** audits to maintain ecological balance.
- The University lays a special emphasis on environmental awareness, and as such, is in the process of implementing a Green Campus policy. The ancient Sanskrit Shastras are replete with best environmental practices. It is trying to implement Campus environmental policy as per those norms. Trees, herbs and shrubs which are considered to be of special environmental significance are planted. Gardens featuring plants associated with various Planets as per Astrology have been developed.
- The requisite facilities like **ramp, lifts, wheelchair, tactile paving** for **DIVYANGJAN** are available.
- Implementation of **solar water heating systems, water recharging, rainwater harvesting** and awareness drives for clean and green campus.
- Visiting guests and dignitaries are invited to plant trees in the campus premises. Latest in the series of attempts and promoting **green campus** is to ask each student to plant a tree and protect it during the years of his/her stay in the campus, creating an emotional bond with Nature.
- One of the **Best practices** of the CSU is Multi-Dimensional approach in education for: **(1) In-depth knowledge through Shastric training. (2) Knowledge creation through Research. (3) Employability through Professional Training and Skill Development.**
- Another **Best practice** of CSU is Sanskrit oriented activities organized every year. They are :- **(1) All India Sanskrit Elocution Contest. (2) All India Sanskrit Drama Fest (Natya Mahotsav). (3) Inter Campus Youth Festival.**
- For the holistic development and spreading of Sanskrit study all over India CSU has a **distinguished** forum of **Non- Formal Sanskrit Centre.**
- It is trying to create linkages whereby students and scholars from other universities and science and technology institutions, such as, IITs, IIMs, institutions specializing in Architecture, Ayurveda, etc. may come to this University and vice versa through exchange programmes to broaden the horizons of educational research, and improve the scientific understanding of ancient **Indian Knowledge Systems.**

**Profile**

**BASIC INFORMATION**

| **Name and Address of the University** |
|---|

| | |
|---|---|
| Name | CENTRAL SANSKRIT UNIVERSITY, DELHI |
| Address | CENTRAL SANSKRIT UNIVERSITY, 56-57 INSTITUTIONAL AREA, JANAKPURI |
| City | NEW DELHI |
| State | Delhi |
| Pin | 110058 |
| Website | www.sanskrit.nic.in |

**Contacts for Communication**

| Designation | Name | Telephone with STD Code | Mobile | Fax | Email |
|---|---|---|---|---|---|
| Vice Chancellor | Shrinivasa Varakhedi | 011-28523949 | 9483501353 | 011-28524993 | vc@csu.co.in |
| IQAC / CIQA coordinator | Sudesh Kumar Sharma | 011-28520979 | 9549160005 | 011-28524993 | skjpr15@gmail.com |

**Nature of University**

| | |
|---|---|
| Nature of University | Central University |

**Type of University**

| | |
|---|---|
| Type of University | Unitary |

**Establishment Details**

| | |
|---|---|
| Establishment Date of the University | 15-10-1970 |
| Status Prior to Establishment,If applicable | |

**Recognition Details**

**Date of Recognition as a University by UGC or Any Other National Agency :**

| Under Section | Date | View Document |
|---|---|---|
| 2f of UGC | | |
| | | |

| | | |
|---|---|---|
| 12B of UGC | | |

**University with Potential for Excellence**

| | |
|---|---|
| Is the University Recognised as a 'University with Potential for Excellence (UPE)' by the UGC? | No |

**Location, Area and Activity of Campus**

| Campus Type | Address | Location * | Campus Area in Acres | Built up Area in sq.mts. | Programmes Offered | Date of Establishment | Date of Recognition by UGC/MHRD |
|---|---|---|---|---|---|---|---|
| Main campus | CENTRAL SANSKRIT UNIVERSITY, 56-57 INSTITUTIONAL AREA, JANAKPURI | Urban | 0.4958 | 2006.7 | One | | |
| Off Campus | Shri Sadashiv Campus Chandan Hazuri Road Puri - 752001 | Urban | 15.28 | 11115 | Thirty Eight | 01-04-1971 | 02-04-1971 |
| Off Campus | Shri Ranbir Campus, Kot Bhalwal, Jammu - 181122 | Rural | 10.51 | 9340 | Twenty Four | 01-04-1971 | 02-04-1971 |
| Off Campus | Guruvayoor Campus Puranattukara, Trissur, Kerala - 680551 | Semi-urban | 15.15 | 11975.07 | Fifteen | 16-07-1979 | 17-07-1979 |
| Off Campus | Jaipur Campus, Gopalpura Bypass Triveni Nagar Jaipur - 302018 | Urban | 7.27 | 8179.5 | Twenty Eight | 13-05-1983 | 14-05-1983 |
| Off Campus | Lucknow Campus Vishal Khand-4, Gomati Nagar, Lucknow - 226010 | Urban | 10 | 7964 | Twenty Two | 02-08-1986 | 03-08-1986 |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| Off Campus | Shri Rajiv Gandhi Campus, Menase, Bharati Nagar Post, Sringeri - 577139 | Hill | 10.2 | 9770.28 | Twenty Seven | 13-01-1992 | 14-01-1992 |
| Off Campus | Vedvyas Campus, Balahar, Kangra -177108 | Hill | 6.5 | 9760 | Seventeen | 16-09-1997 | 17-09-1997 |
| Off Campus | Bhopal Campus, Sanskrit Marg, Baghsewaniya, Bhopal - 462043 | Urban | 10 | 16333.16 | Twenty Six | 16-09-2002 | 17-09-2002 |
| Off Campus | K.j. Somaiya Campus, Suruchi Bhavan, Vidyavihar (E) Mumbai - 400077 | Urban | 1 | 8342.53 | Fourteen | 31-03-2002 | 01-04-2002 |
| Off Campus | Ekalavya Campus, Agartala, Village Sipai Para, Po- Lembucherra Dist- West Tripura - 799210 | Rural | 12.47 | 14376.6 | Twenty Five | 04-06-2013 | 05-06-2013 |
| Off Campus | Shri Raghunath Kirti Campus, Devprayag, Pauri Garwal -249301 | Hill | 22.803 | 19112 | Twenty Two | 16-06-2016 | 17-06-2016 |
| Off Campus | Ganganath Jha Campus Chandrda Shekar Azad Park Allahabad-211002 | Urban | 1.97 | 890.31 | One | 01-04-1971 | 02-04-1971 |

**ACADEMIC INFORMATION**

**Affiliated Institutions to the University**

| Type of Colleges | Permanent | Temporary | Total |
|---|---|---|---|

**Furnish the Details of Colleges of University**

| | Number |
|---|---|
| Constituent Colleges | 0 |
| Affiliated Colleges | 0 |
| Colleges Under 2(f) | 0 |
| Colleges Under 2(f) and 12B | 0 |
| NAAC Accredited Colleges | 0 |
| Colleges with Potential for Excellence(UGC) | 0 |
| Autonomous Colleges | 0 |
| Colleges with Postgraduate Departments | 0 |
| Colleges with Research Departments | 0 |
| University Recognized Research Institutes/Centers | 0 |

**Is the University Offering any Programmes Recognised by any Statutory Regulatory Authority (SRA)** : Yes

| SRA program | Document |
|---|---|
| NCTE | 101026_1783_4_1663154026.pdf |
| DEB-UGC | 101026_1783_21_1663143489.pdf |

**Details Of Teaching & Non-Teaching Staff Of University**

**Teaching Faculty**

| | Professor | | | | Associate Professor | | | | Assistant Professor | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | Male | Female | Others | Total | Male | Female | Others | Total | Male | Female | Others | Total |
| Sanctioned | | | | 27 | | | | 37 | | | | 203 |
| Recruited | 23 | 3 | 0 | 26 | 31 | 2 | 0 | 33 | 153 | 35 | 0 | 188 |
| Yet to Recruit | | | | 1 | | | | 4 | | | | 15 |
| On Contract | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 157 | 49 | 0 | 206 |

**Non-Teaching Staff**

| | Male | Female | Others | Total |
|---|---|---|---|---|
| Sanctioned | | | | 292 |
| Recruited | 143 | 39 | 0 | 182 |
| Yet to Recruit | | | | 110 |

| | | | | |
|---|---|---|---|---|
| On Contract | 37 | 19 | 0 | 56 |

| Technical Staff | | | | |
|---|---|---|---|---|
| | Male | Female | Others | Total |
| Sanctioned | | | | 7 |
| Recruited | 1 | 0 | 0 | 1 |
| Yet to Recruit | | | | 6 |
| On Contract | 9 | 4 | 0 | 13 |

**Qualification Details of the Teaching Staff**

| Permanent Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt/LLD/DM/MCH | 9 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 9 |
| Ph.D. | 70 | 12 | 0 | 32 | 4 | 0 | 93 | 27 | 0 | 238 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| UG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

| Temporary Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt/LLD/DM/MCH | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| Ph.D. | 0 | 0 | 0 | 0 | 0 | 0 | 51 | 17 | 0 | 68 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| UG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

| Part Time Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt/LLD/DM/MCH | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| Ph.D. | 0 | 0 | 0 | 0 | 0 | 0 | 77 | 23 | 0 | 100 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 28 | 10 | 0 | 38 |
| UG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

**Distinguished Academicians Appointed As**

| | Male | Female | Others | Total |
|---|---|---|---|---|
| | | | | |

| | | | | |
|---|---|---|---|---|
| Emeritus Professor | 0 | 0 | 0 | 0 |
| Adjunct Professor | 0 | 0 | 0 | 0 |
| Visiting Professor | 1 | 0 | 0 | 1 |

**Chairs Instituted by the University**

| Sl.No | Name of the Department | Name of the Chair | Name of the Sponsor Organisation/Agency |
|---|---|---|---|
| 1 | School of Shastric Knowledge Systems | Bharat Ratna Pt. Madan Mohan Malviya Distinguished University Chair | Central Sanskrit University Delhi |
| 2 | School of Multidisciplinary Sciences and Technology | Bharat Ratna PV Kane Distinguished University Chair | Central Sanskrit University Delhi |

| Provide the Following Details of Students Enrolled in the University During the Current Academic Year | | | | | | |
|---|---|---|---|---|---|---|
| Program | | From the State Where College is Located | From Other States of India | NRI Students | Foreign Students | Total |
| UG | Male | 1584 | 579 | 0 | 0 | 2163 |
| | Female | 1098 | 603 | 0 | 0 | 1701 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| PG | Male | 815 | 140 | 0 | 0 | 955 |
| | Female | 875 | 69 | 0 | 0 | 944 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Doctoral (Ph.D) | Male | 10 | 80 | 0 | 1 | 91 |
| | Female | 4 | 50 | 0 | 0 | 54 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Diploma | Male | 8 | 7 | 0 | 0 | 15 |
| | Female | 25 | 2 | 0 | 0 | 27 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Certificate / Awareness | Male | 29 | 429 | 3 | 4 | 465 |
| | Female | 13 | 322 | 3 | 3 | 341 |
| | Others | 0 | 0 | 0 | 0 | 0 |

| | |
|---|---|
| **Does the University offer any Integrated Programs?** | No |

**Details of UGC Human Resource Development Centre, If applicable**

| | |
|---|---|
| Year of Establishment | Nill |
| Number of UGC Orientation Programs | 0 |
| Number of UGC Refresher Course | 0 |
| Number of University's own Programs | 0 |

| | |
|---|---|
| Total Number of Programs Conducted (last five years) | 0 |

**Accreditation Details**

| Cycle Info | Accreditation | Grade | CGPA | Upload Peer Team Report |
|---|---|---|---|---|
| A | 3.25 | NAAC Cycle 1 Accreditation Report.pdf Remove | | |
| Cycle 1 | Accredation | | | |

| **Provide the Following Students Details** | |
|---|---|
| **Total Number of Students in Distance Learning** | **826** |
| **Total Number of General Students in Institution** | **5950** |

| **Institutional preparedness for NEP** | |
|---|---|
| 1. Multidisciplinary/interdisciplinary: | •Transforms the vision and mission into a holistic multidisciplinary university. •Integrates Indian Knowledge Systems with Indian Languages and Modern Subjects. •Innovative curricula to teach the traditional subjects. •The best practice of multidisciplinary approach leading to qualitative research transforming the institution into multifarious organization. •The syllabi support the idea of multidisciplinary/interdisciplinary study as its students learn traditional subjects like Vyakarana, Nyaya and Jyotisha etc., in addition to modern subjects like English, Hindi, History, Political Science and Computer Science etc., in UG porgrammes. •Wide range of options to study in the evening courses in other subjects like Vastu, Ayurveda Literature, Yoga and Natya Shastra, etc. |
| 2. Academic bank of credits (ABC): | •Academic Bank of Credits is a novel idea of the UGC in which the credits earned by the students during their learning period are maintained in this virtual/digital storehouse. •Helps them in the execution of the process of multiple exits and multiple entries. •Enter into MoUs with reputed institutions to facilitate credit transfer. •Curriculum design based on the innovative and pedagogical approaches for learning materials, assignments and assessment etc. •University implements ABC as prescribed in NEP 2020. |
| 3. Skill development: | •The professional programmes like Siksha Shastra and Siksha Acharya are conducted as per the guidelines of NCTE. •Professional training in |

| | |
|---|---|
| | developing the finer elements of skill of the students. •Psychology Lab, Language Lab, Computer Lab and ICT Lab help the students in areas like internship and practical guidance. •Ten day spoken Sanskrit camps for students enhance proficiency in spoken and written skills of Sanskrit and in Devanagari script as well. •Vag Vardhini, conducted for all classes including pedagogy, helps students to improve their Sanskrit language skills. •Skill in Sanskrit journalism is obtained through a Diploma/Certificate Course conducted by Non Formal Sanskrit Education. •Mukta Swadhyaya Peetham (Institute of Distance Education) conducts various programmes helps Sanskrit lovers learning Sanskrit language skills. |
| 4. Appropriate integration of Indian Knowledge system (teaching in Indian Language, culture, using online course): | •Integrating Indian Knowledge System into the curricula. •Training students through Sanskrit medium in classroom teaching and Devanagari script in examinations. •Teaches Indian languages and Modern subjects like History and Political Science etc. •MOOCs is an important online platform to provide the learning of IKS subjects. •Non Formal Education Scheme provides the facility of learning the traditional subjects of IKS to propagate the rich Indian culture. •Vastu Shastra, Natya Shastra, Yoga and Ayurveda Literature are taught. •Simple Standard Sanskrit is followed in imparting learning in view of NEP 2020. |
| 5. Focus on Outcome based education (OBE): | •The programmes like Shastri, Acharya, Vidya Varadhi, Siksha Shastra, Siksha Acharya are available . •The Diploma courses in Yoga, Ayurveda Literature, Vastu and Natya Shastra are available. •The subjects like Vyakarana, Sahitya, Nyaya, Jyotisha, Mimansa, Puranetihas, Sarva Darshan, Shaiva Darshan, Bauddha Darshan and Jain Darshan are being taught. •The various training camps like Spoken Sanskrit Workshop, Vag Vardhini and all India Sanskrit Elocution Contest provide enough of opportunities to students with result oriented knowledge. |
| 6. Distance education/online education: | •The University has a separate Centre for Distance Education called Mukta Swadhyaya Peetham through which Bridge courses, Prak Shastri, Sahstri and Acharya programmes are taught in Vyakarana, Sahitya and Jyotisha subjects in addition to English, Hindi, History, Political Science and Environmental Science etc. •Non Formal Scheme of Education provides learning of Simple Sanskrit in courses like Diploma in Sanskrit Journalism etc. •Correspondence courses provide online learning to the Sanskrit loving learners. •Provides Self Learning Materials delineating assignments and assessments etc. •Has a large number of regional centres for conducting contact classes and disseminating knowledge. •A |

| | |
|---|---|
| | large number of training centres work under Non Formal Sanskrit Education disseminating knowledge in Sanskrit studies. •MOOCs provides online learning to students in a large variety of subjects/topics. |

**QIF**

**1.Curricular Aspects**
**1.1 Curriculum Design and Development**
***1.1.1 Curricula developed/ rare shastric texts adopted have relevance to the local/ national/ regional/ global developmental needs with learning objectives including programme outcomes, programme specific outcomes and course outcomes of all the programmes offered by the Institution.***

***विकसिता पाठ्यचर्या/ स्वीकृताः दुर्लभाः शास्त्रग्रन्थाः, स्थानीय-राष्ट्रिय-प्रादेशिक-वैश्विक-विकासस्य आवश्यकतया अधिगमोद्देश्यैः कार्यक्रमस्य परिणामैः, निर्दिष्टकार्यक्रमस्य परिणामैः, पाठ्यक्रमस्य परिणामैः, संस्थया प्रस्तुतानां सर्वेषां कार्यक्रमाणां च परिणामैः सह सङ्गतिं भजन्ते।***

**Answer:**

भारतसर्वकारेण संस्थापितस्य **केन्द्रीयसंस्कृतविश्वविद्यालयस्य** मुख्यम् उद्देश्यं वर्तते संस्कृतवाङ्मये निहितस्य भारतीयज्ञानराशेः समाजं प्रति समानयनम् । अतः विश्वविद्यालयद्वारा **स्थानीय-राष्ट्रिय-प्रादेशिक-वैश्विक-विकासस्य** आवश्यकतानुगुणं काले काले पाठ्यक्रमस्य विकासो विहितः विधीयमानश्च वर्तते।

- सर्वैः जिज्ञासुभिः सुलभग्राह्यतया अध्येतुम् आनुकूल्यं विदधानोऽयं विश्वविद्यालयः देशस्य विविधेषु स्थानेषु निजपरिसरान् धत्ते। एवं बहुपरिसरीये अस्मिन् विश्वविद्यालये वेदः, वेदाङ्गानि, योगविज्ञानम्, साहित्यम्, भारतीयभाषाः, समकालिकज्ञानप्रणाली एवं मानविकशास्त्रम्, शास्त्रीयज्ञानप्रणाली, भारतीयदर्शनानि, बहुविषयकविज्ञानम् एवं प्रौद्योगिकी इति नानाशाखाभिः साम्प्रतिकीं सामाजिकसङ्गतिं भजमानाः पाठ्यक्रमाः प्रवर्तन्ते।
- सञ्चालितानां/ सञ्चाल्यमानानां **शास्त्रि-आचार्य-डिप्लोमा-प्रमाणपत्रपाठ्यक्रमाणां** परिणामाः उद्देश्यस्य यशस्वितायै सफलाः सन्ति। तत्र साफल्याय 'पाठ्यक्रमेषु स्तरानुगुणं निर्दिष्टोद्देश्यानुगुणञ्च अङ्गीकृताः दुर्लभाः शास्त्रग्रन्थाः' मुख्यं कारणं भवति ।

- **वेद-वेदाङ्गसङ्कायगते** वेदविभागस्य पाठ्यक्रमे 'ऋग्वेदभाष्यभूमिका' इति स्वीकृतस्य ग्रन्थस्याध्ययनेन वेदस्य पौरुषेयताभ्रमस्य निरासः अपौरुषेयताज्ञानस्य च सप्रमाणं स्थिरीकरणं भवति। निरुक्तं वेदमन्त्राणां शब्दानां निर्वचनं ज्ञापयति । शुक्लयजुर्वेदमाध्यन्दिनसंहितादर्शपूर्णमासयागस्य यथाविधि अनुष्ठानेन रोगान्मुक्तिः भवति इत्यादिः गहनार्थः स्वीकृतेन वेदपाठ्यक्रमेण ज्ञातुं शक्यते। कात्यायनश्रौतसूत्रम्, महीधरभाष्यम्, सायणभाष्यम्, प्रातिशाख्यञ्च अन्यत्र दुर्लभं वेदवाङ्मये निहितं रहस्यम् अधिगन्तुं बहूपकारकमस्ति। विश्वविद्यालयेन प्रवर्त्यमानः पौरोहित्य-कर्मकाण्डपाठ्यक्रमः समाजे विशेषतः भारतीयसेनायां पण्डितपदप्राप्तये, तया राष्ट्रसेवायै च उपकरोति। विश्वविद्यालयस्य जम्मू-लखनऊपरिसरयोः अयं पाठ्यक्रमः प्रवर्तते।
- वेद-वेदाङ्गसङ्कायगते **व्याकरणविभागस्य** पाठ्यक्रमे पाणिनीयव्याकरणं भाषायाः निर्मितिविषये वैज्ञानिकतममस्तीति लोकप्रसिद्धिः। तत्र आधारभूताः शास्त्रग्रन्थाः अष्टाध्यायी, पातञ्जलमहाभाष्यम्, वाक्यपदीयञ्च भवति। **समग्रायाः संस्कृतभाषायाः लक्षाधिकशब्दानां साधुत्वम् असाधुत्वञ्च बोधयति दुर्लभः ग्रन्थः सिद्धान्तकौमुदी** । काशिका, लघुशब्देन्दुशेखरः, परिभाषेन्दुशेखरश्च ग्रन्थाः प्राचीन-नवीनसंस्कृतभाषाशास्त्रीयान् प्रमेयान् तुलनात्मकतया ज्ञातुं नूनमुपयोगिनः वर्तन्ते। आधुनिकभाषाशास्त्रीयं प्रमेयजातं शाब्दबोधादिप्रणाल्या सह ज्ञातुं विश्वविद्यालयेन स्वीकृतः व्याकरणशास्त्रीयपाठ्यक्रमः महत्त्वपूर्णो वर्तते।
- वेद-वेदाङ्गसङ्कायगते **ज्यौतिषविभागस्य** पाठ्यक्रमे होरा, संहिता, गणितञ्चेति त्रिस्कन्धात्मकस्य ज्यौतिषशास्त्रस्य मनुष्यस्य जीवनेन अपरिहार्यः सम्बन्धः अस्ति। तत्र ग्रहाणां स्थितिः, प्रभावः, खगोलस्वरूपम् इत्यादयः कुतूहलजनकाः विषयाः पाठ्यक्रमे स्वीकृतेषु बृहत्संहितादिग्रन्थेषु प्रतिपादिताः सन्ति। आधुनिकखगोलविज्ञानेन सह

प्राचीनभारतीयज्योतिर्विज्ञानस्य विषयान् परिशीलयितुं पाठ्यग्रन्थाः इमे विशिष्टाः सन्ति। **गुरुवायूरु-शृङ्गेरी-मुम्बई-भोपाल-लखनऊ-पुरी-जयपुर-गरली-देवप्रयागस्थितेषु विश्वविद्यालयस्य परिसरेषु** असौ पाठ्यक्रमः सञ्चाल्यते।

- वास्तु-ज्यौतिषडिप्लोमापाठ्यक्रमे भारतीयस्य वास्तुविज्ञानस्य अद्यत्वे समाजे महती अपेक्षा वर्तते। वास्तुकार-अभियान्त्रिकीं भारतीयां वास्तुपद्धतिं च समाश्रित्य भवनं निर्मातुम् इच्छन्ति जनाः । समाजे तामिमां जनानाम् इच्छां पूरयितुम् असौ पाठ्यक्रमः सङ्गतो वर्तते।
- भाषासाहित्यसंस्कृतिसङ्कायगते साहित्यविभागस्य पाठ्यक्रमे समाजस्य दर्पणः साहित्यम्। प्राचीनभारतीया जीवनपद्धतिः, आहारक्रिया, दिनचर्या, प्रशासनम् धर्मानुष्ठानम् इत्यादयः विषयाः सूक्तिभिः सुचरितैश्च काव्येषु प्रतिपादिताः। एते खलु साम्प्रतिकेऽपि काले व्यक्तेः, समाजस्य, राष्ट्रस्य, विश्वस्य च अभ्युन्नतये पथप्रदर्शकाः भवन्ति। प्रशान्तजीवनाय वेदशास्त्रादिषु उपदिष्टानां मार्गाणां प्रायोगिकं प्रमाणं भवति कादम्बरी काव्यम्, मेघदूतं खण्डकाव्यम्, रघुवंश-शिशुपालवध-नैषधादिमहाकाव्यम्, अभिज्ञानशाकुन्तलं रूपकञ्च। **काव्यस्वरूप/ रचनापद्धतिबोधकाः ध्वन्यालोकः, काव्यप्रकाशः, साहित्यदर्पणः, रसगङ्गाधरः इत्येते पाठ्यक्रमे स्वीकृता ग्रन्थाः संस्कृतसाहित्येन सह भारतीयभाषाणामपि साहित्यस्य उपकारकाः सन्ति ।**
- नाट्यशास्त्रम् भारतीयनृत्यसङ्गीतादिकलायाः आधारग्रन्थः वर्तते। भारतीयरङ्गमञ्चस्य प्रकाशकश्च असौ ग्रन्थः सिद्धान्तं बोधयितुं पाठ्यक्रमे स्वीकृतः। प्रयोगप्रस्तुतिपाठ्यक्रमोऽपि भोपालपरिसरे नाट्यानुसन्धानकेन्द्रद्वारा सञ्चाल्यते। समाजेन आप्तसम्बद्धानां संस्कृतरूपकाणां प्रयोगपाठ्यक्रमेण भारतीयरङ्गमञ्चस्य नष्टप्रायस्य पुनरुत्थाने नाट्यशास्त्रस्य भूमिका विशिष्टा वर्तते।
- दर्शनसङ्कायगते न्यायविभागस्य पाठ्यक्रमे विश्वविद्यालयद्वारा प्राचीननवीनपाठ्यक्रमः सञ्चाल्यते। 'मानाधीना मेयसिद्धिः'। प्रमाणपूर्वकं सिद्धस्य प्रमेयस्य/ पदार्थस्य प्रामाण्यं खलु स्वीक्रियते। तदर्थं वस्तुनः निर्दुष्टतया स्वरूपकथनविधिः न्यायशास्त्रीयः विलक्षणो वर्तते। **न्यायकुसुमाञ्जलिः, हेत्वाभाससामान्यनिरुक्तिः, न्यायमञ्जरी, गादाधरी इत्यादिग्रन्थेषु प्रतिपादिताः दुर्लभाः विषयाः इतरशास्त्राणां/पाठ्यक्रमाणां प्रमेयज्ञानार्थमत्यन्तम् अपेक्षिताः।**
- दर्शनसङ्कायगते बौद्धदर्शनविभागस्य पाठ्यक्रमे भारतीयदर्शनेषु अस्ति विशिष्टं स्थानं बौद्धदर्शनस्य। अभिधर्मकोशः, विज्ञप्तिमात्रतासिद्धिः, माध्यमिककारिका, बौद्धतर्कभाषा, बोधिचर्यावतारः इतीमे दुर्लभाः शास्त्रग्रन्थाः बौद्धदर्शनं प्रकाशयन्ति।
- दर्शनसङ्कायगते जैनदर्शनविभागस्य पाठ्यक्रमे एतद्दर्शनस्य मूलग्रन्थानां गम्भीरम् अध्ययनम् विश्विद्यालयेन प्रवर्त्यते। प्रमेयकमलमार्तण्डः, जैनतर्कभाषा, पञ्चास्तिकायसङ्ग्रहः, समयसारः, स्याद्वादमञ्जरी च ग्रन्थाः पाठ्यक्रमे सन्ति।

- दर्शनसङ्कायगते सांख्ययोगदर्शनविभागस्य पाठ्यक्रमे इतरदर्शनेषु विशिष्टं ज्ञानं प्राप्तुमुपकारकः।
- दर्शनसङ्कायगते मीमांसादर्शनविभागस्य पाठ्यक्रमे श्रौतकर्मणां यागादीनां निरूपणम्, कर्मानुष्ठानबोधकानां वेदवाक्यानाम् अर्थनिरूपणञ्च जिज्ञासून् बोधयितुं पाठ्यक्रमेऽस्मिन् भाट्टदीपिका, शाबरभाष्यम्, श्लोकवार्त्तिकम्, तन्त्रवार्त्तिकम्, भाट्टरहस्यम्, मीमांसाकौस्तुभः इत्येते शास्त्रीयग्रन्थाः स्वीकृताः सन्ति।
- दर्शनसङ्कायगते वेदान्तदर्शनविभागस्य पाठ्यक्रमे इहलोके सुखं भुक्त्वा अन्ते मोक्षमवाप्नुयाम् इति भारतीयस्य मनीषा।
- शास्त्रसङ्कायस्य धर्मशास्त्रविभागस्य पाठ्यक्रमे व्यवहारमयूखः, दायभागः, कौटिलीयम् अर्थशास्त्रम्, दत्तकमीमांसा, कालमाधवश्च ग्रन्थाः सन्ति।
- समग्रे भारते माध्यमिक-उच्चमाध्यमिकस्तरेषु संस्कृतशिक्षकाणाम् अपेक्षा वर्तते । शिक्षाशास्त्रपाठ्यक्रमे संस्कृतं सम्पूर्णदेशे पाठयितुं प्रसारयितुं च अध्यापकाः अध्यापनकौशलं प्राप्नुवन्ति।

- योग-आयुर्वेदसाहित्यडिप्लोमा स्वास्थ्यविषयकः पाठ्यक्रमः समाजस्य बहूपकारी एव वर्तते। साम्प्रतम् अस्य योगायुर्वेदसाहित्यस्य प्रायोगिकपक्षस्य स्थानीय-राष्ट्रिय-क्षेत्रीयस्तरेषु प्रासङ्गिकता वर्तते। सम्पूर्णविश्वे योगस्य प्रायोगिकपक्षस्य महत्त्वमुपलक्ष्य अनुसन्धानानि प्रवर्तन्ते । विश्वविद्यालयद्वारा डिप्लोमापाठ्यक्रमः चाल्यमानोऽस्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload Additional information | View Document |
| Link for Additional Information | View Document |

***1.1.2 Percentage of programmes where syllabus revision was carried out during the last five years***

***विगतेषु पञ्चसु वर्षेषु विहितस्य पाठ्यविवरणपुनरीक्षणस्य प्रतिशतं मानम्।***

**Answer:** 73.21

1.1.2.1 How many Programmes were revised out of total number of Programmes offered during the last five years

विगतेषु पञ्चसु वर्षेषु प्रस्तुतेषु सम्पूर्णसङ्ख्याकेषु कार्यक्रमेषु कति कार्यक्रमाः पुनरीक्षिताः?

Answer: 41

| File Description | Document |
|---|---|
| Minutes of relevant Academic Council/BOS meeting | View Document |
| Institutional data as per Data Template | View Document |
| Details of Programme syllabus revision in last 5 years | View Document |
| Any additional information | View Document |

***1.1.3 Percentage of courses having focus on indepth-shastric learning/ creative writing/ entrepreneurship/ skill development/ Interdisciplinary/ 64 Kalas/ Indigenous Knowledge base with modern application during the last five years***

***विगतानां पञ्चानां वर्षाणाम् आमूलशास्त्राध्ययनं/ सर्जनात्मकलेखनं/ उद्योगप्राप्ति-सामर्थ्यम्/ कौशलविकासम्/ अन्तश्शास्त्रीयमध्ययनं/ 64 कलाः/ आधुनिकानुप्रयोगयुतां भारतीयज्ञानपरम्परां च लक्ष्यीकृत्य प्रवर्तितानां पाठ्यक्रमाणां प्रतिशतं मानम्।***

**Answer:** 100

1.1.3.1 Number of courses having focus on  entrepreneurship/ skill development/ Interdisciplinary/ 64 Kalas/ Indigenous Knowledge base with modern application during the last five years

विगतेषु पञ्चसु वर्षेषु उद्योगप्राप्ति-सामर्थ्यं/ कौशलविकासं/ अन्तश्शास्त्रीयमध्ययनं/ 64 कलाः/ आधुनिकानुप्रयोगयुतां भारतीयज्ञानपरम्परां च लक्ष्यीकृत्य प्रवर्तितानां पाठ्यक्रमाणां सङ्ख्या -

Answer: 870

| File Description | Document |
|---|---|
| Programme/ Curriculum/ Syllabus of the courses | View Document |
| MoU's with relevant organizations for these courses, if any | View Document |
| Minutes of the Boards of Studies/ Academic Council meetings with approvals for these courses | View Document |
| Any additional information | View Document |

***1.1.4 All Syllabi related to Sanskrit/Shastra subjects are available through Sanskrit medium.***

***सर्वाणि संस्कृतसम्बद्धानि शास्त्रसम्बद्धानि च पाठ्यविवरणानि संस्कृतमाध्यमेन उपलभ्यन्ते।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य उद्देश्यम् संस्कृतभाषायाः प्रसारः, संस्कृतवाङ्मये निहितस्य ज्ञानराशेः प्राप्त्यर्थं सर्वेभ्यः अवसरप्रदानम्, सौकर्यप्रकल्पनञ्च। संस्कृते निहिता विषयाः **संस्कृतमाध्यमेन पाठ्यमानाः निर्दिष्टम् उद्देश्यं सफलयिष्यन्ति इत्यतः सर्वे पाठ्यक्रमाः संस्कृतेन संस्कृतसम्बद्धतया च प्रचाल्यन्ते**। प्रचाल्यमानेषु पाठ्यक्रमेषु संस्कृतसम्बद्धाः शास्त्रसम्बद्धाश्च पाठ्यांशाः शतं प्रतिशतं संस्कृतमाध्यमेन उपलभ्यन्ते। तेषां पाठ्यांशानां विवरणम् एवं वर्तते-

**शास्त्रिपाठ्यक्रमः** - एषः विश्वविद्यालयस्य स्नातकपाठ्यक्रमः। षट्सु सत्रार्धेषु विभक्तः शास्त्रिपाठ्यक्रमः १.नव्यव्याकरणम् २.प्राचीनव्याकरणम् ३.साहित्यम् ४.सिद्धान्तज्यौतिषम् ५.फलितज्यौतिषम् ६.सर्वदर्शनम् ७.धर्मशास्त्रम् ८.पुराणेतिहासः ९.वेदः १०.पौरोहित्यम् ११.जैनदर्शनम् १२.बौद्धदर्शनम् १३. सांख्ययोगः १४. नव्यन्यायः १५. प्राचीनन्यायवैशेषिकम् १६.मीमांसा १७.अद्वैतवेदान्तः १८. काश्मीरशैवदर्शनम् इत्येतेषु अष्टादशविषयेषु सञ्चाल्यते। प्रथमद्वितीयतृतीयचतुर्थसत्रार्धेषु प्रतिसत्रार्धं सप्तपत्राणि पञ्चमे षष्ठे च सत्रार्धे अष्टौ पत्राणि भवन्ति। एवं शास्त्रिपाठ्यक्रमे चतुश्चत्वारिंशत् पत्राणि भवन्ति। सर्वाणि शतस्य अङ्कानां कृते वर्तन्ते।

तेषु प्रतिसत्रार्धम् उपरिनिर्दिष्टेषु शास्त्रीयविषयेषु अन्यतमविषयस्य द्वे पत्रे (वैकल्पिकशास्त्रविषयके) भवतः। एवञ्च द्वादशपत्राणि वैकल्पिकशास्त्रविषयकाणि भवन्ति। प्रथमे द्वितीये च सत्रार्धे व्याकरणविषयकम् अनिवार्यपत्रम् एकैकम्, तृतीये चतुर्थे च सत्रार्धे साहित्यविषयकम् अनिवार्यपत्रम् एकैकम्, पञ्चमे षष्ठे च सत्रार्धे दर्शनविषयकम् अनिवार्यपत्रम् एकैकम् चेति षट् संस्कृतसम्बद्धानि पत्राणि भवन्ति। इत्येवं शास्त्रिपाठ्यक्रमे **अष्टादशपत्राणि(१८)** संस्कृत/ शास्त्रसम्बद्धानि वर्तन्ते येषां पाठ्यांशाः पूर्णप्रमाणेन संस्कृतभाषायां भवन्ति।

**शास्त्रिप्रतिष्ठापाठ्यक्रमः -** विश्वविद्यालयेन सञ्चाल्यमानः शास्त्रिप्रतिष्ठापाठ्यक्रमः १.नव्यव्याकरणम् २.साहित्यम् ३.सिद्धान्तज्यौतिषम् ४. अद्वैतवेदान्तः ५.फलितज्यौतिषम् ६.सर्वदर्शनम् ७.धर्मशास्त्रम् ८.वेदः ९.सांख्ययोगः १०.मीमांसा ११. नव्यन्याय इत्येतेषु एकादशविषयेषु सञ्चाल्यते। अस्मिन् पाठ्यक्रमे ४८ पत्राणि भवन्ति। तेषु ४४ पत्राणि शास्त्रिपाठ्यक्रमे निर्दिष्टानि एव। तेषु अष्टादश पत्राणि संस्कृतसम्बद्धानि शास्त्रसम्बद्धानि च । षष्चमे षष्ठे च सत्रार्धे शास्त्रीयपत्रम् (वैकल्पिकम्)एकम्, प्रगतसंस्कृतपत्रम् (अनिवार्यम्) एकम् इति अतिरिक्ततया द्वे द्वे पत्रे भवतः। विश्वविद्यालयेन स्वीकृतेषु सप्तदशविषयेषु अपि शास्त्रिप्रतिष्ठापाठ्यक्रमः प्रवर्तते । एवञ्च शास्त्रिप्रतिष्ठापाठ्यक्रमे१८+०४= २२ पत्राणि संस्कृतमाध्यमेन उपलभ्यमानानि सन्ति।

**आचार्यपाठ्यक्रमः -** एषः केन्द्रीयसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरपाठ्यक्रमो वर्तते। अस्मिन् पाठ्यक्रमे सप्तदश शास्त्रीयाः विषयाः सन्ति। ते च १. नव्यव्याकरणम् २. प्राचीनव्याकरणम् ३.साहित्यम् ४.सिद्धान्तज्यौतिषम् ५.फलितज्यौतिषम् ६.सर्वदर्शनम् ७.धर्मशास्त्रम् ८.जैनदर्शनम् ९.बौद्धदर्शनम् १०.सांख्ययोगः ११.नव्यन्यायः १२.प्राचीनन्यायवैशेषिकम् १३.मीमांसा १४.अद्वैतवेदान्तः १५.पुराणेतिहासः १६. वेदः १७.पौरोहित्यम् १८. काश्मीरशैवदर्शनम्।

आचार्यपाठ्यक्रमः चतुर्षु सत्रार्धेषु विभक्तः। प्रतिसत्रार्धं पञ्चपत्राणि सन्ति। पाठ्यक्रमे विंशतिः पत्राणि भवन्ति। प्रतिसत्रार्धं पञ्चमं पत्रम् ऐच्छिकम्। अन्यानि अनिवार्यपत्राणि। विश्वविद्यालयेन अङ्गीकृतेषु उपरिनिर्दिष्टेषु सप्तदशविषयेषु सर्वाणि पत्राणि शास्त्रीयाणि। तेषां **पाठ्यांशाः पूर्णप्रमाणेन (१००%) संस्कृते उपलभ्यन्ते।**

**शिक्षाशास्त्रिपाठ्यक्रमः -** विश्वविद्यालयद्वारा द्विवर्षीयः शिक्षाशास्त्रिपाठ्यक्रमः प्रचाल्यते। अस्मिन् पाठ्यक्रमे प्रथमवर्षे सप्त सैद्धान्तिकपत्राणि सन्ति। द्वितीयवर्षे च पञ्च सन्ति। वर्षद्वयेन ८०० अङ्कानां प्रायोगिकशिक्षणविषयाः सन्ति। सैद्धान्तिकपत्राणां प्रायोगिकविषयाणां च पाठ्यांशाः पूर्णरूपेण संस्कृतमाध्यमेन उपलभ्यमानाः सन्ति।

**शिक्षाचार्यपाठ्यक्रमः -** विश्वविद्यालयद्वारा सञ्चाल्यमानः शिक्षाचार्यपाठ्यक्रमः चतुर्षु सत्रार्धेषु विभक्तः। अस्मिन् पाठ्यक्रमे प्रथम-द्वितीयसत्रार्धयोः प्रत्येकसत्रार्धे पञ्च सैद्धान्तिकपत्राणि सन्ति। तृतीय-चतुर्थसत्रार्धयोः प्रत्येकसत्रार्धे त्रीणि पत्राणि सन्ति।

चतुर्षु सत्रार्धेषु २२०  अङ्कानां प्रायोगिकशिक्षणविषयाः सन्ति। सैद्धान्तिकपत्राणां प्रायोगिकविषयाणां च पाठ्यांशाः पूर्णरूपेण संस्कृतमाध्यमेन उपलभ्यमानाः सन्ति।

**संस्कृतमाध्यमेन उपलभ्यमानानां पाठ्यांशनां पत्रसंख्याकोष्ठकम्**

| क्र.सं | पाठ्यक्रमः | पत्राणां संख्या |
|---|---|---|
| १ | शास्त्रिपाठ्यक्रमः (अष्टादशविषयेषु) | ३४८ |
| २ | शास्त्रिप्रतिष्ठापाठ्यक्रमः (एकादशविषयेषु) | ३७२ |
| ३ | आचार्यपाठ्यक्रमः (अष्टादशविषयेषु) | ३८२ |
| ४ | शिक्षाशास्त्रिपाठ्यक्रमः | २८ |
| ५ | शिक्षाचार्यपाठ्यक्रमः | २२ |

**केन्द्रीयसंस्कृतविश्वविद्यालयस्य विविधपरिसरेषु सञ्चाल्यमानानां पाठ्यक्रमाणां विवरणम्**

**1.जम्मूकश्मीरस्य श्रीरणबीरपरिसरे**

१.शास्त्रिपाठ्यक्रमः     (वेद-व्याकरण-ज्यौतिष-साहित्य-सर्वदर्शनविषयेषु)

२.आचार्यपाठ्यक्रमः     (वेद-व्याकरण-ज्यौतिष-साहित्य-सर्वदर्शनविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमः

४. शिक्षाचार्यपाठ्यक्रमश्च प्रवर्तते।

**2. राजस्थानस्य जयपुरपरिसरे**

१.शास्त्रिपाठ्यक्रमः(वेद-व्याकरण-धर्मशास्त्र-जैनदर्शन-सर्वदर्शन-ज्यौतिष-साहित्यविषयेषु)

२.आचार्यपाठ्यक्रमः(वेद-व्याकरण-धर्मशास्त्र-जैनदर्शन-सर्वदर्शन-ज्यौतिष-साहित्यविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमः

४. शिक्षाचार्यपाठ्यक्रमश्च प्रवर्तते।

3.त्रिपुराराज्यस्य एकलव्यपरिसरे

१.शास्त्रिपाठ्यक्रमः (अद्वैतवेदान्त-धर्मशास्त्र-व्याकरण-ज्यौतिष-साहित्य-बौद्धदर्शनविषयेषु)

२. आचार्यपाठ्यक्रमः(अद्वैतवेदान्त-धर्मशास्त्र-व्याकरण-ज्यौतिष-साहित्य-बौद्धदर्शनविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

4.हिमाचलप्रदेशस्य श्रीवेदव्यासपरिसरे

१.शास्त्रिपाठ्यक्रमः (अद्वैतवेदान्त-व्याकरण-ज्यौतिष-साहित्यविषयेषु)

२.आचार्यपाठ्यक्रमः(अद्वैतवेदान्त-व्याकरण-ज्यौतिष-साहित्यविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

**5. ओडिशाराज्यस्य श्रीसदाशिवपरिसरे**

१.शास्त्रिपाठ्यक्रमः(अद्वैतवेदान्त-धर्मशास्त्र-न्याय-व्याकरण-ज्यौतिष-साहित्य-सांख्ययोग-पुराणेतिहास-सर्वदर्शनविषयेषु)

२.आचार्यपाठ्यक्रमः (अद्वैतवेदान्त-धर्मशास्त्र-न्याय-व्याकरण-ज्यौतिष-साहित्य-सांख्ययोग-पुराणेतिहास-सर्वदर्शनविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

**6.उत्तरप्रदेशस्य लखनऊ परिसरे**

१.शास्त्रिपाठ्यक्रमः(वेद-व्याकरण-ज्यौतिष-साहित्य-बौद्धदर्शनविषयेषु)

२.आचार्यपाठ्यक्रमः(वेद-व्याकरण-ज्यौतिष-साहित्य-बौद्धदर्शनविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

**7.उत्तराखण्डस्य श्रीरघुनाथकीर्तिपरिसरे**

१.शास्त्रिपाठ्यक्रमः (वेद-व्याकरण-ज्यौतिष-साहित्य-न्यायविषयेषु)

२. आचार्यपाठ्यक्रमः(वेद-व्याकरण-ज्यौतिष-साहित्य-न्यायविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

**8.केरलस्य गुरुवायूरुपरिसरे**

१.शास्त्रिपाठ्यक्रमः(अद्वैतवेदान्त-व्याकरण-ज्यौतिष-न्याय-साहित्यविषयेषु)

२.आचार्यपाठ्यक्रमः(अद्वैतवेदान्त-व्याकरण-ज्यौतिष-न्याय-साहित्यविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

**9. कर्नाटकस्य राजीवगान्धीपरिसरे**

१.शास्त्रिपाठ्यक्रमः (मीमांसा-अद्वैतवेदान्त-व्याकरण-न्याय-ज्यौतिष-साहित्यविषयेषु)

२.आचार्यपाठ्यक्रमः(मीमांसा-अद्वैतवेदान्त-व्याकरण-न्याय-ज्यौतिष-साहित्यविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

**10. मध्यप्रदेशस्य भोपाल् परिसरे**

१.शास्त्रिपाठ्यक्रमः(व्याकरण-जैनदर्शन-ज्यौतिष-साहित्यविषयेषु)

२. आचार्यपाठ्यक्रमः(व्याकरण-जैनदर्शन-ज्यौतिष-साहित्यविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमः

४. शिक्षाचार्यपाठ्यक्रमश्च प्रवर्तते।

**11. महाराष्ट्रस्य के. जे. सोमैयापरिसरे**

१.शास्त्रिपाठ्यक्रमः (व्याकरण-ज्यौतिष-साहित्यविषयेषु)

२.आचार्यपाठ्यक्रमः(व्याकरण-ज्यौतिष-साहित्यविषयेषु)

३.शिक्षाशास्त्रिपाठ्यक्रमश्च प्रवर्तते।

विश्वविद्यालयद्वारा संस्कृत/शास्त्रसम्बद्धाः अन्येऽपि केचन अंशाः अत्र निर्दिश्यन्ते। विद्यावारिधि-उपाध्यर्थं शोधविद्यार्थिभिः रच्यमानः शोधप्रबन्धः संस्कृतभाषायां भवति। शिक्षाचार्यपाठ्यक्रमे छात्राः लघुशोधप्रबन्धं संस्कृतभाषया प्रस्तुवन्ति। छात्राणं संस्कृत/शास्त्रभाषणस्य कौशलवर्धनाय सञ्चाल्यमाना 'वाग्वर्धिनीपरिषद्' नाम्नी साप्ताहिकी सभा पूर्णतया संस्कृतभाषायां प्रवर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Provide UG and PG Syllabus prepared in Sanskrit | View Document |
| Provide link of the Institution website | View Document |

***1.1.5 Electronic media and other digital components in the curriculum offered by DDE- Percentage of the Courses on offer by DDE that have incorporated electronic/digital media and other digital components in their curriculum delivery during the last five years***

***दूरस्थशिक्षानिदेशालयेन प्रस्तुतपाठ्यचर्यायाम् इलेक्ट्रॉनिक-माध्यमः अन्यानि डिजिटल-घटकानि च - विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालयेन प्रस्तुतपाठ्यक्रमेषु सन्निविष्टानाम् इलेक्ट्रॉनिक-माध्यमानाम् अन्येषां डिजिटल-घटकानां च प्रतिशतं मानम्।***

**Answer:** 100

1.1.5.1 Total number of the Courses on offer by DDE have incorporated electronic/ digital media and other digital components in their curriculum delivery year wise during the last five years

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालयेन प्रस्तुतपाठ्यचर्यायाः पाठ्यक्रमेषु सन्निविष्टानाम् इलेक्ट्रॉनिक-माध्यमानाम् अन्येषां डिजिटल-घटकानां च वार्षिकी सम्पूर्णा सङ्ख्या।

Answer: 102
1.1.5.2 Total number of courses across all programmes offered by the DDE during the last five years

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालयेन प्रस्तुतकार्यक्रमेषु सन्निविष्टानां पाठ्यक्रमाणां सम्पूर्णा सङ्ख्या।

Answer: 102

| File Description | Document |
|---|---|
| Details of Programmes incorporating electronic media and other digital components offered year wise over the last five years | View Document |
| Data Template | View Document |
| Any other relevant information | View Document |

***1.1.6 Percentage of programmes wherein Simple Standard Sanskrit is adopted as medium of text/reference book during the last five years.***

***विगतेषु पञ्चसु वर्षेषु प्रवर्तितानां कार्यक्रमाणां प्रतिशतं मानं यत्र सरलमानकसंस्कृतं पाठ्य/सन्दर्भग्रन्थानां माध्यमरूपेण समाश्रितम्।***

**Answer:** 14.29

1.1.6.1 Number of programmes wherein Simple Standard Sanskrit is adopted as medium of text/reference book during the last five years:

विगतेषु पञ्चसु वर्षेषु प्रवर्तितानां कार्यक्रमाणां सङ्ख्या यत्र सरलमानकसंस्कृतं पाठ्य/सन्दर्भग्रन्थानां माध्यमरूपेण समाश्रितम् –

Answer: 8

| File Description | Document |
|---|---|
| As per Date Template | View Document |
| Any additional information | View Document |

***1.1.7 Percentage of courses wherein Simple Standard Sanskrit is adopted as medium of text/reference book during the last five years.***

***विगतेषु पञ्चसु वर्षेषु प्रवर्तितानां पाठ्यक्रमाणां प्रतिशतं मानं यत्र सरलमानकसंस्कृतं पाठ्य/सन्दर्भग्रन्थानां माध्यमरूपेण समाश्रितम्।***

**Answer:** 31.49

1.1.7.1 Number of courses wherein Simple Standard Sanskrit is adopted as medium of text/reference book during the last five years:

विगतेषु पञ्चसु वर्षेषु प्रवर्तितानां पाठ्यक्रमाणां सङ्ख्या यत्र सरलमानकसंस्कृतं पाठ्य/सन्दर्भग्रन्थानां माध्यमरूपेण समाश्रितम् –

Answer: 274

| File Description | Document |
|---|---|
| List of courses. | View Document |
| As per Data Template | View Document |
| Any additional information | View Document |

***1.1.8 Courses developed and taught leading to blending of Sanskrit Knowledge Tradition with Modern Knowledge System having Simple Standard Sanskrit text/Reference books.***

***आधुनिकज्ञानप्रणाल्या सह संस्कृतज्ञानपरम्परायाः समायोजनं दधानाः सरलमानकसंस्कृतेन पाठ्य/सन्दर्भग्रन्थसहिताः विकासिताः पाठिताश्च पाठ्यक्रमाः।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः **भारतीयज्ञानपरम्परायाः सम्पोषणाय विविधानि कार्यतन्त्राणि आलम्बते।** संस्कृतस्य प्रसारः, शास्त्रेषु प्रतिपादितानां मूल्यानां समाजे उपयुक्ततानयनम्, काव्यादीनां सर्वजनीनता च तेषां कार्यतन्त्राणां मुख्यं लक्ष्यं भवति। एतदुद्देश्येन विविधानां पाठ्यक्रमाणां रचना, सञ्चालनम्, पाठ्यग्रन्थनिर्माणम्, पाठ्यग्रन्थनिर्माणे प्रोत्साहनम् इत्यादीनि विविधानि कार्याणि निर्वहति। पाठ्यक्रमाणां रचनावसरे भाषायाः विषये अवधानं दीयते। सर्वेषु पाठ्यक्रमेषु संस्कृतभाषया संरचितेष्वपि अध्येतुः सुवेद्यता तत्र मुख्यां भूमिकाम् आवहति। भाषा सरला चेत् पाठ्यांशस्य अवगमने सारल्यं भवति। यद्यपि ग्रन्थानां रचनाशैली शास्त्रे शास्त्रे भिद्यते। अर्थात् प्रतिशास्त्रं प्रतिपाद्यविषयाणां विशिष्टा काचित् शैली वर्तते। विविधशास्त्रेषु पाठ्यक्रमाणां निर्माणावसरे सर्वसाधारणतया काचिदेका शैली अवलम्बितुं न शक्यते। तथापि **प्राचीनशैल्यविरोधेन भाषायां विद्यमान एव सः सारल्यपक्षः समाश्रयणीयः। सारल्यं च संस्कृतभाषायाः स्वभाव एव। तच्च सारल्यं व्याकरणशास्त्रस्य नियमेन सिद्धम् । सैव भाषायाः मानकता। एवं सारल्येन व्याकरणनियमेन च युक्तं भवति सरलमानकसंस्कृतम्। भारतीयज्ञानशाखानां सुबोधे सम्प्रति सरलमानकसंस्कृतेन विरच्यमानः पाठ्यक्रमः जनानुरागी वर्तते।**

सरलमानकसंस्कृतस्य क्रियान्वयाय विश्वविद्यालयद्वारा २०.०१.२०१६ तमे दिनाङ्के काचित् समितिः घटिता अभूत्। सा समितिः सामान्यसम्पर्कः, शिक्षणम्, वार्त्ता, मनोरञ्जनम्, जालपुटकम्, प्रशासनम्, पत्रकारिता इत्येतेषु विषयेषु सरलमानकसंस्कृतस्य अन्वयनाय मार्गदर्शनं करोति।

पाठ्यग्रन्थानां निर्माणविषये समितिद्वारा एषः प्रस्तावः कृतो वर्तते। 'संस्कृतग्रन्थानां पाठनं संस्कृतेन करणीयं चेत्तदर्थं सरलसंस्कृतेन तेषां व्याख्यानात्मकानां पुस्तकानां निर्माणं करणीयम् । न्याय-व्याकरण-मीमांसादिग्रन्थाः विषयदृष्ट्या यथा गम्भीराः तथा तत्तद्ग्रन्थप्रयुक्तायाः प्रौढसंस्कृतभाषायाः कारणेनापि दुरूहाः सन्ति इत्यतः तत्र प्रवेष्टुकामानां कृते तेषां पाठ्यग्रन्थानां पुनः सरलसंस्कृतभाषया लेखनं प्रकाशनं च अपेक्ष्यते । संस्कृतभाषानिबद्धानां वाल्मीकि-व्यास-भास-कालिदासादीनां काव्यरचनानां सम्प्रेषणक्रमः सरलया संस्कृतभाषया लिखितपुस्तकैः पुनरपि प्रसरेत् । एतदतिरिच्य भूगोलेतिहासगणितविज्ञानादीनाम् आधुनिकानां पाठ्यविषयाणां पुस्तकानि अपि सरलसंस्कृतेन निर्मातव्यानि सन्ति, येन संस्कृतभाषायाः सर्वव्यापकत्वं, सर्वविषयाणाम् अवबोधनाय योग्यता सामर्थ्यवत्वं च सिद्धं भवेत्' इति ।

विश्वविद्यालयस्य विविधेषु पाठ्यक्रमेषु सरलमानकसंस्कृतस्य अन्वयः कृतो वर्तते। नियतरूपेण प्राक्शास्त्रिपाठ्यक्रमः, शास्त्रिपाठ्यक्रमः, आचार्यपाठ्यक्रमः शिक्षाशास्त्रिपाठ्यक्रमः, शिक्षाचार्यपाठ्यक्रमः, पदविकापाठ्यक्रमः प्रमाणपत्रीयपाठ्यक्रमः च सञ्चाल्यते। मुक्तस्वाध्यायपीठद्वारा केचन पाठ्यक्रमाः सञ्चाल्यन्ते। ते च

- **संस्कृतावतरणी- प्राक्शास्त्रिसेतुपाठ्यक्रमः**
- **प्राक्शास्त्रिपाठ्यक्रमः (साहित्ये व्याकरणे, ज्योतिषे च)**
- **संस्कृतावगाहनी- शास्त्रिसेतुपाठ्यक्रमः(साहित्ये, व्याकरणे, ज्योतिषे च)**
- **शास्त्रिपाठ्यक्रमः (साहित्ये व्याकरणे, ज्योतिषे च)**
- **शास्त्रावगाहनी-आचार्यसेतुपाठ्यक्रमः(साहित्ये, व्याकरणे, ज्योतिषे च)**
- **आचार्यपाठ्यक्रमः (साहित्ये, व्याकरणे फलितज्योतिषे च)**
- **पाली-पदविकापाठ्यक्रमः**
- **प्राकृत-पदविकापाठ्यक्रमः**
- **प्राकृत-प्रमाणपत्रीयपाठ्यक्रमः**
- **पत्रकारिता-प्रमाणपत्रीयपाठ्यक्रमः**

एतेषु पाठ्यक्रमेषु सरलमानकसंस्कृतेन अध्ययनग्रन्थाः विकासिताः सन्ति। एते ग्रन्थाः नियतपाठ्यक्रमाणाम् अपि उपकारकाः सन्ति। सरल-मानक-संस्कृतेन लिखितानां ग्रन्थानां यद् स्वरूपमस्ति तद् सर्वमपि विषयनिष्ठं वर्तते , प्रत्येकं वाक्यस्य संयोजनम् अग्रिमवाक्येन सह क्रमबद्धरूपेण वर्तते। यथा- आधुनिकविषयेषु (सामाजिक-विज्ञानादिषु) ज्ञानसंरचना, विषयविवेचनं वर्तते, तथैव सरल-मानक-संस्कृतेन लिखितानां ग्रन्थानां मूललक्ष्यं वर्तते । सरल-मानक-संस्कृतेन लिखितानां ग्रन्थानां स्वाध्यायकरणे अधिकाधिकप्रयोगः भवति। संस्कृतशास्त्रीयग्रन्थेषु प्रतिपाद्यविषयस्य सरल-मानक-संस्कृतेन अधिगमः सारल्येन सम्भवति। सरल-मानक-संस्कृतेन चतुर्णामपि भाषाकौशलानां(श्रवणं-भाषणं-पठनं-लेखनम् ) अभ्यासः सर्वेषामपि संस्कृतानुरागिणां कृते रुचिकरं सौविध्यपूर्णं भवति। विविधेषु पाठ्यक्रमेषु विकासितानां पाठ्यग्रन्थानां नामानि एवं सन्ति।

प्राक्शास्त्रिपाठ्यक्रमे

- लघुसिद्धान्तकौमुदी (आदितः भ्वादिपर्यन्ता) रचनानुवादः च,
- स्वप्नवासवदत्तम् श्रुतबोधश्च
- काव्यदीपिका
- वैयाकरणसिद्धान्तकौमुदी
- भास्करीयबीजगणितम्
- जन्मपत्रदीपकम्
- किरातार्जुनीयम्
- बीजगणितम्
- ग्रहलाघवम्
- चन्द्रालोकः

शास्त्रिपाठ्यक्रमे

- साहित्यदर्पणः
- कादम्बरी (शुकनासोपदेशान्तभागः)
- लघुसिद्धान्तकौमुदी
- ताजिकनीलकण्ठी
- वैयाकरणसिद्धान्तकौमुदी
- महाभाष्यम्
- अभिज्ञानशाकुन्तलम्
- लौकिकसंस्कृतसाहित्येतिहासः
- नैषधीयचरितम्
- मेघदूतम्
- केशवीयजातकपद्धतिः
- भावप्रकाशः
- गोलपरिभाषा
- सर्वदर्शनसङ्ग्रहतः औलूक्यदर्शनम्, अक्षपाददर्शनम्, जैमिनिदर्शनं च
- उत्तररामचरितम्
- बृहज्जातकम्
- जैमिनीयसूत्रम्
- जातकालङ्कारः
- प्रौढमनोरमा

आचार्यपाठ्यक्रमे (व्याकरणम्)

- लघुशब्देन्दुशेखरः
- महाभाष्यम् (प्रथमाध्यायस्य प्रथमे पादे ५ तः ९ आह्निकं यावत्)
- परिभाषेन्दुशेखरः
- वैयाकरणभूषणसारः
- वैदिकवाङ्मयस्येतिहासः भारतीयसंस्कृतिश्च
- लघुशब्देन्दुशेखरः
- व्युत्पत्तिवादः
- वाक्यपदीयम्
- वैयाकरणसिद्धान्तपरमलघुमञ्जूषा
- व्याकरणशास्त्रेतिहासः

### आचार्यपाठ्यक्रमे (ज्योतिषम्)

- भारतीय-कुण्डलीविज्ञानम्
- सारावली (१-३० अध्यायाः)
- पञ्चस्वराः
- सचित्र-सामुद्रिकरहस्यम्
- बृहत्संहिता (प्रथमभागः)
- सूर्यसिद्धान्तः
- बृहत्पराशरहोराशास्त्रम्
- भावकुतूहलम्
- नरपतिजयचर्या
- बृहद्वास्तुमाला
- फलितविकासः
- ज्यौतिषशास्त्रेतिहासः

### आचार्यपाठ्यक्रमे (साहित्यम्)

- काव्यप्रकाशः
- ध्वन्यालोकः
- व्यक्तिविवेकः
- रसगङ्गाधरः
- अभिधावृत्तमातृका
- वक्रोक्तिजीवितम्
- काव्यशास्त्रेतिहासः

एतदतिरिच्य भूगोलेतिहासगणितविज्ञानादीनाम् आधुनिकानां पाठ्यविषयाणां पुस्तकानि अपि सरलसंस्कृतेन निर्मातव्यानि सन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any Additional information | View Document |
| Link for Additional Information | View Document |

**1.2 Academic Flexibility**

***1.2.1 Whether the Institution has designed and offered any Innovative Courses/ Courses in emerging area/ Sanskrit based courses including scientific and technical literature leading to both traditional and modern degrees (e.g. Shastri, B.Sc. etc) with combination of yoga, Ancient and Modern Mathematics/ Economics/ Management/ Law/ Computer Science/ Theoretical Ayurveda/ Krishi-parashara/ Vrikshayurveda etc.***

***संस्थया प्रस्तुतेषु सर्वेषु विविधायामवत्सु पाठ्यक्रमेषु (वैज्ञानिक-प्रौद्योगिक-साहित्यसमाश्रयेण शास्त्री/ बी.एस्.सी-प्रभृतिपारम्परिकाधुनिकोपाधिनाम्ना योगशास्त्रस्य प्राचीन-आधुनिकगणितयोः/ अर्थशास्त्रस्य/ प्रबन्धनशास्त्रस्य/ विधिशास्त्रस्य/ सङ्गणकीयविज्ञानस्य/ आयुर्वेदसिद्धान्तस्य (दर्शनस्य)/ कृषिपाराशरस्य/ वृक्षायुर्वेदस्य च सङ्घटनेन समारब्धाः नवीनपाठ्यक्रमाः तथा उदयमानविषयकपाठ्यक्रमाः/ संस्कृताश्रितपाठ्यक्रमाः) अभिनवपाठ्यक्रमाः।***

**Answer:**

समाजस्य अपेक्षानुगुणं समये समये परिवर्त्यमाना शिक्षाप्रणाल्याः व्यवस्था देशम् उन्नयति। संस्कृतवाङ्मये विद्यमानानां मौलिकानां व्यक्तेः, समाजस्य, देशस्य, विश्वस्य च क्षेमवर्धकानां सर्वशान्तिप्रदानां च विषयाणां शैक्षिकविधिमाध्यमेन सह प्रदानाय केन्द्रीयसंस्कृतविश्वविद्यालयः कृतसङ्कल्पः वर्तते। विश्वविद्यालयस्य तदनुरूपाः गतिविधयः वर्तन्ते। अस्य नियतपाठ्यक्रमाः एवं वर्तन्ते।

- **शास्त्री(स्नातकः)**
- **आचार्यः(स्नातकोत्तरः)**
- **शिक्षाशास्त्री (बि.एड्)**
- **शिक्षाचार्यः(एम्.एड्)**
- **पदविका (डिप्लोमा)**
- **विद्यावारिधिः(पिएच्.डि)**
- **विद्यावाचस्पतिः(डि.लिट्)**

एतेषु पाठ्यक्रमेषु प्राचीनैः पाठ्यपत्रैः सह कालोचितानि कानिचन नवीनपाठ्यपत्राणि स्वीकृतानि वर्तन्ते।

**शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च सिद्धान्तज्यौतिषविषयके** प्राचीनगणितसम्बन्धीनि पत्राणि भवन्ति। तत्र शास्त्रिपाठ्यक्रमे सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकः, केतकीयग्रहगणितम् इतीमानि पत्राणि भवन्ति। आचार्यपाठ्यक्रमे लीलावती, सरलत्रिकोणमितिः, रेखागणितम्, गोलपरिभाषा सूर्यसिद्धान्तः इतीमानि पत्राणि प्राचीनगणितसम्बन्धीनि सन्ति। गोलस्य स्थितिं ग्रहाणां गतिञ्च निर्दुष्टतया प्रतिपादयितुं ज्योतिर्विज्ञाने आश्रितस्य प्राचीनस्य गणितस्य परिचयः एतैः पाठ्यपत्रैः सम्पद्यते। 'सिद्धान्तशिरोमणिः' इति पत्रेण भारतीयगणितपद्धत्या ग्रहणकालस्य निर्णयः निर्दुष्टतया ज्ञातुं शक्यते। **फलितज्योतिषविषयके प्राचीनगणितम् आश्रिते आचार्यपाठ्यक्रमे** सूर्यसिद्धान्तः, भारतीयकुण्डलीविज्ञानम् इति पत्रे भवतः। भारतीयकुण्डलीविज्ञानम् इति पत्रे प्राचीनगणितमाश्रित्य कुण्डलीनिर्माणविधानं प्रतिपादितमस्ति।

**धर्मशास्त्रविषयके शास्त्रिपाठ्यक्रमे** याज्ञवल्क्यस्मृतिः, मनुस्मृतिः चेति द्वे पत्रे भवतः। तत्र व्यवहारः दायभागश्च प्राचीनभारतीयपद्धतेरनुगुणं ज्ञातुं अत्यन्तोपयोगी अस्ति। **आचार्यपाठ्यक्रमे** च कौटिलीय-अर्थशास्त्रम्, व्यवहारमयूखः, दायभागः, निर्णयसिन्धुः, महाभारतस्य शान्तिपर्व, आधुनिकहिन्दुविधिः इतीमानि पाठ्यपत्राणि प्राचीनभारतस्य जनानाम् आचारः, नीतिः, व्यवहारः, शासनक्रमः, सामरस्यम्, दण्डविधिः इत्यादीन् विषयान् प्रतिपादयन्ति। आधुनिकहिन्दुविधिः इति पत्रं हिन्दूनां न्यायनीतिं वेषभूषां च (Hindu Law and Costume) विमृशति। धर्मशास्त्रपाट्यक्रमे कौटिलीय-अर्थशास्त्रम् आधुनिकम् अर्थशास्त्रम् इति पत्रद्वयं भवतीति हेतोः अर्थशास्त्रस्य प्राचीननियमान् नवीननियमान् च अधिगन्तुम् अवसरो वर्तते।

**शास्त्रिपाठ्यक्रमे सर्वदर्शनविषयके** योगसूत्रम् इति पत्रे योगविज्ञानस्य पुरा प्रवृत्तं सैद्धान्तिकं चिन्तनम् उद्दिष्टमस्ति।

**योगः एवम् आयुर्वेदसाहित्यम्** इति संरचितः नवीनः डिप्लोमापाठ्यक्रमः स्वास्थ्यसंरक्षण/संवर्धनविधानं प्राचीनपद्धत्या सह निरूपयति। अस्मिन् संयुक्तपाठ्यक्रमे योगशास्त्रसम्बद्धानि आयुर्वेदसम्बद्धानि च षट् पत्राणि सन्ति। तानि

**१.योगस्य सामान्यपरिचयः योगस्य प्रमुखाः धाराः**

**२. जीवनशैली योगचिकित्सा च**

**३. आयुर्वेदपरिचयः मूलसिद्धान्ताः च**

**४. द्रव्यविज्ञानं नामरूपज्ञानं च**

**५. प्रथमदीक्षा द्वितीयदीक्षा च**

**६. प्रायोगिकयोगः ।**

अत्र सैद्धान्तिकरूपेण आयुर्वेदः पाठ्यांशत्वेन स्वीकृतः। मुख्यतया नवीनपाठ्यक्रमस्य अस्य उद्देश्यं सोत्साहजीवनशैलीसम्पादनम्, शरीरस्य मनसः च स्वास्थ्यसंरक्षणम्, त्रिदोषाणां परिचयः, आयुर्वेदीयसस्यानां परिचयः इति। एतान् विषयान् अवगत्य प्रशस्तजीवनशैलीम् अवाप्तुं शक्यते।

विश्वविद्यालयस्य शास्त्रिपाठ्यक्रमे **अर्थशास्त्रम्/समाजशास्त्रम्/राजनीतिशास्त्रम्** इति प्रतिसत्रम् एकं पत्रम् अस्ति। शास्त्रिपाठ्यक्रमे स्वीकृतेषु सप्तदशविषयेषु सर्वेषाम् अनिवार्यरूपेण **सङ्गणकविज्ञानम्** एकं पत्रं भवति। पञ्चमे षष्ठे च सत्रार्धे **पर्यावरणशिक्षा** इति नवीनेन पत्रेण छात्राणां पर्यावरणस्य प्रयोजनं तस्य संरक्षणम् इत्यादिविषयाणाम् अवगमनं भवति। शास्त्रिपाठ्यक्रमः पौरोहित्यविषयकः समाजे, भारतीयसेनायाम्, अन्यत्र च धर्मगुरुरूपेण सेवां कर्तुम् अपेक्षितं ज्ञानं प्राप्तुम् उपयुक्तो वर्तते।

**प्रमाणपत्रपाठ्यक्रमः(षाण्मासिकः) -नाट्यशास्त्रं संस्कृतरङ्गमञ्चः च**

विश्वविद्यालयस्य भोपाल् परिसरस्य नाट्यानुसन्धानकेन्द्रद्वारा (२०२०-२१) चालितः। पाठ्यक्रमेऽस्मिन् पत्रम्

१.संस्कृतरङ्गमञ्चः नाट्यशास्त्रं च

२. संस्कृतरङ्गमञ्चप्रयोगः ।

**डिप्लोमापाठ्यक्रमः-भारतीयशास्त्रीयरङ्गमञ्चः** विश्वविद्यालयस्य भोपाल् परिसरस्य नाट्यानुसन्धानकेन्द्रद्वारा सञ्चाल्यते। पत्राणि-

**१.नाट्यशास्त्रं रङ्गमञ्चश्च**

**२. नाट्याभिनयः प्रयोगश्च**

**३.मञ्चसज्जा एवं नाट्यतन्त्राणि**

**४. पारम्परिकनाट्यशैली लोकनाट्यशैल्यः एवं रङ्गसङ्गीतम् इतीमानि ।**

भारतीयरङ्गमञ्चस्य डिप्लोमापाठ्यक्रमः प्रमाणपत्रपाठ्यक्रमश्च आधुनिकरङ्गप्रयोगेषु विद्यमानैः तन्त्रैः साकं पारम्परिकरङ्गतन्त्राणां सामञ्जस्ये अत्युपयोगी वर्तते। पाठ्यक्रमे संस्कृतभाषायां लिखितानां रूपकाणां संस्कृतभाषायामेव नाट्यशास्त्राधारेण प्रयोगं कर्तुं दिशानिर्देशः वर्तते।

**शिक्षाशास्त्रिपाठ्यक्रमे शिक्षाचार्यपाठ्यक्रमे** च संस्कृतभाषायाः शिक्षणविधिः बोध्यते। शिक्षणविधयश्च प्राचीनाः नवीनाश्च संयुक्तरूपेण पाठ्यक्रमे योजिताः सन्ति। तत्र शिक्षाशास्त्रिपाठ्यक्रमे

**१.दर्शनसमाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा**

**२.अधिगमविकासयोः मनोविज्ञानम्**

**३.सामाजिकविज्ञानशिक्षणम् (पत्रांशः)**

**४.नवीनशैक्षिकप्रवृत्तयः ( शारीरिकशिक्षा, पर्यावरणशिक्षा, जनसंख्याशिक्षा)**

**५.समसामयिकं भारतं शिक्षा च**

**६. शान्तिशिक्षा/मानवाधिकारशिक्षा/मूल्यशिक्षा/शिक्षायां लैङ्गिकसमस्याः**

इतीमानि पत्राणि भवन्ति। इमानि पत्राणि पारम्परिकविषयाणाम् आधुनिकैः विषयैः सह समन्वयरूपेण रचितानि।

**शिक्षाचार्यपाठ्यक्रमस्य** पत्राणि। प्रथमसत्रार्धे-

**१.शैक्षिकप्रक्रियायां दर्शनशास्त्रम्**

**२.पारम्परिकसंस्कृतशिक्षा**

**३.शैक्षिकानुसन्धानम् आधारभूतसांख्यिकी च**

**४. शिक्षा शान्तिश्च**

**५.शैक्षिकं व्यावसायिकं च निर्देशनम् अथवा शैक्षिकम् आयोजनं प्रशासनं च**

द्वितीयसत्रार्धे-

**१.शैक्षिकप्रक्रियायां समाजशास्त्रम्**

**२.शिक्षायां सूचनाप्रविधिः एवं संप्रेषणप्रविधिः**

**३.ज्ञानम्, अधिगन्ता, अधिगमप्रक्रिया च**

**४. मूल्यशिक्षा/ प्रौढशिक्षा**

**५. समावेशात्मकशिक्षा/ शैक्षिकप्रविधिः**

तृतीयसत्रार्धे

**१.संस्कृतशिक्षायां नवीनप्रवृत्तयः**

**२.शैक्षिकानुसन्धानम् आधारभूतसांख्यिकी च**

चतुर्थसत्रार्धे

**१.वैयक्तिकविकासार्थं मनोविज्ञानम्**

एतैः पत्रैः युक्तः पाठ्यक्रमः संस्कृतशिक्षायाः अनुसन्धानस्य विविधसामाजिकस्थितीनां च सम्प्रत्ययस्य दिशं निर्दिशति। विविधस्तरेषु संस्कृतशिक्षार्थम् अपेक्षितप्रौद्योगिकविषयाणाम् अन्वयविधीन् निर्दिशति। शिक्षकस्य शिक्षणविधानस्य गुणवत्तां निर्दिशति।

एते पाठ्यक्रमाः उपरिनिर्दिष्टैः पत्रैः सह केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरेषु सञ्चाल्यन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Minutes of relevant Academic Council/BOS meeting | View Document |
| Any additional information | View Document |

***1.2.2 Percentage of Programmes in which Choice Based Credit System (CBCS)/elective course system has been implemented (Latest Completed academic year)***

***विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यक्रमप्रणाल्या प्रवर्तितानां कार्यक्रमाणां प्रतिशतं मानम्। (सद्यः समाप्तशैक्षिकवर्षस्य)***

**Answer:** 98.21

1.2.2.1 Number of Programmes in which CBCS/ Elective course system implemented.

विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यक्रमप्रणाल्या प्रवर्तितानां कार्यक्रमाणां सङ्ख्या।

Answer: 55
1.2.2.2 Number of programmes offered during latest completed academic year.

सद्यः समाप्तशैक्षिकवर्षे प्रस्तुतानां कार्यक्रमाणां सङ्ख्या

Answer: 56

| File Description | Document |
|---|---|
| Minutes of relevant Academic Council/BOS meetings | View Document |
| Institutional data as per Data Template | View Document |
| Any additional information | View Document |

***1.2.3 Institution provides the flexibility of bringing together the conventional face-to-face mode, MOOCs, online education and allow students to choose and combine the courses they are interested in. Provide details.***

***संस्थया प्रत्यक्षशिक्षणविधेः सामूहिकमुक्तान्तर्जाल-पाठ्यक्रमस्य (MOOCs) अधितन्त्रिशिक्षाणां च परस्परसमन्वयनाय नमनीयता प्रकल्पिता, तेन स्वरुचिपूर्णानां पाठ्यक्रमाणां चयने संयोजने च च्छात्राः अनुमताः। क्रियान्वयनविवरणं देयम्।***

**Answer:**

**विस्तृतसद्यस्कपाठ्यक्रमस्य (MOOCs) परिचयः -**

विस्तृतसद्यस्कपाठ्यक्रमः (MOOCs) अन्तर्जालाधारितः निःशुल्कः दूरस्थशिक्षणस्य विधिः वर्तते। अस्य निर्मितिरेव भौगोलिकदृष्ट्या विभक्तानां बहुसंख्याकानां छात्राणां कृते कृतास्ति । किञ्च विस्तृतसद्यस्कपाठ्यक्रमस्य उद्देश्यमेव अन्तर्जालमाध्यमेन सर्वेषां कृते असीमायाः सहभागितायाः मुक्तावसरप्रकल्पनम् । पारम्परिकपाठ्यक्रमस्य पाठितया पाठनीयायाश्च अध्ययनसामग्र्या सह, MOOCs द्वारा, उपयोक्तॄणां वेदिकया (USER FORUM) सामाजिकमाध्यमद्वारा(Social media) वा संभाषणात्मकाः कक्ष्याः चाल्यन्ते । तेन छात्राणाम् अध्यापकानाम् अध्यापनसहायकानां च मध्ये मिथः संभाषणस्य अवसरः प्राप्यते । तात्कालिकप्रतिपुष्ट्यर्थं स्फूर्तिस्पर्धाः निबन्धनानि च आयोजयितुं शक्यन्ते । 2008 तमे वर्षे समारब्धा 2012 तमे वर्षे अध्ययनस्य प्रसिद्धपद्धतित्वेन ख्याता इयं MOOCs व्यवस्था सम्प्रति दूरस्थशिक्षणविषये विशिष्टेन अनुसन्धानेन प्रवर्तते ।

MOOCs व्यवस्था विस्तृताध्ययनस्य दूरस्थशिक्षणस्य च अत्यन्तनूतनेषु विधिषु अन्यतमः । MOOCs व्यवस्था सततं वर्धिष्णुः सती उच्चशिक्षणे नूतनाध्ययनावसरान् निर्माति । संस्कृतस्य/शास्त्राणां पाठ्यक्रमस्य सञ्चालनार्थम् अपेक्षितपाठ्यसामग्रीनिर्माणे सुदृढ उपगमः एषः इत्यतः केन्द्रीयसंस्कृतविश्वविद्यालयेन असौ उपक्रमः क्रियते ।

MOOCs इत्यस्य महत्त्वपूर्णं तत्त्वं गुणवत्ता, सा च पाठ्यक्रमस्य निर्माण-वर्धन-प्रदानेषु सर्वेषु स्तरेषु समाश्रयणीया । पाठ्यक्रमस्य निर्माणावसरे पाठ्यक्रमप्रदात्र्याः संस्थायाः/पाठ्यक्रमप्रदातुः गणस्य स्तरे साधनीया । विश्वविद्यालयस्तरे

पाठ्यमानाः विषया अपि MOOCs मध्ये सन्ति । सामान्यतः विश्वविद्यालये पाठ्यमानाः बहवः विषयाः MOOCs पद्धत्या पाठयितुम् शक्याः । व्यावसायिकगुणवत्तावर्धनार्थं व्यावहारिककौशलानि अपि महत्त्वपूर्णानि भवन्ति ।

**केन्द्रीयसंस्कृतविश्वविद्यालये MOOCs व्यवस्थया विविधस्तरे पाठ्यक्रमं विधातुं विभिन्नानां परिसराणां सर्वविभागीयाध्यापकानां कृते एकलव्यपरिसरे (अगरतला,त्रिपुरा) 22-28 मार्च 2018 दिवसयोः एतत्सम्बद्धा कार्यशाला आयोजिता आसीत् । अस्यां कार्यशालायां विश्वविद्यालयस्य अध्यापकैः भागः ऊढः कार्यशालाया लाभश्च प्राप्तः ।**

विश्वविद्यालय-अनुदान-आयोगस्य 2021तमे वर्षे स्थापितनियमानुसारं सस्पृहमनस्कानां यूनां कृते अन्तर्जलमाध्यमेन सद्यस्काध्ययनपाठ्यक्रमस्य क्रेडिट् इति पद्धत्याः स्वीकारविषयकः एकः उपक्रमः कृतो वर्तते। 2022 वर्षस्य जून् मासस्य तृतीये तथा अष्टाविंशे दिने भारतसर्वकारेण प्रसारितं प्रपत्रकम् ( D.O. F. NO. 1-8/2017, SECRETARY, UGC, GOVT. OF INDIA) अनुसरता **केन्द्रीयसंस्कृतविश्वविद्यालयेन SWAYAM-MOOCs पाठ्यक्रमस्य सञ्चालनम् आरब्धम् अस्ति । तदर्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य सुयोग्येन अधिकारिणा शैक्षणिक-परामर्श-समितिः AAC स्थापिता । 2020 वर्षस्य राष्ट्रिय-शैक्षिक-नीत्यनुसारम् संस्कृतविदुषां सामान्यजनानां च महदुपकारक्षमस्य UGC-SWAYAM-MOOC इत्यस्य पाठ्यक्रमस्य निर्माणे संभावनानां चिन्तनार्थं 18/04/2022 तमे दिनाङ्के सूचना दत्ता ।**

तदनु केन्द्रीयसंस्कृतविश्वविद्यालयेन NPTEL इति स्थानिकपद्धत्या अस्य स्थापनार्थं MOOCs-SWAYAM इति सद्यस्कपाठ्यक्रमस्य चालनार्थं समेषु परिसरेषु प्रपत्रकं प्रसारितम् (परिशिष्टं-3 मध्ये संलग्नम्) । अधोदत्तानां UGC/SWAYAM-MOOCs 2017 & 2021 इत्यस्य निर्देशानुसारं सद्यस्कमाध्यमेन MOOC/SWAYAM इत्यस्य स्नातकस्तरे, स्नातकोत्तरस्तरे प्रमाणपत्रीये, पदविकायां च पाठ्यक्रमाणां निर्माणार्थं क्षेमस्य अभिव्यक्तिपद्धतिम् (E.O.C.) अङ्गीकर्तुं केन्द्रीयसंस्कृतविश्वविद्यालयस्य समेऽपि परिसराः सूचिताः ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य नियमिताः पाठ्यक्रमास्तु नमनीयतागुणेन युक्ताः सन्ति। तेषु नियमितपाठ्यक्रमः मुक्तस्वाध्यायपीठद्वारा प्रवर्तमानः पाठ्यक्रमः इति द्विप्रकारकः पाठ्यक्रमः वर्तते। उभयविधपाठ्यक्रमे छात्रेभ्यः कल्पितानां नमनीयतानां विवरणम् एवं वर्तते।

**नियतपाठ्यक्रमे नमनीयताः एवं सन्ति-**

**१.परिसरचयने नमनीयता**

विश्वविद्यालयोऽयं बहुपरिसरीयः। अस्य विश्वविद्यालयस्य परिसराः भारतस्य विभिन्नराज्येषु सन्ति। पाठ्यक्रमं प्रविविक्षुभ्यः छात्रेभ्यः तेषु परिसरेषु स्वस्य अपेक्षानुगुणम् अन्यतमं परिसरं चेतुम् अवसरः कल्पितः।

**२.शास्त्र/विषयचयने नमनीयता**

शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च शास्त्रचयने छात्राणां स्वातन्त्र्यं कल्पितमस्ति विश्वविद्यालयेन। शास्त्रिपाठ्यक्रमे अधीतवेदान्तः छात्रः आचार्यपाठ्यक्रमे साहित्यं फलितज्योतिषम् अन्यद्वा शास्त्रं स्वीकर्तुं शक्नोति। एवम् शास्त्रिपाठ्यक्रमे अन्यतमं शास्त्रम् आचार्यपाठ्यक्रमे अन्यतमं शास्त्रं स्वीकर्तुं शक्यते इति शास्त्रचयने नमनीयता वर्तते।

**३.पाठ्यपत्रस्य चयने नमनीयता**

विश्वविद्यालयस्य आचार्यपाठ्यक्रमे वैकल्पिकप्रश्नपत्राणि भवन्ति। विश्वविद्यालयस्य सर्वेषु परिसरेषु एषा व्यवस्था प्रकल्पिता । अत्र अधोनिर्दिष्टेषु चतुर्दश वैकल्पिकविषयेषु छात्राणाम् इच्छानुगुणम् कश्चिदेकः विषयः चेतुं शक्यः।
**मुक्तस्वाध्यापीठद्वारा सञ्चाल्यमानेषु पाठ्यक्रमेषु प्रकल्पिता नमनीयता :-**

**१.अवधेः अग्रेसारणम्** छात्रः निर्धारितपाठ्यक्रमाणां निर्दिष्टावधेः द्विगुणितं समयं प्राप्तुं शक्नोति।

**२.वयोमितेः नमनीयता** मुक्तस्वाध्यायपीठस्य सर्वेषु पाठ्यक्रमेषु वयसः गरिष्ठतायाः नियमः नास्ति। प्रविविक्षुः कनिष्ठमितेः ऊर्ध्वं कदापि पाठ्यक्रमं स्वीकर्तुं शक्नोति।

**३.प्रणालीपरिवर्तनम्** नियमितप्रणाल्यां स्थितः छात्रः पाठ्यक्रमस्य मध्यकाले प्रथमवर्षात्  द्वितीयवर्षाद्वा अनन्तरम्, मुक्तस्वाध्यायप्रणाल्या तमेव पाठ्यक्रमम् अग्रे अनुवर्तयितुं शक्नोति। एवमेव मुक्तस्वाध्यायप्रणाल्यां मध्ये पाठ्यक्रमं हित्वा नियमितपाठ्यक्रमम् अनुवर्तयितुं शक्नोति।

**४.सेतुपाठ्यक्रमः** स्नातकस्तरे संस्कृतम् अपठितवतां स्नातकोत्तरस्तरे (आचार्यस्तरे)पाठ्यक्रमं स्वीकर्तुं मुक्तस्वाध्यायप्रणाल्याम् अवसरः कल्पितः । संस्कृतं विना स्नातकपदवीम् उत्तीर्णः छात्रः मुक्तस्वाध्यायपीठस्य सेतुपाठ्यक्रमं (अवधिः एकवर्षम्) समापयेत्। ततः सः आचार्यपाठ्यक्रमं स्वीकर्तुं शक्नोति इति सामान्यः नियमः।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Provide Link to MOOCs, online Platform | View Document |

***1.2.4 Number of employment generating courses including skill oriented vocational courses introduced during the last five years.***

***विगतेषु पञ्चसु वर्षेषु प्रवर्तितानां कौशलोन्मुखव्यावसायिकपाठ्यक्रमान् अन्तर्भाव्य उद्योगोत्पादकपाठ्यक्रमाणां सङ्ख्या।***

**Answer:** 64

1.2.4.1 Number of employment generating courses including skill oriented vocational courses introduced during the last five years:

विगतेषु पञ्चसु वर्षेषु प्रवर्तितानां कौशलोन्मुखव्यावसायिकपाठ्यक्रमान् अन्तर्भाव्य उद्योगोत्पादकपाठ्यक्रमाणां सङ्ख्या –

Answer: 64

| File Description | Document |
|---|---|
| Brochure or any other document relating to employment generating Courses. | View Document |
| As per Data Template | View Document |
| Any additional information | View Document |

***1.2.5 Percentage of students pursuing such courses specified in 1.2.4 during the last five years.***

***विगतेषु पञ्चसु वर्षेषु १.२.४ सङ्ख्यामाने निर्दिष्टान् पाठ्यक्रमान् स्वीकृतवतां छात्राणां प्रतिशतं मानम्।***

**Answer:** 93.15

1.2.5.1 Number of students pursuing employment generating courses specified in 1.2.4 year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु १.२.४ सङ्ख्यामाने निर्दिष्टान् उद्योगोत्पादनं कुर्वतः पाठ्यक्रमान् स्वीकृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| | | | | |
|---|---|---|---|---|
| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
| 4733 | 5647 | 5964 | 6319 | 1713 |

| File Description | Document |
|---|---|
| List of students pursuing employment generating courses specified in 1.2.4 | View Document |
| As per Data Template | View Document |
| Any additional information | View Document |

**1.3 Curriculum Enrichment**

***1.3.1 Institution integrates cross cutting issues as reflected in Sanskrit literature relevant to contemporary issues including Gender, Environment and Sustainability, Human Values and Professional Ethics and traditional system of shastric learning into the Curriculum.***

***संस्था, संस्कृतसाहित्ये शास्त्रपरम्परायां च प्रतिफलितान् स्त्रीपुरुष-पर्यावरण-स्थिरता-मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राधिगम-प्रणालीसहितसमसामयिकसमस्याविषयकान् सर्वत्रानुस्यूतांशान् पाठ्यचर्यायां समन्वयति।***

**Answer:**

संस्कृतसाहित्यस्य उपदेशसारः वर्तते ‘सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्’ इति। वेदाः, शास्त्राणि च प्रभुसम्मिततया, पुराणानि मित्रसम्मिततया, काव्यानि कान्तासम्मिततया च जनान् उपदिशन्ति। अतः एतेषां संस्कृतवाङ्मयगतानां ग्रन्थानाम् अध्ययनस्य उपदेशप्राप्तिपूर्वकं तथा आचरणम् एव मुख्यं प्रयोजनम्। ततः जनाः परस्परं सामरस्येन जीवन्तः सामाजिकीं शान्तिं वर्धयेयुः।

केन्द्रीयसंस्कृतविश्वविद्यालयः वेदादित्रिविधमपि साहित्यम् आश्रित्य विविधाः पाठ्यचर्याः समचालयत्। पाठ्यक्रमेषु स्थितानि समता, स्थिरता, एकता, देशभक्तिः, अहिंसा, सत्यम्, अस्तेयः, शौचम्, इन्द्रियनिग्रहः इत्यादीनि मूल्यानि प्राकाश्यं नीतानि। दाम्पत्यधर्मः, राजधर्मः, पौरजानपदधर्मः, कौटुम्बिकाचाराः, पर्यावरणस्य महत्त्वम्, वृत्तिनीतिः इति नैके विषयाः पाठ्यचर्यायां समन्वयन्ति। तादृशाः सङ्क्षेपतः अत्र उल्लिख्यन्ते।

शास्त्रिपाठ्यक्रमे प्रथमसत्रार्धे साहित्ये चम्पूरामायणम् इति पत्रे दौष्ट्यगुणस्य हेयता । **साहित्यदर्पणः इति पत्रे साहित्यस्य अध्ययने सर्वेषाम् अधिकारनिरूपणम्। धर्मशास्त्रे याज्ञवल्क्यस्मृतिः इति पत्रे सदाचारणम् । पुराणेतिहासे वाल्मीकिरामायणस्य सुन्दरकाण्डम् इति पत्रे परोपकारः, दूतधर्मः, सेवकवृत्तिः। शुक्लयजुर्वेदे ‘इषे त्वो र्जेत्वा’ इत्यादिमन्त्रेषु अस्तेयः गवादिपशुसंरक्षा, सज्जनसंख्यावृद्धिः । ‘इदमहम् अनृतात्सत्यमुपैमि’ इत्यादिमन्त्रेषु सत्यमार्गः। अद्वैतवेदान्ते कठोपनिषद् इति पत्रे यमनचिकेतसोः संवादेन आध्यात्मिकं मूल्यम्।**

**शास्त्रिपाठ्यक्रमे द्वितीयसत्रार्धे साहित्ये कादम्बरी इति पत्रे शुकनासोपदेशेन राज्ञः स्वभावः, अतिसम्पदो दुष्परिणामाः, परवञ्चनादात्मरक्षणम्** । सर्वदर्शने योगसूत्रम् इति पत्रे भारतीययोगदर्शनस्य सर्वोपादेयता। पुराणेतिहासे वाल्मीकिरामायणम् इति पत्रे राज्ञः प्रजापालने अवधेयाः अंशाः। **अद्वैतवेदान्ते मुण्डकोपनिषद् इति पत्रे जीवब्रह्मणोः ऐक्यभावः।**

शास्त्रिपाठ्यक्रमे साहित्ये तृतीयचतुर्थसत्रार्धयोः अभिज्ञानशाकुन्तलम् इति पत्रे स्त्रीणां पुरुषाणां च समाधिकारः । महर्षेः कण्वस्य गुरुकुले महर्षेः मारीचस्याश्रमे च वसतां तापस्यः मुनिकुमाराश्च इत्येतेषां स्त्रीपुरुषाणां सहाध्ययनम् । कन्यायाः निजमनोरथानुसारं पतिवरणम्। दम्पत्योः सामरस्येन जीवनम् । तृतीयसत्रार्धे साहित्ये मेघदूतम् इति पत्रे दम्पत्योः मैत्र्या सह जलसंरक्षणम्, वृष्टिविज्ञानम्, भौगोलिकाखण्डता, च। पौरोहित्ये श्राद्धविवेकः इति पत्रे पूर्वजानां स्मरणम्। जैनदर्शने इष्टोपदेशः इति पत्रे ‘वासनामात्रमेवैतत् सुखं दुःखं च देहिनाम् । तथा ह्युद्वेजयन्त्येते भोगा रोगा इवापदि’ इत्यादिना पाठ्यांशेन अतिविषयासक्तेः परित्यागः। अद्वैतवेदान्ते तैत्तिरीयोपनिषद् इति पत्रे अधिलोक-अधिज्यौतिष-अधिविद्य-अधिप्रज-

अध्यात्मनामिकाः पञ्चमहासंहिताः। ईशावास्योपनिषद् इति पत्रे अधर्ममार्गस्य परित्यागः। आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्। इत्यादि-उपनिषद्वाक्यैः पाठ्यांशैः पारम्परिकशिक्षाप्रणालीपरिचयः।

शास्त्रिपाठ्यक्रमे चतुर्थसत्रार्धे पुराणेतिहासे श्रीमद्भगवद्गीता इति पत्रे भक्तिः, पुरुषोत्तमप्राप्तिः।

शास्त्रिपाठ्यक्रमे पञ्चमसत्रार्धे पर्यावरणशिक्षा इति पत्रे पर्यावरणस्य महत्त्वम्,तत्संरक्षणम्। साहित्ये शिशुपालवधम् इति पत्रे प्राशासनिकं कौशलम्। पुराणेतिहासे अग्निपुराणे काव्यप्रमेयसङ्ग्रहः।

**शास्त्रिपाठ्यक्रमे षष्ठसत्रार्धे वेदान्तसारः इति पत्रे  आध्यात्मिकं मौल्यम्। पर्यावरणशिक्षा इति पत्रे प्रकृतिसंरक्षणम्, जलसंरक्षणम्, भूमिसंरक्षणम् च। अद्वैतवेदान्ते श्रीमद्भगवद्गीता इति पत्रे अहङ्कारपरित्यागः, आहारपद्धतिः, सत्त्वरजस्तमसां गुणानां स्वरूपम्, तत्प्रभावः च ।**

शास्त्रिप्रतिष्ठापाठ्यक्रमे किरातार्जुनीयम् इति पत्रे राजनैतिकविचाराः । भक्तिरसामृतसिन्धुः इति पत्रे भक्तिमार्गस्य महत्त्वम् । नीतिशतकम् इति पाठ्यांशेन सुभाषितैः सन्मार्गोपदेशः।  इत्येतानि सार्वकालिकतया अत्यन्तोपादेयानि तत्त्वानि शास्त्रिपाठ्यक्रमे विद्यमानानि पाठ्यचर्यायाम् अनुस्यूततया समन्वयं लभन्ते।

आचार्यपाठ्यक्रमे साहित्ये नाट्यशास्त्रम् इति पत्रे काव्येषु नाट्येषु च आस्वाद्यमानानां रसानां भावानां च स्वरूपं यच्च भारतीयानां रूपकाणां सम्प्रति चलच्चित्रादिरूपेण परिणतानां च मूलाधारः । वेणीसंहारम् इति पत्रे राजतन्त्रे धर्माधर्मविवेकः ।  रसगङ्गाधरः इति पत्रे काव्यसाहित्यतत्त्वनिर्णये भारतीयानां दृष्टिः। ध्वन्यालोकः इति पत्रे भारतीयभाषागतानां साहित्यप्रकाराणां निर्माणे अत्यन्तोपादेयः ध्वनिसिद्धान्तः।

आचार्यपाठ्यक्रमे धर्मशास्त्रे कौटिलीयार्थशास्त्रम् इति पत्रे विनयाधिकारनामके प्रथमाधिकरणपाठ्यांशे अमात्योत्पत्तिः, मन्त्रिपुरोहितनियुक्तिः, मन्त्रिणां सत्त्वपरीक्षा, आत्मरक्षणम्, दूतकर्म इत्यादयः राजनैतिकाः विचाराः। मनुस्मृतिः इति पत्रे राज्ञः व्यवहारदर्शनम्, व्यवहारभेदाः, धनसंरक्षणोपायाः इत्यादयः विचाराः।

आचार्यपाठ्यक्रमे जैनदर्शने समयसारः इति पत्रे प्रकृतिः, कर्मबन्धः, मोक्षः जीवनलक्ष्यम् इति दार्शनिकः विचारः।

आचार्यपाठ्यक्रमे बौद्धदर्शने ‘धर्माणां प्रविचयमन्तरेण नास्ति क्लेशानां यत उपशान्तयेऽभ्युपायः’ इत्यादिना धर्मोपदेशस्य सार्वकालिकी उपादेयता।

आचार्यपाठ्यक्रमे सांख्ययोगे भारतीयदर्शनानां परिचयः इति पत्रे दर्शनानां स्वरूपम्, उपादेयता, भारतीयदर्शनानां सारसङ्ग्रहः। आसनम्, प्राणायामः, चक्रम्, कुण्डलिनी, बन्धः, क्रिया, शक्तिः, नाडी, मुद्रा इत्यादीनां हठयोगसम्बन्धिनां साधनोपायाः।

आचार्यपाठ्यक्रमे मीमांसायां श्रौतयागानां निरूपणम्। अद्वैतवेदान्ते छान्दोग्योपनिषद् इति पत्रे सत्यस्य अभिव्यक्तिमार्गः ।

आचार्यपाठ्यक्रमे पुराणेतिहासे श्रीमद्भागवतम् इति पत्रे साधनज्ञानम्, सिद्धज्ञानम्, साधनभक्तिः, सिद्धा भक्तिः, मर्यादामार्गः, अनुग्रहमार्गः, द्वैत-अद्वैतसमन्वयः इत्यादिविषयाः आस्तिकतायाः स्थैर्यसम्पादकाः । भारतीयसंस्कृतिः इति पत्रे भारतीयानां कौटुम्बिकव्यवस्था, जीवनशैली, संस्काराः च।

एवं केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा सञ्चालितेषु पाठ्यक्रमेषु, संस्कृतसाहित्ये विद्यमानाः मैलिकाः विषयाः, शास्त्रपरम्परया सिद्धाः समाजे अन्वयं लभमानाः अभ्युन्नतिकारिणश्च विषयाः युक्ताः सन्ति।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| The list of courses where the above topics are included | View Document |

| | |
|---|---|
| Any additional information | View Document |
| A description of courses which address Gender, Environment and Sustainability, Human Values and Professional Ethics, traditional system of shastric learning | View Document |

***1.3.2 Number of value added courses imparting transferable and life skills offered during the last five years***

***विगतेषु पञ्चसु वर्षेषु प्रस्तुतानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्याधारितानाञ्च पाठ्यक्रमाणां सङ्ख्या।***

**Answer:** 17

| File Description | Document |
|---|---|
| List of value added courses (Institutional data as per Data Template) combined with 1.3.3 | View Document |
| Brochure or any other document relating to value added courses | View Document |
| Any additional information | View Document |

***1.3.3 Percentage of students enrolled in the courses under 1.3.2***

***१.३.२ बिन्दोः अनुरूपं जीवनकौशलप्रदे मूल्याधारिते च पाठ्यक्रमे प्रविष्टानां छात्राणां प्रतिशतं मानम्।***

**Answer:** 13.8

1.3.3.1 ***Number of students enrolled in value added courses imparting transferable and life skills offered year-wise during the last five years***

विगतेषु पञ्चसु वर्षेषु प्रस्तुतानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्याधारितपाठ्यक्रमाणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 1060 | 671 | 916 | 445 | 518 |

| File Description | Document |
|---|---|
| List of students enrolled (as per data template) combined with 1.3.2 | View Document |
| Any additional information | View Document |

***1.3.4 Percentage of students undertaking field projects/ internship/ training programme/ summer assignment etc. (Latest completed academic year data)***

***क्षेत्रकार्यपरियोजनासु अन्तःप्रशिक्षणेषु प्रशिक्षणकार्यक्रमेषु ग्रीष्मावकाशीयकार्येषु गृहीतभागानां छात्राणां प्रतिशतं मानम्। (सद्यः समाप्तशैक्षिकवर्षस्य)***

**Answer:** 10.74

1.3.4.1 Number of students undertaking field projects/ internship/ training programme/ summer assignment etc. during the latest completed academic year.

सद्यः समाप्तशैक्षिकवर्षे क्षेत्रकार्यपरियोजनासु अन्तःप्रशिक्षणेषु प्रशिक्षणकार्यक्रमेषु ग्रीष्मावकाशीयकार्येषु गृहीतभागानां छात्राणां सङ्ख्या।

Answer: 639

| File Description | Document |
|---|---|
| List of Programmes and number of students undertaking field projects / internships ( As per Data Template) | View Document |
| Any additional information | View Document |

***1.3.5 Institution Curriculum has units and sub-units of the modern subjects like History, Physical and Mathematical Sciences, Political Science, Education, Sociology, Psychology and Human behavior, Economics, Management, Computer Science and Application etc. have contents from Sanskrit based knowledge and being taught in Sanskrit medium. Modern Sanskrit Literature is also included in the curriculum, provide details.***

***संस्थापाठ्यचर्यायाम् आधुनिकविषयाणां यथा इतिहासः, भौतिकविज्ञानं, गणितीयविज्ञानानि, राजनीतिशास्त्रम्, शिक्षाशास्त्रं, समाजशास्त्रं, मनोविज्ञानं, मानवव्यवहारशास्त्रं, अर्थशास्त्रं, प्रबन्धनशास्त्रं, सङ्गणकीयं विज्ञानम् अनुप्रयोगश्च इत्यादीनाम् अधुनातनरूपेण सह संस्कृतज्ञानपरम्परायाम् एतत्सम्बद्धं यत् किमपि तथ्यं प्राप्यते तेन सह एतेषां भागोपभागरूपेण समावेशः वर्तते। अपि च एते अंशाः संस्कृतगिरा पाठ्यमानाः वर्तन्ते।***

***आधुनिकसंस्कृतसाहित्यस्यापि पाठ्यचर्यायां समावेशः स्यात्। (विवरणं देयम्।)***

**Answer:**

**संस्कृतमाध्यमेन पाठ्यमानाः भागोपभागाः**

केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा शास्त्रिपाठ्यक्रमः, आचार्यपाठ्यक्रमः, शिक्षाशास्त्रिपाठ्यक्रमः, शिक्षाचार्यपाठ्यक्रमः, प्रमाणपत्रीयपाठ्यक्रमः, पदविकापाठ्यक्रमः च सञ्चालिताः सन्ति। एतेषु पाठ्यक्रमेषु संस्कृत/शास्त्रीयविषयैः सह आधुनिकाः विषयाः अपि युक्ताः वर्तन्ते। भारतीयज्ञानपरम्परायाः ज्ञानेन सह विश्वविद्यालयस्य छात्राः आधुनिकविषयेषु नवाचारेषु च विशिष्टं ज्ञानं प्राप्नुयुः, तेन समाजे स्वातन्त्र्येण कालोचितं योगदानं कर्तुं च ते प्रभवेयुः इति उद्देश्येन तान् आधुनिकानपि विषयान् स्वीकृत्य विन्यस्तः पाठ्यक्रमः सञ्चालितो वर्तते। तद्विवरणमत्र क्रियते। शास्त्रिपाठ्यक्रमे चतुर्थपत्रं वैकल्पिकविषयकम्। तत्र एते विषयाः वर्तन्ते-

**1. इतिहासः**

**2. राजनीतिशास्त्रम्**

**3. समाजशास्त्रम्**

**4. अर्थशास्त्रम्**

शास्त्रिप्रतिष्ठापाठ्यक्रमे प्रतिसत्रार्धम् अन्तिमं पत्रं प्रगतसंस्कृतम्। तत्र वैकल्पिकं ई-संस्कृतमूलानि इति पत्रम्। शास्त्रिपाठ्यक्रमे धर्मशास्त्रविषये कौटिलीयम् अर्थशास्त्रम् इति पत्रं वर्तते। भारतस्य प्राचीनतमः अर्थशास्त्रीयः ग्रन्थः एषः स्वामी, अमात्यः, सुहृत्, कोषः, राष्ट्रम्, दुर्गः, बलम्, इत्येवंरूपेण देशस्य अष्टाङ्गव्यवस्थायाः प्रतिपादकः वर्तते। पुराणेतिहासविषये महाभारतम्- शान्तिपर्व इति विषयः निर्धारितो वर्तते। राजनैतिकाः बहवः अंशाः अत्र छात्राणाम् अत्यन्तोपयोगिनः वर्तन्ते। आचार्यपाठ्यक्रमे प्रतिसत्रार्धम् अन्तिमं पत्रं बहुवैकल्पिकं वर्तते । तत्र-

**1. संस्कृतशिक्षणाय अधिगमार्थञ्च सामग्र्युत्पादनम्**

2. **शारीरिकशिक्षा**

3. **संस्कृतसाहित्येतिहासः भाषाविज्ञानञ्च**

4. **संस्कृतं संस्कृतिश्च**

5. **प्राचीनभारतीयमनोविज्ञानम्**

6. **वर्णात्मकं भाषाविज्ञानम्**

7. **भारतीयरङ्गमञ्चः संस्कृतनाटकप्रस्तुतिश्च**

इतीमे विषयाः नवीनतया पाठ्यांशानां योजनेन सह निर्धारिताः समचाल्यन्त। विश्वविद्यालयद्वारा प्रचालिते शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च सत्रार्धपरीक्षायां उपरि निर्दिष्टानां विषयाणां पाठनम् अंशतः संस्कृतमाध्यमेन प्रावर्तत। सत्रार्धपरीक्षायाम् एतेषां विषयाणां लेखनमाध्यमः संस्कृतम्/हिन्दी/आङ्ग्लम् इति त्रिषु अन्यतमः। विश्वविद्यालयेन लेखनाय वैकल्पिकावसरः कल्पितो वर्तते। अधुनिकविषयाणाम् अध्यापकाः संस्कृतभाषां जानन्ति। एवञ्च हिन्दी-आङ्ग्लभाषामाध्यमेन सह अध्यापकाः यथाशक्ति संस्कृतमाध्यमेनापि अपाठयन्।

शिक्षाशास्त्रिपाठ्यक्रमे विषयाः संस्कृतमाध्यमेन अपाठ्यन्त। अस्मिन् पाठ्यक्रमे संस्कृतसम्बद्धाः शिक्षाविधिबोधकाः नैके विषयाः वर्तन्ते। तेषां विवरणम्-

प्रथमवर्षे

1. **दर्शनसमाजशाशास्त्रयोः परिप्रेक्ष्ये शिक्षा**

2. **अधिगमविकासयोः मनोविज्ञानम्**

3. **शिक्षणाधिगमयोः सूचना-सम्प्रेषनविधिः**

4. **भाषाशिक्षा**

5. **संस्कृतशिक्षणम्**

6. **आधुनिकविषयशिक्षणम्/ आधुनिकभाषाशिक्षणम्**

7. **शैक्षिकप्रबन्धनम् /नवीनशैक्षिकप्रवित्तयः**

द्वितीयवर्षे

1. **पाठ्यचर्या विद्यालयश्च**

2. **अधिगमाकलनम्**

3. **समसामयिकभारतम् शिक्षा च**

4. **शास्त्रशिक्षणम्**

5. **समावेशात्मकं शिक्षणम् तथा ( शान्तिशिक्षा / मानवाधिकारशिक्षा/ मूल्यशिक्षा/ शिक्षायां लैङ्गिकसमस्याः)**

शिक्षाचार्यपाठ्यक्रमे सत्रार्धप्रणाली अनुस्रियते। प्रथमे द्वितीये च सत्रार्धे प्रत्येकं पञ्च विषयाः अपाठ्यन्त। प्रथमसत्रार्धे-

1. **शैक्षिकप्रक्रियायां दर्शनशास्त्रम्**

2. **पारम्परिकसंस्कृतशिक्षा**

3. **शैक्षिकानुसन्धानम् आधारभूता सांख्यिकी च**

4. **शिक्षा शान्तिश्च/ दूरस्थशिक्षा**

5. **शैक्षिकं व्यावसायिकञ्च निर्देशनम्/ शैक्षिकम् आयोजनम् प्रशासनञ्च**

द्वितीयसत्रार्धे-

1. **शैक्षिकप्रक्रियायां समाजशास्त्रम्**

2. **शिक्षायां सूचनाविधिः सम्प्रेषणविधिश्च**

3. **ज्ञानम्, अधिगन्ता अधिगमप्रक्रिया च**

4. **मूल्यशिक्षा/प्रौढशिक्षा**

5. **समावेशात्मकशिक्षा/शैक्षिकप्रविधिः**

तृतीयसत्रार्धे-

1. **संस्कृतशिक्षायां नवीनप्रवृत्तयः**

2. **शैक्षिकानुसन्धानम् आनुमानिकसांख्यिकी च**

3. **तुलनात्मकशिक्षा/पर्यावरणशिक्षा तत्पुनरुद्धारश्च**

चतुर्थसत्रार्धे

1. **वैयक्तिकविकासार्थं मनोविज्ञानम्**

2. **अध्यापकशिक्षा**

3. **माध्यमिकशिक्षा/पाठ्यचर्याविकासः**

इतीमे विषयाः संस्कृतमाध्यमेन अपाठ्यन्त। एतेषां विषयाणां संस्कृतभाषायां पाठ्यांशाः निर्मिताश्च सन्ति।

शिक्षाशास्त्रिपाठ्यक्रमे शिक्षामनोविज्ञानम् इति विषयः वर्तते। शास्त्रिपाठ्यक्रमम् आचार्यपाठ्यक्रमं वा समापितवत्सु अशीतिप्रतिशतं छात्राः एनं पाठ्यक्रमं स्वीकृतवन्तः। अतः मनोविज्ञानस्य अध्ययनेन छात्राः अध्यापनाय अपेक्षितं विशिष्टं कौशलं सम्पादितवन्तः।

**आधुनिकसंस्कृतसाहित्यम्**

आचार्यपाठ्यक्रमे आचार्यचतुर्थसत्रार्धे 'प्रसिद्धकवयः प्रसिद्धपाश्चात्यसाहित्यकाराश्च' इति विषयके पत्रे आधुनिकानां कवीनां तत्कृतीनां च अध्ययनं प्रावर्तत। तत्र

- **भट्टमथुरानाथशास्त्री तत्कृतयः**
- **जानकीवल्लभशास्त्री तत्कृतयः**
- **बच्चूलाल अवस्थी तत्कृतयः**
- **राधावल्लभ त्रिपाठी तत्कृतयः**

इत्यादयः प्रमुखाः आधुनिकाः कवयः तेषां कृतयश्च पाठ्यक्रमे निर्धारिताः आसन्। एवम् आधुनिकसंस्कृतसाहित्यस्य निर्धारणेन भारतीयस्य काव्यसाहित्यस्य दीर्घपरम्परायाः परिचयं प्राप्तवतां छात्राणां कृते, साम्प्रतिकानां संस्कृते विद्यमानानां साहित्यप्रकाराणां परिचयः प्राप्तः । प्रसिद्धपाश्चात्यसाहित्यकारेषु अरस्तु, होरेसः, रिचर्ड, वर्डस्वर्थ काचे इत्यादीनां पाश्चात्यसाहित्यकाराणां तत्कृतीनां च सामान्यपरिचयः संस्कृतमाध्यमेन प्रादायि।

केन्द्रीयसंस्कृतविश्वविद्यायेन निर्धारितेषु पाठ्यक्रमेषु आधुनिकसाहित्यं स्वीकृतं वर्तते। शास्त्रिपाठ्यक्रमे षट्सु सत्रार्धेषु प्रतिसत्रार्धं चतुर्थपत्रं वैकल्पिकं भवति। तत्र हिन्दीसाहित्यम् इति विषयः अपि निर्धारितो वर्तते। हिन्दीसाहित्ये गद्यम्, कविता, नाटकम्, उपन्यासः,निबन्धः,आत्मकथा, संस्मरणम्, व्यङ्ग्यसाहित्यम्, यात्रासाहित्यम् इति साहित्यस्य विविधप्रकारकाः पाठ्यविषयत्वेन स्वीकृताः सन्ति। नागार्जुनः, भवानीप्रसाद मिश्रः, केदार नाथ अग्रवालः, मोहन राकेशः, प्रेमचन्द,अमरकान्तः, उषा प्रियंवदा, मन्नू भण्डारी इत्यादीनां साहित्यं स्वीकृतं वर्तते।

शास्त्रिपाठ्यक्रमे षट्सु सत्रार्धेषु प्रतिसत्रार्धं भाषारूपेण हिन्दी/प्रान्तीयभाषा इति निर्धारितं विद्यते। तत्र प्रान्तीयभाषा इति वैकल्पिके पत्रे भाषासु विकल्पाः सन्ति। बङ्गला, उडिया, नेपाली, डोगरी, मलयालम्, मणिपुरी, तमिल, कन्नड इत्येतासां भाषाणां प्राचीन-आधुनिकसाहित्यं पाठ्यक्रमे स्वीकृतं वर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| List of units and sub-units of the modern subjects | View Document |
| Any additional information | View Document |

**1.4 Feedback System**

***1.4.1 Structured feedback received from***

- ***1) Students***
- ***2) Teachers***
- ***3) Employers***
- ***4) Alumni***

***for design and review of syllabus Semester wise /year-wise***

***अर्धसत्रप्रणाल्याः, वार्षिकसत्रप्रणाल्याः वा पाठ्यविवरणसंरचनार्थं समीक्षार्थञ्च संरचिता प्रतिपुष्टिः स्वीक्रियते -***

- ***१. छात्रेभ्यः***
- ***२. अध्यापकेभ्यः***
- ***३. नियोजकेभ्यः***
- ***४. पूर्वच्छात्रेभ्यः***

**Answer:** A. All 4 of the above अ.उपरि निर्दिष्टेषु सर्वे चत्वारः

| File Description | Document |
|---|---|
| As per Data Template | View Document |
| Any additional information (Upload) | View Document |
| Action taken report of the Institution on feedback report as stated in the minutes of the Governing Council, Syndicate, Board of Management (Upload) | View Document |

| | |
|---|---|
| URL for stakeholder feedback report | View Document |

***1.4.2 Feedback processes of the institution may be classified as follows:***

***संस्थायाः प्रतिपुष्टिप्रक्रिया अधोलिखितक्रमेण विभज्य दर्श्यते–***

**Answer:** A. Feedback collected, analysed, action taken and available on website 1. प्रतिपुष्टिः सङ्गृहीता, विश्लेषिता, क्रियान्विता, जालस्थाने उपलभ्यते च।

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| URL for feedback report | View Document |

***1.4.3 The feedback thus obtained is***

- ***Discussed in the Statutory Bodies of the Institution like Academic Council/ Executive Council etc.***
- ***Is used for restructuring the curriculum***
- ***Discussed with Traditional scholars/ Peers***

***इत्थं सङ्गृहीता प्रतिपुष्टिः -***

- ***संस्थायाः विद्वत्परिषदि/ शासिपरिषदि/ न्यायसभायाम्/ अन्येषु प्राधिकारेषु चर्चिता।***
- ***पाठ्यचर्यायाः पुनः निर्माणाय उपयुज्यते।***
- ***पारम्परिकैः विद्वद्भिः प्रवरगणैः वा सह चर्चिता।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः स्वकीयहितधारकेभ्यः प्रतिपुष्टिं संगृह्य  पाठ्यचर्यायाः निर्माणे प्रतिपुष्टेः प्रयोगं करोति । बहुपरिसरीयस्य अस्य विश्वविद्यालयस्य  कार्याणि विविधपरिषद्द्वारा प्रवर्तन्ते। विविधेभ्यः हितधारकेभ्यः युगानुरोधेन प्रतिपुष्टिं स्वीकर्तुं प्रतिपुष्टेः स्वरूपंनिर्धार्यितुं विशेषज्ञैः मार्गदर्शनं प्राप्तम्।

- **विगतपञ्चवर्षाणां 2017 तः 2022 पर्यन्तं विविधसान्दर्भिकप्रश्नानुसारं विविधेभ्यः हितधारकेभ्यः युगानुरोधेन प्रतिपुष्टिं संकलय्य पाठ्यचर्यायाम् आवश्यकतानुगुणं परिवर्तनानि विहितानि।**
- प्रतिपुष्टेः प्रत्येकं हितधारकेभ्यः (छात्त्रेभ्यः,अध्यापकेभ्यः, पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तस्य दत्तांशस्य विशुद्धिं विधाय पुनरावृत्तिदोषान् निवार्य वैज्ञानिकरीत्या व्यवस्थीकरणं कृतम्। प्राप्तदत्तांशाना विद्वत्परिषदि चर्चां विधाय अनुमोदनं प्राप्तम्।
- विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्टेः सम्बद्धविशेषज्ञैः साकं चर्चासत्रेषु विमर्शान् कृत्वा बहुमूल्यानि मन्तव्यानि , संस्तुतयः संकलितानि। सर्वेषामपि मन्तव्यानां,संस्तुतीनां व्यावहारिकप्रयोगं विश्वविद्यालयीय पाठ्यचर्यासु पाठ्येतरक्रियासु कर्तुं संस्थागत- सर्वेषु अपि स्तरेषु चिन्तनं विहितम्। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टेः प्रयोगं विविधनीतिनिर्माणकार्येषु साहाय्यं करोति।   विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः अस्माकं सर्वेषामपि परिसराणां युगानुरूपं परिवर्तनानि संशोधनानि सूचयति।
- विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः राष्ट्रिय-अध्यापक-शिक्षा-परिषदः निर्णयान् शिक्षाशास्त्रि- शिक्षाचार्यकक्षासु क्रियान्वयनं कर्तुं सूचयति।
- विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः राष्ट्रिय-शैक्षिक-अनुसन्धान-परिषदः निर्णयान्  प्राक्-शास्त्रिकक्षासु  क्रियान्वयनं कर्तुं  सूचयति।
- विविधहितधारकेभ्यः प्राप्तप्रतिपुष्ट्यनुगुणं प्राक्शास्त्रि- शास्त्रिकक्षासु  संगणकविज्ञानपाठ्यक्रमः छात्त्रेभ्यः अनिवार्यरूपेण  योजितः।

- विविधहितधारकेभ्यः प्राप्तप्रतिपुष्ट्यनुगुणं शास्त्रिकक्षासु पर्यावरणविज्ञानपाठ्यक्रमः छात्त्रेभ्यः योजितः। छात्त्रेषु पर्यावरणस्य जागरूकता सम्पादनाय , वायु-जल-ध्वनिप्रदूषणं दूरीकर्तुं सतर्कता समुत्पादनाय पर्यावरणविज्ञानपाठ्यक्रमः प्रासङ्गिकः वर्तते।
- शैक्षणिकपरिषदः उपवेशने विविधहितधारकेभ्यः (अध्यापक-छात्त्र-पूर्वछात्त्र-वृत्तिदातृभ्यः) प्राप्तप्रतिपुष्टेः चर्चा कृता । ततः परिषदः सर्वे सदस्याः स्वकीयमतानि स्थापितवन्तः। उपवेशने निर्दिष्टेषु बिन्दुषु चर्चा विहिता । एतत्परिपाटीम् अनुसृत्य गतपर्यये पाठ्यक्रमाणां नवीकरणम्, परिवर्तनम्, परिवर्धनम्, इत्यादयः विषयाः शैक्षणिकपरिषदः पुरतः उपास्थाप्यन्त। अपेक्षानुगुणं कार्यपरिषदः अनुशंसां स्वीकृत्य कार्यान्वयः कृतः। आदौ परिसरेभ्यः आगताः अभिप्राया अपि परिगृहीताः। मुक्तरूपेण चर्चा विहिता। परिषदः निर्णयानुसारं तन्निर्देशम् अनुसृत्य विश्वविद्यालयः कार्यम् अकरोत्।
- विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्टेः विश्लेषणं व्यावहारिकसंस्तुतयश्च कार्यपरिषदि, योजना-नियन्त्रणमण्डल्यां, वित्तसमितौ, शैक्षणिकपरिषदि, परीक्षामण्डल्यां, केन्द्रीयानुसन्धान-मण्डल्यां, प्रकाशनसमितौ, प्रशासनसमितौ इत्यादिषु प्रेष्यते विचार्यते च । शैक्षिकाणि, प्राशासनिकानि, आनुसन्धानिकानि, प्राकाशनिकानि च कार्याणि विश्वविद्यालयस्य प्रगतेः साक्षात् सूचकानि भवन्ति। क्रियाशीलाः इमाः परिषदः निर्दिष्टानां कार्याणां निर्वाहे विशिष्टम् अनुभवम् आवहन्ति। विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तप्रतिपुष्टेः इमाः परिषदः प्रयोगं कुर्वन्ति।
- विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तप्रतिपुष्टेः निर्णयाय शैक्षणिकपरिषद् एव मुख्या भवति। तस्याः परिषदः अङ्गीकारात्परं प्रतिपुष्टेः निर्णीतस्य प्रकल्पस्य क्रियान्वयः क्रियते। शैक्षणिकपुरोगतिं प्राप्य विश्वविद्यालयः अन्यसंस्थाभिः सह स्पर्धितुम् ईहते। प्रतिपुष्टेः प्रयोगः पाठ्यक्रमरचनादिषु शैक्षिककार्येषु अविलम्बं लक्ष्यपूर्तये अध्ययनमण्डलीं रचयितुं इयं परिषत् प्रोत्साहयति अनुमन्यते च। अध्ययनमण्डलीद्वारा अङ्गीकृतं निर्णयं परिशीलयति। अपेक्षानुगुणं परिष्कारं सूचयति। शैक्षणिकनिर्णयाः पूर्णतया छात्रकेन्द्रिताः छात्रप्रियाश्च भवेयुः, तदर्थं शैक्षणिकपरिषद् सततं तत्परा भवति। परिषदः कार्यतन्त्रस्य लक्ष्यं भवति अधीतशास्त्राः स्पर्धात्मके जगति अनतिश्रमेण उद्योगं लभेरन् इति।
- शैक्षणिकपरिषद् अध्ययनमण्डली एते उभे अपि सहयोगेन विश्वविद्यालयस्य शैक्षणिकीं कार्यप्रणालीं कुरुतः। विश्वविद्यालयस्य सर्वाङ्गिकविकासे तयोः उभयोः कार्ययोजना, काले अङ्गीक्रियमाणः निर्णयः, स्थाने दीयमाना प्रतिपुष्टिः च विशिष्टां भूमिकां वहति। विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तस्य प्रतिपुष्टेः प्रयोगः समाजस्य अध्येतृणां च अपेक्षाः सूक्ष्मं विज्ञाय शैक्षिकनिर्णयानां क्रियान्वयः कर्तव्यो भवति। यतः स एव परिसरेषु परिणामजनकः भवति। शिक्षाशास्त्रिपाठ्यक्रमस्य शिक्षाचार्यपाठ्यक्रमस्य च शैक्षिककार्याणि NCTE नियमावल्याधारेण प्रवर्तन्ते। प्राक्शास्त्रिपाठ्यक्रमस्य तानि कार्याणि NCERT नियमावल्याधारेण प्रवर्तन्ते। विश्वविद्यालयस्य शैक्षणिकपरिषद् अनयोः संस्थयोः नियमान् परिशीलयति। तदविरोधेन विश्वविद्यालयस्य उद्देश्यं साधयितुं कार्ययोजनां करोति।
- केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वेषु परिसरेषु प्रत्येकं विभागीय भौतिकमाध्यमेन अपि छात्त्रेभ्यः प्रतिपुष्टेः संग्रहणं कृतमस्ति। इत्थं स विविधहितधारकेभ्यः (अध्यापकेभ्यः,छात्त्रेभ्यः,पूर्वछात्त्रेभ्यः,नियोजकेभ्यः) प्राप्तस्य प्रतिपुष्टेः प्रयोगः विशिष्य छात्त्रेभ्यः विश्वविद्यालयस्य कल्याणाय कल्पते।
- शैक्षणिकपरिषदः अध्ययनमण्डल्याः च विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्ट्याधारेणैव विश्वविद्यालयः पाठ्यपत्रं निर्धारयति। प्राक्शास्त्रिपाठ्यक्रमे शास्त्रिपाठ्यक्रमे च अनिवार्यपत्रत्वेन सङ्गणकविज्ञानम् योजितम्। अद्यत्वे सङ्गणकविज्ञानं सर्वत्र औद्योगोकक्षेत्रेषु अनिवार्यतया अपेक्षितम् अस्ति। तेन संस्कृतपदवीधराणाम् औद्योगिकक्षेत्रस्य विस्तारः अभवत्।
- शास्त्रिपाठ्यक्रमे पर्यावरणविज्ञानम् इति पत्रं योजितम्। समाजस्य प्रतिपुष्ट्यनुसारं शैक्षिकपरिषदः क्रियान्वयनस्य इदम् अन्यदुदाहरणम्। अस्य पत्रस्य अध्ययनेन बहूनि प्रयोजनानि वर्तन्ते। पर्यावरणस्य सन्तुलनायाः रक्षणम्, प्रदूषणस्य नियन्त्रणम्, शुद्धस्य वायोः जलस्य च महत्त्वम् इत्यादीन् अनेकान् विषयान् अध्येतारः अवगच्छन्ति। पत्रमिदं सस्यारोपणे प्रेरणां ददाति, वृक्षच्छेदनाद् निवृत्तौ प्रेरणां ददाति। आत्मानं परितः स्वच्छतायाः रक्षणे उत्साहं वर्धयति। परिसरेषु सुन्दरोद्यानस्य निर्माणं प्रोत्साहयति। हरिद्वनोद्देशः परिसरेषु सर्वेषां सदस्यानां मनसः उल्लासं वर्धयति।

विश्वविद्यालयस्य मुक्तस्वाध्यापीठस्य सर्वे शैक्षणिककार्यक्रमाः पाठ्यक्रमाः च विविधहितधारकेभ्यः प्रतिपुष्टिम् अनुसृत्य प्रवर्तन्ते प्रवर्धन्ते च।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload the Minutes of the Academic Council/ Executive Council etc. | View Document |
| Any additional information | View Document |

**2.Teaching-learning and Evaluation**

**2.1 Student Enrollment and Profile**

***2.1.1 Average variation in enrolment of learners in the DDE during the last five years***

***विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालये अध्येतॄणां नामाङ्कने परिवर्तनस्य मध्यमानम्।***

**Answer:** 27

2.1.1.1 Number of learners newly enrolled at DDE year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालये नूतनतया नामाङ्कनं कृतवताम् अध्येतॄणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 1 | 1 | 763 | 713 | 840 |

| File Description | Document |
|---|---|
| Total enrolment data year wise authenticated by Registrar of the University | View Document |
| Data Template | View Document |
| Any other relevant information | View Document |

***2.1.2 Demand Ratio***

***अभियाचनायाः अनुपातः***

**Answer:** 133.74

2.1.2.1 Number of eligible applications received for admissions to all the Programmes year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रचालितेषु सर्वेषु कार्यक्रमेषु प्राप्तार्हतानाम् आवेदनपत्राणां वार्षिकक्रमेण सम्पूर्णा सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 4733 | 4187 | 3715 | 5919 | 2522 |

2.1.2.2 Number of seats available year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् उपलब्धानां स्थानानां सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 3324 | 3228 | 3087 | 3043 | 3077 |

| File Description | Document |
|---|---|
| Institutional Data as per data template | View Document |
| Any additional information | View Document |

***2.1.3 Percentage of seats filled against seats reserved for various categories (SC, ST, OBC, Divyangjan, EWS etc.) as per applicable reservation policy during the last five years***

***विगतेषु पञ्चसु वर्षेषु, आरक्षणनीत्यनुसारेण, नानाप्रवर्गेभ्यः (अनुसूचितजातिः, अनुसूचितजनजातिः, अन्य-अप्रगतजातिः, दिव्याङ्गजनाः, आर्थिकदृष्ट्या दुर्बलाः इत्यादयः) निर्दिष्टेषु आरक्षितस्थानेषु, सम्पूरितानाम् आरक्षितस्थानानां प्रतिशतं मानम्।***

**Answer:** 55.15

2.1.3.1 ***Number of actual students admitted from the reserved categories year-wise during the last five years.***

**विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् आरक्षितप्रवर्गेभ्यः प्राप्तप्रवेशानां छात्राणां सङ्ख्या।**

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 1046 | 1085 | 970 | 1002 | 1006 |

2.1.3.2 Number of seats earmarked for reserved category as per GOI/State Govt. rule year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु  भारतशासनस्य अथवा राज्यशासनस्य नियमानुरूपम् आरक्षितप्रवर्गेभ्यः निर्दिष्टानां स्थानानां वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 2076 | 2037 | 1931 | 1616 | 1603 |

| File Description | Document |
|---|---|
| Average percentage of seats filled against seats reserved (Institutional data as per Data Template) | View Document |
| Any additional information | View Document |

**2.2 Catering to Learner Diversity**

***2.2.1 The institution assesses the learning levels of the students, after admission and organises special programmes (including Tour programs/ Gurukulas/ spoken Sanskrit shibirams/ camps/ workshops/ Science Appreciation/ Program of Karmakanda/  Communication (Oral and written) workshops/ Cultural musuem visits and manuscript liabraries/ summer schools etc.) for advanced learners and slow learners.***

***संस्था छात्राणां प्रवेशात्परं तेषाम् अधिगमस्तरं निरीक्षते अपि च प्रगताध्येतॄणां मन्दाध्येतॄणां च कृते विशिष्टान् कार्यक्रमान् च आयोजयति। (तत्र कार्यक्रमेषु पर्यटनकार्यक्रमाः/ गुरुकुलं प्रति पर्यटनं/ संस्कृतसम्भाषणशिबिराणि/ आवासीयशिबिराणि/ कार्यशालाः/ विज्ञानकप्रशंसाः/ कर्मकाण्डकार्यक्रमाः/ संवादकार्यशालाः (मौखिक्यः लिखिताः च)/ सांस्कृतिकसङ्ग्रहालयं प्रति हस्तलेखागारं प्रति च यात्रा/ ग्रीष्मकालिकशिबिराणि इत्यादीनि अन्तर्भवन्ति।)***

**Answer:**

अधिगमस्तरभेदेन छात्राः प्रगताध्येतारः, मध्यमाध्येतारः, मन्दाध्येतारः च भवन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा प्रचाल्यमाने शास्त्रिपाठ्यक्रमे, आचार्यपाठ्यक्रमे च  **छात्राः शैक्षिकार्हतानुसारं रुच्यनुगुणं च पाठ्यक्रमं स्वीकर्तुम् अर्हन्ति।**

विश्वविद्यालयः संस्कृत/शास्त्राध्ययनार्थं छात्राणां विविधं सौविध्यं कल्पयति। छात्राः स्वीयानुकूलतानुगुणं विश्वविद्यालयस्य द्वादशपरिसरेषु अन्यतमं परिसरं चिन्वन्ति। प्रत्येकं परिसरे विभिन्नराज्यानां छात्राः प्रवेशं प्राप्नुवन्ति। तेषां मातृभाषा भिद्यते। एवं विविधान् अंशान् परिगणय्य विश्वविद्यालयः छात्राणाम् अधिगमस्तरवृद्ध्यर्थं सोपानक्रमेण अनेकान् कार्यक्रमान् आयोजयति।

मन्दाध्येतॄणां छात्राणां कृते-

1. **संस्कृतसम्भाषणकौशलपाठ्यक्रमः** शास्त्रिपाठ्यक्रमे प्रवेशं प्राप्तवतां छात्राणां कृते प्रवेशसमनन्तरं विश्वविद्यालयः, प्रत्येकं परिसरे संस्कृतसम्भाषणशिबिरम् आयोजयति। संस्कृतभाषया अपरिचिताः छात्राः दशदिनात्मके तस्मिन् शिबिरे भागं गृहीत्वा सरलसंस्कृतसम्भाषणकौशलं अभ्यस्यन्ति।
2. **शब्दभण्डारवर्धनम्** भाषणे पाटवसम्पादनार्थं संस्कृतषायाः शब्दराशिः अपेक्ष्यते। अपेक्षितानां शब्दानां सङ्ग्रहार्थं प्रतिदिनम् एका कक्ष्या प्रकल्पिता वर्तते। तत्र शब्दरूपाणि, धातुरूपाणि, अमरकोषश्च पाठ्यन्ते। एकमासावधौ प्रचाल्यमानायाम् अस्यां कक्ष्यायाम् उपस्थिताः मन्दाधिगन्तारः एतत्प्रयोजनं लभन्ते।
3. **संस्कृतमाध्यमेन पाठनम्** विश्वविद्यालयस्य अध्यापनमाध्यमः संस्कृतम्। छात्राः प्रत्येकं कक्ष्यायां संस्कृतं शृण्वन्तः भाषापाटवं प्राप्नुवन्ति।  तथापि मन्दाधिगन्तॄणां शास्त्रविषयेषु अधिगमाय दशप्रतिशतं हिन्दी/आङ्ग्लभाषायामपि पाठ्यते।
4. **आन्तरिकमूल्याङ्कनम्**  प्रतिपत्रम् एकैकस्य भागस्य समाप्तेः परं छात्राः परीक्ष्यन्ते। तेन तत्तद्विषये  छात्रस्य अधिगमस्तरः ज्ञायते।
5. **सत्रीयपरीक्षा** विश्वविद्यालयस्य सत्रीयपरीक्षाद्वारा छात्राणां स्तरः ज्ञायते। विभिन्नपाठ्यक्रमेषु पठतां तेषां स्तरे ज्ञाते सति मन्दाध्येतॄणां स्तरवर्धनाय उपायाः विभिन्नाः विधीयन्ते।
6. **सुज्ञानकक्ष्या** मन्दाधिगन्तॄणां कृते पृथक्तया अपेक्षानुसारं कक्ष्याः स्वीक्रियन्ते। कक्ष्यायाः स्वीकारात् प्राक् पश्चात् च तेषां स्तरस्य परीक्षा क्रियते। स्तरे उन्नतिम् अप्राप्तवतां मन्दाध्येतॄणां पुनः परिश्रमार्थं मार्गदर्शनं क्रियते।
7. **वाग्वर्धिनी परिषत्** परिषद्द्वारा साप्ताहिकम् अधिवेशनं प्रचाल्यते। छात्राः अधीतस्य संस्कृतस्य शास्त्रस्य वा कञ्चिद्विषयम् अवलम्ब्य भाषन्ते। अध्यापकाः तैः भाषिते विषये प्रश्नान् पृच्छन्ति। छात्राः समादध्युः। अन्यथा अध्यापकाः समाधानमुक्त्वा छात्रं तद्विदं कुर्वन्ति।
8. **दत्तकार्यम्**  विश्वविद्यालयद्वारा आन्तरिकमूल्याङ्कनाङ्गतया दत्तकार्यं प्रकल्पितं वर्तते। अध्यापकाः पाठिते विषये दत्तकार्यं ददति। मन्दाध्येतारः छात्राः निर्दिष्टे काले दत्तकार्यं विधाय अधिगमस्य स्तरोन्नतिं प्राप्नुवन्ति।

प्रगताध्येतॄणां छात्राणां कृते-

1. **वाक्यार्थपरिषत्** परिसरीयाः अध्यापकाः शास्त्रीयम् एकं विषयम् अवलम्ब्य आदर्शरूपेण वाक्यार्थं कुर्वन्ति। परिषदः अधिवेशने उपस्थिताः छात्राः शास्त्रवाक्यार्थप्रणालीम् अभ्यस्यन्ति। विश्वविद्यालयस्य केषुचित्परिसरेषु इयम् अधिगमप्रणाली प्रवर्तते।

2. **स्पर्धानाम् आयोजनम्** काले काले शैक्षिकाः सांस्कृतिकाश्च विविधाः स्पर्धाः आयोज्यन्ते। भारतीयविद्यास्थानानां बोधदार्ढ्याय स्फूर्तिस्पर्धा आयोज्यते। अग्रसराध्येतारः छात्राः तत्र भागमूढ्वा प्रयोजनं लभन्ते।
3. **विशिष्टव्याख्यानम्** सर्वेषु परिसरेषु विशिष्टव्याख्यानानि आयोज्यन्ते। शास्त्राणां, संस्कृतभाषायाः, भारतीयसंस्कृतेः अन्येषु मौल्यप्रतिपादकेषु विषयेषु व्याख्यानानि आयोजितानि भवन्ति। आमन्त्रिताः विशिष्टाः विद्वांसः व्याख्यानं विदधति। छात्राः तत्र लाभं प्राप्नुवन्ति।
4. **प्रतियोगितासु मार्गदर्शनम्** शैक्षिक/सांस्कृतिक/क्रीडास्पर्धासु राज्यस्तरीयासु राष्ट्रस्तरीयासु भागग्रहणाय मार्गदर्शनं क्रियते। छात्राः बहिः प्रवर्तमानासु प्रतियोगितासु सोत्साहं भागं गृह्णन्ति। भागग्राहिभ्यः छात्रेभ्यः विश्वविद्यालयपक्षतः मार्गव्ययः दीयते।
5. **प्रोत्साहनम्/अभिप्रेरणा** राज्यस्तरीय/राष्ट्रस्तरीयस्पर्धासु प्राप्तपुरस्काराणां छात्राणां विश्वविद्यालयपक्षतः परिसरे अभिनन्दनं क्रियते। सामाजिकजालपुटेषु वार्ता प्रसार्यते। विश्वविद्यालयस्य पत्रिकायां संस्कृतवार्ता इत्यत्र पुरस्कारवृत्तान्तः प्रकाश्यते। एतादृशैः उत्साहवर्धकैः कार्यैः अन्येऽपि छात्राः प्रेरिताः भविष्यन्ति।
6. **सभासञ्चालनम्** विश्वविद्यालस्य परिसरेषु विविधकार्यक्रमाणां सञ्चालनं स्वागतकथनम्, धन्यताविष्करणम् इत्यादिकौशलं प्राप्तुम् अवसरः कल्प्यते।
7. **आवासीयशिबिरम्** लेखनकौशलवर्धनाय आवासीयशिबिरं चाल्यते।
8. **महाविद्यालयीयच्छात्रवर्गः** अस्मिन् वर्गे संस्कृते भाषणम्, लेखनम्,पाठनम् इत्यादिविषयेषु प्रशिक्षणं दीयते। अवकाशकाले अयं छात्रवर्गः आयोज्यते। इच्छिकाः छात्राः लाभं प्राप्नुवन्ति।
9. **शास्त्रार्थप्रशिक्षणवर्गः** छात्रेषु शास्त्रीयं विशिष्टं ज्ञानम् आधातुं विश्वविद्यालयद्वारा शास्त्रार्थप्रशिक्षणवर्गः आयोज्यते। परिसरस्तरे चिताः अग्रसराध्येतारः छात्राः प्रशिक्षणवर्गे भागं गृह्णन्ति।
10. **प्रशिक्षणवर्गेषु भागग्रहणार्थं प्रोत्साहनम्** अन्यसंस्थाद्वारा प्रचाल्यमानेषु भाषाबोधनवर्गः, वेदशिक्षणम्, शास्त्रार्थप्रशिक्षणवर्गः, सम्भाषणशिबिरम् इत्यादिप्रशिक्षणवर्गेषु भागग्रहणाय छात्राणां कृते अवसरः कल्प्यते। भागग्राहिभ्यः मार्गव्ययः दीयते।
11. **तन्त्रांशनिर्माणप्रशिक्षणम्** शास्त्रग्रन्थानां app निर्माणे तन्त्रांशनिर्माणे च छात्राणां कृते प्रशिक्षणं दीयते। छात्राः विविधग्रन्थानां संस्कृतसम्बन्धिनः तन्त्रांशान्, Android App च निर्मातुं कौशलं प्राप्नुवन्ति।
12. **प्रवेशपरीक्षाणां मार्गदर्शनम्** विशिष्टाध्ययनार्थम् विभिन्नपाठ्यक्रमेषु प्रवेशं लब्धुं NET, SET/SLET, PSST, PVVT इत्यादिपरीक्षासु छात्राणां कृते मार्गदर्शनं क्रियते। विश्वविद्यालयीयस्य छात्राः स्नातक/ स्नातकोत्तरपाठ्यक्रमस्य अवधौ एतन्मार्गदर्शनं प्राप्य उन्नताध्ययने प्रवेशं लभन्ते।
13. **लघुचलच्चित्रनिर्माणे मार्गदर्शनम्** संस्कृते लघुचलच्चित्रनिर्माणार्थम् अवसरः कल्प्यते। विश्वविद्यालयः युवमहोत्सवे लघुचलच्चित्रस्पर्धाम् आयोजयति। तत्र छात्रैः निर्मितानां चलच्चित्राणां प्रदर्शनं भवति। चितानि चित्राणि पुरस्क्रियन्ते।
14. **पर्यटनकार्यक्रमाः** छात्राणां विशिष्टानुभवप्राप्तये विश्वविद्यालयः पर्यटनकार्यक्रमान् आयोजयति। २०२० तमे वर्षे प्रतिपरिसरं छात्राः इतरविश्वविद्यालयं प्रति पर्यटनाय सूचिताः आसन्। **सपद्येव Covid 19 विषमस्थितेः कारणेन तत् न शक्तम्।**

मन्दाध्येतृणाम् प्रगताध्येतृणाञ्च छात्राणां स्तरोन्नयनाय विभिन्नाः कार्ययोजनाः विश्वविद्यालयद्वारा अनुष्ठीयन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***2.2.2 Student - Full time teacher ratio (Data for the latest completed academic year)***

***छात्राणां पूर्णकालिकाध्यापकानां च अनुपातः (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 13.13

| File Description | Document |
|---|---|
| Any additional information | View Document |

**2.3 Teaching- Learning Process**

***2.3.1 Student centric methods, such as experiential learning, participative learning and learning through dialogue mode and use of hermeneutics in the teaching of knowledge texts and Kavyas, problem solving methodologies are used for enhancing learning experiences***

***अनुभवात्मकः अधिगमः, सहभागी अधिगमः, संवादपद्धत्या अधिगमः इत्यादयः छात्रकेन्द्रितविधयः, वादपद्धत्या शिक्षणं, शास्त्राणां काव्यानां च पाठने टीकाभाष्यादिपद्धतयः समस्यापरिष्कारविधिविज्ञानानि च अधिगमानुभवसमभिवर्धनाय उपयुज्यन्ते।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा मुख्यतया **शास्त्रिपाठ्यक्रमः शास्त्रिप्रतिष्ठापाठ्यक्रमः, आचार्यपाठ्यक्रमश्च** सञ्चाल्यते। पाठ्यक्रमेषु तेषु इमे शास्त्रीयाः विषयाः निर्दिष्टाः सन्ति। १.नव्यव्याकरणम् २.प्राचीनव्याकरणम् ३.साहित्यम् ४.सिद्धान्तज्यौतिषम् ५.फलितज्यौतिषम् ६.सर्वदर्शनम् ७.धर्मशास्त्रम् ८.पुराणेतिहासः ९.वेदः १०.पौरोहित्यम् ११.जैनदर्शनम् २.बौद्धदर्शनम् १३. सांख्ययोगः १४. नव्यन्यायः १५. प्राचीनन्यायवैशेषिकम् १६.मीमांसा १७.अद्वैतवेदान्तः, काश्मीरशैवदर्शनम् ।

भारतीयज्ञानशाखानाम् एतासां सुदीर्घा अध्ययन-अध्यापनपरम्परा वर्तते। गुरुः शिष्यस्य स्तरं जानानः एव अध्याप्यं विषयं उचितेन विधिना अध्यापयति, काले पर्यवेक्षते, परीक्षते च । तत्र छात्रकेन्द्रिताः विधयः -

1. **अनुभवात्मकः अधिगमः** साहित्ये शृङ्गारादिरसानां परिचयः कक्ष्यायां प्राप्यते। वैद्युतफलके प्रदर्श्यमानानि रूपकाणि दृष्ट्वा छात्राः अनुभवद्वारा रसज्ञानं प्राप्नुवन्ति। विश्वविद्यालयेन प्रतिवर्षम् आयोज्यमानः संस्कृतनाट्यमहोत्सवः साक्षात् अनुभवात्मकाधिगमाय अवसरं कल्पयति। फलितज्यौतिषे जातकस्य कुण्डल्यां फलादेशविचारः पाठ्यते। छात्राः स्वानुभवेन सह फलादेशविधानम् अभ्यस्यन्ति।
2. **साहचर्याधिगमः** 'पादं सब्रह्मचारिभ्यः' अतः छात्राः सहभागिभिः सह पाठ्यांशम् अवगच्छन्ति। नव्यव्याकरणे पाठितं सूत्रं सहाध्यायिनः मिथः चिन्तनं कुर्वन्ति। सिद्धान्तज्यौतिषगणितीयप्रक्रियां सम्भूय अभ्यस्यन्ति। एवं फलितज्यौतिषे सांख्ययोगे, मीमांसायाम्, अद्वैतवेदान्ते च द्वयोः त्रयाणां वा समूहं निर्माय एकैकस्य समूहस्य कृते एकैकः विषयः दीयते। तं समूहशः अभ्यस्यन्ति।
3. **श्रवणपूर्वकः अधिगमः** कक्ष्यायां विशेषावधानपूर्वकं श्रोतुं सूचना दीयते। अल्पसमयापेक्षी विषयः अध्यापकेन पाठ्यते। छात्रैः ऐकाग्र्येण श्रूयते।
4. **मननाधिगमः** युक्तिभिः चिन्तनं मननम्। न्याये, साहित्ये, वेदान्ते मीमांसायां सांख्ययोगे व्याकरणे बौद्धदर्शने च छात्राः **मननाधिगमस्य** अवसरं प्राचुर्येण प्राप्नुवन्ति। हेत्वाभासः, रसः, भावना, स्फोटः इत्यादीन् प्रमेयान् मननेन अधिगच्छन्ति।
5. **स्वाध्यायाधिगमः** शास्त्रेषु विद्यमानाः विषयाः पाठिता भवन्ति। ततः तत्संवादिनः विषयान् बोद्धुं छात्राः सूच्यन्ते। स्वाध्यायेन ते छात्राः तं विषयम् अवगच्छन्ति। व्याकरणे रामशब्दस्य प्रक्रियापाठनात्परम् अकरान्तपुल्लिङ्गशब्दान् कृष्ण इत्यादीन् स्वाध्यायेन अधिगच्छन्ति। एवं साहित्ये काव्यस्य, ज्यौतिषे मुहूर्तग्रन्थस्य च **स्वाध्यायाधिगमः** प्रवर्तते।
6. **परिसंवादपूर्वकः अधिगमः** छात्राः कक्ष्यायां सहाध्यायिभिः सह अध्यापकेन सह वा परिसंवादं कुर्वन्ति। साहित्ये अभिज्ञानशाकुन्तलस्य पाठ्यांशानां संवादं कुर्वन्ति। वेदान्ते कठोपनिषदं **संवादात्मकतया** पठन्ति। एवं नाटकेषु विविधप्रसङ्गान्, शास्त्रेषु पूर्वपक्ष-उत्तरपक्षरूपेण वाक्यार्थांश्च अनेन विधिना अभ्यस्यन्ति।
7. **अवलोकनात्मकाधिगमः** एषः अधिगमः सर्वेषु उपरिनिर्दिष्टेषु विषयेषु प्रवर्तते। यथा ज्यौतिषे चन्द्रग्रहणादिविचारः। वेदे मन्त्राणाम् अनुवाकः। पाठ्यांशेन संबद्धान् अन्यान् विषयान् यूट्यूब् इत्यादिजालस्थानेषु अवलोकयन्ति।
8. **प्रश्नविधिः** एषः प्राचीनः विधिः। प्रश्नोपनिषदि 'ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छत, यदि विज्ञास्यामः, सर्वं ह वो वक्ष्याम' इति निर्देशः लभ्यते।कालांशे कश्चन समयः छात्राणां जिज्ञासोपशमनाय निर्दिष्टो भवति। छात्राः प्रश्नान् पृच्छन्ति। पाठितस्य विषयस्य पठनसमये उत्पन्नान् प्रश्नान् अग्रिमकालांशे पृच्छन्ति। ततः

अध्यापकात् समाधानं प्राप्नुवन्ति। वाग्वर्धिनीपरिषदि छात्र-अध्यापकयोः मध्ये प्रवर्तमानेन **प्रश्नोत्तरमाध्यमेन** शास्त्रीयं विषयम् अवगच्छन्ति।

9. **प्रयोगपूर्वकः अधिगमः** साहित्ये नाटकस्य, ज्यौतिषे फलादेशविचारस्य, पौरोहित्ये कर्मकाण्डस्य च योगशास्त्रे आसनानां **प्रयोगपूर्वकं** ज्ञानं सम्पाद्यते।

**अध्यापनविधयः**

1. **वादविधिः** वादे वादे जायते तत्त्वबोधः। शास्त्रीयग्रन्थेषु दर्शनग्रन्थेषु च प्रमेयविचारः वादसरण्या प्रतिपादितो वर्तते। अतः वेदान्ते न्याये व्याकरणे मीमांसायां बौद्धदर्शने, जैनदर्शने, सांख्ययोगे च अध्यापकाः अमुं विधिम् आश्रयन्ते। वाक्यार्थपरिषदि अध्यापकाः विशेषतः अनेन विधिना प्रमेयं प्रतिपादयन्ति।
2. **दृष्टान्तविधिः** व्याकरणे स्फोटः, वर्णनित्यत्वम्, वेदान्ते अध्यासः, भ्रमः, साहित्ये वृत्तयः, मीमांसायां विभिन्नप्रमेयाः (लौकिकन्यायानाम् उपयोगः) एवं नैकेषां विषयाणां पाठने च एषः विधिः प्रयुज्यते। प्रदीयमानेन दृष्टान्तेन **दार्ष्टान्तिकस्य** सुलभावगतिः भवति।
3. **अध्यारोप-अपवादविधिः** सोपानक्रमेण विषयोपन्यासेन अध्यापनम्। स्थूलात् सूक्ष्मं प्रति, अज्ञातात् ज्ञातं प्रति, इन्द्रियगम्याद् अतीन्द्रियं प्रति विषयं क्रमेण बोधयितुम् एषः विधिः आश्रीयते। अद्वैतवेदान्ते ब्रह्मणः स्वरूपकथनादौ प्रयुज्यते।
4. **व्याख्यानविधिः** प्रसिद्धोऽयं विधिः साहित्ये नैषधीयचरितम्, सांख्ये सृष्टिप्रक्रियाम् इतरशास्त्रविषयान् च बोधयितुम् अवलम्ब्यते।
5. **कथाविधिः** प्रतिपाद्यस्य विषयस्य सम्बन्धिनः अनेके कथाप्रसङ्गाः उच्यन्ते। काव्यानाम्, पुराणानाम्, उपनिषदां भगवद्गीतायाः च पाठने असौ विधिः आश्रीयते।
6. **आदर्शवाचनविधिः** पुराणम् वेदमन्त्राः, काव्यानि इत्येतेषां पाठनाय परिसरेषु प्राचुर्येण असौ विधिः स्वीकृयते।
7. **समस्यासमाधानविधिः** शास्त्रीयविषयाणां पाठनसमये आदौ संशयः ततः समाधानं पुनः संशयः ततः समाधानम् इत्येवं क्रमेण सिद्धान्तस्य स्थापनं क्रियते। विश्वविद्यालयस्य पाठ्यक्रमेषु अत्यन्तोपयोगिनम् एनं विधिम् आश्रयन्ते अध्यापकाः।
8. **परीक्षाविधिः** शास्त्राणां दृढावगतिसम्पादनाय शलाकापरीक्षा क्रियते। अवान्तरविषये पाठिते घटकपरीक्षा क्रियते।
9. **टीकाभाष्यपद्धतिः** विभिन्नपाठ्यक्रमेषु विद्यमानानां शास्त्रीयग्रन्थानां पाठनाय **टीकापद्धतिः** अत्यन्तम् उपादेया वर्तते।

एतैः विधिभिः सह **प्रवचनविधिः, सङ्गोष्ठी, कण्ठस्थिरीकरणम्, अभिनयविधिः** इत्यादयः विधयः यथोपयोगितया आश्रीयन्ते। किञ्च विश्वविद्यालयेन शिक्षाशास्त्रिपाठ्यक्रमः प्रवर्त्यते। तस्मिन् पाठ्यक्रमे उपरिनिर्दिष्टानां प्रायः सर्वेषां विधीनां स्वरूपं पाठ्यते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Link for Additional Information | View Document |

***2.3.2 Teachers use ICT- enabled tools including online resources for effective teaching and learning processes***

***शिक्षकाः प्रभावितया अध्ययन-अध्यापनप्रक्रियायै अन्तर्जाले समुपलब्धाः सामग्रीः अन्तर्भाव्य सूचना-सञ्चार-प्रौद्योगिकी (सू. सं. प्रौ)-समन्वितानि उपकरणानि उपयुञ्जते।***

**Answer:**

विश्वविद्यालयस्य पाठ्यक्रमेषु प्रभावोत्पादकतया अध्ययन-अध्यापनप्रक्रियायाः निर्वाहाय भूयान् अवसरः वर्तते। तदर्थं शिक्षकाः अन्तर्जाले समुपलब्धाः सामग्रीः समाकलयन्ति। सूचना-सञ्चार-प्रौद्योगिकी समन्वितानि (सू.सं.प्रौ) उपकरणानि उपयुञ्जते। इयं प्रौद्योगिकी शिक्षाक्षेत्रे विशिष्टां भूमिकां वहति। **सङ्गणकम्- जालव्यवस्था, रेडियो दूरदर्शनम्,** उपग्रहः इत्यादिभिः माध्यमैः प्रौद्योगिकी अधिकप्रभावजनिका वर्तते। एतेषु माध्यमेषु बहुविधानि उपकरणानि सन्ति येषाम् उपयोगात् शिक्षकाः अध्यापने गुणाधानं कुर्वन्ति छात्राश्च अध्येयविषयेभ्यः स्पृहयन्ति।

सम्प्रति सूचना-सञ्चार-प्रौद्योगिक्याः बहुषु क्षेत्रेषु गहना व्यापृतिः सञ्जाता वर्तते। शिक्षाक्षेत्रम्, वाणिज्यम्, वैद्यकम्, विज्ञानम् इति तस्याः प्रधानानि क्षेत्राणि। **शिक्षाक्षेत्रे अध्ययनम्, अध्यापनम्, अनुसन्धानम्, सम्प्रेषणम्, प्रस्तुतीकरणम्, मूल्याङ्कनम्, प्रसारः, प्रकाशनम्, शिक्षाविधीनां विकासः** इत्यादिषु अङ्गेषु सूचना-सञ्चार-प्रौद्योगिकी विशिष्टं पात्रं वहति। संस्कृतशिक्षाक्षेत्रे च छात्राणाम् अपेक्षाः वर्धमानाः सन्ति। तासां पूरणे सूचना-सञ्चार-प्रौद्योगिकी साहाय्यम् आचरति।

विश्वविद्यालयः साहित्यादिषु विषयेषु विविधान् पाठ्यक्रमान् सञ्चालयति। तेषु प्राक्शास्त्री, शास्त्री, आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः, पदविका, प्रमाणपत्रीयः च पाठ्यक्रमाः मुख्यतया सन्ति। मुक्तस्वाध्यायपीठद्वारा अपि साहित्ये व्याकरणे ज्योतिषे च शास्त्रि-आचार्यपाठ्यक्रमाः सञ्चाल्यन्ते। योगे आयुर्वेदसाहित्ये च पदविका, प्रमाणपत्रीयः च पाठ्यक्रमः सञ्चाल्यते।

शिक्षकाः सङ्गणकमाध्यमेन निर्धारितान् विषयान् पाठयन्ति। विश्वविद्यालयद्वारा परिसरेषु कल्पितः स्मार्ट् कक्ष्याप्रकोष्ठः, वाईफाई, सङ्गणकप्रकोष्ठः च यूट्यूब इत्यादौ अन्तर्जाले समुपलब्धानां सामग्रीणाम् उपयोगे सहाया भवन्ति। सद्यस्कमाध्यमेन अध्ययनम् अध्यापनं च बह्वपेक्ष्यतया विश्वविद्यालये समन्वितं विद्यते। मुक्तस्वाध्यायपीठद्वारा अनेकाः कक्ष्याः सूचना-सञ्चार-प्रौद्योगिकीसमन्वितोपकरणैः सञ्चाल्यन्ते। **मुक्तस्वाध्यायपीठं विश्वविद्यालयस्य दूरस्थशिक्षाकेन्द्रं भवति। सम्प्रति दूरस्थशिक्षाक्षेत्रे सूचना-सञ्चार-प्रौद्योगिकी बह्वनुकूलतां** जनयति। अतः सा अत्यन्तम् अनिवार्यतया अपेक्ष्यते।

शिक्षकैः अधोनिर्दिष्टानां पाठ्यग्रन्थानां ध्वनिमुद्रितपाठाः/ वीडियोपाठाः निर्मिताः सन्ति।

### प्राक्शास्त्रिपाठ्यक्रमे

- लघुसिद्धान्तकौमुदी
- अजन्तहलन्तसन्धिः
- पूर्वोत्तरकृदन्तप्रकरणम्
- किरातार्जुनीयम्

### शास्त्रिपाठ्यक्रमे

- साहित्यदर्पणः
- कादम्बरी (शुकनासोपदेशान्तभागः)
- लघुसिद्धान्तकौमुदी
- ताजिकनीलकण्ठी
- वैयाकरणसिद्धान्तकौमुदी
- तर्कभाषा
- अभिज्ञानशाकुन्तलम्
- समासः
- सर्वदर्शनसङ्ग्रहः
- उत्तररामचरितम्

### आचार्यपाठ्यक्रमे

- काव्यप्रकाशः
- ध्वन्यालोकः
- व्यक्तिविवेकः

- रसगङ्गाधरः
- वक्रोक्तिजीवितम्
- पञ्चस्वराः

सूचना-सञ्चार-प्रौद्योगिक्याः समन्वयेन शिक्षणाधिगमप्रक्रियायाः सरलता सुबोधता च सिद्ध्यति। पाठ्यसामग्रीनिर्माणे अपि अस्याः विशिष्टं स्थानं वर्तते। विश्वविद्यालयस्य औपचारिकशिक्षायाः अनौपचारिकशिक्षायाः च अध्ययन-अध्यापनप्रक्रियायां समप्राधान्यम् वर्तते। रोचकप्रक्रियया छात्राः अभिप्रेरणां प्राप्नुवन्ति। ते आत्मनः ऐकाग्र्यं वर्धयन्ति। शिक्षाशास्त्रिपाठ्यक्रमे सूचना-सञ्चार-प्रौद्योगिक्याः समन्वयः कथं करणीयः इति विचारः पाठ्यांशत्वेन स्वीकृतो वर्तते। **शिक्षकाश्च शिक्षाशास्त्रिपाठ्यांशान् ICT माध्यमेन** पाठयन्ति। ज्यौतिषपाठ्यक्रमे सूचना-सञ्चार-प्रौद्योगिक्याः समन्वयेन शिक्षकाः गणितं फलितं च पाठयन्ति। वास्तुज्योतिषपदविकापाठ्यक्रमे च एतदन्वयः वर्तते।

विश्वविद्यालयस्य परिसरेषु कक्ष्याप्रकोष्ठे सूचना-सञ्चार-प्रौद्योगिक्याः समन्वयेन अध्यापनाय सौविध्यानि कल्पितानि वर्तन्ते। प्रौद्योगिकीविधिना पाठस्य सिद्धतार्थं शिक्षकाणां कृते सङ्गणकशाला अनुमता वर्तते।

विश्वविद्यालयस्य परिसरेषु अनया प्रौद्योगिक्या समन्वितानि उपकरणानि प्रकल्पितानि सन्ति। **चित्रम् (ग्राफिक्स्) प्रोजेक्टर्, दूरदर्शनम्, सङ्गणकम्, डिजिटल् बोर्ड्, केमरा, लेप्टाप्, टेलि कान्फ़ेरेन्स्, वीडियो कान्फ़ेरेन्स्, दृश्य-श्रव्योपकरणानि, शैक्षिकतन्त्रांशाः** इत्येतानि सौविध्यानि प्रकल्पितानि सन्ति। विश्वविद्यालयस्य जालपुटे 'भाषाशिक्षणस्य दृश्यपाठाः' उपारोपिताः वर्तन्ते। संस्कृतभाषायाः शास्त्राणां च अनेकानि व्याख्यानानि शिक्षकाणाम् अन्येषां च उपयोगाय जालपुटे उपारोपितानि वर्तन्ते।

विश्वविद्यालयः कालोचितं समालोच्य कार्यप्रणालीं योजयति। अद्यत्वे भारतीयज्ञानशाखानां बहवः पाठ्यक्रमाः बहुषु स्तरेषु अपेक्षिताः सन्ति। तेषां पाठ्यक्रमाणां समये सञ्चालनाय विश्वविद्यालयः कृतसङ्कल्पः वर्तते। तदनुसारं पाठ्यक्रमाणाम् अनुपमतया सञ्चालने इयं सूचना-सञ्चार-प्रौद्योगिकी सहाया वर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for webpage describing the " LMS/ Academic Management System" | View Document |

***2.3.3 Ratio of students mentored for academic and other related issues (Data to be provided only for the latest completed academic year)***

### *शैक्षिकविषयेषु अन्यसम्बद्धविषयेषु च मार्गदर्शनं प्राप्तवतां छात्राणाम् अनुपातः (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः एव देयः)*

**Answer:** 29.02

2.3.3.1 Number of mentors

मार्गदर्शकानां सङ्ख्या

Answer: 205

| File Description | Document |
|---|---|
| | |

| | |
|---|---|
| Upload year-wise, number of students enrolled and full time teachers on roll. | View Document |
| Mentor/Mentee ratio | View Document |
| Circulars pertaining to assigning the mentors to mentees | View Document |

***2.3.4 Availability of digitized SLMs for the learners - Percentage of programs offered by DDE having access to online SLMs***

***अध्येतृणां कृते डिजिटल-स्वाध्यायसामग्र्याः उपलब्धता – दूरस्थशिक्षानिदेशालयेन प्रस्तुतकार्यक्रमाणां प्रतिशतं मानं येषां स्वाध्यायसामग्री अधितन्त्रि सुलभा।***

**Answer:** 100

2.3.4.1 Number of programmes offered by DDE where learning material of the Institution are digitized and the SLMs uploaded on the website / Online Repository/ e-content app / LMS for their availability to the learners during the last five years

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालयेन प्रस्तुतानां कार्यक्रमाणां सङ्ख्या यत्र अध्ययनसामग्रीणां डिजिटलैजेशन् कृतं वर्तते अपि च अध्येतृणाम् उपलब्धतायै स्वाध्यायसामग्र्यः जालस्थाने/ अधितन्त्रिकोषे / ई-विषयतन्त्रांशे/ अधिगमप्रबन्धप्रणाल्याम् उपारोपिताः।

Answer: 6
2.3.4.2 Number of Programs offered by the DDE (Without repeat count) during the last five years

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालयेन प्रस्तुतानां कार्यक्रमाणां सङ्ख्या (पुनरावर्तितगणनां विना)

Answer: 6

| File Description | Document |
|---|---|
| Data template in Section B | View Document |
| Any other relevant information | View Document |
| Links to Digital repository of SLMs | View Document |

***2.3.5 Mechanism to provide academic counselling support at DDE A mechanism is in place at DDE to provide academic counselling support to learners enrolled in different programmes including strategies for learner participation and engagement as well as development of required competencies and skills***

***दूरस्थशिक्षानिदेशालये शैक्षिकपरामर्शसहयोगप्रदानार्थं क्रियाविधिः दूरस्थशिक्षानिदेशालये विभिन्नपाठ्यक्रमेषु नामाङ्कितेभ्यः शिक्षार्थिभ्यः शैक्षिकसाहाय्यं प्रदातुम् एकः क्रियाविधिः अस्ति, यस्मिन् अध्येतृणाम् प्रतिभागितायै सहभागितायै च रणनीतिः तथा च आवश्यकदक्षतानां कौशलानाञ्च विकासः समाविष्टः वर्तते।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य शैक्षिककार्येषु दूरस्थशिक्षणम् अन्यतमं भवति। मुक्तस्वाध्यापीठम् इत्यभिधानेन प्रथते असौ निदेशनालयः। देहल्यां स्थिते विश्वविद्यालयस्य मुख्यालये विद्यमानं पीठस्य प्रधानं केन्द्रं दूरस्थशिक्षाकार्यं निर्वहति। विश्वविद्यालयस्य प्रतिपरिसरं स्वाध्यायपीठम् इति नाम्ना दूरस्थशिक्षाध्ययनकेन्द्रं वर्तते। अध्येतृणां भागग्रहणाय, सहभागितायै च पीठद्वारा कुशलकार्यं निरुह्यते।

**२०१० तमवर्षे समारब्धं मुक्तस्वाध्यायपीठं विश्वविद्यालयानुदान-आयोगस्य दूरस्थशिक्षाविभागेन मान्यतां प्राप्य** कार्यक्रमान् योजयति। **IGNOU/ NOS, संस्कृतसंवर्धनप्रतिष्ठानम्** इत्यादिभिः शैक्षिकसंस्थाभिः सम्बन्धं धत्ते। भारते दूरस्थशिक्षायाम् इन्दरागान्धीमुक्तविश्वद्यालयः लोकप्रियो वर्तते। तस्य स्वाध्यायसामग्री, सम्पर्ककक्ष्या, परीक्षाविधानञ्च आकर्षणीयतां धरति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठमपि स्वाध्यायसामग्रीणां निर्माणे इन्दिरागान्धीविश्वविद्यालयस्य मार्गदर्शनं प्राप्नोति। तेन मुक्तस्वाध्यापीठद्वारा निर्मिता संस्कृतस्य स्वाध्यायसामग्री भारते दूरस्थशिक्षाप्रणाल्याम् अत्युत्कृष्टा इति प्रसिद्धिः वर्तते।

मुक्तस्वाध्यायपीठस्य मुख्यः अधिकारी 'निदेशकः' भवति। स्वाध्यायकेन्द्रस्य मुख्यः 'समन्वयकः' भवति। सः **सम्पर्ककक्ष्या, अध्यापकानां निर्धारणम्, अध्येतृभ्यः सूचनाप्रदानम्** इत्यादिकार्यं निर्वहति।

विश्वविद्यालयस्य मुक्तस्वाध्यायपीठद्वारा व्याकरणे साहित्ये फलितज्योतिषे च प्राक्शास्त्रि-सेतुपाठ्यक्रमः, प्राक्शाशस्त्रिपाठ्यक्रमः, शास्त्रि-सेतुपाठ्यक्रमः, शास्त्रिपाठ्यक्रमः, आचार्यसेतुपाठ्यक्रमः, आचार्यपाठ्यक्रमः च सञ्चाल्यते। पाली, प्राकृतम्, संस्कृतपत्रकारिता इत्येतेषु विषयेषु प्रमाणपत्रीयपाठ्यक्रमाश्च प्रवर्त्यन्ते। अत्यल्पे समये पीठेनानेन सर्वेषां निर्दिष्टानां पाठ्यक्रमाणाम् उत्कृष्टा स्वाध्यायसामग्री संरचिता वर्तते। काले काले पाठ्यक्रमाणां परिवर्धनं नवीनपाठ्यक्रमाणां योजनं कर्तुं पीठमिदं नमनीयतां धत्ते। तेन विभिन्नानां भारतीयज्ञानशाखानाम् अध्ययनाय मुक्तः अवसरः कल्पनीयः इति कार्ययोजना प्रवर्तते। मु.स्वा.पीठमिदम् अध्येतृभ्यः नैकानि सौविध्यानि कल्पयति।

- **अध्येता निर्धारितपाठ्यक्रमाणां निर्दिष्टावधेः द्विगुणितं समयं प्राप्तुं शक्नोति।**
- **मुक्तस्वाध्यायपीठस्य सर्वेषु पाठ्यक्रमेषु वयसः गरिष्ठतायाः नियमः नास्ति। प्रविविक्षुः कनिष्ठमितेः ऊर्ध्वं कदापि पाठ्यक्रमं स्वीकर्तुं शक्नोति।**
- **स्नातकस्तरे संस्कृतम् अपठितवतां स्नातकोत्तरस्तरे (आचार्यस्तरे)पाठ्यक्रमं स्वीकर्तुं मुक्तस्वाध्यायप्रणाल्याम् अवसरः कल्पितः ।**
- **उद्योगे निरताः अन्ये च नियमितरूपेण पाठ्यक्रमं प्रवेष्टुं ये न शक्नुवन्ति, तेषां कृते एषः उत्तमः अवसरः।**
- **अध्येतृणाम् अपेक्षाः पूरयितुं भारते चतुर्दश स्वाध्यायकेन्द्राणि मुक्तस्वाध्यापीठस्य उद्देश्यं सफलयन्ति सन्ति।**
- **पाठ्यक्रमे प्रविष्टेभ्यः अध्येतृभ्यः विश्वविद्यालयद्वारा परिचयपत्रं दीयते।**
- **प्रविष्टेभ्यः अध्येतृभ्यः मित्रतुल्या स्वाध्यायसामग्री प्रदीयते।**
- **आडियो/ वीडियो रूपेण अध्ययनसामग्री प्रकल्प्यते।**
- **पाठ्यक्रमे प्रविष्टानाम् अध्येतृणां जिज्ञासोपशमनाय सर्वेषु स्वाध्यायकेन्द्रेषु वर्षे द्विवारं पाक्षिकी सम्पर्ककक्ष्या व्यवस्थाप्यते।**
- **सम्पर्ककक्ष्यायाम् अध्येतृणां कृते सरलया पद्धत्या बोधनस्य व्यवस्था कल्पिता वर्तते।**
- **शास्त्रेषु विचक्षणानाम् अध्यापकानां मार्गदर्शनं कल्प्यते।**
- **अध्येत्रा निजजिज्ञासाशमनाय आवर्षं दूरवाण्या वाट्साप् समूहेन वा मार्गदर्शकाः अध्यापकाः सम्पर्चितुं शक्यन्ते।**
- **विश्वविद्यालयस्य मुक्तस्वाध्यायपीठं दत्तकार्याणां गुणोत्कृष्टाम् आन्तरिकमूल्याङ्कनपद्धतिम् अनुसरति। अध्येतृन् प्रति दत्तकार्यस्य/ अधीतस्य विषयस्य परिष्कारः लिखितरूपेण निर्दिश्यते।**
- **पाठ्यक्रमे व्याकरणम्/साहित्यम्/फलितज्यौतिषम् इति विषयेण सह हिन्दी/ प्रान्तीयभाषा, आङ्ग्लम्, इतिहासः इत्येतेषामपि पत्राणां पठनाय अवसरः कल्पितो वर्तते।**
- **विश्वविद्यालयद्वारा वार्षिकपरीक्षायाः आयोजनम्, मूल्याङ्कनम्, पदवीप्रदानञ्च निरुह्यते।**
- **पञ्जीकरणं कृतवताम् अध्येतृणां कृते स्वाध्यायकेन्द्रे एव स्वाध्यायसामग्र्याः प्राप्तिव्यवस्था कल्प्यते।**
- **स्वाद्यायकेन्द्रेषु ग्रन्थालयव्यवस्था कल्पिता वर्तते।**
- **अध्येतृणां कृते पाठ्यक्रमे नामाङ्कनार्थं शक्यदानं शुल्कम् ।**
- **स्वाध्यायसामग्रीणां मूल्यम् अल्पं गुणो महान् ।**
- **सम्पर्ककक्ष्यायाः अध्यापकेभ्यः मानदेयव्यवस्था मुक्तस्वाध्यायपीठद्वारा प्रकल्प्यते।**
- **मुक्तस्वाध्यायपीठस्य पाठ्यक्रमेषु प्रविष्टाः अध्येतारः, नियमितपाठ्यक्रमस्य सौविध्यानुभूतिं प्राप्नुवन्ति।**

**COVID 19** इत्यनेन महारोगेण समाक्रान्ते विषमकाले नियमितपाठ्यक्रमाणां वेगशीला गतिः कुण्ठिता अभूत्। सर्वत्र विद्यासंस्थासु केन्द्रद्वारा एव अन्तर्जालमाध्यमेन सम्पर्ककक्ष्याः चालिताः। परीक्ष्यायाः सुचारुसम्पादने विलम्बः समजायत।

मुक्तस्वाध्यापीठमपि अनया बाधया उपहता अभूत्। पीठस्य सर्वाणि कार्याणि समये न सम्पन्नानि।

किन्तु सम्प्रति पुनः मुक्तस्वाध्यापीठस्य महान् अवसरः वर्तते। दूरस्थितानाम् भारतीयविद्याः अवजिगमिषूणाम् इच्छां पूरयितुं दूरस्थशिक्षणव्यवस्था बहूपकारिणी वर्तते। अतः निश्चितः सम्प्रत्ययोऽस्ति पीठस्य यत् विभिन्नानां भारतीयविद्यास्थानानां नवीनया पद्धत्या तान्त्रिकोपकरणैश्च सह परिचायनीयाः पाठ्यक्रमाः देशे देशान्तरे च स्थितानां संस्कृत-शास्त्राधिजिघांसूनाम् अभीप्सितं पूरयिष्यन्तीति। तदस्यां दिशि केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यापीठम् अग्रेसरति।

अस्माद् वर्षात् मुक्तस्वाध्यायपीठद्वारा सद्यस्कमाध्यमेन पाठ्यक्रमान् सञ्चालयितुं सङ्कल्पः कृतो वर्तते। भगवद्गीता, योगः, वेदान्तः, आयुर्वेदसाहित्यम् इत्येतेषु विषयेषु प्रमाणपत्रीयपाठ्यक्रमान् पदविकापाठ्यक्रमान् च सञ्चालयितुं निर्धारितं वर्तते। किञ्च संस्कृतं पठितुम् इच्छतां सर्वेषां मुक्तस्वाध्यायपीठम् अन्यविधसौकर्याणामपि समावेशं कर्तुमुत्सहते। यथा तान्त्रिकोपकरणैः सह स्वाध्यायसामग्रीणां नवीनतासम्पादनम्, नियमितपाठ्यक्रमे अर्धं समाप्य शिष्टमर्धं मुक्तस्वाध्यायकेन्द्रस्य पाठ्यक्रमे अनुवर्तयितुम् अवसरप्रदानम्, एवमेव नियमितपाठ्यक्रमम् अर्धं समाप्य मुक्तस्वाध्यायपाठ्यक्रमे अनुवर्तयितुं च अवसरप्रदानम्, नूतनपाठ्यक्रमाणाम् आरम्भः इत्यादीनि ।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Schedules of different counselling activities | View Document |
| Any other relevant information | View Document |

***2.3.6 Institution encourages the Grurukula method of teaching/ Pathashalas/ Traditional Oriental Learning System (TOLS)/ Gurukula/ Shastrapeethas/ Interdisciplinary Research on Sanskrit and Sanskrit knowledge system.***

***संस्था गुरुकुलपद्धत्या अध्यापनं/ पाठशालाः/ परम्परागतप्राच्याधिगमप्रणालीः/ गुरुकुलानि/ शास्त्रार्थपीठानि/ संस्कृतविद्यां संस्कृतज्ञानपरम्परां च आश्रित्य अन्तश्शास्त्रीयानुसन्धानानि प्रोत्साहयति।***

**Answer:**

विश्वविद्यालयस्य पाठ्यक्रमाः अनुसन्धानक्षेत्रस्य विस्तारकाः वर्तन्ते। अध्यापनपद्धतिः आधुनिकप्रणाल्या सह गुरुकुलप्रणालीमपि अवलम्बते। विश्वविद्यालये परम्परागतप्राच्याधिगमप्रणाल्या शास्त्राध्यापनं प्रवर्तते। यज्ञशाला, वेधशालादिव्यवस्था मीमांसादिपाठ्यक्रमे प्रायोगिकं ज्ञानं ददाति। ज्योतिषपाठ्यक्रमे प्रायोगिकज्ञानार्थं प्रयोगशालाद्वारा विषयाः पाठ्यन्ते।

विश्वविद्यालयद्वारा शास्त्रिपाठ्यक्रमः शास्त्रिप्रतिष्ठापाठ्यक्रमः , आचार्यपाठ्यक्रमश्चमुख्यतया सञ्चाल्यते। पाठ्यक्रमेषु तेषु इमे शास्त्रीयाः विषयाः निर्दिष्टाः सन्ति। १. नव्यव्याकरणम् २.प्राचीनव्याकरणम् ३. साहित्यम्४.सिद्धान्तज्यौतिषम् ५. फलितज्यौतिषम्६.सर्वदर्शनम् ७. धर्मशास्त्रम्८.पुराणेतिहासः ९. वेदः१०.पौरोहित्यम् ११. जैनदर्शनम्२.बौद्धदर्शनम् १३. सांख्ययोगः१४. नव्यन्यायः १५ . प्राचीनन्यायवैशेषिकम्१६.मीमांसा १७.अद्वैतवेदान्तः । अत्र पाठ्यक्रमे निर्दिष्टानां भारतीयज्ञानशाखानाम् एतासां सुदीर्घा अध्ययन-अध्यापनपरम्परा वर्तते। विश्वविद्यालयः शास्त्राध्ययनप्रणालीं पारम्परिकीं परिगृह्य प्रवर्तते।अन्तश्शास्त्रीयाः विषयाः पाठ्यक्रमे निर्दिष्टा वर्तन्ते। आचार्यपाठ्यक्रमे चतुर्षु अपि सत्रार्धेषु प्रतिसत्रार्धम् एकं वैकल्पिकं पत्रम् अन्तश्शास्त्रीयं वर्तते। तद्द्वारा अन्तश्शास्त्रीयेषु विषयेषु अनुसन्धानाय अवसरः कल्पितो वर्तते।

आचार्यपाठ्यक्रमे निर्दिष्टाः अन्तश्शास्त्रीयाः विषयाः इमे सन्ति। पालिभाषा साहित्यं च, प्राकृतभाषा साहित्यं च, जैनदर्शनं बौद्धदर्शनं च, संस्कृतशिक्षणाय अधिगमार्थं च सामग्र्युत्पादनम्, धर्मशास्त्रम्, शारीरिकशिक्षा, संस्कृतसाहित्येतिहासः

भाषाविज्ञानं च, संस्कृतं संस्कृतिश्च, जैनदर्शनं- साहित्यम् अभ्यासः च, वैदिकसाहित्यम् उपनिषदः च, प्राचीनभारतीयमनोविज्ञानम्, वर्णात्मकं भाषाविज्ञानम्, वास्तु, भारतीयरङ्गमञ्चः संस्कृतनाट्यप्रस्तुतिश्च ।

**परिसरेषु वाग्वर्धिनीपरिषद्, वाक्यार्थसभा, शास्त्रार्थसभा, शास्त्रपरीक्षा, शास्त्रस्पर्धा, संस्कृतकविसमवायः इत्यादयः अनुसन्धाने प्रेरकाः कार्यक्रमाः विश्वविद्यालयद्वारा आयोजिता भवन्ति।**

विश्वविद्यालयस्य परिसरेषु विविधेषु शास्त्रीयेषु विषयेषु विशिष्टव्याख्यानानि आयोज्यन्ते। तत्र सम्पद्यमानैः शास्त्रेषु विशिष्टानां प्रसिद्धविपश्चिदां व्याख्यानैः छात्राः अनुसन्धानात्मकं चिन्तनं लभन्ते।

वाक्यार्थसभायाः आयोजने प्रोत्साहनं दीयते। विश्वविद्यालयस्य राजीवगान्धीपरिसरे अध्यापकवाक्यार्थपरिषद् सङ्घटिता वर्तते। परिषद्द्वारा वाक्यार्थसभाः आयोज्यन्ते। सभासु परिसरीयाः अध्यापकाः आदर्शवाक्यार्थं प्रस्तुवन्ति। तेन छात्राः शास्त्रीयेषु सूक्ष्मेषु विषयेषु गवेषणमार्गः कीदृशः भवेत् इति ज्ञातुम् अवसरं प्राप्नुवन्ति।

गुरुकुलेषु आश्रियमाणाः विधयः विश्वविद्यालस्य पाठ्यक्रमेऽपि अध्यापनाय अवलम्ब्यन्ते।

1. **शास्त्रीयग्रन्थेषु दर्शनग्रन्थेषु च प्रमेयविचारः वादसरण्या प्रतिपादितो वर्तते। अतः वेदान्ते न्याये व्याकरणे मीमांसायां, बौद्धदर्शने, जैनदर्शने, सांख्ययोगे च अध्यापकाः वादविधिम् आश्रयन्ते।**
2. **व्याकरणे स्फोटः, वर्णनित्यत्वम्, वेदान्ते अध्यासः, भ्रमः, साहित्ये वृत्तयः, मीमांसायां विभिन्नप्रमेयाः (लौकिकन्यायानाम् उपयोगः) एवं नैकेषां विषयाणां पाठने च दृष्टान्तविधिः उपयुज्यते।**
3. **सोपानक्रमेण विषयोपन्यासेन अध्यापनम्। स्थूलात् सूक्ष्मं प्रति, अज्ञातात् ज्ञातं प्रति, इन्द्रियगम्याद् अतीन्द्रियं प्रति विषयं क्रमेण बोधयितुम् अध्यारोप-अपवादविधिः आश्रियते।**
4. **साहित्ये नैषधीयचरितम्, सांख्ये सृष्टिप्रक्रियाम् इतरशास्त्रविषयान् च बोधयितुं व्याख्यानविधिः अवलम्ब्यते।**
5. **प्रतिपाद्यस्य विषयस्य सम्बन्धिनः अनेके कथाप्रसङ्गाः उच्यन्ते। काव्यानाम्, पुराणानाम्, उपनिषदां भगवद्गीतायाः च पाठने कथाविधिः आश्रीयते।**
6. **पुराणम् वेदमन्त्राः, काव्यानि इत्येतेषां पाठनाय परिसरेषु प्राचुर्येण आदर्शवाचनविधिः स्वीकृयते।**
7. **शास्त्रीयविषयाणां पाठनसमये आदौ संशयः ततः समाधानं पुनः संशयः ततः समाधानम् इत्येवं क्रमेण सिद्धान्तस्य स्थापनं क्रियते। विश्वविद्यालयस्य पाठ्यक्रमेषु अत्यन्तोपयोगिनं समस्यासमाधानविधिम् आश्रयन्ते अध्यापकाः।**
8. **शास्त्राणां दृढावगतिसम्पादनाय शलाकापरीक्षा क्रियते। अवान्तरविषये पाठिते घटकपरीक्षा क्रियते। प्राचीनः परीक्षाविधिः प्रश्नविधिः वा उपयुज्यते।**
9. **टीकाभाष्यपद्धतिः विभिन्नपाठ्यक्रमेषु विद्यमानानां शास्त्रीयग्रन्थानां पाठनाय टीकापद्धतिः अत्यन्तम् उपादेया वर्तते।**

अन्ये च प्रवचनविधिः, सङ्गोष्ठी, कण्ठस्थिरीकरणम्, अभिनयविधिः इत्यादयः विधयः यथोपयोगितया आश्रीयन्ते। एतैः विधिभिः अध्यापितान् विषयान् अधीयानाः छात्राः आत्मनः अनुसन्धानदृष्टिं वर्धयन्ति।

छात्राः अनुसन्धानार्थं प्रेर्यन्ते। भारतीयज्ञानशाखानां मिथः सम्बन्धः भूयान् वर्तते। अतः अनुसन्धातारः अन्तःसम्बद्धेषु विषयेषु गवेषणाय विषयैः निर्दिश्यन्ते।

विश्वविद्यालयः शोधपरियोजनासु अन्तश्शास्त्रीयम् अनुसन्धानं पुरस्कृत्य कर्तुं प्रोत्साहं ददाति। राष्ट्रियशक्षानीतिः भारतीयज्ञानशाखानाम् अनुसन्धानदृष्ट्या अध्ययनं प्रोत्साहयति। विश्वविद्यालयः सम्प्रति सर्वेषु स्तरेषु तदनुरूपं पाठ्यक्रमं रचयति।

***English version available in the additional information link**

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload any additional information | View Document |
| Link for additional Information | View Document |

***2.3.7 Percentage of teachers teaching Simple Standard Sanskrit medium programmes in Institution during the last five years.***

***विगतेषु पञ्चसु वर्षेषु संस्थायां सरलमानकसंस्कृतमाध्यमेन सञ्चालितेषु कार्यक्रमेषु पाठयितृणाम् अध्यापकानां प्रतिशतं मानम्।***

**Answer:** 403.75

2.3.7.1 Number of teachers teaching Simple Standard Sanskrit medium programmes during the last five years:

विगतेषु पञ्चसु वर्षेषु सरलमानकसंस्कृतमाध्यमेन सञ्चालितेषु कार्यक्रमेषु पाठयितृणाम् अध्यापकानां सङ्ख्या -

Answer: 1829

| File Description | Document |
|---|---|
| As per Data Template | View Document |
| Any Additional information | View Document |

***2.3.8 Use of Simple Standard Sanskrit/ Sanskrit while teaching higher shastric text in higher level programmes.***

***उच्चतरकार्यक्रमेषु उच्चशास्त्रीयपाठस्य अध्यापने सरलमानकसंस्कृतस्य/ संस्कृतस्य प्रयोगः।***

**Answer:**

विश्वविद्यालयस्य पाठ्यक्रमाः विशिष्टैः अनेकैः उद्देश्यैः संरचिताः सन्ति। तत्र भारतीयज्ञानशाखानां संस्कृतभाषामाध्यमेन अध्यापनम् इति मुख्यम् उद्देश्यं वर्तते। समयानुगुणं पाठ्यक्रमे अध्यापनविधौ च परिवर्धनं विश्वविद्यालयेन क्रियते। **वर्तमानकाले अध्यापने सरलमानकसंस्कृतस्य आवश्यकता** अस्ति। अल्पप्रगतस्तरीयकार्यक्रमेषु यथा अस्य अपेक्षा वर्तते तथैव उच्चतरकार्यक्रमेषु अपि वर्तते। यतः प्रौढानां शास्त्रीयग्रन्थानाम् उच्चतरकार्यक्रमेषु पाठ्यमाणां सुबोधाय सरलमानकसंस्कृतस्य अनिवार्यता वर्तते। शास्त्रिपाठ्यक्रमेषु आचार्यपाठ्यक्रमेषु च साहित्यम्, व्याकरणम्, वेदान्तः, जैनदर्शनम्, बौद्धदर्शनम्, सर्वदर्शनम्, न्यायः, मीमांसा, ज्योतिषम् इत्यादयः विषयाः सन्ति। एतेषाम् **अध्यापनप्रणाल्यां सरलमानकसंस्कृतस्य प्रयोगः विविधप्रकारेण** क्रियमाणः वर्तते। **यथा अजन्तशब्दानां बाहुल्येन प्रयोगः, युष्मदर्थे भवच्छब्दस्य प्रयोगः, एकवचनबहुवचनयोः प्रयोगः, विभक्तिविषये सारल्यम्, भूतकालार्थे कृदन्तप्रयोगः, लट्, लङ्, लृट्, लोट् इति चतुर्णां लकाराणां बाहुल्येन प्रयोगः, लघूनां वाक्यानां प्रयोगः, कर्तरिप्रयोगस्य आधिक्येन उपयोगः, अन्वयानुसारेण वाक्यप्रयोगः** इत्यादयः।

अध्यापकाः कक्ष्यायां शास्त्रग्रन्थस्य पाठनावसरे अजन्तेषु हलन्तेषु च स्थितानां सामान्यशब्दानां केषाञ्चन सर्वनामशब्दानां च प्रचुरं प्रयोगं कुर्वन्ति। सुबन्तेषु संज्ञाशब्दाः, जातिगुणवाचकाः शब्दाः, ल्युट्-घञ्-अच्-क्तिन्-प्रभृतयः शब्दाः, भाववाचकाः शब्दाः, सम्बन्धवाचकाः शब्दाः, सङ्ख्यावाचकाः पूरणप्रत्ययान्ताः च शब्दाः आधिक्येन उपयुज्यन्ते। सरलसंस्कृते यावच्छक्यम् अजन्तशब्दानां प्रयोगः क्रियमाणः वर्तते। तत्रापि अकारान्तपुंलिङ्गशब्दानाम् अकारान्तनपुंसकलिङ्गशब्दानाम्, आकारान्त- ईकारान्तस्त्रीलिङ्गशब्दानां च प्रयोगः आधिक्येन क्रियते । यथा -

- **अकारान्तपुंलिङ्गशब्दाः - बालकः, वृक्षः, मार्गः, आपणः, अध्यापकः, विद्यालयः, कार्यालयः, सोदरः, जनकः इत्यादयः ।**
- **अकारान्तनपुंसकलिङ्गशब्दाः - फलम्, नगरम्, पुष्पम्, वातायनम्, द्वारम्, भवनम् इत्यादयः ।**
- **आकारान्ताः स्त्रीलिङ्गशब्दाः - लता, माला, शाला, बालिका, महिला, भाषा इत्यादयः।**

- **ईकारान्ताः स्त्रीलिङ्गशब्दाः - लेखनी, अङ्कनी, भगिनी, जननी, विद्यार्थिनी, नदी इत्यादयः ।**

सरलमानकसंस्कृतमार्गदर्शिकायाः अयम् आशयः वर्तते 'व्यवहारप्रतिनिधिभूते अमरकोषे अपि एतादृशाः चतुर्विधशब्दाः एव आधिक्येन सन्ति ।एतेषां चतुर्विधानां केषाञ्चित् सर्वनाम्नां केषाञ्चित् अव्ययानां च आधारेण सर्वविधाः अपि अभिप्रायाः विना क्लेशं विना दोषं च प्रकाशयितुं शक्याः । अतः एतैः चतुर्विधैः एव शब्दैः व्यवहारं निर्वोढुं प्रयत्नः करणीयः, येन श्रोतुः प्रयोक्तुः च श्रमः नितरां न्यूनः भवेत्' इति । पर्यायशब्देषु सत्स्वपि बहुषु, तेषु शब्देषु अकारान्तः शब्दः प्रायेण स्वीक्रियते । यथा – गजार्थकेषु हस्तिन्, करिन् इत्यादिषु पर्यायशब्देषु गजः इति अकारान्तः शब्दः स्वीक्रियते । एवमेव जलमुक्, जलदः, वारिदः, अम्बुभृत् इत्यादिषु बहुषु शब्देषु सत्सु अपि मेघः इति अकारान्तः शब्दः स्वीक्रियते।

मातृभाषायां स्थितानां संस्कृतशब्दानां आधिक्येन स्वीकरणात् छात्रः अर्थं झटिति अवगच्छति । तेन सहजतया संस्कृतस्य सरलताम् अभ्युपगच्छति सः । तस्मात् अस्मिन् विषये अध्यापकाः सावधानाः वर्तन्ते।

भूतकाले क्त-क्तवत्वोः प्रयोगः प्रचुरतया क्रियते। विधिलिङ्-लकारः लङ्-लकारः च प्रयुज्यते। धातुषु प्रथम-चतुर्थ-षष्ठ-दशमगणेषु पठिताः परस्मैपदिनः धातवः आधिक्येन प्रयुज्यन्ते। अन्यगणीयानाम् अपेक्षायां सत्यां ल्युडन्तेन सह भाववाचकप्रत्यययुक्तेन अन्येन सह वा 'करोति' इत्यस्य प्रयोगः प्रोत्साह्यते। उदाहरणतया **'भुङ्क्ते - भोजनं करोति'** इति । एवं यथानुकूलम् अव्ययपदानां प्रयोगः आधिक्येन क्रियते।

अध्यापकाः व्याकरणानुगुणम् अपवादरहितान् अल्पापवादयुक्तान् वा नियमान् प्राथम्येन अवलम्बन्ते। अध्यापकाः सामान्यरूपेण युष्मदर्थे भवच्छब्दस्य प्रयोगं कुर्वन्ति। एवं प्राचुर्येण एकवचनबहुवचनयोः प्रयोगं कुर्वन्ति।

मातृभाषायां द्विवचनस्य प्रयोगः नास्ति इत्यतः सुललिततया तत्प्रयोगे तदवगमने वा जनाः क्लेशम् अनुभवन्ति । अतः शास्त्रग्रन्थानां पाठनावसरे यथासम्भवं द्विवचनस्य परिहारः क्रियते ।

अतः 'द्वयम् ' इत्यस्य योजनेन क्रियमाणः शब्दप्रयोगः सुकरः भवति । यथा - 'बालकौ' इति वक्तव्ये **'बालकद्वयम्'** इति, 'बालिके' इति वक्तव्ये **'बालिकाद्वयम्'** इति, 'फले' इति वक्तव्ये **'फलद्वयम्'** इति च वक्तुं शक्यते । एवं बालकद्वयम् अस्ति, बालिकाद्वयम् अस्ति, फलद्वयम् आनय इति एकवचनान्तं क्रियापदं सारल्येन प्रयोक्तुं परिसरीयाः छात्राः प्रेरणाः प्राप्नुवन्ति ।

पञ्चम्यादिविभक्तिविषये सारल्यं कृतं वर्तते। विभक्तिप्रत्ययान्तेन यः अर्थः बोध्येत सः एव अर्थः क्वचित् अव्ययेन अपि बोध्यते । तादृशे अवसरे अव्ययस्य उपादानं क्रियते । यथा 'तः' इत्यस्य पञ्चम्यर्थे प्रयोगः । ग्रामतः, विद्यालयतः, शालातः, आपणतः, नदीतः, नगरतः, काशीतः, वृक्षतः इत्येवमादयः । प्रातिपदिकात् तसिल्, तस् वा तत्र । तेन 'शालायाः' इत्यादौ पञ्चमी उत षष्ठी इति भ्रमस्य नावसरः । मुख्यतया भूतकालार्थे कृदन्तप्रयोगः क्रियमाणो वर्तते। मुक्तस्वाध्यायपीठद्वारा सरलसंस्कृतेन रचितानाम् अध्ययनसामग्रीणां सदुपयोगः सम्पद्यते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any Additional information | View Document |
| Link for Additional Information | View Document |

**2.4 Teacher Profile and Quality**

***2.4.1 Percentage of full time teachers against sanctioned posts during the last five years***

***अनुमोदितानि पदानि लक्ष्यीकृत्य विगतेषु पञ्चसु वर्षेषु नियुक्तानाम् अध्यापकानां प्रतिशतं मानम्।***

**Answer:** 165.1

2.4.1.1 Number of sanctioned posts for full time teachers year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु पूर्णकालिकाध्यापकेभ्यः अनुमोदितानां पदानां वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 276 | 250 | 280 | 240 | 275 |

| File Description | Document |
|---|---|
| Year-wise full time teachers and sanctioned posts for 5 years (Institutional Data as per data Template) | View Document |
| List of the faculty members authenticated by the Head of HEI | View Document |
| Any additional information | View Document |

***2.4.2 Percentage of full time teachers with Ph.D/ D.Lit. during the last five years***

***विगतेषु पञ्चसु वर्षेषु, पी-एच्.डी/ डी.लिट्. इत्युपाधिमतां पूर्णकालिकाध्यापकानां प्रतिशतं मानम्।***

**Answer:** 92.72

2.4.2.1 Number of full time teachers with Ph.D/ D.Lit. during the last five years

विगतेषु पञ्चसु वर्षेषु, पी-एच्.डी/ डी.लिट्. इत्युपाधिमतां पूर्णकालिकाध्यापकानां सङ्ख्या।

Answer: 420

| File Description | Document |
|---|---|
| List of number of full time teachers with PhD/D.Lit. and number of full time teachers for 5 years ( Institutional data as per data Template) | View Document |
| Any additional information | View Document |

***2.4.3 Average teaching experience of full time teachers in the same institution (Data to be provided only for the latest completed academic year, in number of years)***

***पूर्णकालिकाध्यापकानां तस्यामेव संस्थायाम् अध्यापनानुभवस्य मध्यमानम् (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः वर्षाणां सङ्ख्यायां देयः)***

**Answer:** 11.11

2.4.3.1 ***Total experience of full-time teachers.***

पूर्णकालिकाध्यापकानां सम्पूर्णः अध्यापनानुभवः

Answer: 5031

| File Description | Document |
|---|---|
| List of Teachers including their designation, department and | View Document |

| | |
|---|---|
| experience details (Data Template as of 2.4.1) | |
| Any Additional information | View Document |

***2.4.4 Percentage of full time teachers who received awards, recognition, fellowships at State, National, International level from Government recognised bodies during the last five years***

***विगतेषु पञ्चसु वर्षेषु राज्य-राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारम् अभिज्ञानं विद्वद्वृत्तिं वा प्राप्तवतां पूर्णकालिकाध्यापकानां प्रतिशतं मानम्।***

**Answer:** 11.04

2.4.4.1 Number of full time teachers who received awards, recognition, fellowships at State, National, International level from Government recognised bodies during the last five years

विगतेषु पञ्चसु वर्षेषु राज्य-राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारम् अभिज्ञानं विद्वद्वृत्तिं वा प्राप्तवतां पूर्णकालिकाध्यापकानां सङ्ख्या।

Answer: 50

| File Description | Document |
|---|---|
| Institutional data: as per Data Template | View Document |
| e-copies of award letters (scanned or soft copy) | View Document |
| Any additional information | View Document |

***2.4.5 Full-time teachers and other academics in positions – Percentage of the sanctioned posts occupied by full-time teachers and other academics in DDE respectively during the last five years***

***पूर्णकालिकशिक्षकाणाम् अन्यशिक्षाविदां च स्थितिः - विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालये स्वीकृतपदेषु पूर्णकालिकशिक्षकैः अन्यैः शिक्षाविद्भिश्च पूरितानां पदानां क्रमशः वार्षिकं प्रतिशतं मानम्।***

**Answer:** 100

2.4.5.1 Number of Fulltime teachers and other academics appointed at DDE against the sanctioned posts during the last five years

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालये स्वीकृतपदेषु नियुक्तानां पूर्णकालिकशिक्षकाणाम् अन्येषां च शिक्षाविदां सङ्ख्या।

Answer: 47

2.4.5.2 Number of sanctioned post of full time teacher and other academics available at DDE during the last five years

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालये पूर्णकालिकाध्यापकानाम् इतरशिक्षकाणाञ्च स्वीकृतपदानाम् उपलब्धा सङ्ख्या।

Answer: 47

| File Description | Document |
|---|---|
| List of the faculty members authenticated by the Registrar of the University | View Document |
| Details of full time teachers and other academics as per Data Template | View Document |
| Any other relevant information | View Document |

***2.4.6 Faculty are available for new programmes/ emerging areas of study such as Research papers, Projects, Consultancy, Prashikshan-Experience, Dharmashastra, Cultural Tourism, Computational linguistics, Computational Sanskrit, Translation Studies, Comparative Philosophy, Comparative Aesthetics, Yogic Science, Yoga Darshan, Samskrit Journalism, Sanskrit manuscriptology, Management, Jurisprudence, Temple Culture and Administration, Vastushastra, Medicinal Astrology etc.***

***नूतनकार्यक्रमाणाम्/उदयमान-क्षेत्राणां (शोधपत्राणि, परियोजनाः, परामर्शः, प्रशिक्षणानुभवः, धर्मशास्त्रं, सांस्कृतिकपर्यटनं, सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तोलनिकं दर्शनं, तोलनिकं सौन्दर्यशास्त्रं, योगविज्ञानम्, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रम्, प्रबन्धनशास्त्रं, विधिशास्त्रं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) अध्यापनाय अध्यापकाः उपलभ्यन्ते।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः यथा भारतीयविद्यानां शिक्षणे तत्परोऽस्ति तथा वर्तमान-अपेक्षानुगुणम् उदयमानानां बहुविषयकपाठ्यक्रमाणाम् अन्तर्विषयकपाठ्यक्रमाणाम् अन्येषां प्राशासनिक-वाणिज्य-भैषज्यानां पाठ्यक्रमाणां च समन्वयने बद्धादरोऽस्ति। शोधपत्राणि, परियोजनाः, परामर्शः, प्रशिक्षणानुभवः, धर्मशास्त्रं, सांस्कृतिकपर्यटनं, सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तौलनिकं दर्शनं, तौलनिकं सौन्दर्यशास्त्रं, योगविज्ञानं, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रं, प्रबन्धनशास्त्रं, विधिशास्त्रं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम्, भारतीयरङ्गमञ्चः ग्रीक्-नाटकपरम्परा, अवधानकला, आयुर्वेदसाहित्यम् आहारविज्ञानं च, वास्तुशास्त्रम् इत्यादीनां नूतनपाठ्यक्रमाणाम् अध्यापनाय प्राज्ञाः अध्यापकाः विश्वविद्यालयस्य परिसरेषु समुपलभ्यन्ते।

परिसरेषु अध्यापने निरताः अध्यापकाः **साहित्यम्, व्याकरणम्, तत्त्वशास्त्रम्, योगदर्शनम्, संस्कृतपत्रकारिता, ज्योतिषम्, वास्तुविज्ञानम्, सौन्दर्यशास्त्रम्, पौरोहित्यं देवालयसंस्कृतिश्च** इत्यादीनां विषयाणां बोधने संयुक्ताः सन्ति। **आङ्ग्लम्, हिन्दी, इतिहासः, राज्यशास्त्रम्** इत्यादीन् विषयान् ते बोधयन्तः वर्तन्ते।

प्रतिशैक्षिकसत्रं संपर्ककक्ष्याः यथाकालं प्रवर्तन्ते। तस्मिन् समये त्रिवारं चतुर्वारं वा एताः कक्ष्याः सञ्चाल्यन्ते। विषयविशेषज्ञाः अध्यापकाः कक्ष्यासु व्याकरण-योगदर्शनादिविषयान् साररूपेण अध्यापयन्ति। पाठ्यक्रमे प्रविष्टाः अध्येतारः यथाविधि कक्ष्यायां भागं गृह्णन्ति। अध्यापितान् विषयान् अधिगत्य सन्तुष्टा भवन्ति। जिज्ञासां निस्सङ्कोचं ते प्रकटयन्ति। अध्यापकाश्च तान् समाधाय कक्ष्यां समापयन्ति। एवं विषयेषु विशिष्टयोग्यतावताम् अध्यापकानां मार्गदर्शनेन अध्येतारः असन्दिग्धा भवन्ति। विश्वविद्यालयस्य प्रणालीयं अध्येतृप्रिया वर्तते। विश्वविद्यालयस्य अध्ययनसामग्री अपि उत्कृष्टा वर्तते। अध्यापकाः सूक्ष्मेक्षिकया अध्ययनसामग्रीम् इमां सज्जीकृतवन्तः। तस्माद् अध्येतारः सार्थकताम् अनुभवन्ति।

अन्याः याः शैक्षिकसंस्थाः उपरिनिर्दिष्टेषु विषयेषु नवीनपाठ्यक्रमान् चालयन्त्यः सन्ति, ताभिः सह उत्कर्षे स्पर्धमानः सन् केन्द्रीयसंस्कृतविश्वविद्यालयः साधु योगं भजति। शुभोदर्कं विचिन्त्य विभिन्नान् संयुक्तपाठ्यक्रमान् निर्मातुं योजनां करोति। संयुक्तपाठ्यक्रमे आधुनिकविषयाणाम् अध्यापनाय अपेक्षितां व्यवस्थां कर्तुं विश्वविद्यालयः कार्ययोजनां विदधाति। अद्य सामान्याः विश्वविद्यालयाः राष्ट्रियशिक्षानीत्या अन्विताः सन्तः प्रत्यग्रतां लभमानाः सन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयोऽपि उदयमानाः आवश्यकताः पूरयितुं सज्जते। सङ्गणकीयभाषाशास्त्रस्य, सङ्गणकीयसंस्कृतस्य च बोधनकौशलानाम् अवाप्तये अयम् अवसरः वर्तते। पाठ्यक्रमः एषः परिसरेषु कार्यरतान् सङ्गणकीय-अध्यापकान् प्रोत्साहयति।

**सङ्गणकीयकार्यक्रमनिर्माणे संस्कृतभाषायाः आनुरूप्येण योगः इतराभ्यः भाषाभ्यः अतिशयितफलदः** इति जगति विदितं वर्तते। विश्वे बहवः इमां वस्तुस्थितिं जानानाः विश्वविद्यालयाः संस्कृतपाठ्यक्रमाणां सञ्चालने उत्सहमानाः वर्तन्ते।

सङ्गणकीयभाषाशास्त्रम् बह्वपेक्षितं सत् अद्य उदयमानेषु शिक्षाक्षेत्रेषु इतरेभ्यः विशिष्यते। अस्मिन् **सङ्गणकीयभाषाशास्त्रे ज्ञानप्रदतन्त्रज्ञानम्, संस्कृतव्याकरणशास्त्रम्, आधुनिकभाषाशास्त्रम् इति त्रयः विभागाः भवन्ति। पाणिनीय-अष्टाध्यायी एव अस्य बहुविषयकपाठ्यक्रमस्य मूलाधारः भवति। न्यायः, मीमांसा, व्याकरणम्, साहित्यम् इत्यादिषु शास्त्रेषु भाषाशास्त्रीयाः नैके पक्षाः विचारिताः सन्ति। वर्णस्य, पदस्य, पदावयवस्य, वाक्यस्य, वाक्यसमुदायस्य, अर्थस्य, सम्बन्धस्य** इत्येवंरूपेण ते सन्ति। आधुनिकभाषाशास्त्रस्य अन्विततया प्रवर्तमानम् एतेषां विशिष्टम् अध्ययनम् बहून् अवसरान् सृजति। प्राकृतिकभाषाप्रक्रियायाः योजनेन संस्कृतभाषायां तान्त्रिकक्षेत्रस्य विस्तारः भवति।

तुलनात्मकतत्त्वशास्त्रं विशिष्टं विभक्ताध्ययनं कर्तुम् अवसरं ददाति। भारतीयतत्त्वशास्त्रेण सह तौलनिकाध्ययनेन पाश्चात्यतत्त्वशास्त्रस्य अन्तर्दृष्टिः गोचरीभवति। तुलनात्मकसौन्दर्यशास्त्रीयम् अध्ययनमपि विशिष्टप्रयोजनकं वर्तते। एष पाठ्यक्रमः भरतमुनेः नाट्यशास्त्रस्य अरिष्टाटलस्य काव्यशास्त्रस्य च तुलनात्मक-अध्ययनाय भूयांसम् अवसरं कल्पयति। **अरिष्टाटलेन** उक्तं क्याथर्सिस्, भरतमुनिना उक्तः रसानन्दश्च समानौ इति विज्ञाय छात्राः काव्यतत्त्वस्य वैश्विकीं दृष्टिं लभेरन्।

सम्प्रति योगविद्या संयुक्तराष्ट्रसङ्घेन अङ्गीकृता वर्तते। समग्रं विश्वं योगविद्यां भारतञ्च सकौतुकं वीक्षते। योगेन आधेः व्याधेश्च शमनं भवतीति विषयं विज्ञाय वैदेशिकाः विद्यामिमां सबहुमानम् आद्रियन्ते।

संस्कृतपत्रकारिता नूतनः कश्चित् पाठ्यक्रमः वर्तते। अत्र अनेकाः सम्भावनाः वर्तन्ते। प्रतिगृहं प्रायेण दूरदर्शनं वर्तते। षष्ट्यां जनेषु प्रतिशतं मोबैल् वर्तते। अधिकांशा जनाः जगतः वृत्तान्तं ज्ञातुम् इच्छन्ति। अतः संस्कृतपत्रकारितायाः दृश्यमाध्यमेषु भूयान् उद्योगावसरः सम्भाव्यते।

संस्कृते प्रबन्धनशास्त्रस्य अद्य अपेक्षा वर्तते। वैदेशिकाः प्राचीनभारतीयप्रबन्धनशास्त्रद्वारा नैतिकमूल्येन सह प्रबन्धनपद्धतिं ज्ञातुं समुत्सुकाः भवेयुः। सांस्कृतिकयात्रिकस्य उपक्रमः संस्कृतेः सूक्ष्मं ज्ञानं सम्पादयितुम् विशिष्टम् अवसरं कल्पयिष्यति।

**अनुवादादध्ययनेन** उद्योगावसराः नैके सम्भाव्यन्ते। एवम् अन्यभाषासाहित्यस्य संस्कृते अनुवादेन च सन्ति प्रयोजनानि। भारतीयवास्तुविज्ञानस्य अपेक्षानुगुणं प्रसारः न वर्तते। **वास्तुशास्त्रपाठ्यक्रमस्य** उपक्रमेण सः भवेत्। **देवालयसंस्कृतिः** भारतस्य भूमिकां निर्वहति। देवालयसंस्कृतिद्वारा भारतीयसंस्कृतेः विभिन्नस्रोतसां सूक्ष्मतत्त्वानि अधिगन्तुं शक्यन्ते। तत्र प्राशासनिकनैपुण्याः विमर्शः प्रासङ्गिकतां भजते।

पाठ्यक्रमसम्बद्धतया शोधपत्राणि, परियोजनाः, परामर्शः च सम्प्रति अपेक्षाम् अञ्चन्ति। **संस्कृतमातृकाशास्त्रस्य** भूयान् अवसरः वर्तते। तेन मातृकाणां सम्पादनादि कार्यं सुष्ठु निर्वर्तयितुं शक्यते।

**भैषज्यज्योतिषम्, वास्तुशास्त्रम्** इत्यादिविषयकाः नवीनाः पाठ्यक्रमाः भारतीयज्ञानपरम्परायाः अगाधतां दृढयन्ति। परिणामतः वैदेशिकाः भारतस्य अवगमनाय नवीनां दृष्टिं लभेरन्। संस्कृते निहितानां विषयाणां सर्वदा उपादेयता वर्तते इति सततं श्रूयते। अद्य तासां भारतीयविद्याशाखानां प्रासङ्गिकता निरूपणीया वर्तते। अतः एतेषां भारतीयविषयाणां नूतविषयैः नूतनपद्धत्या च सह प्रवर्त्यमानं पाठ्यक्रमः इमाम् अपेक्षां पूरयेत्।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Link for additional Information | View Document |

***2.4.7 Contribution of faculty to innovation of activities and Specialisation in various academics of Shastra-Chudamani/ Emeritus/ Adjunct Faculty/ Fellows/ Visiting Professors/ Post Doctoral Fellows etc,.***

***शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणां, संयोजिताचार्याणां, प्रतिष्ठिताचार्याणां, विद्यावारिध्युत्तरशोधरतानां विविधशिक्षाविदां विशेषकार्यकलापानां नवीकरणार्थम्अध्यापकानां योगदानम्।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणाम्, संयोजिताचार्याणम्, प्रतिष्ठिताचार्याणाम्, विद्यावारिध्युत्तरशोधरतानां विदुषां च सम्बन्धं स्थापयति। गतेषु पञ्चसु वर्षेषु अस्माकं विश्वविद्यालयेन सम्बद्धानां तेषां विदुषां नामानि अत्र सूच्यन्ते ।

### श्रीसदाशिवपरिसरः, पुरी, ओडिशा

- डा.विश्वनाथ स्वाईं, (शास्त्रचूडामणिः) पुरीस्थे श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालये कार्यरतः असौ आचार्यः उत्कृष्टविधिना सह रसगङ्गाधरः, काव्यानि, रसनिष्पत्तिः इत्यादिविषयान् अबोधयत्।
- डा.ए.के स्नेह नन्दः, (सदाशिवपरिसरस्य आचार्यचरः) साहित्यशास्त्रे विशिष्टां गतिं वहन् एषः आचार्यः छात्रान् रूपकप्रशिक्षणेन शिक्षितवान्। शास्त्रचूडामणिपरियोजनायां छात्राणां मार्गदर्शनं कृतवान्।
- प्रो.व्रजकिशोर स्वाँई, प्रो.माधवचन्द्र पण्डा च पुरीस्थस्य श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य आचार्यौ धर्मशास्त्रे कृतभूरिश्रमौ मनुस्मृतौ विद्यमानान् दायभागः इत्यादीन् मुख्यान् विषयान् अबोधयताम्।
- प्रो.वाचस्पतिशर्मा  दर्भंगास्थितस्य के.एस.डि.संस्कृतविश्वविद्यालयस्य (बिहार) आचार्यः धर्मशास्त्रे विशिष्टगतिमान् धर्मशास्त्रे कठिनान् विषयान् अपाठयत्।
- प्रो.सुधांशुशेखर शास्त्री, बनारस्-हिन्दूविश्वविद्यालयस्य आचार्यः (वाराणसी) तथा प्रो.एस.के.सेनापतिः, केन्द्रीयसंस्कृतविश्वविद्यालयस्य (मुख्यालयः, नवदेहली) आचार्यः सर्वदर्शनस्य अद्वैतवेदन्तस्य च ग्रन्थान्  ब्रह्मसूत्रभाष्यं च छात्राणां कृते सुबोध्यतया अपाठयन्।
- प्रो.गङ्गण्णा, केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीसदाशिवपरिसरः (पुरी) इत्यत्र आचार्यः अद्वैतवेदान्ते चित्सुखीग्रन्थं सुललिततया अध्यापयत्।
- प्रो. हरेकृष्णमहापात्रः राष्ट्रियसंस्कृतसंस्थानस्य श्रीसदाशिवपरिसरस्य प्राचार्यचरः पाणिनिव्याकरणस्य बहुश्रुतः विद्वान् महाभाष्यादिग्रन्थान् अबोधयत्।
- प्रो.प्रलयकुमार नन्द, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी इत्यत्र आचार्यः तथा प्रो.गङ्गाधर पण्डा, कोह्लणविश्वविद्यालयः, चाईवासा, झाडखण्डः इत्यत्र कुलपतिः शिक्षाशास्त्रस्य विद्वांसौ शिक्षातत्त्वानां बोधनम् अकुरुताम्।
- प्रो.शीतलाकुमार शुक्ल, ला.के.सम्.वि,नवदेहल्ली, प्रो.श्यामभापट्, सम्पूर्णानन्द.सं.वि.वि,वाराणसी, प्रो.कान्हुचरण पण्डा, रामाधीनसंस्कृतमहाविद्यालयः, ब्रह्मपुरम् एते साहित्ये व्याकरणे च विद्वांसः परिसरस्य अभ्यागताः आसन्।
- प्रो.शशिरानी मिश्रः, सम्पूर्णानन्द.सं.वि.वि,वाराणसी, प्रो.गोपालचन्द दाशः, व्याकरणे साहित्ये च विद्वान् (उत्कलविश्वविद्यालयः, भुवनेश्वरः)|

### जयपुरपरिसरः, जयपुरम्, राजस्थानम्

- प्रो.चान्दकिरण सलूजा, (संस्कृतसम्वर्धनप्रतिष्ठानम्, नवदेहली),
- प्रो.गंगाधर पण्डा, शिक्षाशास्त्रज्ञः, (कोह्लणविश्वविद्यालयः, चाईवासा, झाडखण्डः)
- प्रो.अर्कनाथ चौधरी,  वैयाकरणः, पूर्वकुलपतिः, (श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात्)
- प्रो.रमेश कुमार पाठकः, साहित्यवित्, सङ्कायाध्यक्षः, (एसएलबीएस राष्ट्रियसंस्कृतविश्वविद्यालयः, देहली)
- प्रो.जी.एस्.आर्. कृष्णमूर्तिः, साहित्यशास्त्रज्ञः, कुलसचिवः, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः )
- प्रो.दीनानाथ शर्मा, तथा  प्रो.सलोनी जोशी, (गुजरात विश्वविद्यालयः)
- प्रो.कमलेश कुमार जैन, (बनारस हिन्दूविश्वविद्यालयः, वाराणसी)
- प्रो.सत्य प्रकाश शर्मा, (अलीगढ़ मुस्लिम विश्वविद्यालयः)
- डा.ऋषभ चन्द्र जैन, (अहिंसा अनुसंधान केन्द्रम्, वैशाली)
- प्रो.जगराम भट्टाचार्यः, (विश्व भारती, शान्तिनिकेतनम् , पश्चिमबंगाल)
- प्रो.सुदीप कुमार जैन, (एसएलबी राष्ट्रियसंस्कृतविश्वविद्यालयः, देहली)
- प्रो.जयकुमार उपाध्यायः, (एसएलबी राष्ट्रियसंस्कृतविश्वविद्यालयः, देहली)

- प्रो.दामोदर शास्त्री, (विश्वभारतीमानितविश्वविद्यालयः)
- डा.महावीर प्रभाचन्द्र शास्त्री, (शोलापुर) डा.बलराम शुक्लः, (दिल्ली विश्वविद्यालयः)
- प्रो.कल्पना जैन, (एसएलबी राष्ट्रियसंस्कृतविश्वविद्यालयः, देहली )
- प्रो.विजय कुमार जैन, (केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ परिसरः) ।

**राजीवगान्धीपरिसरः, शृङ्गेरी, कर्नाटकम्**

- प्रो.एम्.एल्.नरसिंहमूर्तिः, वेदान्तशास्त्रे मूर्धन्यविद्वान्, कुलपतिः, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः )
- प्रो.रामचन्द्रभट्टः, कोटेमने, योग-वेदान्तादिषु कृतभूरिश्रमः, गुरुकुलशिक्षाविधिज्ञः, कुलपतिः, (योगविश्वविद्यालयः, बेङ्गलूरु)
- प्रो.वरप्रसादरावः, साहित्यवित् (आचार्यनागार्जुनविश्वविद्यालयः, गुंटूर)
- प्रो.शुद्धानन्द पाठकः, वेदान्तशास्त्रज्ञः, (एसएलबी राष्ट्रियसंस्कृतविश्वविद्यालयः, देहली)
- प्रो.किशोर चन्द्र पाढी, (एस्.जे.एस्,विश्वविद्यालयः, पुरी)
- प्रो.श्रीपादभट्टः, ज्यौतिषशास्त्रे प्रसिद्धः विद्वान्, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)
- प्रो.के.पी.केशवन्, साहित्यवित् (केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर परिसरः केरल)
- डा.वेणीमाधव जोशी, पूर्वसङ्कायाध्यक्षः, (कर्नाटकविश्वविद्यालयः)
- डा.रामकुमारशर्मा, (केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः,राजस्थानम् )
- प्रो.पीयूषकान्त दीक्षितः, कुलपतिः, (उत्तराखण्डसंस्कृतविश्वविद्यालयः )
- डा.गोपालकृष्ण हेगडे, निदेशकः, (वेदसंस्कृत-अकादमी, कर्नाटकम् )
- प्रो.वाई.एस्.रमेशः, शिक्षाशास्त्रज्ञः (केन्द्रीयसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः, राजस्थानम् )
- प्रो.राधावल्लभ त्रिपाठी, बहुश्रुतः विद्वान्, पूर्वकुलपतिः, (केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली )
- प्रो.मुरलीधरशर्मा, शिक्षाशास्त्रज्ञः, कुलपतिः, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)
- प्रो.जी.एस्.आर्.कृष्णमूर्तिः, सङ्कायाध्यक्षः, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)
- डा.जनार्दन हेगडे, (संस्कृतभारती, बेङ्गलूरु)
- प्रो.वि.पाण्डुरङ्गनरसिंह रावः, (इन्दिरागान्धी राष्ट्रियमुक्तविश्वविद्यालयः)
- डा.मधुसूदन भट्टः, प्राचार्यः, (उपेन्द्रपै महाविद्यालयः, उडुपी, कर्नाटकम्)
- डा.राधागोविन्द त्रिपाठी, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)
- पण्डित वेङ्कट सुब्रह्मण्यम्, (व्योम प्रयोगालयः, बेङ्गलूरु) डा.राधाकृष्णन्, (मैलापुरसंस्कृतमहाविद्यालयः, चन्नै)
- प्रो.उन्नीकृष्णन् नम्बूथिरी, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)
- प्रो.देवी प्रसाद त्रिपाठी, कुलपतिः, (उत्तराखण्डसंस्कृतविश्वविद्यालयः, उत्तराखण्डः)
- प्रो.के. कृष्णभट्टः, योगविभागः, (मङ्गलूरुविश्वविद्यालयः, मङ्गलूरु, कर्नाटकम्)
- महामहोपाध्यायः कृष्णमूर्तिशास्त्री, पूर्वप्राचार्यः, (मैलापुरसंस्कृतमहाविद्यालयः, चन्नै)
- प्रो.गंगाधर पण्डा, (कोह्लणविश्वविद्यालयः, चाईवासा, झाडखण्डः)
- प्रो.ललितकुमारत्रिपाठी, (केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीगङ्गानाथझापरिसरः, प्रयागराजः)
- प्रो.लक्ष्मीनारायणभट्टः, साहित्यशास्त्रज्ञः प्राचार्यः, (एस्.एम्.एस्.पि.संस्कृतमहाविद्यालयः, उडुपी, कर्नाटकम्)
- प्रो.रवीन्द्र मुले, सङ्कायाध्यक्षः, (सावित्रीविश्वविद्यापीठम्, पुणे) डा. के.सी.नागेशः, प्राध्यापकः, (श्रीमातासंस्कृतमहाविद्यालयः, उम्मचिगि, कर्नाटकम्)

**भोपालपरिसरः, भोपाल्, मध्यप्रदेशः**

- प्रो.चान्दकिरण सलूजा, (संस्कृतभारती, नवदेहली)
- प्रो.गंगाधर पण्डा, (कोह्लणविश्वविद्यालयः, चाईवासा, झाडखण्डः)
- प्रो.अर्कनाथ चौधरी, पूर्वकुलपतिः, (श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात्)
- प्रो.दिव्यचैतन्य ब्रह्मचारी (सम्पूर्णानन्द.सं.वि.वि. वाराणसी)
- प्रो.सुब्राय वि. भट्टः निदेशकः, (केन्द्रीयसंस्कृतविश्वविद्यालयः, राजीवगान्धीपरिसरः, शृङ्गेरी)
- प्रो.वासुदेवशर्मा, निदेशकः, (केन्द्रीयसंस्कृतविश्वविद्यालयः, जम्मूपरिसरः)
- प्रो.मीनाक्षी मिश्रा, (एल्. बि. एस्. विश्वविद्यालयः, दिल्ली)

- प्रो.रमाकान्त पाण्डेयः, (बनारस् हिन्दू विश्वविद्यालयः, वाराणसी)
- प्रो.के. जे. सुरेशः, (मा.ला.च.प. विश्वविद्यालयः, भोपाल)
- प्रो.देवनारायण झा, (श्रीकामेश्वरसिङ्ग दर्भङ्गासंस्कृतविश्वविद्यालयः, बिहार)
- प्रो.प्रह्लाद जोशी, (राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Link for additional Information | View Document |

***2.4.8 Systems adopted to recharge academically and rejuvenate teachers (e.g. learning with traditional Gurus, providing research grants, study leave, nomination to national/international conferences/ seminars, in-service training, organizing national/international conferences, vakyartha-Sabhas, Shastrartha-Sabha, Shastra-Pareeksha, Shastra-spardha/Samskrita-Kavi-Samavaya (Sanskrit Poets' Meet) etc.)***

***अध्यापकान् शैक्षिकरूपेण पुनर्नवीकर्तुम् अभिगृहीताः व्यवस्थाः - यथा-पारम्परिकगुरूणां सविधे अध्ययनम्, अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/ सेवारतप्रशिक्षणं, राष्ट्रिय/अन्ताराष्ट्रियसम्मेलनस्य आयोजनं, वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकवि-समवायः इत्यादयः।***

**Answer:**

अध्यापकानां शैक्षिकरूपेण पुनर्नवीकरणाय केन्द्रीयसंस्कृतविश्वविद्यालयेन अनेके कार्यक्रमाः आयोज्यन्ते। विश्वविद्यालयानुदान-आयोगेन तथा भारतसर्वकारेण निर्धारिताः अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/सेवारतप्रशिक्षणम्, राष्ट्रिय/अन्ताराष्ट्रियसम्मेलनस्य आयोजनम्, इति नैकाः व्यवस्थाः कल्पयति। परिसरेषु अध्यापनरतानाम् अध्यापकानां वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकविसमवायः इत्यादयः कार्यक्रमाश्च विश्वविद्यालयद्वारा आयोजिता भवन्ति।

प्रतिवर्षं संस्कृतसप्ताहः विश्वविद्यालयस्य सर्वपरिसरेषु समाचर्यते। **श्रावणपूर्णिमायां संस्कृतदिवसम् उपलक्ष्य आचर्यमाणे अस्मिन् कार्यक्रमे शैक्षिकाः सङ्गोष्ठ्यः आयोज्यन्ते।**

प्रतिवर्षं **जून् मासस्य २१ तमे दिनाङ्के 'अन्ताराष्ट्रिययोगदिवसः' आयोज्यते।** अस्मिन् योगदर्शनस्य महत्त्वम् उपलक्ष्य विशिष्टं व्याख्यानम् आयोज्यते। योगासनानां प्रशिक्षणं दीयते। अध्यापकाः तत्र भागं गृह्णन्ति। तेन प्रतिदिनम् आसनानि कर्तुं प्रभवन्ति।

प्रतिवर्षं **ग्रीष्मावकाशे केन्द्रीयविद्यालयस्य शिक्षकाणां कृते सेवारतप्रशिक्षणवर्गः** आयोज्यते। केन्द्रीयसंस्कृतविश्वविद्यालयः वर्गस्य आयोजकः भवति। अस्मिन् वर्गे भारते विद्यमानानां केन्द्रीयविद्यालयानाम् अध्यापकाः भागं गृह्णन्ति। असौ वर्गः प्रतिभागिनां सौकर्यदृष्ट्या देशस्य स्थानद्वये आयोज्यते। तत्र भाषाबोधनदृष्ट्या कार्यशाला चा आयोजिता भवति।

प्रतिवर्षं वाक्प्रतियोगिता, शलाका, स्फूर्तिस्पर्धा, कण्ठपाठस्पर्धा च आयोज्यते। विविधेषु शास्त्रीयेषु विषयेषु स्पर्धाः सञ्चाल्यन्ते। ताः स्पर्धाः स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च भवन्ति। छात्राः इतरच्छात्रैः सह स्पर्धित्वा स्थानीयस्तरे राज्यस्तरे च चिताः सन्तः राष्ट्रस्तरे प्रवेशं लभन्ते। विविधस्तरेषु भागं गृह्णतां छात्राणां कृते परिसरेषु अध्यापकाः मार्गदर्शनं यच्छन्ति। स्पर्धार्थं निर्धारितान् विषयान् छात्रान् पाठयन्ति। तदर्थं ते विशिष्टां कौशलञ्च सम्पादयन्ति। अत्र छात्राणां यशसि अध्यापकानां शास्त्रीयम् अध्यापनकौशलं बिम्बितं भवति।

विश्वविद्यालयस्य परिसरेषु प्रतिवर्षं राष्ट्रस्तरीयाः सङ्गोष्ठ्यः, अन्तर्जालीयाः सङ्गोष्ठ्यः, सम्मेलनानि च आयोज्यन्ते। तदेतद् आयोजनम् अध्यापकानां शैक्षणिककौशलनां पुनर्नवीकरणे एका वेदिका भवति।

विश्वविद्यालयस्य परिसरेषु अध्यापननिरतानाम् अध्यापकानां कृते विश्वविद्यालयानुदान-आयोगस्य नियमानुसारम् अपेक्षितेषु सेवानिरतप्रशिक्षणेषु भागं ग्रहीतुं अवसरः कल्प्यते। ते अध्यापकाः यूजीसि-मानवसंसाधनविकासकेन्द्रेषु आयोज्यमाने पुनश्चर्यापाठ्यक्रमे (RC), अभिविन्यासपाठ्यक्रमे (Orientation Programme) च भागग्रहणाय प्रेष्यन्ते। अध्यापकाः एतत्पाठ्यक्रमे भागं गृहीत्वा नैकानि अध्यापनकौशलानि प्राप्नुवन्ति। परिसरेषु कार्यनिरताः अध्यापकाः पुनश्चर्यापाठ्यक्रमे, अभिविन्यासपाठ्यक्रमे अन्येषु च विभिन्नपाठ्यक्रमेषु भागम् अगृह्णन्। तेषां नामानि-

डा. अरुणभट्टः सङ्कायविकासकार्यक्रमे (FDP) भागम् अगृह्णात्। डा. अरुणभट्टः, डा. प्रमोदभट्टः, डा. नारायणवैद्यः, डा. अरविन्दकुमार सोमदत्तः, डा. दयानिधिः, डा. ओम प्रकाश सहानि, डा. रतन कुमार पाण्डे च अभिविन्यासपाठ्यक्रमे भागं गृहीतवन्तः। श्री आकाश बाबू जैन रचनात्मक-निर्देशात्मकपाठ्यक्रमे (FIP) भागं गृहीतवान्। एते विश्वविद्यालयस्य राजीवगान्धीपरिसरस्य (शृङ्गेरी, कर्नाटकम्) अध्यापकाः सन्ति।

डा. वेणुगोपाल रावः, डा. के.गिरिधररावः, प्रो. ई.एम्. राजन्, मणिचित्र पि. एस्. राधिका पि. आर्. विजयानन्द अडिगः इत्येते सङ्कायविकासकार्यक्रमे (FDP) भागम् अगृह्णन्। श्री दानेश पि.वि, केविएस्-सेवारतकार्यक्रमे भागं गृहीतवान्। प्रो. हर्षकुमारः पुनश्चर्यापाठ्यक्रमे भागम् अगृह्णात्। प्रो.हर्षकुमारः, निशा विनोदः, रम्या पि.आर्. डा. रामचन्द्रजोय्सः च कार्यशालायां भागं गृहीतवन्तः। डा. शीबा एम्.के, प्रो. के.के. शैन्, पि. विद्याधरः, श्यामराजः सि. वेणुगोपालरावः, जेस्सि के. ए, एन्. आर्. श्रीधरन्, श्रीनिवासन् पि.के. इत्येते अभिविन्यासपाठ्यक्रमे भागम् अगृह्णन्। एते विश्वविद्यालयस्य गुरुवायूरुपरिसरस्य (त्रिशूर, केरलम्) अध्यापकाः सन्ति।

विश्वविद्यालयस्य परिसरेषु विविधेषु शास्त्रीयेषु विषयेषु विशिष्टव्याख्यानानि आयोज्यन्ते। तत्र सम्पद्यमानैः शास्त्रेषु विशिष्टानां प्रसिद्धविपश्चिदां व्याख्यानैः अध्यापकाः अधिकं प्रयोजनं लभन्ते।

वाक्यार्थसभायाः आयोजने प्रोत्साहनं दीयते। विश्वविद्यालयस्य राजीवगान्धीपरिसरे अध्यापकवाक्यार्थपरिषद् सङ्घटिता वर्तते। परिषद्द्वारा वाक्यार्थसभाः आयोज्यन्ते। सभासु परिसरीयाः अध्यापकाः आदर्शवाक्यार्थं प्रस्तुवन्ति। सिद्धतापूर्वकं पूर्वपक्षसिद्धान्तक्रमेण विषयोपस्थापनकौशलं प्राप्तुम् ते अवसरं प्राप्नुवन्ति।

अन्यस्थानेषु आयोज्यमानासु शास्त्रार्थसभासु विश्वविद्यालयस्य अध्यापकाः भागं गृह्णन्ति। यथा- **शृङ्गेरीशारदापीठे प्रतिवर्षं प्रवर्तमानायां शास्त्रार्थसभायां राजीवगान्धीपरिसरीयाः अध्यापकाः भागं गृह्णन्ति। तेनाली, पुणे, अहम्मदनगरम्, काशी इत्यादिप्रदेशेषु प्रचाल्यमानासु शास्त्रपरीक्षासु भागग्रहणाय अध्यापकाः प्रोत्साह्यन्ते।**

प्रतिभायाः प्रकाशनाय कविसम्मेलनम् एका वेदिका भवति। विश्वविद्यालयस्य प्रतिभावन्तः अध्यापकाः काव्यानि विरचय्य सम्मेलनेषु प्रस्तुवन्ति। परिसरेषु विविधावसरेषु संस्कृतकविसमवायः आयोज्यते। राजीवगान्धीपरिसरे, परिसरस्य रजतमहोत्सवकाले (२०१७) राष्ट्रियकविसम्मेलनम् आयोजितम्।

**अष्टादशी**परियोजनान्तर्गततया शैक्षिकानुसन्धानाय विश्वविद्यालयः अनुदानं ददाति। इयं व्यवस्था प्रतिवर्षं महा/लघुपरियोजनायाः कृते आवेदनं दत्तवद्भ्यः अनुसन्धानाय वर्तते। विश्वविद्यालयस्य परिसरेषु कार्यनिरताः अध्यापकाः अनुसन्धानपरियोजनार्थम् आवेदयन्ति। अनुदानेन तेषां प्रोत्साहनं क्रियते।

एवं बहवः शैक्षिकाः कार्यक्रमाः अध्यापकानां पुनर्नवीकरणाय अभिगृहीताः वर्तन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |

| Link for additional Information | [View Document] |
|---|---|

***2.4.9 Institution has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/Veda Shakhas.***

***संस्थायां कश्चन क्रियाविधिः वर्तते यस्मिन् युवाध्यापकाः वरिष्ठविदुषां सन्निधौ शास्त्राध्ययनाय प्रोत्साह्यन्ते। गुरूणां नामानि सूचयन्तु येभ्यः अध्यापकाः शास्त्राणां वेदशाखानां वा पारम्परिकम् अध्ययनमकुर्वन्।***

**Answer:**

शास्त्राणां वेदशाखानां च **अध्ययनम्, अध्यापनम्, अनुसन्धानम्, प्रसारः** इत्यादिभिः क्रियाभिः **भारतीयज्ञानशाखानां सामाजिकोपयोगः** सिद्ध्यति। संस्कृतवाङ्मयस्य समाजपर्यन्तं नयने विधीयमाने समाजेन सह तस्य सम्बन्धः स्थिरो भवति। तेन समाजे शान्तिः, सौहार्दम्, स्वास्थ्यम्, धर्मश्च सन्तिष्ठते। एतदुद्देश्येन केन्द्रीयसंस्कृतविश्वविद्यालयः नैकान् विधीन् अनुसरति। विश्वविद्यालये विविधसङ्कायेषु कार्यरताः अध्यापकाश्च विशिष्टाः विद्वांसः वर्तन्ते। गुरूणां सन्निधौ अधीतशास्त्राः वरिष्ठाः युवानश्च अध्यापकाः वर्तन्ते। विश्वविद्यालये कार्यरताः युवानः अध्यापकाः  वरिष्ठानां विदुषां सन्निधौ शास्त्राध्ययनम् अन्ववर्तयन्/ अनुवर्तयन्ति। तेषाम् नामानि इत्थं वर्तन्ते।

**एकलव्यपरिसरः, अगर्तला, त्रिपुरा**

**डा. गणेश्वरनाथ झा, व्याकरणविभागाध्यक्षः,  महामहोपाध्यायानां मणिद्रविडशास्त्रिवर्याणाम् आचार्याणां राजारामशुक्लवर्याणां च सन्निधौ न्यायशास्त्रं वेदान्तशास्त्रं च अधीतवान्।**

**श्रीवेदव्यासपरिसरः गरली, हिमाचलप्रदेशः**

**प्रो. सुब्रह्मण्यम्, ज्यौतिषविभागाध्यक्षः,  घनपाठिनां के. वि. सोमयाजुलुवर्याणां सन्निधौ वेदक्रमपाठम् अधीते।**

**श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः**

- प्रो. विजयपालशास्त्री आचार्याणां सूर्यकान्तबालीवर्याणां सन्निधौ साहित्यम्
- प्रो. बनमालीबिश्वालः  आचार्याणां सरोजाभाटेमहोदयानां सन्निधौ व्याकरणम्
- डा. कृपाशङ्करशर्मा आचार्याणां के. एन्. शुक्लमहाभागानां सन्निधौ साहित्यम्
- डा. प्रफुल्ल गडपालः आचार्याणां रमाकान्तपाण्डेयवर्याणां सन्निधौ साहित्यम्
- डा. आर्. बालमुरुघन् आचार्याणां विष्णुपोट्टीमहाभागानां सन्निधौ न्यायम्
- डा. सच्चिदानन्दस्नेही आचार्याणां हरेरराम त्रिपाठिवर्याणां सन्निधौ न्यायम्
- डा. अनिल कुमारः आचार्याणां सुखदेव भोई वर्याणां सन्निधौ साहित्यम्
- डा. शैलेन्द्र प्रसाद उनियालः आचार्याणां महेशचन्द्र दासवर्याणां सन्निधौ वेदम्
- डा. श्रीओम् शर्मा आचार्याणां ब्रजभूषण ओझावर्याणां सन्निधौ व्याकरणम्
- डा. अरविन्द सिंघ गौर्  आचार्याणां एस्.के. माथुरवर्याणां सन्निधौ
- डा. अशोक थप्लियालः आचार्याणां देवीप्रसाद त्रिपाठिवर्याणां सन्निधौ ज्यौतिषम्
- डा. मुकेशकुमारः आचार्याणाम् ए.पि.सच्चिदानन्दवर्याणां सन्निधौ ज्यौतिषम्
- डा. मनिश जुगरन् आचार्याणां वाइ. एस्. रमेशवर्याणां सन्निधौ साहित्यं च अध्यगीषत।

**श्रीसदाशिवपरिसरः पुरी, ओडिशा**

अधोनिर्दिष्टाः वरिष्ठाः विद्वांसः मासे प्रतिभानुवासरं यूनः अध्यापकान् अपाठयन्। ते यथा-

- प्रो. अतुल कुमार नन्दः, प्रो. खगेश्वर मिश्रः,
- प्रो. ब्रज किशोर स्वाईं,
- प्रो. जय कृष्ण मिश्रः,
- प्रो. माधव चन्द्र पण्डा,

- डा. विद्यानाथ स्वाईं, इत्येते आचार्याः धर्मशास्त्रम्.
- डा.सुधांशु शेखर शास्त्री वेदान्तम्
- प्रो. कृष्णकान्त शर्मा सांख्ययोगम्
- डा. गणपति शुक्लः, प्रो. राजाराम शुक्लः न्यायम्
- प्रो. सुकान्त कुमार सेनापतिः, प्रो. प्रलय कुमार नन्दः च सर्वदर्शनम् अध्यापयन्।

**जयपुरपरिसरः जयपुरम्, राजस्थानम्**

- डा. किरण खिंची, प्रो. शिवकान्त झा, प्रो. श्रीधर मिश्रः, प्रो. विष्णुकान्त पाण्डेयः, प्रो. कमलचन्द्रयोगी इत्येतेषाम् आचार्याणां सन्निधौ व्याकरणम्
- डा. राकेशकुमार जैनः, डा. ललितकिशोर शर्मा, आरती मीणा च प्रो. रामकुमार शर्मा प्रो. किशोर कुमार दलाई इत्येतेषाम् आचार्याणां सन्निधौ साहित्यम्
- डा. कृष्णाशर्मा, डा. अङ्कित दधीचः डा. सुब्रत साहू च  प्रो. भगवती सुदेशवर्याणां सन्निधौ धर्मशास्त्रम्
- डा. रानी दधीच, डा. पवन व्यासः, डा. चेतन कुमारः, प्रो. सत्यम कुमारीवर्याणां सन्निधौ सर्वदर्शनम्
- डा. सुधाकर कुमार पाण्डेयः, डा. प्रकाश रञ्जन मिश्रः च  डा. लम्बोदर मिश्रवर्याणां सन्निधौ वेदम् अधीतवन्तः।

**श्रीराजीवगान्धीपरिसरः शृङ्गेरी, कर्नाटकम्**

- डा. नारायण रायकरः, डा. राघवेन्द्र पी. अरोल्ली, डा. श्यामसुन्दर भट्टः च प्रो. नवीन होल्लवर्याणां सन्निधौ न्यायशास्त्रम्
- श्री निरञ्जन भट्टः, डा. विश्वनाथ सुंकसालः च डा. गणेश ईश्वरभट्टवर्याणां सन्निधौ अद्वैतवेदान्तम्
- डा. श्रीकरः वि. डा. राघवेन्द्रभट्टवर्याणां सन्निधौ साहित्यम्
- डा. नारायण वैद्यः डा. चन्द्रकान्तवर्याणां सन्निधौ शिक्षाशास्त्रम्
- डा. गोविन्द जि. हेगडे प्रो. सुब्राय भट्टवर्याणां सन्निधौ  मीमांसाशास्त्रम् अध्यगीषत।

**भोपाल परिसरः भोपाल्, मध्यप्रदेशः**

- प्रो. सुबोध शर्मा, प्रो. जे. भानु मूर्तिः, प्रो. हंसधर झा, प्रो. सनन्दन कुमार त्रिपाठी प्रो. अर्चना दुबे इत्यादयः आचार्याः परिसरस्य यूनः अध्यापकान् शास्त्राणि अध्यापयन्।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Link for additional Information | View Document |

**2.5 Evaluation Process and Reforms**

***2.5.1 Average number of days from the date of last semester-end/ year-end examination till the declaration of results during the last five years***

***विगतेषु पञ्चसु वर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां सङ्ख्यायाः मध्यमानम्***

**Answer:** 36.4

2.5.1.1 ***Number of days from the date of last semester-end/ year- end examination till the declaration of results year-wise during the last five years.***

विगतेषु पञ्चसु वर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 33 | 41 | 39 | 40 | 29 |

| File Description | Document |
|---|---|
| List of Programmes and date of last semester and date of declaration of results (Institutional Data as per Data Template) | View Document |
| Any additional information | View Document |

***2.5.2 Percentage of students who made complaints/grievances about evaluation against total number appeared in the examinations during the last five years***

***विगतेषु पञ्चसु वर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये परिवादं/व्यथां वा कृतवतां छात्राणां प्रतिशतं मानम्।***

**Answer:** 0.46

2.5.2.1 Number of students who made complaints/grievances about evaluation year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये परिवादं/व्यथां वा कृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 18 | 0 | 8 | 90 | 85 |

2.5.2.2 Number of students appeared in the Institution examination year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु, संस्थायां परीक्षासु सम्मिलितच्छात्राणां वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 9336 | 8918 | 8696 | 8476 | 8201 |

| File Description | Document |
|---|---|
| Number of students who made complaints and total number of students appeared year-wise | View Document |
| Any additional information | View Document |

***2.5.3 IT integration and reforms in the examination procedures and processes (continuous internal assessment and end-semester assessment) have brought in considerable improvement in examination management system of the institution***

***सूचनाप्रविधिना परीक्षापद्धतेः परिष्कारेण (निरन्तरम् आन्तरिकपरीक्षणं अन्तिमसत्रार्द्धपरीक्षणं) च संस्थायाः परीक्षाप्रबन्धनसमितेः वर्धने विशिष्टम् आनुकूल्यम् आनीतम्।***

**Answer:**

पाठ्यक्रमाणाम् अङ्गं भवति **परीक्षापद्धतिः**। केन्द्रीयसंस्कृतविश्वविद्यालयस्य परीक्षापद्धतिः, तन्त्रज्ञानसम्पत्तेः सहकारेण सूचनाप्रविधिसंयोजनेन परीक्षासम्बन्धिकार्याणि निर्वहति। परीक्षापद्धतिः, आन्तरिकपरीक्षाप्रणाली, आन्तरिकमूल्याङ्कनं च यथाकालं समन्वयति। विश्वविद्यालयद्वारा प्राक्शास्त्रिपाठ्यक्रमः, शास्त्रिपाठ्यक्रमः, आचार्यपाठ्यक्रमः, शिक्षाशास्त्रिपाठ्यक्रमः, शिक्षाचार्यपाठ्यक्रमः, विद्यावारिधिपाठ्यक्रमः, पदविकापाठ्यक्रमः, प्रमाणपत्रीयपाठ्यक्रमश्च सञ्चाल्यते। तत्र प्राक्शास्त्रि-शिक्षाशास्त्रिपाठ्यक्रमौ वार्षिकपद्धत्या, शास्त्रि-आचार्यपाठ्यक्रमौ सत्रार्धपद्धत्या च प्रवर्तते। प्राक्शास्त्री, शास्त्री, शिक्षाशास्त्री, आचार्यः, शिक्षाचार्यः इत्यादीनां पाठ्यक्रमाणां प्रक्रिया प्रवेशपरीक्षया आरभ्यते। सर्वाः प्रवेशपरीक्षाः सद्यस्कमाध्यमेन (Online) सञ्चाल्यन्ते। तदर्थं मासद्वयात् पूर्वं सूचनाप्रसारादयः सर्वाः सिद्धताः विश्वविद्यालयस्य परीक्षाविभागेन निरूह्यन्ते। परीक्षाविभागः प्रश्नपत्रनिर्माणाय विषयज्ञान् अनुभविनः अध्यापकान् सूचयति। प्रश्नपत्रनिर्माणाय दशदिनात्मकः कालः निर्दिश्यते। समानविषये त्रीणि प्रश्नपत्राणि निर्मातुं ते अध्यापकाः निर्दिष्टाः भवन्ति।

**परीक्षार्थिनः छात्राः परीक्षाप्रपत्रं पूरयेयुः। निर्दिष्टं email सङ्केतं कूटाक्षरं च आदाय निर्दिष्टजालपुटद्वारा परीक्षाशुल्कं समर्पयेयुः। प्रवेशपत्रं जालपुटे आरोपितं परीक्षार्थिनः स्वयम् अवरोपणं कर्तुं शक्नुवन्ति। परीक्षार्थी परीक्षाकेन्द्रं प्रेवेशपत्रेण सह प्रविशेत् इति नियमः अनुस्रियते।**

प्रश्नपत्राणाम् उत्तरपुस्तिकायाः च मुद्रणं विधाय परीक्षाकेन्द्रं प्रति प्रेष्यते। विभिन्नराज्येषु स्थिताः विश्वविद्यालयस्य परिसराः, आदर्शमहाविद्यालयाः च परीक्षाकेन्द्राणि भवन्ति। परीक्षायाः सुष्ठुसम्पादनाय सर्वेषु परीक्षाकेन्द्रेषु मुख्यपरीक्षकः नियुक्तो भवति।

1. **परीक्षाप्रक्रिया**

केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा प्राक्शास्त्रि-शास्त्रि-शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधि-पाठ्यक्रमेषु प्रवेशेच्छुकच्छात्राणां कृते प्रवेशपरीक्षाः आयोज्यन्ते। आसु परीक्षासु प्राक्शास्त्रि-शास्त्रि-पाठ्यक्रमयोः कृते परिसरस्तर एव प्रवेशपरीक्षा आयोज्यते। शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधिपाठ्यक्रमेषु च प्रवेशेच्छुकच्छात्राणां कृते अखिलभारतीयस्तरे प्रवेशपरीक्षाः आयोज्यन्ते । सर्वासामपि परीक्षाणां कृते प्रवेशेच्छुकाभ्यर्थिभिः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य जालपुटमाध्यमेन सद्यस्कावेदनं (Online Application) क्रियते । तदनु प्राक्शास्त्रि-शास्त्रिपाठ्यक्रमयोः कृते विश्वविद्यालयस्य सर्वेषु परिसरेषु निर्धारिततिथौ परीक्षा आयोज्यते । शिक्षाशास्त्रि-शिक्षाचार्य-विद्यावारिधिपाठ्यक्रमाणां कृते तु देशस्य विभिन्नेषु नगरेषु देहली-वाराणसी-जम्मू-हरिद्वारादिषु विंशतौ स्थानेषु प्रवेशपरीक्षाः आयोज्यन्ते । इमाः प्रवेशपरीक्षाः प्रायेण मई-जूनमासयोः आयोज्यन्ते । एतदर्थं विस्तृताः सूचनाः विश्वविद्यालयस्य परिसराणाञ्च जालपुटेषु प्रसिद्धवार्तापत्रिकासु च विज्ञापिताः भवन्ति।

त्रिवर्षीयशास्त्रि-द्विवर्षीय-आचार्य-द्विवर्षीयशिक्षाचार्यपाठ्यक्रममधीयानानां छात्राणां प्रतिवर्षं **द्विः सत्रार्धपरीक्षा(Semester Exams)** आयोज्यन्ते । एवं शास्त्रिपाठ्यक्रमस्य आहत्य षट् सत्रार्धपरीक्षाः आचार्यपाठ्यक्रमस्य चतस्रः सत्रार्धपरीक्षाः शिक्षाचार्यस्य चापि चतस्रः सत्रार्धपरीक्षाः आयोज्यन्ते । आसु सत्रार्धपरीक्षासु प्रथम-तृतीय-पञ्चमसत्रार्धपरीक्षाः नवम्बर-दिसम्बरमासयोः द्वितीय-चतुर्थ-षष्ठसत्रार्धपरीक्षाः मई-जूनमासयोः आयोज्यन्ते ।

द्विवर्षीयप्राक्शास्त्रिपाठ्यक्रमस्य द्विवर्षीयशिक्षाशास्त्रिपाठ्यक्रमस्य च प्रतिवर्षं वार्षिकी परीक्षा आयोज्यते। वार्षिकी परीक्षा प्रायेण अप्रिल-मई-मासयोः आयोज्यते । विद्यावारिधिपाठ्यक्रममधीयानानां शोधच्छात्राणां कृते षाण्मासिकपाठयक्रमस्य अन्ते लिखितपरीक्षा आयोज्यते अपि च शोधकार्यस्य अन्ते शोधप्रबन्धसमर्पणात् परं मौखिकी परीक्षा आयोज्यते ।

सर्वेषामपि पाठ्यक्रमाणां प्रत्येकं प्रश्नपत्रस्य लिखितपरीक्षया साकम् आन्तरिकपरीक्षणमपि विधीयते। समग्रप्रश्नपत्रस्य 20 प्रतिशतं मूल्याङ्कनम् आन्तरिकपरीक्षणमाध्यमेन क्रियते । शिक्षाशास्त्रि-शिक्षाचार्यपाठ्यक्रमयोः कृते प्रायोगिकपरीक्षा अपि आयोज्यन्ते । यत्र बाह्यपरीक्षकः छात्राणां प्रायोगिककार्याणां कौशलानाञ्च आधारेण मूल्याङ्कनं विदधाति ।

1. **सूचनाप्रविधेः साहाय्यम्**

**सूचनाप्रविधिः**

विभिन्नानां कार्याणां सम्पादने सौकर्यं कल्पयति अतः सम्प्रति सूचनाप्रविधेः प्रभावः सर्वेषु क्षेत्रेषु वर्तते । शिक्षाजगत्यपि नवनवीनानां प्रयोगाणां परिणामतो नवनवीनाः प्रविधयः प्रयुज्यमाना वर्तन्ते । अधुना शिक्षणेप्रशिक्षणे अध्ययने मूल्याङ्कने विभिन्नेतरगतिविधीनां सम्पादने च सूचनाप्रविधिः अत्यन्तं सहायको भवति । परीक्षाप्रबन्धनप्रणाल्याः सञ्चालनेऽपि सूचनाप्रविधिः अत्यन्तमुपकारी वर्तते । पूर्वं सूचनाप्रविधेरभावे परीक्षानिमित्तमावेदनपूरणे एव महान् कालः समयश्च भवति स्म तदधुना सूचनाप्रविधेः कारणात् भृशं रक्ष्यते । सम्प्रति केन्द्रीयसंस्कृतविश्वविद्यालयद्वारा आयोज्यमानानां विभिन्नानां परीक्षाणामावेदनपत्राणि तदर्थं समर्प्यमाणं शुल्कञ्च सर्वमपि **सद्यस्कमाध्यमेन (Online)** क्रियमाणं वर्तते । अपि च सर्वाः अपि सूचनाः जालपुटमाध्यमेनैव प्रदीयमानाः सन्ति । भाविनि काले अस्य प्रविधेः विभिन्नेषु कार्येषु इतोऽपि अनुप्रयोगाय केन्द्रीयसंस्कृतविश्वविद्यालयः प्रयतमानो वर्तते ।

1. **निरन्तरम् आन्तरिकपरीक्षणप्रणाली**

निरन्तरम् आन्तरिकपरीक्षणप्रणाली सम्प्रति सर्वत्रापि परीक्षणस्य मुख्याङ्गत्वेन विद्यमाना वर्तते । सर्वासु शैक्षिकसंस्थासु बाह्यपरीक्षणेन साकं निरन्तरम् आन्तरिकपरीक्षणमपि सम्पाद्यते । केन्द्रीयसंस्कृतविश्वविद्यालयेनापि स्वीयपरिसरेषु विभिन्नपाठ्यक्रमान् अधीयानानां छात्राणां निरन्तरम् आन्तरिकं परीक्षणं सम्पाद्यते। छात्रस्य कक्ष्योपस्थितिः, पुस्तकालये पत्रपत्रिकाणाम् अध्ययनम्, पाठ्यसहगामिक्रियासु सहभागिता, परियोजनाकार्याणां सम्पादनञ्चेति विषयानधिकृत्य निरन्तरम् आन्तरिकं परीक्षणं विधीयते । छात्रस्य सहभागितानुसारं तस्य प्रदर्शनानुसारञ्च तस्मै अङ्काः प्रदीयन्ते ।

1. **सङ्गणकपटलोपरि पत्रमौल्यमापनव्यवस्था**

सङ्गणक-सहायकानुदेशनैः सह मूल्याङ्कनकार्येष्वपि विश्वविद्यालयस्य परीक्षाविभागेन यथासमयं निर्देशाः दीयन्ते । विगत-कोविड19-महामार्याः प्रकोपविशिष्टपरिस्थितिषु परीक्षाविभागेन उत्तरपुस्तिकाभिः सम्बद्धमूल्याङ्कनायापि स्पष्टनिर्देशाः प्रदत्ताः एव (यथा कार्यालयादेशः के.सं.वि./परीक्षा/कोविड-19/2021/133 दिनाङ्कः 11.306.2021)। निर्देशेषु ऑनलाइनमाध्यमेन उत्तरपुस्तिकानां सङ्गणकपटलोपरि-मूल्याङ्कनमेव कर्तव्यमिति विशिष्टमेव । एतदर्थम् उत्तरपुस्तिकानां भौतिकस्वरूपम् अङ्गीकृत्य वितरणं मूल्याङ्कनञ्च अनिर्दिष्टं निषिद्धञ्च । अनया प्रक्रियया अनावश्यककर्गज-वित्तादिव्ययोऽपि नाभवत्, तथैव अध्यापकानां परीक्षकाणां च सहयोगोऽपि प्राप्तः । एतैः क्रियाकलापैः परीक्षाप्रबन्धनसमितेः वर्धने आनुकूल्यं समानीतं वर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Year-wise number of applications, students and revaluation cases | View Document |
| Any additional information | View Document |

***2.5.4 Status of automation of Examination division along with approved Examination Manual.***

***परीक्षाविभागस्य यान्त्रिकीकरणेन सह अङ्गीकृतायाः परीक्षामार्गदर्शिकायाः स्थितिः***

**Answer:** B. Only student registration, Hall ticket issue & Result Processing 2. केवलं छात्राणां पञ्जीकरण-परीक्षा-प्रवेशपत्रं फलितांशप्रक्रिया च

| File Description | Document |
|---|---|
| Current Manual of examination automation system | View Document |
| Any additional information | View Document |
| Annual reports of examination including the present status of automation (Institutional data as per Data Template) | View Document |

***2.5.5 Institution has a policy of question paper setting in Sanskrit language and mechanism of encouraging students in writing answers in Sanskrit.***

***संस्थायां संस्कृतेन प्रश्नपत्रसज्जतार्थं काचिद् नीतिः, तथा च संस्कृतेन उत्तरलेखनार्थं छात्राणां प्रोत्साहनाय क्रियाविधिश्च वर्तते।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः भारतीयज्ञानशाखानां शिक्षणं प्रोत्साहयति। ज्ञानशाखाः ताः वेदः, वेदाङ्गानि, दर्शनानि, शास्त्राणि, पुराणानि, काव्यानि च भवन्ति। सर्वाः इमाः शाखाः संस्कृतभाषया उपनिबद्धाः। वेदादीनां ज्ञानशाखानां सुष्ठु अवगतये संस्कृतभाषा एव आश्रयणीया । भाषान्तरे अवगमनापेक्षया मूलभाषायां सम्प्रत्ययः याथार्थ्येन भवति। अतः संस्कृतविश्वविद्यालयस्य सर्वे पाठ्यक्रमाः संस्कृतभाषायां संरचिताः सन्ति। विषयाणाम् अध्यापनं संस्कृतमाध्यमेन भवति। परीक्षायाः लेखनमाध्यमः संस्कृतभाषा देवनागरीलिपिश्च वर्तते।

**विश्वविद्यालये प्राक्शास्त्री, शास्त्री, आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः इत्येतेषु नियमितपाठ्यक्रमेषु छात्राः प्रवेशं प्राप्नुवन्ति। प्रवेशपरीक्षाम् उत्तीर्य आगतेषु तेषु द्विप्रकारकाः छात्राः भवन्ति। केचन पारम्परिकपद्धत्या पूर्वकक्ष्याम् उत्तीर्य समागताः। अन्ये केचन आधुनिकपद्धत्या पूर्वकक्ष्याम् उत्तीर्य समागताः। पारम्परिकपद्धत्या अधीत्य प्रवेशं लब्धवन्तः छात्राः कक्ष्यायां संस्कृतमाध्यमेन प्रवर्त्यमानं पाठम् अवगन्तुं पारयन्ति। लेखनेन च ते परिचिता भवन्ति। किन्तु आधुनिकपद्धत्या अधीत्य प्रवेशं लब्धवन्तः छात्राः पाठस्य अवगमने संस्कृतेन लेखने च क्लेशम् अनुभवन्ति। अतः प्रवेशसमनन्तरं सम्भाषशिबिरं कार्यशाला च आयोज्यते। तेन भाषणे लेखने च प्राथमिकं ज्ञानं प्राप्नुवन्ति।**

विश्वविद्यालयेन सञ्चाल्यमाने शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च १.नव्यव्याकरणम् २.प्राचीनव्याकरणम् ३.साहित्यम् ४.सिद्धान्तज्यौतिषम् ५.फलितज्यौतिषम् ६.सर्वदर्शनम् ७.धर्मशास्त्रम् ८.पुराणेतिहासः ९.वेदः १०.पौरोहित्यम् ११.जैनदर्शनम् २.बौद्धदर्शनम् १३. सांख्ययोगः १४. नव्यन्यायः १५. प्राचीनन्यायवैशेषिकम् १६.मीमांसा १७.अद्वैतवेदान्तः इति सप्तदशविषया वर्तन्ते। एते विषयाः संस्कृतमाध्यमेनैव पाठ्यन्ते।

प्राक्शास्त्रिपाठ्यक्रमे शास्त्रिपाठ्यक्रमे च आङ्ग्लम्, हिन्दी अथवा प्रान्तीयभाषा इति पत्रे भवतः। अनयोः पाठन-लेखनमाध्यमः सा सा भाषा एव भवति। इतिहासः/ राजनीतिशास्त्रम्/ दर्शनम्/ समाजशास्त्रम्/ अर्थशास्त्रम् इति पत्रं सङ्गणकविज्ञानम् इति पत्रञ्च आङ्लभाषामाध्यमेन हिन्दीभाषामाध्यमेन वा पाठ्यते। संस्कृतभाषया अपि पाठ्यते। लेखनमाध्यमः संस्कृतम् हिन्दी आङ्ग्लं वा भवितुम् अर्हति। एवञ्च आधुनिकभाषाणाम् इतिहासादिविषयाणां च अध्यापनस्य लेखनस्य च माध्यमः वैकल्पिकतया संस्कृतं निर्दिष्टं वर्तते।

**शास्त्रिपाठ्यक्रमे तथा आचार्यपाठ्यक्रमे प्रतिसत्रं विंशतेः अङ्कानाम् आन्तरिकी परीक्षा भवति । तत्र आन्तरिकमूल्याङ्कनाय लिखितपरीक्षा भवति । तस्याः परीक्षायाः प्रश्नपत्रं संस्कृतमाध्यमेन भवति, छात्राः संस्कृतमाध्यमेन उत्तरन्ति ।**

शिक्षाशास्त्रिपाठ्यक्रमे आधुनिकभाषाविषयं विहाय इतराणि पत्राणि संस्कृतमाध्यमेन पाठ्यन्ते । छात्राणां शिक्षणाभ्यासः मनोविज्ञानस्य प्रायोगिकपरीक्षा च संस्कृतभाषया एव प्रवर्त्यते ।

विद्यावारिधिपाठ्यक्रमे शोधरताः छात्राः शोधप्रबन्धं संस्कृतमाध्यमेन प्रस्तुवन्ति । संस्कृतभाषायां लिखितस्यैव शोधप्रबन्धस्य परीक्षणयोग्यता इति विश्वविद्यालयस्य सामान्यः नियमः वर्तते। तेषां शोधस्य मूल्याङ्कनं परीक्षणञ्च संस्कृतमाध्यमेन भवति। एतत्तु छात्राणां गवेषणेन सह संस्कृतभाषायां विशिष्टां गतिं प्राप्तुं महान्तम् अवसरं कल्पयति।

**प्राक्शास्त्रिपाठ्यक्रमात् आचार्यपाठ्यक्रमं यावत् शिक्षाशास्त्रिपाठ्यक्रमात् शिक्षाचार्यपाठ्यक्रमं यावत् निर्धारितः सर्वोऽपि विषयः संस्कृतवाङ्मये निहितानां तत्त्वानाम् अनुसन्धाने प्रवृत्तिं जनयति। संस्कृतमाध्यमेन पाठनेन इदं प्रयोजनं प्राप्तुं शक्यते। ज्ञेयः पदार्थः मूलभाषया ज्ञातः एव अव्यभिचरितो भवति।**

पारम्परिकधारायाम् अधीत्य प्रविष्टाः छात्राः इव आधुनिकधारायाम् अधीत्य प्रविष्टानाम् अपि सुलभग्राह्यतया रुचिं वर्धयति सम्भाषणपाठ्यक्रमः। असौ पाठ्यक्रमः संस्कृतेन अपरिचितेषु छात्रेषु जायमानां भीतिं निवारयति। अस्मिन्पाठ्यक्रमे शब्दकोषः, उच्चारणम्, वाक्यरचना, क्रियापदावली इत्येतेषु बिन्दुषु अवधानं दीयते। सर्वोऽपि सम्भाषणपाठ्यक्रमः पूर्णतया संस्कृतमाध्यमेन सञ्चाल्यते। भाषणकौशलम् अधिगन्तुम् एषः सरलः मार्गः। तस्मात् छात्राः अस्मिन् पाठ्यक्रमे उत्साहेन भागं गृह्णन्ति। एवं सर्वेषु स्तरेषु छात्रस्नेही पाठ्यक्रमः सञ्चालनीयः इत्यपि विश्वविद्यालयस्य चिन्तनं वर्तते।

विद्यार्थिदशायां प्राप्तं सम्भाषणकौशलम् अग्रिमकाले अध्यापकत्वेन नियुक्तये अध्यापनकर्मणि च बहूपकारि भविष्यति। तत् इतरेभ्यः वैशिष्ट्यं ख्यापयति। अतः संस्कृताध्यापकस्य संस्कृतसम्भाषणम् 'सत्ता' भवति। सम्प्रति प्राशासनिकविभागेषु संस्कृतं परिचाययितुं विश्वविद्यालयः कार्ययोजनां निर्माति। अग्रिमकाले संस्कृतविश्वविद्यालयस्य सर्वेऽपि विभागाः संस्कृतसम्भाषणेन परिचिताः भविष्यन्ति। परिसरेषु, आदर्शमहाविद्यालयेषु, सम्बद्धसंस्थासु च संस्कृतभाषया सम्भाषणं कर्तुं विश्वविद्यालयद्वारा प्रोत्साहनं दीयमानं वर्तते। तेन कार्यालयीयाः अपि विशिष्टां प्रेरणां प्राप्य संस्कृते सम्भाषणं कर्तुं प्रभवन्ति। **अध्यापकाश्च नूनं संस्कृतसम्भाषणं कुर्युः येन परिसरीयं वातावरणं संस्कृतं भवति इति विश्वविद्यालयेन उद्दिष्टं वर्तते।** अतः नियुक्तौ तादृशाः कुशलाः एव अध्यपकत्वेन चीयन्ते। तेन छात्राः स्वयं प्रेरिता भविष्यन्ति। विश्वविद्यालयस्य साप्ताहिकमेलनम्, वार्षिकोत्सवः, नाट्यमहोत्सवः, युवमहोत्सवः इत्यादयः अनेके कार्यक्रमाः संस्कृतभाषायां भाषणस्य आद्यतां वहन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload the policy document | View Document |
| Upload any additional information | View Document |
| Provide link for Additional Information | View Document |

**2.6 Student Performance and Learning Outcomes**

***2.6.1 The institution has stated learning outcomes (generic and programme specific)/ graduate attributes which are integrated into the assessment process and widely publicized through the website and other documents***

***संस्थाद्वारा अधिगमपरिणामाः (विशिष्टाः निर्दिष्टाश्च कार्यक्रमाः)/ स्नातकोपाधिधारिणां परीक्षणपद्धतिसमन्विताः शैक्षिकगुणोपलब्धयः व्यापकप्रचारार्थं संस्थायाः जालस्थाने अन्येषु प्रपत्रेषु च निर्दिश्यन्ते।***

**Answer:**

भारतस्य विभिन्नेषु राज्येषु केन्द्रीयविश्वद्यालयस्य परिसराः वर्तन्ते। विश्वविद्यालयद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः उद्घोष्यन्ते।पाठ्यक्रमाणां विशिष्टपरिणामाः जालस्थाने निर्दिश्यन्ते, प्रदर्श्यन्ते च ।तेन छात्रैः, परिसरीयैः निदेशकैः, अध्यापकैः च यथासमयं परिणामाः ज्ञातुं शक्यन्ते। **विश्वविद्यालयस्य जालस्थानम् http://sanskrit.nic.inवर्तते ।तत्र सुलभग्राह्या सरणिः अनुसृता वर्तते। छात्रस्थली, परिसरस्थली, गुरुस्थली इति त्रीणि स्थाननि पृथग् निर्दिष्टानि। सम्बन्धिन्यः सूचनाः सम्बन्धिभिः साक्षात् तत्तत्स्थाने प्राप्तुं शक्यन्ते। जालस्थाने**

**परिणामानां प्रकाशनस्य निर्दिष्टा काचित् प्रक्रिया वर्तते। विश्वविद्यालयद्वारा प्राप्तोपाधयः तया प्रक्रियया सन्तुष्टाश्च सन्ति।**

विश्वविद्यालयेन प्राक्शास्त्री, शास्त्री, आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः, विद्यावारिधिः इति पाठ्यक्रमाः सञ्चाल्यन्ते। एते पाठ्यक्रमाः विश्वविद्यालयस्य सर्वेषु परिसरेषु प्रवर्त्यमानाः सन्ति।योगः, आयुर्वेदसाहित्यम्, वास्तु-ज्योतिषम्, भारतीयरङ्गमञ्चः इति विषयेषु पदविकापाठ्यक्रमश्च  गुरुवायूरु-श्रृङ्गेरी-भोपाल-जयपुरपरिसरेषु प्रवर्त्यते। शिक्षाशास्त्रि-शिक्षाचार्यपाठ्यक्रमौ राष्ट्रियशिक्षकशिक्षापरिषदः नियमम् अनुसृत्य प्रवर्तेते। अन्ये पाठ्यक्रमाः विश्वविद्यालयानुदान-आयोगस्य नियमाधारेण प्रवर्तन्ते।

विश्वविद्यालयस्य सर्वोऽपि पाठ्यक्रमः चतुर्मुखी वर्तते । विषयः, समयः, पुष्टिः, तुष्टिः इति चतुरः बिन्दून् परिगणय्य पाठ्यक्रमाणां विन्यासः क्रियते। पाठ्यक्रमे अङ्गीकरणीयाः विषयाः शास्त्रीयाः आधुनिकाश्च भारतीयमौल्यप्रतिपादकाः भवेयुः। किञ्च ते साम्प्रतिकाः भवेयुः। सर्वेऽपि पाठ्यक्रमाः निर्धारितसमयेन सामञ्जस्यं भजेरन्। पाठ्यक्रमाः अध्येतुः समाजस्य च अपेक्षाणां पूरणे तुष्टिप्रदा भवेयुः। सर्वे पाठ्यक्रमाः अध्येतुः तोषजनकाः स्युः। तुष्टिश्च पाठ्यक्रमाणाम् आकर्षकेण विन्यासेन सिद्ध्यति। एवं **चतुर्मुखी पाठ्यक्रमः विश्वविद्यालयेन निर्धार्यते।**

विश्वविद्यालयस्य अध्ययनपरिषत् पाठ्यक्रमाणां निर्धारणं करोति। विश्वविद्यालयस्य माननीयेन कुलपतिना सह विमृश्य परिषदियं तान् पाठ्यक्रमान् निर्धारयति। परिषदि विश्वविद्यालयस्य अन्यविश्वविद्यालयानाञ्च आचार्याः सदस्यत्वेन भवन्ति। शैक्षिकविभागः सर्वेषां पाठ्यक्रमाणां सञ्चालनप्रक्रियां निर्वर्तयति। अध्ययनपरिषदा निर्धारितानां पाठ्यक्रमाणाम् अनुमोदनाय शैक्षिकविभागः कार्यपरिषदः पुरस्तात् प्रस्तावं करोति। एवं विविधस्तरेषु अनुशीलन-अनुमोदनपुरस्सरं निर्धारिताः पाठ्यक्रमाः विश्वविद्यालयस्य जालपुटे प्रकाश्यन्ते।प्रतिवर्षत्रयं पाठ्यक्रमस्य परिवर्तनं विधीयते।

विश्वविद्यालयस्य शैक्षिकविभागः पाठ्यक्रमाणां परिणामान् विशिष्टपरिणामांश्च परिशीलयति। समये समये स्वीक्रियमाणया योजनया परिणामेषु गुणाः लक्ष्यन्ते। ततः  अन्यासां शैक्षिकयोजनानां क्रियान्वयने उत्साहः वर्धते।

**विश्वविद्यालयस्य ध्येयोद्देश्यानुगणं पाठ्यक्रमाः निर्धार्यन्ते।**नानाक्षेत्रेषु उद्योगप्राप्तये एते पाठ्यक्रमाः सहकारिणः भवन्ति। केरलराज्ये प्राक्शास्त्रिपाठ्यक्रमःप्राथमिकशालायां नियुक्तेः शैक्षणिकार्हतारूपेण अङ्गीकृतो वर्तते। तेन अमुं पाठ्यक्रमं समाप्य बहवः तस्मिन् राज्ये उद्योगं प्राप्तवन्तः। विश्वविद्यालयस्य एषः उत्तमः परिणामः वर्तते।

शास्त्रिपाठ्यक्रमस्य अर्हताधारेण विविधाः उद्योगावसराः लभ्यन्ते। वित्तकोषः,  भारतीयरेल्वे, राज्यनागरिकसेवा, केन्द्रनागरिकसेवा, भारतीयपोस्ट्-विभागः इत्यादीनां प्रवेशपरीक्षां लेखितुम् अर्हता प्राप्यते। अन्यविश्वविद्यालयानां पदवीधरैः सह केन्द्रीयविश्वविद्यालयस्य पदवीधराः  समानावसरं लभमानाः सन्ति। बहवः उक्तेषु औद्योगिकक्षेत्रेषु वृत्तिम् अलभन्त। आयुर्वेदसाहित्यस्य, वास्तुज्योतिषस्य, योगविज्ञानस्य च पदविकापाठ्यक्रमाः कौशलाधारिता वर्तन्ते। तेन प्राप्तपदवीकानां स्वतन्त्रतया उद्योगं कर्तुं दक्षता विश्वासश्च सिद्ध्यति।  असौ विश्वविद्यालयस्य पाठ्यक्रमाणां साक्षात् परिणमः वर्तते।

विश्वविद्यालयस्य पाठ्यक्रमेषु प्राचीनविद्यया सह आधुनिकविद्याया अपि समन्वयः वर्तते। संस्कृतपदवीधराः आङ्ग्लभाषायामपि निपुणाः सन्तः विदेशेषु संस्कृतप्रचारकार्यं कर्तुम् उत्सहन्ते। एवं ते भारतस्य सांस्कृतिकप्रतिनिधित्वेन आत्मानं व्यापारयितुं सङ्कल्पन्ते।

**विश्वविद्यालयस्य पारदर्शिनी नीतिः छात्रप्रिया शास्त्रप्रिया च वर्तते।** शैक्षिककार्याणां सर्वाः  सूचनाः विश्वविद्यालयस्य/ परिसराणां भित्तौ प्रकाश्यन्ते। ताः सूचनाः अध्यापकैः अभिभावकैश्च सुलभतया अनुसर्तुम् एष उपक्रमः सौविध्यं कल्पयति। एवं पाठ्यक्रमाणां परिणामाः हस्तामलकीक्रियन्ते।

**विद्यावारिधिपाठ्यक्रमे ईमैल् द्वारा, दूरवाणीमाध्यमेन च अनुसन्धातुः कृते मौखिकपरीक्षायाः सूचना दीयते। मौखिकपरीक्षायाम् उत्तीर्णानां नामानि विश्वविद्यालयस्य सम्बन्धिपरिसरस्य च अन्तर्जाले प्रकाश्यन्ते।**

**मुक्तस्वाध्यायकेन्द्रद्वारा सञ्चाल्यमानानां सर्वेषां पाठ्यक्रमाणां परिणामाः अन्तर्जालस्थाने निर्दिश्यन्ते प्रकाश्यन्ते च। तेन भारते अन्यत्र देशे विद्यमानाः च सर्वान् विषयान् ज्ञातुं प्रभवन्ति।**

एवं **विश्वविद्यालयस्य अन्तर्जालप्रभावेण दूरस्थाः अपि परिसराः सहभागिनश्च पार्श्ववर्तिनः इव लक्ष्यन्ते।** तत्परिणामेन उक्तानाम् उपलब्धीनां क्रियान्वयः सुकरः समपद्यत।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload COs for all courses (exemplars from Glossary) | View Document |
| Upload any additional information | View Document |
| Provide links as Additional Information | View Document |

***2.6.2 Attainment of Programme outcomes, Programme specific outcomes and course outcomes are evaluated by the institution***

***एतेषां सर्वेषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमपरिणामानां निष्पत्तीनां च मूल्याङ्कनं संस्था करोति।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमाः भारतीयज्ञानपरम्पराश्रिताः वर्तन्ते। भारतपरम्परा, संस्कृतिः, वेदेषु शास्त्रेषु च निहिताः विचारधाराः इत्येते बिन्दवः पाठ्यक्रमेषु बिम्बिता भवन्ति। पाठ्यक्रमाणां निर्माणम्, निष्पत्तिः, परिणामानां मूल्याङ्कनम्, निष्पत्तेः मूल्याङ्कनम्, मापनम् इतीमानि चाक्रिककार्याणि यथाकालं विधीयन्ते।

**पाठ्यक्रमस्य परिचयप्रदानम्** प्रवेशकाले व्याकरणम्, साहित्यम्, ज्योतिषम्, वेदान्तः इत्यादीनां पाठ्यक्रमगतानां वैकल्पिकानां शास्त्रविषयाणां सामान्यपरिचयः क्रियते। सम्बद्धपाठ्यक्रमस्य समितेः सदस्याः तत्कार्यं सम्पादयन्ति। छात्रेण चीयमानस्य पाठ्यक्रमस्य पाठ्यपत्राणामपि परिचयः क्रियते। पाठ्यक्रमाणां विशिष्टं प्रयोजनं किमित्यपि उच्यते।

**पाठ्यांशपूरणम्** अध्यापकेन निर्दिष्टसमये पाठ्यांशः समापनीयः। अतः प्रत्येकं विषयस्य अध्यापकेन पाठ्यपत्रे प्रतिमासं पाठनीयस्य अंशस्य विभागः क्रियते। मासे मासे निर्दिष्टः पाठ्यांशः पूर्यते। तेन समये पाठ्यांशपूरणं सम्भवति। पुनरवलोकनम्, परीक्षासिद्धता च तत्र कर्तुं सौविध्यं वर्तते।

**आन्तरिकमूल्याङ्कनम्** पाठ्यक्रमस्य अवधौ आन्तरिकमूल्याङ्कनाय उपस्थितिः, दत्तकार्यम्, मासिकपरीक्षा, ग्रन्थालयकार्यम् इति चत्वारः अंशाः परिगण्यन्ते।

- **उपस्थितिः** कक्ष्या-अध्यापने छात्राणाम् उपस्थितिः पाठ्यक्रमस्य परिणामं निर्धारयति।

प्रतिशतं पञ्चसप्ततिः उपस्थितिः न्यूनतमत्वेन अपेक्षिता परीक्षायाम् उपवेशनाय।

- **दत्तकार्यम्** छात्राःनिर्दिष्टे पाठ्यविषये पीपीटी- द्वारा विषयोपस्थापनम्, ग्रन्थानाम् आवलीनिर्माणम्, लघुसमीक्षा इत्यादिकार्याणि कुर्वते।
- **मासिकपरीक्षा** पाठिते विषये मासि मासि परीक्षा क्रियते। तेन छात्राः अन्तिमपरीक्षायाः न बिभ्यति।
- **ग्रन्थालयकार्यम्** विभागीयपुस्तकानां वर्गीकरणम्, शास्त्रग्रन्थेषु मङ्गलश्लोकसङ्ग्रहः, भरतवाक्यानां सङ्ग्रहः, संस्कृतपत्रिकाणाम् आवलीनिर्माणम्, ई-ग्रन्थालयानां परिचयः इत्यादीनि कार्याणि दीयन्ते। एवं चतुर्भिः एतैः आन्तरिकमूल्याङ्कनं भवति। प्राप्ताङ्काः सत्रीयपरीक्षायाः परिणामेन सह योज्यन्ते।

**अतिरिक्तकक्ष्याः** आन्तरिकमूल्याङ्कनेन छात्राणां **क्रमितमापनं** भवति। सामान्यतया ते मन्दाध्येतारः, मध्यमाध्येतारः, अग्रेसराध्येतारः इति विभक्ताः भवन्ति। आद्ययोः स्तरोन्नयनार्थं क्रियमाणः यत्नः परिणामे मुख्यं पात्रं वहति। परिसरेषु

अतिरिक्तकक्ष्याः स्वीकृताः तत्परिणामाश्च लक्ष्यीकृताः।

**सत्रीयपरीक्षाः** छात्राणां परीक्षाफलेन पाठ्यक्रमाणां गुणः निर्धार्यते। विश्वविद्यालयद्वारा परीक्षा, मूल्याङ्कनम्, फलितांशस्य पट्टिकानिर्माणम्, तस्य घोषणा, अङ्कतालिकाप्रदानम् च क्रियते। एताभिः अवान्तरक्रियाभिः पाठ्यक्रमाणां परिणामाः ज्ञातुं शक्यन्ते।सञ्चालितेषु पाठ्यक्रमेषु अन्ते सत्रीयपरीक्षाः समचाल्यन्त। ततः प्रथमद्वितीयाद्याः श्रेण्यः निर्धारिताः।

**पुनर्मूल्याङ्कनम्** विश्वविद्यालयेन सञ्चाल्यमानानां पाठ्यक्रमाणां मूल्याङ्कनस्य प्रामाण्ये पुनर्मूल्याङ्कनस्यापि अस्ति महत्त्वम्। छात्रैः परीक्षायां विहितस्य यत्नस्य अनुसारं प्राप्तःअङ्कः पाठ्यक्रमाणां साफल्यनिर्धारणे कारणं भवति। विश्वविद्यालये इयं व्यवस्था कल्पिता वर्तते।

**पूरकपरीक्षाः** छात्राः सत्रीयपरीक्षायाः फले वृद्धिम् इच्छन्तः पूरकपरीक्षार्थम् आवेदयन्ति। ते पाठ्यक्रमे अपेक्षिते पत्रे पूरकपरीक्षां दातुं शक्नुवन्ति।अनया प्रक्रियया पाठ्यक्रमाणां परिणामानां निष्पत्तिः सुकरा भवति।

**प्रत्यादानम्**(Feedback) प्रत्येकं पाठ्यक्रमस्य समाप्तौ स्वीक्रियमाणं प्रत्यादानं पाठ्यक्रमाणां परिणामं निर्धारयति। विश्वविद्यालयद्वारा वैद्युतिकपत्रकेण प्रत्यादानं स्वीकृतम्।

**नियुक्तिः** विश्वविद्यालये पाठ्यक्रमं समाप्य प्राप्तपदवीकाः विभिन्नेषु क्षेत्रेषु वृत्तिं लभन्ते। प्राक्शास्त्रिपाठ्यक्रमं समाप्तवन्तः अनेके केरले प्राथमिकशालासु नियुक्ताः। शिक्षाशास्त्रिपाठ्यक्रमं समाप्तवन्तः विविधराज्येषु प्रौढशालासु वृत्तिम् अलभन्त। वित्तकोषे केचन प्राप्नुवन्। अन्ये नागरिकसेवादिषु आत्मानं व्यापारयितुं प्रेरणाम् अलभन्त। तत्परीक्षासु सिद्धतारता अभूवन्। NET, KSET, CTETइत्यादि- उद्योगद्वारपरीक्षाः उत्तीर्णाः। बहवः योगः, आयुर्वेदसाहित्यम्, वास्तु-ज्योतिषम् इत्यादीन् कौशलाधारितपाठ्यक्रमान् समाप्य स्वयमुद्योगम् आरब्धवन्तः।

विश्वविद्यालयेन पाठ्यक्रमाणां परिणामानां निष्पत्तेश्च मापनं विहितम्। अत्र प्राक्शास्त्री, शास्त्री, आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः, विद्यावारिधिः प्रमाणपत्रम्, पदविका इत्येते पाठ्यक्रमाः सञ्चालिताः। एते पाठ्यक्रमाः निर्दिष्टोद्देशैः सह प्रवर्तिताः। उद्देशानुगुणं तेषां क्रियान्वयार्थं कार्याणि व्यधीयन्त। प्रवेशकाले दत्तेन शास्त्रीयाणां पाठ्यक्रमाणां परिचयेन छात्राः विविधेषु शास्त्रेषु विभक्ताः अभवन्। **नामितमापनेन** आसक्तेः निर्धारणं समपद्यत। शिक्षाशास्त्रिपाठ्यक्रमे मनोविज्ञानादिना **अन्तरितमापनं** भवति। छात्राः निर्दिष्टे विषये शून्याङ्कं प्राप्तवन्तोऽपि प्रश्नान्तरे पृष्ठे अङ्कं प्राप्नुवन्। पाठ्यक्रमेषु प्रतिसत्रं सत्रीयपरीक्षासु प्राप्तं फलं वीक्ष्य **आनुपातिकं मापनं** विहितम्। तेन पाठ्यक्रमे परिवर्तनं परिवर्धनं च कर्तुं चिन्तनं सम्पन्नम्।

पाठ्यक्रमाणां यथोद्देशैः परिणामैः केन्द्रीयसंस्कृतविश्वविद्यालयः अग्रवर्तिभिः इतरविश्वविद्यालयैः सह स्पर्धितुं समर्थः भवति। Covid 19 इत्यादिभिः विषमस्थितिभिः बहवः देशाः पीडिताः वर्तन्ते।भारतम् तदतिक्रान्तस्थितिं लब्धुं शक्नोति। समकाले वसुधैव कुटुम्बकम् इति सर्वोपादेयं तत्त्वं प्रसारयितुं समर्थं च भवति।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Upload any additional information | View Document |
| Provide link for Additional Information | View Document |

***2.6.3 Pass percentage of students (Data for the latest completed academic year)***

***छात्राणाम् उत्तीर्णतायाः प्रतिशतं मानम्। (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 95.81

2.6.3.1 Total number of final year students who passed the Institution examinations

संस्थायाः परीक्षासु उत्तीर्णानाम् अन्तिमवर्षीयाणां छात्राणां सम्पूर्णा सङ्ख्या

Answer: 2060
2.6.3.2 Total number of final year students who appeared for the examinations

परीक्षासु सम्मिलितानां अन्तिमवर्षीयाणां छात्राणां सम्पूर्णा सङ्ख्या

Answer: 2150

| File Description | Document |
|---|---|
| Upload list of Programmes and number of students passed and appeared in the final year examination (Data Template) | View Document |
| Upload any additional information | View Document |
| Provide link for the annual report | View Document |

***2.6.4 The Institution has mechanism to evaluate the performance of students through the vakyartha/shastrartha-Sabhas, Shalaka-Pareeksha, Shastra-Pareeksha (Oral), Shastra-spardha, Writing Sanskrit-Slokas/Padya/Poetry etc.***

***संस्थायां वाक्यार्थ/शास्त्रार्थसभा-शलाकापरीक्षा-शास्त्रपरीक्षा (मौखिकं)-शास्त्रस्पर्धा-संस्कृतश्लोक-पद्य-काव्यादिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं कश्चन क्रियाविधिः वर्तते।***

**Answer:**

विश्वविद्यालये/परिसरेषु स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च शास्त्रस्पर्धासु भागग्रहणम्, वाक्यार्थसभानाम् आयोजनम् इत्यादिषु छात्राणां प्रस्तुतेः मूल्याङ्कनं सरलविदानेन क्रियते। तद्यथा -

१.**वाक्यार्थसभा** - विश्वविद्यालयस्य परिसरेषु साप्ताहिकी वाग्वर्धिनीसभा आयोज्यते। समयसारिण्याम् सभायाः कालांशः निर्धारितो भवति। अतः अनिवार्योपस्थितिः वर्तते। निर्दिष्टे/स्वाभीष्टे शास्त्रविषये ते वाक्यार्थं प्रस्तुवन्ति। विषये प्रस्तुते अध्यापकाः प्रश्नान् पृच्छन्ति। अङ्कदानेन प्रस्तुतानां वाक्यार्थानां श्रेणीनिर्धारणं क्रियते। अधिकासु सभासु गृहीतभागाः छात्राः पुरस्क्रियन्ते। शास्त्रसभा आयोज्यते। तत्र अध्यापकाः आदर्शवाक्यार्थं प्रस्तुवन्ति। छात्राः अनिवार्योपस्थित्या वाक्यार्थप्रस्तावं वीक्षमाणाः शास्त्रार्थप्रस्तुतेः कौशलम् अभ्यस्यन्ति। प्रश्नकरणाय ते छात्राः अनुमता भवन्ति।

२.**अखिलभारतीयस्तरे शास्त्रीयस्पर्धानाम् आयोजनम्** - विश्वविद्यालयः अखिलभारतीयस्तरे स्पर्धानाम् आयोजनस्य उत्तरदायित्वं निर्वहति। शास्त्रशलाका, शास्त्रभाषणम्, काव्यकण्ठपाठः, अमरकोषकण्ठपाठः, अष्टाध्यायीकण्ठपाठः, धातुरूपकण्ठपाठः, समस्यापूर्तिः, अक्षरश्लोकी, शास्त्रीयस्फूर्तिस्पर्धा इति एतासां प्रवर्तमानस्पर्धानां नियमावलीं सज्जीकरोति। राज्यस्तरे राष्ट्रस्तरे च अपेक्षिताः सूचनाः ददाति। छात्राणां साधुप्रस्तुतेः मूल्याङ्कनस्य च व्यवस्थां कल्पयति।

३.**शलाकापरीक्षा** - विश्वविद्यालयस्य परिसरेषु अध्यापकाः छात्रान् सज्जीकुर्वन्ति। चयनाय स्पर्धाम् आयोजयन्ति। ततः चिताः प्रतिभागिनः राज्यस्तरीयस्पर्धायां ततः अखिलभारतीयस्तरे च भागं गृह्णन्ति। राष्ट्रस्तरे विजयिनः सौवर्णशलाकया सौवर्णपदकेन धनराशिना प्रमाणपत्रेण च पुरस्क्रियन्ते। शलाकास्पर्धायां स्पर्धालुना निर्दिष्टशास्त्रस्य निर्दिष्टग्रन्थभागस्य समग्रतया अध्ययनं कार्यम् । स्पर्धालुः ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पङ्क्तीः कण्ठस्थीकुर्यात्, ग्रन्थपङ्क्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत्, निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुं कौशलं सम्पादयेत् । परीक्षाविधानम् अखिलभारतीयायां, राज्यस्तरीयायां च शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकं स्पर्धालोः परीक्षणं त्रिषु घट्टेषु क्रियते।

- **प्रथमः घट्टः स्मृतिबल/धारणाशक्तिपरीक्षणम्।** परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते । ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तं श्रावणीयाः। परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात् । स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोऽधिकप्रश्नान् अपि कर्तुमर्हन्ति। परीक्षकैः असकृत् शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि ।
- **द्वितीयः घट्टः व्याख्यानसामर्थ्यपरीक्षणम्** । परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते । तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात् । छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात् । परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि ।
- **तृतीयः घट्टः विशेषावगतिपरीक्षणम्/गाढज्ञानपरीक्षणम्।** परीक्षकाः निर्धारितग्रन्थभागे विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य पुनः प्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत् । प्रश्नपुनःप्रश्नरूपेण शास्त्रचर्चया समाधानं प्राप्नुयुः। इयं रीतिः पञ्चकृत्वः भवेत्। परीक्षायाम् उत्तीर्णानाम् एव पुरस्काराय प्रथम/द्वितीय/तृतीयस्थाननिश्चयः क्रियते ।

४.**शास्त्रार्थविचारस्पर्धा** विश्वविद्यालयस्य स्नातकादिषु पाठ्यक्रमेषु अधीयानाः छात्राः अस्यां भागं गृह्णन्ति। स्थानीयस्तरे, राज्यस्तरे, राष्ट्रस्तरे च इयं स्पर्धा सञ्चाल्यते। शास्त्रार्थविचारस्पर्धा युगलवाक्यार्थस्पर्धा वर्तते । स्पर्धालुभिः निर्दिष्टविषये शास्त्रार्थविचारः करणीयः । प्रदत्तविषये कश्चन पूर्वपक्षम् अन्यः सिद्धान्तपक्षं च उपस्थापयेत् । स्ववक्तव्यविषयस्य शास्त्रान्तरेण सम्बन्धं/साम्यं/भेदं पूर्वपक्षं, सिद्धान्तं च सम्यगवगच्छेयुः। स्पर्धारम्भात् एकघण्टातः पूर्वं सोपानत्रये अपि निर्दिष्टेभ्यः विषयेभ्यः कश्चन विषयविशेषः शास्त्रार्थविषयस्य शीर्षकत्वेन उद्घोष्यते । प्रत्येकं स्पर्धालुयुगलस्य परीक्षणं सोपानत्रये क्रियते -

- **प्रथमसोपानम् निर्दिष्टेषु विषयेषु कश्चन विषयः स्पर्धार्थं प्रदीयते । तद्विषयमादाय स्पर्धालुयुगलेन शास्त्रार्थः कर्तव्यः । निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति । निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। तत्र उत्तीर्णं युगलषट्कं द्वितीयसोपानं प्रति आर्हतां प्राप्नोति । अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते ।**
- **द्वितीयसोपानम् अत्र प्रथमसोपाने प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कश्चन विषयः प्रदीयते । तद्विषयमादाय युगलषट्केन शास्त्रार्थः कर्तव्यः । तत्रापि पुनः निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः । निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति । तत्र उत्तीर्णं युगलद्वयं तृतीयसोपानं प्रति गच्छति । अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते ।**
- **तृतीयसोपानम् अत्र प्रथमसोपाने द्वितीयसोपाने च प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कश्चन विषयः शास्त्रचर्चायै प्रदीयते । तद्विषयमादाय युगलद्वयेन शास्त्रार्थः कर्तव्यः । तत्रापि निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति । तत्र युगलमेकं प्रथमस्थानं प्राप्नोति । अन्यत् च युगलं द्वितीयस्थानं प्राप्नोति । अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 30 निमेषाः प्रदीयन्ते ।**

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Upload any additional information | View Document |
| Provide link for Additional Information | View Document |

**2.7 Student Satisfaction Survey**

***2.7.1 Online Student Satisfaction Survey regarding Teaching Learning process***

***अध्यापन-अधिगमयोः प्रक्रियाविषये अधितन्त्रि छात्रसन्तुष्टेः सर्वेक्षणम्।***

**Answer:**

| File Description | Document |
|---|---|
| Upload database of all currently enrolled students (Institutional data as per Data Template) | View Document |

*2.7.2 Online Learner Satisfaction Survey regarding teaching-learning process*

***अध्यापनाध्ययनप्रक्रियासन्दर्भे अधितन्त्रि अध्येतृसन्तुष्टिसर्वेक्षणम्***

**Answer:**

| File Description | Document |
|---|---|
| Data Template | View Document |
| Database of all currently enrolled Distance Learners | View Document |
| Any other relevant information | View Document |

**3.Research, Innovations and Extension**

**3.1 Promotion of Research and Facilities**

*3.1.1 The institution's Research facilities are frequently updated and there is a well defined policy for promotion of research which is uploaded on the institutional website and implemented*

***संस्थायाः अनुसन्धानयोजनाः मुहुर्मुहुः नवीकृताः। एवमेव अनुसन्धानस्य प्रोन्नत्यै सुचारुनिर्दिष्टा योजना संस्थायाः जालस्थाने उपारोपिता क्रियान्विता च।***

**Answer:**

**प्रस्तावना**

- केन्द्रीयसंस्कृतविश्वविद्यालये अनुसन्धाने उत्कृष्टतायाः प्रासङ्गिकतायाश्च गवेषणपरिणामः प्राप्यते । अतः उच्चतममानकेषु अनुसन्धानं सञ्चालयितुं शोधनीतिप्रपत्रमिदं समुचितोत्तमशोधप्रथानां विषये मार्गदर्शनं विदधाति ।
- शोधनीतिप्रपत्रस्य उद्देश्यं विश्वव्यापिमानकानुसारं विशिष्टानुसन्धानसमूहानां संघटनं विधाय अनुकूलानुसन्धानसंस्कृतेः पारिस्थितिकीतन्त्रस्य च स्थापनं वर्तते ।
- शोधनीतिप्रपत्रमिदं वैश्विकसमाजस्य अध्ययनहिताय शोधनिष्कर्षान् प्रयोक्तुं प्राथमिकतां प्रयच्छति ।
- इदं प्रपत्रं शैक्षणिकमानकानां नैतिकतायाश्च पालयित्रीं शोधसंस्कृतिम् आरभते तत्संवर्धनञ्च कुरुते ।
- अस्य प्रपत्रस्य उद्देश्यं विस्तृतानुसन्धानगतिविधीनां संवर्धनं शोधसम्बद्धकार्यनीतेः प्रदानं वर्तते ।
- प्रपत्रमिदं सैद्धान्तिकज्ञानस्य परिणामेषु क्रियान्वयनं विधातुमवसरं प्रयच्छति अपि च प्रपत्रसिद्धान्तानाम् अनुप्रयोगाधारेण अनुसन्धानार्थं मार्गं प्रदर्शयति ।

**शोधनीतिप्रपत्रस्य उद्देश्यानि**

- व्यूहात्मक-प्राविधिक-परिचालनात्मकस्तरेषु सर्वेषां विश्वविद्यालयानुसन्धानगतिविधीनां योजनार्थम् आयव्ययार्थं नियन्त्रणार्थञ्च संस्थागतक्षमतानां संवर्धनम् ।
- संकायसदस्यानां छात्राणाञ्च शोधपरियोजनासु उपक्रमेषु च साहाय्यार्थं सौविध्यप्रदानार्थञ्च पर्याप्तशोधनिधेः स्थापनं प्रबन्धनञ्च ।
- अनुसन्धानार्थं धनवितरणे पुरस्कारस्थापने इतरेषु सर्वेषु च कार्येषु साहाय्यार्थं नीतीनां विधीनां मानकानाञ्च निर्माणम् ।
- स्वीयोद्देश्यैः दृष्ट्या च सह अन्ताराष्ट्रियविकासलक्ष्यानुरूपं विधातुं विश्वविद्यालये सर्वविधशोधप्रयासानां समुचितरूपेण समन्वयार्थं व्यवस्थाप्रदानम् ।
- विश्वविद्यालयस्य शोधकार्यसूचीं निर्मातुं तत्स्थिरीकरणार्थञ्च प्रमुखसमुचितक्षेत्रेभ्यो वित्तपोषितशोधपरियोजनाभ्यश्च सर्वोच्चप्राथमिकतायाः रूपरेखानिर्माणम् ।

**शोधस्य व्यापकक्षेत्राणि**

1. **शोधपरियोजनाः**

- मूलधनसम्बद्धप्रावधानानि राष्ट्रियान्ताराष्ट्रियमहत्त्वस्य महत्त्वपूर्णक्षेत्रेषु प्रतिस्पर्धिशोधपरियोजनायाः प्रोत्साहनं विधास्यन्ति । मूलधनस्यानुदानेन नवीनविचाराणां ज्ञानस्य च संवर्धनं भविष्यति अपि च शोधपरियोजनानां सञ्चालने सौविध्यं भविष्यति याः बाह्यानुदानमाध्यमेन स्वीयस्रोतांसि सम्भावितरूपेण विकासयिष्यन्ति ।
- शोधपरियोजनार्थं भौतिकव्यवस्थायाः प्रदानं (यत्र सौविध्यं संसाधनानि सेवाश्च सम्मिलितानि) वित्तपोषणञ्च केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रधानकार्यालयदिल्लीद्वारा करिष्यते । प्रावधानानि शोधपरियोजनानां सञ्चालनाय संस्कृतस्य संस्कृतशिक्षायाश्च क्षेत्रे नवाचारान् संवर्धयितुं संरचयिष्यन्ते ।

2. **शोधप्रकाशनानि**

- विश्वविद्यालयः संस्कृतस्य अन्यसम्बद्धविषयाणां क्षेत्रे गुणवत्तापूर्णपत्रिकाणां मुद्रणं सद्यस्कप्रकाशनञ्च संवर्धयिष्यति ।
- विश्वविद्यालयः प्रसिद्धानां विदुषां लेखकानाञ्च दुर्लभप्रकाशनानां पुनःप्रकाशनेऽपि आर्थिकरूपेण साहाय्यं करिष्यति।
- विश्वविद्यालयः उच्चानुक्रमितगुणवत्तापूर्णपत्रिकासु गुणवत्तापूर्णशोधपत्राणि प्रकाशयितुं सङ्कायसदस्यानां प्रोत्साहनं सक्रियाभिप्रेरणञ्च विधास्यति ।

3. **बौद्धिकसम्पदधिकारः (IPR)**

- प्रपत्रमिदं भारतशासनद्वारा स्वीकृतस्य व्यापकविषयस्य 'सर्जनात्मकभारतं नवाचारभारतम्' इत्यस्यानुसारं विश्वविद्यालये गतिशीलां सजीवां सन्तुलितबौद्धिकाधिकारप्रणालीं प्रोत्साहयति ।
- नीतिप्रपत्रमिदं रचनात्मकतां नवाचारान् उद्यमितां सामाजिकसांस्कृतिकार्थिकविकासञ्च संवर्धयिष्यति । अपि च संस्कृतज्ञानपरम्परायाः इतरक्षेत्रेषु योगायुर्वेदस्वास्थ्यसततविकासेषु महत्त्वपूर्णसामाजिकार्थिक-प्राविधिकविकासक्षेत्रेषु च उन्नयनार्थम् अधिकावधानं करिष्यति ।

4. **पाण्डुलिपीनां भाण्डारः**

- बौद्धिकसम्पदधिकारत्वेन एकस्वाधिकारत्वेन (पेटेंट) च प्राप्तानां पाण्डुलिपीनाम् अंशनं एकत्रीकरणं क्रयणं अङ्कीकरणं स्वीकरणञ्चेति सर्वाणि कार्याणि प्रयागराजस्थगङ्गानाथझापरिसरे सम्पादयिष्यन्ते ।
- पाण्डुलिपीनां निभालनं संरक्षणञ्च संरक्षणनियमानुसारं विचारणीयं भविष्यति ।

5. **विभिन्नकार्यक्रमेषु अनुसन्धानम्**

- विश्वविद्यालयः विभिन्नस्तरेषु स्नातक-स्नातकोत्तर-शोध-विद्यावारिध्युत्तरस्तरेषु विश्वविद्यालयद्वारा प्रदीयमानविभिन्न-कार्यक्रमेषु गुणवत्तापूर्णानुसन्धानं संवर्धयितुं प्रतिबद्धो वर्तते ।
- अनुसन्धाने गुणवत्तां सुनिश्चेतुं विश्वविद्यालयस्य सकाशे उपर्युक्तकार्यक्रमाणां कृते विस्तृतमार्गदर्शिका भविष्यति ।

केन्द्रीयशोधमण्डलस्य भूमिका उत्तरदायित्वञ्च

- विश्वविद्यालयस्य शोधनीत्यभिलेखानां सज्जीकरणम् ।
- विद्वत्परिषदा प्रदत्तस्य शोधक्षेत्रस्य सज्जीकरणम्, यस्मिन् बृहतीनां लघ्वीनां परियोजनानां परामर्शस्य अथवा अन्यशोधगतिविधीनां समावेशो भविष्यति ।
- शोधप्रस्तावानां पुनरीक्षणं शोधशीर्षकस्य चरमस्वीकृतिः ।
- स्वक्षेत्राधिकारे शोधस्य प्रमुखक्षेत्राणां निर्धारणम् ।
- विश्वविद्यालयेन राष्ट्रियैः /अन्ताराष्ट्रियाभिकरणैर्वा वित्तपोषणाय सांस्थानिकशोधकार्यक्रमाणां मूल्याङ्कनम्

**अनुसन्धाननीतेः कार्यान्वयनतन्त्रम्**

- विश्वविद्यालयस्य केन्द्रीयशोधमण्डलं, विश्वविद्यालयप्रबन्धनेन विभिन्नस्तरेषु अन्यसमितिभिश्च सह संयुज्य कार्यं कृत्वा अस्याः शोधनीतेः अभिलेखस्य क्रियान्वयने दायित्वभाग् भविष्यति । शोधसङ्कायप्रमुखोऽस्य अभिलेखस्य कार्यान्वयननिर्धारणं करिष्यति। निम्नलिखितरूपेण नीतेः क्रियान्वयनं कर्तुं कानिचित् तन्त्राणि सन्ति-
- संकायसदस्यैः अनुसन्धानाय सौविध्यप्रदानं तथा प्रारम्भिकधनप्रदानाय एकस्य अनुसन्धानवित्तकोषस्य स्थापनाय च विश्वविद्यालयप्रबन्धनेन सह कार्यकरणम्

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Minutes of the Research Committee/ Academic Council/ Governing Council/ Syndicate/ Board of Management related to research promotion policy adoption | View Document |
| Any additional information | View Document |
| URL of Policy document on promotion of research uploaded on website | View Document |

***3.1.2 The institution provides seed money for in-depth Shastric training/inter-disciplinary training to its teachers for research during the last five years (average of five years; INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु संस्था अध्यापकेभ्यः अनुसन्धानाय तलस्पर्शि-शास्त्र-प्रशिक्षणाय अन्तःशास्त्रीय-प्रशिक्षणाय च मूलनिधिं ददाति। (पञ्चानां वर्षाणां मध्यमानम्; लक्षशः रूप्यकेषु)***

**Answer:** 3.8

3.1.2.1 ***The amount of seed money provided by institution to its faculty year-wise during the last five years (INR in lakhs).***

**संस्थया विगतेषु पञ्चसु वर्षेषु अध्यापकेभ्यः प्रदत्तस्य मूलनिधेः वार्षिकी सङ्ख्या (लक्षशः)।**

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 4.5 | 0.35137 | 0.36506 | 12.92 | 0.83979 |

| File Description | Document |
|---|---|
| Minutes of the relevant bodies of the Institution | View Document |
| List of teachers receiving grant and details of grant received (Institutional data as per Data Template) | View Document |
| Budget and expenditure statements signed by the Finance Officer indicating seed money provided and utilized | View Document |
| Any additional information | View Document |

***3.1.3 Percentage of teachers receiving national/ international fellowship/financial support by various agencies for advanced studies/ research during the last five years***

***गतेषु पञ्चसु वर्षेषु विविधसंस्थाभ्यः प्रोध्ययनाय/अनुसन्धानाय राष्ट्रियाम्/अन्ताराष्ट्रियां विद्वद्वृत्तिम्/वित्तीयसाहाय्यं प्राप्तवताम् अध्यापकानां प्रतिशतं मानम्।***

**Answer:** 10.15

3.1.3.1 Number of teachers who received national/ international fellowship/financial support from various agencies, for advanced studies / research; during the last five years

गतेषु पञ्चसु वर्षेषु विविधसंस्थाभ्यः प्रोध्ययनाय/अनुसन्धानाय राष्ट्रियाम्/अन्ताराष्ट्रियां विद्वद्वृत्तिम्/वित्तीयसाहाय्यं प्राप्तवताम् अध्यापकनां सङ्ख्या।

Answer: 46

| File Description | Document |
|---|---|
| List of teachers and their international fellowship details (Data Templates) | View Document |
| e-copies of the award letters of the teachers | View Document |

***3.1.4 Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and other research fellows enrolled in the Institution during the last five years***

***संस्थायां विगतेषु पञ्चसु वर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां (JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां सङ्ख्या***

**Answer:** 76

| File Description | Document |
|---|---|
| Provide a list of research fellows and their fellowship details (Data Template) | View Document |
| Any additional information | View Document |

***3.1.5 Institution has the following facilities***

1. ***Central Instrumentation Centre/ Language Laboratory Computer Lab/ICT Lab***
2. ***Museum***
3. ***Studios/ Recording Studio for Audio-Video/e-P.G.Pathashala Facilities***
4. ***Research/Statistical Databases***
5. ***Manuscript Resource Centre (MRC)***
6. ***Manuscript Conservation Centre (MCC)***
7. ***Yoga Training Centre***
8. ***Yoga Therapy Centre with modern equipments***
9. ***Observatory/Yajnashala***
10. ***Psychology Laboratory***
11. ***Any other facility to support research***

***संस्थायाम् अधोलिखितानि सौविध्यानि सन्ति-***

1. ***केन्द्रीयम् उपकरणकेन्द्रम्/ भाषाप्रयोगशाला/ सङ्गणकप्रयोगशाला/ सूचना-सम्प्रेषण-प्राविधिप्रयोगशाला***
2. ***पुरातत्त्वसङ्ग्रहालयः***
3. ***दृश्य-श्रव्य-सामग्रीनिर्माणाय चित्राङ्कनशालायाः ध्वन्यङ्कनशालायाः ई.पी.जी पाठशालायाः वा सौविध्यानि।***
4. ***अनुसन्धानम्/साङ्ख्यकीयो दत्तांशनिधिः***
5. ***पाण्डुलिपिसंसाधनकेन्द्रम्***
6. ***पाण्डुलिपिसंरक्षणकेन्द्रम्***
7. ***योगप्रशिक्षणकेन्द्रम्***
8. ***आधुनिकयन्त्रसहितं योग-उपचारकेन्द्रम्***
9. ***वेधशाला/यज्ञशाला***
10. ***मनोविज्ञानप्रयोगशाला***
11. ***अनुसन्धानस्य समर्थनाय किञ्चित् सौविध्यम्***

**Answer:** A. Any four or more the above अ. उपर्युक्तेषु केचित् चत्वारः अथवा ततोऽधिकाः

| File Description | Document |
|---|---|
| | |

| | |
|---|---|
| Upload the list of facilities provided by the Institution and their year of establishment (Institutional data as per Data Template) | View Document |
| Upload any additional information | View Document |
| Paste link of videos and geotagged photographs | View Document |

***3.1.6 Percentage of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency (Data for the latest completed academic year)***

***विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य (SAP) प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., आय्.सी.एस्.एस्.आर्., आय्.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः, शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां प्रतिशतं मानम्। (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 33.33

3.1.6.1 ***Number of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency.***

**विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., ऐ.सी.एस्.एस्.आर्., ऐ.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां सङ्ख्या।.**

Answer: 5
3.1.6.2 Number of departments offering academic programmes during the latest completed academic year

सद्यः समाप्तशैक्षिकवर्षे शैक्षिककार्यक्रमान् प्रस्तूयमानानां विभागानां सङ्ख्या

Answer: 15

| File Description | Document |
|---|---|
| List of departments and award details (Institutional data as per Data Template) | View Document |
| e-version of departmental recognition letters or other award letters | View Document |
| Any additional information | View Document |

***3.1.7 Does the Institution has the following –***

***1. Scheme for preparation of critical edition of unpublished manuscripts for research projects and research degrees***

***2. Sanskrit as the compulsory medium of writing thesis/dissertation/ Project Report etc.***

***3. Provision for the translation of Sanskrit/Shastric texts as part of formal research degree?***

***4. Incentive to write Sanskrit-Teeka-s/commentaries on Sanskrit texts***

*5. Scheme for production of Study materials in Sanskrit*

*संस्थायाम् अधोलिखितांशाः सन्ति–*

1. ***अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना***
2. ***शोधप्रबन्ध/लघुशोधप्रबन्ध/परियोजनाप्रतिवेदनेषु अनिवार्यमाध्यमत्वेन संस्कृतम्***
3. ***औपचारिक-अनुसन्धान-उपाध्यङ्गतया संस्कृतग्रन्थानां शास्त्रीयग्रन्थानां वाऽनुवादाय प्रोत्साहनम्***
4. ***औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीका/व्याख्यालेखनार्थं प्रोत्साहनम्***
5. ***संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणाय योजना***

**Answer:**

**विश्वविद्यालये अधोलिखिताः अंशाः सन्ति।**

**1. अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना -**

एकं विषयविशेषमधिकृत्य विस्तरेण क्रियमाणम् अध्ययनम् ; विशेषतः नूतनतथ्यानां नूतनपदार्थानां च क्रमबद्धरूपेण अन्वेषणम् एव अनुसन्धानम् इति उच्यते। तत्रापि अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनादीनां कार्याणां सम्पादनेन अप्रकाशितग्रन्थानां ग्रन्थकाराणां वैशिष्ट्यानि बहिरायान्ति। अज्ञातकर्तृकग्रन्थाः इति अपवादोऽपि दूरीभवति अप्राकाशितानां व्यवस्थितरूपेण प्रकाशनेन। अतः केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशसु परिसरेषु अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनादीनि कार्याणि शोधच्छात्रैः क्रियन्ते। विशिष्य एतदर्थमेव प्रयागराजस्थे गङ्गानाथझापरिसरे प्राक्शोधपाठ्यक्रमान्तर्गतत्वेन विशिष्टाः प्रशिक्षणकार्यशालाः अपि आयोज्यन्ते । उपद्विशतं शोधच्छात्राः प्रतिवर्षं तत्र प्राक्शोधपाठ्यक्रमस्य अध्ययनाय विभिन्नपरिसरेभ्यः गच्छन्ति। 56,475 सङ्ख्याकाः पाण्डुलिपयः तत्र सन्ति। सर्वाधिकाः पाण्डुलिपयः अद्यावधि प्रकाशिताः सन्ति। गङ्गानाथझापरिसरस्य पार्श्वे समृद्धः पाण्डुलिपिसङ्ग्हालयो वर्तते। यस्मिन् संस्कृतवाङ्मयस्य सर्वासाम् शाखानां पाण्डुलिपयः सङ्गृहीताः सन्ति। विविध-प्रान्तीय-लिपिषु निबद्धानाम् पाण्डुलिपीनाम् संख्या षड्पञ्चाशत् सहस्रम् वर्तते। अत्रत्यानाम् शोधच्छात्राणां, रुच्यनुरुपं शोधकार्यहेतवे हस्तलेखानाम् आवण्टनं क्रियते। तद्नु मार्गदर्शकस्य निर्देशात् शोधच्छात्राः पाण्डुलिपीनाम् सम्पादनम्, अनुशीलनं, तुलनात्मकम् समीक्षणम् शोधोपाधिहेतवे कुर्वन्ति। अत्र नियुक्ताः आचार्याः, सहाचार्याः, सहायकाचार्याः अपि पाण्डुलिपीनाम् सम्पादनं कुर्वन्ति। राष्ट्रिय-अन्ताराष्ट्रिय-स्तरेऽपि शोधसम्पादन-हेतवे शोधार्थिभ्यः पाण्डुलिपयः प्रदीयन्ते। गुरुवायूरुपरिसरे 172 संङ्ख्याकाः , जम्मूपरिसरे 73 , पुरीपरिसरे 177 संङ्ख्याकाः च तालपत्रेषु लिखिताः पाण्डुलिपयः सन्ति। आयुर्वेदस्य ज्यौतिषस्य वेदान्तादीनां शास्त्राणां पाण्डुलिपयः सम्पादिताः अपि सन्ति। एवमन्येष्वपि परिसरेषु शतशः वर्तन्ते। विश्वविद्यालयस्य अष्टादशी इत्यस्यां विशिष्टायां परियोजनायाम् अपि ग्रन्थसम्पादनयोजनानां स्वीकारार्थं प्रचुरमात्रेण अवसराः सन्ति। आर्थिकम् अनुदानम् अपि दीयते । केन्द्रीयसंस्कृतविश्वविद्यालयस्य शोधनीतौ अपि मातृकासम्पादनस्य ग्रन्थसम्पादनयोजनायाश्च प्रारुपं कथं भवेत् इत्यत्र मार्गदर्शनसूत्राणि उल्लिखितानि सन्ति।

**2. शोधप्रबन्धादिषु अनिवार्यमाध्यमत्वेन संस्कृतम् -**

विश्वविद्यालयस्य सर्वेऽपि शोधप्रबन्धाः लघुशोधप्रबन्धाः संस्कृतपरियोजनाश्च संस्कृतमाध्यमेन एव विरच्यन्ते। विगतेषु पञ्चसु वर्षेषु 855 संङ्ख्याकाः शोधप्रबन्धाः संस्कृतभाषामाध्यमेन एव लिखिताः सन्ति। विश्वविद्यालयस्य शोधनियमावल्याम् अपि सुस्पष्टं लिखितं वर्तते यत् संस्कृतमाध्यमेन एव शोधप्रबन्धाः लघुशोधप्रबन्धाः शोधपत्राणि च लेखनीयानि इति। शिक्षाचार्यस्तरीयाः छात्राः स्वीयान् लघुशोधप्रबन्धान् संस्कृतेन एव लिखन्ति। विज्ञानमनोविज्ञानप्रौद्योगिक्यादिषु

विषयविशेषेषु शोधावसरे लघुशोधप्रबन्धनिर्माणावसरे चापि संस्कृतमाध्यमेन एव सर्वं कार्यं सम्पाद्यते। एवम् आधुनिके शिक्षाशास्त्रे विद्यमानान् अत्याधुनिकविषयान् अवलम्ब्य अपि संस्कृतमाध्यमेन एव विश्वविद्यालयस्य छात्राः शोधकार्यं सम्पादयन्ति।

**3. अनुसन्धानोपाधिलाभाय संस्कृतशास्त्रग्रन्थानां अनुवादावसरः -**

विश्वविद्यालये अनुसन्धानकार्यत्वेन संस्कृतशास्त्रग्रन्थानां अनुवादार्थमपि अवसरः कल्प्यते। ये ग्रन्थाः प्रौढशैल्या लिखिताः सन्ति ते दुर्बोधाः भवेयुः इति मत्वा बालानां सुखबोधाय सरलभाषया तत्तादृशानां ग्रन्थानाम् अनुवादकार्यमपि सरलव्याख्यामुखेन सम्पादयन्ति। ब्राह्मी , शारदा इत्याद्यासु लिपिषु निबद्धानां ताडग्रन्थानां देवनागर्याम् अनूद्य लिखन्ति शोधच्छात्राः।प्रादेशिकभाषासु निबद्धानां संस्कृतग्रन्थानां मूलप्रतयः लभ्यन्ते चेत्तर्हि तासाम् अपि अनुवादकार्यं सम्पादयन्ति शोधच्छात्राः। अनेन तेषां कृते विद्यावारिधिः इति उपाधिः दीयते। मातृकासम्पादनावसरे न्यूनातिन्यूनं तिस्रः मातृकाः अपेक्ष्यन्ते। तासाम् अध्ययनम् अनिवार्यं भवति शोधोपाधिग्रहणाय । मातृकाः प्रादेशिकभाषास्वपि प्रचुरमात्रेण लिपिबद्धाः भवन्ति। अष्टादश्यां विविधसंस्कृतसाहित्यानाम् अनुवादाय आर्थिकम् अनुदानम् अपि दीयते, यस्य लाभम् अस्माकं परिसरीयाः अध्यापकाः असकृत् कुर्वन्ति।

**4.औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीकाव्याख्यालेखार्थं प्रोत्साहनम् -**

सूत्रभाष्यवार्तिकानि टीकोपटीकाः व्याख्याश्च संस्कृतवाङ्मयस्य जीवातुभूतानि तत्त्वानि सन्ति। तत्रापि शास्त्रशिक्षणप्रधानाः द्वादशः परिसराः सन्ति विश्वविद्यालयस्य। अतः टीकालेखनाय व्याख्यालेखनाय च प्रतिपदं मार्गदर्शनं कुर्वन्ति शिक्षकाः । स्वयमपि परिसरीयैः शास्त्रज्ञैः शिक्षकैः शास्त्रीयाः टीकाग्रन्थाः विरचिताः विद्यावारिधिरित्युपाधिलाभाय। विश्वविद्यालयस्य प्रकाशनेन अपि एतादृशाः विद्वत्पूर्णाः टीकाग्रन्थाः प्रकाशिताः सन्ति। विश्वविद्यालयस्य शोधच्छात्राः अपि अप्रकाशितानां टीकाग्रन्थानां सम्पादनं कृत्वा प्राचीनान् टीकाकारान् पुनरुज्जीवयन्तः सन्ति।

आनन्दकुमारत्रिपाठी इत्येषः शोधच्छात्रः रामऋषिकृतायाः नलोदयकाव्यटीकायाः यमकबोधिन्याः (२०१८) इदम्प्रथमतया सम्पादनम् अकरोत्। बहवो हि टीकाः संस्कृतवाङ्मये अप्रकाशिताः एव सन्ति। टीकां सम्पाद्य व्याख्यालेखनेन शताधिकाः शोधच्छात्राः विद्यावारिधिः इति उपाधिं प्राप्नुवन्ति।

**5. संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणयोजना -**

विश्वविद्यालये संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणयोजनाः बहवः सन्ति। विश्वविद्यालयस्य योजनाविभागेन अपि एतदर्थं बहुविधाः योजनाः विनिर्मिताः सन्ति। प्राथमिकस्तरे दीक्षापाठ्यक्रमस्य अध्ययनाध्यापनाय दीक्षापुस्तकानि लक्षशः प्रकाशितानि। अद्यावधि 300000 संङ्ख्याकानि दीक्षापुस्तकानि प्रकाशितानि। एतानि अध्ययनाध्यापनसामग्रीरूपेण बहुत्र उपयुज्यन्ते। विश्वविद्यालयस्य प्रकाशनविभागः सक्रियः वर्तते यस्मात् बहूनि शास्त्रीयपुस्तकानि प्रकाश्यन्ते। अष्टादशी इति विशिष्टा योजना विश्वविद्यालयस्य वर्तते। अत्र संस्कृतेन पाठ्यपुस्तकानां विविधसाधनानां प्रकाशनाय धनसहयोगः दीयते। परिसरीयैः शिक्षकैः अपि बहवः अध्ययनाध्यापनसामग्र्यः निर्मीयन्ते। अतः छात्राः विना क्लेशं संस्कृतमाध्यमेन एव संस्कृतशिक्षाम् अवाप्तुं प्रभवन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |

**3.2 Resource Mobilization for Research**

***3.2.1 Grants for research projects sponsored by non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, chairs in the institution during the last five years (INR in Lakhs)***

***संस्थायां गतेषु पञ्चसु वर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तमनुदानं पीठानि च (लक्षशः)***

**Answer:** 5

3.2.1.1 Total Grants for research projects sponsored by non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, Chairs in the institution year-wise during the last five years (INR in Lakhs)-

संस्थायां गतेषु पञ्चसु वर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तानाम् अनुदानानां वार्षिकः योगः (लक्षशः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 00 | 00 | 00 | 00 | 5 |

| File Description | Document |
|---|---|
| List of project and grant details (Institutional data as per Data Template) | View Document |
| e-copies of the grant award letters for research projects sponsored by non-government sources. | View Document |

***3.2.2 Grants for research projects sponsored by government sources like UGC, Central Sanskrit University (Formerly Rashtriya Sanskrit Sansthan), IGNCA, NMM, Sanskrit Academies, ICPR, DST, ICHR etc. during the last five years (INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु विश्वविद्यालयानुदानायोग-केन्द्रीयसंस्कृतविश्वविद्यालय (प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्)-इन्दिरागाँधीराष्ट्रियकलाकेन्द्र-राष्ट्रियपाण्डुलिपि मिशन्-संस्कृताकादमी- भारतीयदार्शनिकानुसन्धानपरिषद्-भारतीयैतिहासिकानुसन्धानपरिषदादिभिः सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तमनुदानम्। (लक्षशः)***

**Answer:** 257.3

3.2.2.1 ***Total Grants for research projects sponsored by government sources year-wise during the last five years (INR in Lakhs).***

विगतेषु पञ्चसु वर्षेषु सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तानामनुदानानां वार्षिकः योगः। (लक्षशः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 100 | 4 | 13.60 | 76.70 | 63 |

| File Description | Document |
|---|---|
| List of project and grant details (Institutional data as per Data Template) | View Document |
| E-copies of the grant award letters for research projects sponsored by government | View Document |

| | |
|---|---|
| Any additional information | View Document |

***3.2.3 Number of research projects per teacher funded by government and Non-Government agencies during the last five years***

***विगतेषु पञ्चसु वर्षेषु सर्वकारीयाभिः असर्वकारीयाभिश्च संस्थाभिः प्रत्येकम् अध्यापकाय आर्थिकसाहाय्येन प्रस्तुतशोधयोजनाः।***

**Answer:** 0.09

3.2.3.1 Number of research projects funded by government and non-government agencies during the last five years

विगतेषु पञ्चसु वर्षेषु सर्वकारीयाभिः असर्वकारीयाभिश्च संस्थाभिः प्रत्येकम् अध्यापकाय आर्थिकसाहाय्येन प्रदत्तशोधयोजनानां सङ्ख्या।

Answer: 40

| File Description | Document |
|---|---|
| Supporting document from Funding Agency | View Document |
| List of research projects and funding details ( Institutional data as per Data Template) | View Document |
| Any additional information | View Document |
| Provide Link for the funding agency website | View Document |

***3.2.4 Institution provides funds out of its internal resources for the promotion of research. Provide details***

***संस्था आन्तरिकस्रोतोभ्यः प्राप्तधनं अनुसन्धानस्य प्रोन्नयनाय परिकल्पयति किम्? विवरणं देयम्।***

**Answer:**

आन्तरिकस्रोतोभ्यः प्राप्तं धनराशिं केन्द्रीयसंस्कृतविश्वविद्यालयः अनुसन्धानस्य प्रोन्नयनाय अपि परिकल्पयति।

**१. अनुसन्धानपरियोजनाः**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशः परिसराः सन्ति। सर्वेष्वपि परिसरेषु अनुसन्धानपरियोजनानां स्वीकरणाय 2016 तमे वर्षे 1,80,00000 परिमितः धनराशिः परिसरीयेभ्यः प्राध्यापकेभ्यः मुख्यालयेन प्रदत्तः। अनुसन्धानपरियोजनाः मुख्यपरियोजनाः लघुपरियोजनाः इति द्विधा विभक्तः । मुख्यशोधपरियोजनाभ्यः 1500000 परिमितधनराशिः लघुशोधपरियोजनाभ्यः 800000 परिमितधनराशिः च प्रदत्तः। दिङ्मात्रं यथा -

1. **2016 तः 2018** वर्षपर्यन्तं   भट्टिमहाकाव्यस्वाध्यायः इति मुख्यशोधपरियोजना गङ्गानाथझापरिसरीयैः आचार्यैः ललितकुमारत्रिपाठिवर्यैः स्वीकृतः। वर्षत्रयस्य परियोजना एषा। एतदर्थं 1500000 परिमितधनराशिः विश्वविद्यालयेन प्रदत्तः।
2. **2019** तमे वर्षे श्रीमन्महाभारतस्थानि उपाख्यानानि अवलम्ब्य कथानिर्माणपूर्वकं तत्प्रासङ्गिकतायाः निरूपणम् इति लघ्वी अनुसन्धानपरियोजना राजीव गान्धी परिसरस्य सहायकाचार्याभ्यां डा. चन्द्रशेखरभट्ट- डा. राघवेन्द्रभट्टवर्याभ्यां सम्पादिता। एतदर्थं विश्वविद्यालयेन ५०००० परिमितधनराशिः प्रदत्तः।
3. वटक्कुंकूर- राजराजवर्मकृतं  केरलीय-संस्कृतसाहित्यचरित्रम् इत्यस्य संस्कृतानुवादपरं शोधकार्यं 2016 तमे वर्षे डा. इ. एम् . राजन् वर्यैः के.जे. सोमय्यापरिसरे सम्पादितम् । एतदर्थं विश्वविद्यालयेन 500000 परिमितधनराशिः प्रदत्तः।

4. नक्षत्रजातकम् इत्यस्य हिन्दी भाषायाम् अनुवादः जयपुरपरिसरस्य आचार्यैः वासुदेवशर्मावर्यैः 2016 तमे वर्षे सम्पादितः। एतदर्थं विश्वविद्यालयेन 200000 लक्षपरिमितधनराशिः प्रदत्तः।
5. एकलव्यपरिसरीयनिदेशकैः आचार्यैः सर्वनारायणझावर्यैः ज्यौतिषे वैद्युतिकपठ्यस्य वैद्युतिकग्रन्थालयस्य च विनिर्माणाय क्रमशः 500000 रूप्यकाणि स्वीकृतानि। इयं शोधपरियोजना सकाले सम्पादिता।
6. **संस्कृतानुसन्धानकोषः** इति विषये लघ्वी परियोजना २०१६-१७ तमे वर्षे भोपालपरिसरीयेण साहित्यविभागस्य आचार्येण धर्मेन्द्रकुमार वर्येण स्वीकृत्य सम्पादिता । एवं बह्व्यः शोधपरियोजनाः 2016 तः आरभ्य 2019 पर्यन्तं सम्पादिताः।

## २. शोधच्छात्रेभ्यः आर्थिकसहयोगः

सर्वेभ्यः शोधच्छात्रेभ्यः छात्रवृत्तिसहितं षाण्मासिकं प्रशिक्षणं विश्वविद्यालयः गङ्गानाथझापरिसरमुखेन प्रयच्छति। अस्मिन् परिसरे विशिष्टाः कार्यशालाः विश्वविद्यालयेन आयोज्यन्ते यत्र सर्वेषां भागग्रहणम् अनिवार्यं भवति। क्रमशः यथा-

१. प्राक्शोधपाठ्यक्रमे व्याख्यानार्थं प्रतिवर्षम् अन्यपरिसरीयाः बाह्याः च विद्वांसः प्रतिवर्षं गङ्गानाथझापरिसरं गच्छन्ति। तेभ्यः आवासस्य भोजनस्य गमनागमनस्य च व्यवस्था परिसरपक्षतः क्रियते। ते शोधसम्बद्धानि विशिष्टानि व्याख्यानानि शोधार्थिनां कृते प्रयच्छन्ति। मानदेयरूपेण प्रतिव्याख्यानं १००० रूप्यकाणि दीयन्ते। २९/०३/२०२२ तः ०१/०४/२०२२ पर्यन्तं विशिष्टव्याख्यानार्थं राजीवगान्धीपरिसरस्य सहायकाचार्यः डा.गणेश टी. पण्डित महोदयः गङ्गानाथझापरिसरं गत्वा शोधप्रविधेः विभिन्नेषु विषयेषु व्याख्यानानि अयच्छत्। भारतीयज्ञानप्रणालीम् आश्रित्य विशिष्टानि व्याख्यानानि कृतानि। शोधप्रारूपनिर्माणम् , शोधप्रस्तावस्य सज्जीकरणम् , शोधसङ्क्षिप्तिकानिर्माणम् इत्यादिषु विषयेषु प्रायोगिकं प्रशिक्षणम् अयच्छत्। एवमेव आचार्याः वाइ. एस. रमेशवर्याः , आचार्याः सुदेशकुमारशर्मवर्याः , आचार्याः सूर्यनारायणभट्टाः , आचार्याः मणद्राविडशास्त्रिणः , आचार्याः अभिराजराजेन्द्रमिश्राः अन्येऽपि बहवः शोधक्षेत्रे नूतनानां विचाराणाम् उपस्थापनाय प्रतिवर्षं कक्ष्यां स्वीकुर्वन्ति।

२.आचार्याः सूर्यनारायणभट्टाः 01/06/22 तः 04/06/22 पर्यन्तं शोधच्छात्राणां शोधकार्यसम्पादनाय विशिष्टं व्याख्यानम् अकुर्वन्। तेभ्यः शोधव्याख्यानार्थं प्रतिव्याख्यानं मानदेयम् अपि दत्तम्। शास्त्रारम्भ-सूत्रार्थनिरूपणम् , भावनायाः निरूपणम् , विधेः विभागः , उत्पत्तिविधिः, श्रुतिनिरूपणम्, लिङ्गवाक्यनिरूपणम् , प्रकरणस्थान-समाख्यानिरूपणम् इति विषयेषु शोधकार्यं कर्तुं तैः मार्गदर्शनं कृतम् ।

३.आचार्याः रमाकान्तपाण्डेयवर्याः लक्ष्मणपुरीपरिसरे तथा वेदव्यासपरिसरे च शोधव्याख्यानानि अकुर्वन्। परिसरपक्षतः उभयत्रापि ३००० रूप्यकाणि मानदेयरूपेण प्रतिव्याख्यानं प्रदत्तानि। एवं सर्वेषु प्ररिसरेषु शोधार्थिनां प्रोत्साहनाय अध्यापकाः व्याख्यानानि आयोजयन्ति।

सर्वेषु परिसरेषु स्थानीयाः शोधसंयोजकाः विश्वविद्यालयेन नियुक्ताः सन्ति। ते शोधसम्बद्धानां कार्याणां प्रभारिणः भवन्ति। शोधसम्बद्धसाक्षात्कारस्य उपवेशनस्य गोष्ठ्याः सञ्चालनम् अपि एते कुर्वन्ति।

## ३. अष्टादशी परियोजनाः

विश्वविद्यालयस्य प्रसिद्धा अष्टादशी इत्येषा योजना वर्तते यत्र विभिन्नाः परिसरीयाः शिक्षकाः शोधकार्याय आर्थिकम् अनुदानं मुख्यालयपक्षतः प्राप्नुवन्ति। शोधपरियोजनानां क्रियान्वयनाय अष्टादश्याम् अवसरः वर्तते इत्यतः आन्तरिकस्रोतोभ्यः अधिकस्य धनराशेः व्ययः न क्रियते।

## ४. शोधपत्रिकायाः प्रकाशनम्

परिसरेषु स्थानीयाः निदेशकाः शोधपत्रिकायाः प्रधानाः सम्पादकाः भवन्ति। शोधपत्रिकायाः प्रकाशनाय अपि आन्तरिकस्रोतसः विनियोगः क्रियते। अत्र सर्वत्रापि शोधच्छात्राणां शोधलेखाः भवन्ति। प्रत्येकं शोधच्छात्रः संस्कृतेन अनिवार्यरूपेण प्रतिवर्षं न्यूनातिन्यूनं शोधसम्बद्धं विषयम् आश्रित्य शोधलेखान् लिखेत् । एवं शोधप्रवृत्तेः विकासाय अपि अनुसन्धानकार्याणां प्रोन्नयनाय विश्वविद्यालयः सर्वदा यत्नशीलः वर्तते। राजीवगान्धीपरिसरस्य शारदा इत्यस्याम्, सदाशिवपरिसरस्य सदाशिवम् इत्यत्र, जयपुरस्थस्य जयन्ती इत्यस्याम्, प्रयागराजस्थस्य उशती इत्यस्याम् ,

रणबीरपरिसरस्य श्रीवैष्णवी इत्यस्याम् अन्यासु च पत्रिकासु च शोधच्छात्राः अनुसन्धानेन सम्बद्धान् शोधलेखान् लिखन्ति। न केवलं शिक्षकाः व्याख्यानादीनां माध्यमेन अपि तु प्रकाशनकार्याणां माध्यमेन अपि अनुसन्धानकार्याणि सम्पादयन्ति।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुसन्धानसङ्कायप्रमुखाः विश्वविद्यालयस्य शोधकार्याणां वर्धनाय नवाचाराणाम्  अभिवर्धनाय च प्रोत्साहयन्ति। २०२२ तः आरभ्य शोधसङ्कायप्रमुखाः इति पदं विश्वविद्यालयेन परिकल्पितं वर्तते। एते विश्वविद्यालयस्य शोधक्षेत्रं पश्यन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional Information | View Document |

**3.3 Innovation Ecosystem**

***3.3.1 Institution has created an eco-system for innovations including Incubation centre/ Research Labs/Manuscript repositories/subject based networks/teaching learning centers (TLC)/MOOCS studio/NRC and other initiatives for creation and transfer of knowledge***

***सम्बद्धसंस्थाद्वारा एका पारिस्थितिकी विरचिता यत्र अभिनवस्य ज्ञानस्य सर्जनार्थं सम्प्रेषणार्थं च अभिनवज्ञाननिष्पत्तिकेन्द्राणि/ अनुसन्धानप्रयोगशालाः/पाण्डुलिपिसंरक्षणकेन्द्राणि/विषयाधारितजलसम्पर्कः/ अध्यापनाध्ययनकेन्द्राणि/सामूहिकान्तर्जालपाठ्यक्रमाङ्कनशाला/ एन्.आर्.सी. तथा अन्ये उपायाः उपलभ्यन्ते।***

**Answer:**

**नास्ति ज्ञानसमो लाभः** इत्युक्तिं  विश्वविद्यालयः मनसि निधाय ज्ञानस्य क्षेत्रे नवाचाराणां स्वागतीकरणाय सर्वदा संसिद्धः वर्तते। प्रत्येकं परिसरः अभिनवज्ञाननिष्पत्तेः केन्द्रत्वेन प्रोन्नतं भवेत् इति विश्वविद्यालयः विभावयति। अतः एव इदम्प्रथमतया भारतीयज्ञानप्रणाल्याः प्रसारपरायां केन्द्रसर्वकारस्य योजनायां सोत्साहं भागं गृह्णन्ति विश्वविद्यालयस्य शिक्षकाः। क्रमशः यथा -

१.भारतीयज्ञानपरम्परायाः प्रशिक्षुताकार्यक्रमेषु भागं गृहीतुम् उद्युक्ताः सन्ति विश्वविद्यालयस्य प्राध्यापकाः छात्राः च। भारतीयज्ञानसंवाहनयोजनायाः - २०२२-२०२३ अन्तर्गतत्वेन विभिन्नानां प्राचीनज्ञानशाखानां अभिनवशैल्या अभिनवपद्धत्या च बोधयितुं परियोजनाः विश्वविद्यालयस्य सदस्यैः स्वीकर्तुं प्रयासः आरब्धः वर्तते। AICTE इत्यस्य अन्तर्गतस्य भारतीयज्ञानपरम्पराकेन्द्रस्य विविधयोजनासु विशिष्य संस्कृतवाङ्मयेन सम्बद्धासु विश्वविद्यालयस्य शिक्षकाः सोत्साहं भागं गृह्णन्ति। एताः सर्वाः नूतनाः योजनाः सन्ति। अतः क्रमशः औपचारिकरूपेण अभिनवज्ञाननिष्पत्तिकेन्द्रत्वेन परिणताः भवन्ति विश्वविद्यालयस्य परिसराः सर्वे।

२.केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशसु परिसरेषु प्रयागराजस्थः गङ्गानाथझापरिसरः अनुसन्धानकार्यादिषु मूर्ध्नि तिष्ठति। १९४३ तमे वर्षे गङ्गानाथझा शोधसंस्थानं नाम्ना प्रारब्धमिदं १९७१ तमे वर्षे संस्थानाधीनमभूत् । सम्प्रति केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनुसन्धानकार्यणां प्रधानं केन्द्रम् इदम् एव वर्तते। वस्तुतः नाम्ना अनुसन्धानप्रयोगशाला नास्ति। परन्तु कर्मणा एषः परिसरः प्रतिष्ठापनात् आरभ्य (१९४३) संस्कृतानुसन्धानक्षेत्रे नूतनान् प्रयासान् कुर्वन् संस्कृतक्षेत्रस्य अनौपचारिकानुसन्धानप्रयोगशाला इव विभाति। भारतीयाः वैदेशिकाः च छात्राः अस्मिन् परिसरे शोधकार्यं सम्पादयितुम् आयान्ति।

वैदेशिकाः विभिन्नानां विश्वविद्यालयानां शिक्षकाः च अत्र आगत्य संस्कृतगणकीयभाषाविज्ञानादिषु विशिष्टानि व्याख्यानानि शोधार्थिनां कृते प्रयच्छन्ति। सर्वेषां परिसराणां शोधार्थं चिताः छात्राः अत्र परिसरे षाण्मासिकं पाठ्यक्रमम् अध्येतुम् आयान्ति। एवम् अयं परिसरः विश्वविद्यालयस्य परम्परया  अनुसन्धानप्रयोगशाला इत्येव वक्तुं शक्यते । १२०० सङ्ख्याकाः शोधप्रबन्धाः अस्य ग्रन्थालये सन्ति। अस्य परिसरस्य निदेशकाः सम्प्रति विश्वविद्यालयस्य शोधसङ्कायप्रमुखाः अपि सन्ति। अतः विविधाः सम्भावनाः सन्ति।

३.पाण्डुलिपयः विश्वविद्यालयस्य पञ्चसु परिसरेषु विशेषरूपेण उपलभ्यन्ते । गुरुवायूरु परिसरे १७२ सङ्ख्याकाः पाण्डुलिपयः सन्ति। ११७ सङ्ख्याकाः पाण्डुलिपयः पुरीपरिसरे , ७३ संङ्ख्याकाः पाण्डुलिपयः जम्मूपरिसरे , शृङ्गगिरिस्थे राजीव गान्धी परिसरे १३७ सङ्ख्याकाः च संरक्षिताः सन्ति। सर्वाधिकाः पाण्डुलिपयः प्रयागराजस्थे गङ्गानाथ-झा परिसरे संरक्षिताः सन्ति ।

अत्र ५६४७५ सङ्ख्याकाः पाण्डुलिपयः विद्यन्ते। विश्वविद्यालयः पाण्डुलिपीनां संरक्षणे बद्धादरः वर्तते। अतः एव अतीव प्रधानाः दुर्लभाः च पाण्डुलिपयः परिसरेषु संरक्षिताः सन्ति।

४. सर्वे परिसराः विश्वविद्यालयस्य औपचारिकानि शिक्षणाधिगमकेन्द्राणि एव सन्ति। विशिष्य पूर्वोत्तरपर्वतीयप्रान्तेषु इदम्प्रथमतया विश्वविद्यालयस्य एकलव्यपरिसरे शिक्षकविकासकेन्द्रस्य प्रतिष्ठापनं विहितं वर्तते। एवं जयपुरपरिसरे अन्यत्रापि एतादृशानां केन्द्राणां प्रतिष्ठापनाय विश्वविद्यालयः उद्युक्तः वर्तते।

५. विश्वविद्यालयस्य एकलव्यपरिसरे २२/०३/२०१८ तः २८/०३/२०१८ पर्यन्तं MOOCs माध्यमेन पाठ्यक्रमाणां संरचनाय विश्वविद्यालयस्य प्राध्यापकेभ्यः इदम्प्रथमतया प्रशिक्षणं दत्तम् । विभिन्नाः परिसरीयाः शिक्षकाः अस्मिन् प्रशिक्षणवर्गे भागं गृहीत्वा लाभान्विताः अभवन्। युवाकाङ्क्षापूर्णमस्तिष्केभ्यः सक्रियाधिगमार्थं जालीयमध्ययनम् शैक्षिकदृष्ट्या नवनवोन्मेषशालिनां यूनां मस्तिष्कोत्तेजनाय तेभ्यः सक्रियाधिगमसौकर्यप्रदानाय च परिकल्पितं अन्तर्जालाश्रितं शैक्षिकजालस्थानमेव SWAYAM इति वक्तुं शक्यते । स्वयं पोर्टल् इत्येतत् एकं केन्द्रसर्वकारीयं शैक्षिकमुखद्वारोपमं जालस्थानं वर्तते। भारतस्य सर्वासु दिक्षु शिक्षां प्रसार्य शैक्षिकप्रणाल्याः परिष्कारसम्पदनमेव अस्योद्देशं वर्तते । एतदनु विश्वविद्यालयस्य सर्वेभ्यः परिसरेभ्यः अन्तर्जालाश्रितपाठ्यक्रमाणां संरचनाय NPTEL, IGNOU, CEC, ITMB इत्येतेषां पाठ्यक्रमसमूहानाम् अनुप्रयोगाय संसूचनाः प्रदत्ताः सन्ति।

MOOCs- व्यापकमुक्तान्तर्जालाश्रितपाठ्यक्रमः इत्येषः अन्तर्जालाश्रितः दूरस्थशिक्षाकार्यक्रमः इत्यपि वक्तुं शक्यते। भौगोलिकदृष्ट्या दूरस्थाः अपि छात्राः शिक्षकाः च अस्य जालस्य माध्यमेन समीपस्थाः एकत्रिताः वा भवन्ति ।निष्पक्षायाः ( equity ) गुणभूयिष्ठायाः ( quality ) शिक्षायाः सम्प्राप्तिः ( access ) समेभ्यः शिक्षार्थिभ्यः उपलभ्येत इति धिया इदम् अन्तर्जालिकशैक्षिकस्थानं विन्यस्तमस्ति।

व्यापकमुक्तान्तर्जालाश्रितपाठ्यक्रमेषु नैके पाठ्यक्रमाः भाषासम्बद्धाः सन्ति । संस्कृतभाषासम्बद्धेषु MOOCs जालस्थानस्थेषु पाठ्यक्रमेषु अधिकाधिकाः उच्चमाध्यमिकस्तरीयाः संस्कृतपाठाः (३०९) एव । संस्कृतव्याकरणस्य परिचयात्मपाठ्यक्रमः , सम्भाषणसंस्कृतम् , संस्कृतशिक्षणेन सम्बद्धः अन्तर्जालाश्रितः अभिविन्यासकार्यक्रमः , संस्कृतव्याकरणम् इत्येवं सप्त खण्डाः तत्र नयनातिथयो भवन्ति । सम्प्रति विश्वविद्यालयस्य विभिन्नेभ्यः परिसरेभ्यः दशाधिकाः अन्तर्जालाश्रितपाठ्यक्रमसंरचनाय प्रस्तावाः समागताः सन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |

***3.3.2 Number of awards/ recognitions received for research/ innovations won by the institution/ teachers/ research scholars/ students during the last five years***

## *विगतेषु पञ्चसु वर्षेषु संस्थया/ अध्यापकैः/ अनुसन्धातृभिः/ छात्रैः अनुसन्धानार्थं/ नवाचारार्थं प्राप्तानां पुरस्काराणां/ सम्मानानां सङ्ख्या।*

**Answer:** 28

3.3.2.1 Total number of awards/ recognitions received for research/ innovations won by the institution/ teachers/ research scholars/ students year wise during the last five years

विगतेषु पञ्चसु वर्षेषु संस्थया/ अध्यापकैः अनुसन्धानार्थं/ नवाचारार्थं प्राप्तानां पुरस्काराणां/सम्मानानां वार्षिकी सम्पूर्णा सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 10 | 3 | 3 | 5 | 7 |

| File Description | Document |
|---|---|
| List of innovation and award details (Data Template) | View Document |
| e- copies of award letters | View Document |

***3.3.3 Workshops/ seminars conducted on innovative practices at DDE***

***दूरस्थशिक्षानिदेशालयेन नवाचारस्य अभ्यासार्थम् आयोजिताः कार्यशालाः/ संगोष्ठ्यः***

**Answer:** 27

3.3.3.1 Total number of workshops/seminars conducted by DDE year wise during the last five years on:

- Intellectual Property Rights (IPR);
- Open Educational Resources (OERs);
- Massive Open Online Courses (MOOCs);
- Technology-Enabled Learning;
- Learning Management System;
- Development of e-content and
- Other innovative technologies

विगतेषु पञ्चसु वर्षेषु दूरस्थशिक्षानिदेशालयेन अधोलिखितेषु क्षेत्रेषु आयोजितानां कार्यशालानां/ संगोष्ठीनां वार्षिकी सम्पूर्णा सङ्ख्या

- बौद्धिकसंपदधिकारः
- मुक्तशैक्षिकसंसाधनम्
- बृहत्स्तरे मुक्ताः अधितन्त्रिपाठ्यक्रमाः (एमओओसी)
- प्रौद्योगिकीसंबलितं शिक्षणम्
- शिक्षणप्रबन्धप्रणाली
- ई-सामग्र्याः विकासः अपि च
- अन्याः नवाचारयुताः प्रौद्योगिक्यः

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 00 | 00 | 8 | 9 | 10 |

| File Description | Document |
|---|---|
| List of workshops/seminars over the last five years | View Document |
| | |

| | |
|---|---|
| Data Template | View Document |
| Any other relevant information | View Document |
| Report of the event/ link to the material developed | View Document |

***3.3.4 Mentoring provided to newly established Institutes, new research and innovation initiatives established in other universities in the area of Sanskrit basic and applied research, Quality Improvement Program in Sanskrit.***

***सद्यः स्थापितानां संस्थानां समारम्भाय प्रदत्तानि मार्गदर्शनानि, अन्यविश्वविद्यालयेषु मौलिकसंस्कृते अनुप्रयुक्तानुसन्धानक्षेत्रे च स्थापितं नवानुसन्धानं नावीन्योपक्रमाश्च, संस्कृते गुणवत्तासुधारणकार्यक्रमाः***

**Answer:**

या कापि संस्था भवतु सासकाले मार्गदर्शनं सम्प्राप्य **लघ्वी पुरा वृद्धिमती च पश्चात्** इतिवत् विकासं प्राप्तुं सक्षमा भवति। एतदनु केन्द्रीयसंस्कृतविश्वविद्यालयः अपि नवसंस्थाभ्यः संस्कृतेन सम्बद्धेषु आधारभूतेषु कार्येषु अनुसन्धानेषु च मार्गदर्शनं करोति। क्रमशः यथा -

1. विश्वविद्यालयः इतरेषु विश्वविद्यालयेषु उच्चसंस्थासु च संस्कृतभाषायां प्राथमिककेन्द्राणि सञ्चालयितुं मार्गदर्शनं करोति। IIT, IIM, HEI इत्यादिषु अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां नूतनतया आरम्भणाय अनुमतिं ददाति। केन्द्रशिक्षकाणां चयननियोजनादिकम् अपि करोति।
2. भारते औपचारिकरूपेण अनौपचारिकरूपेण च संस्कृतभाषायाः अध्ययनाय अपेक्षितानि अध्ययनसंसाधनानि (study material) अपि प्रयच्छति। दीक्षापुस्तकानि लक्षशः मुद्रितानि सन्ति।
3. **उन्नत-भारत- अभियान** इत्यनया योजनया अभिप्रेरितः केन्द्रीयसंस्कृतविश्वविद्यालयः विभिन्नपरिसराणां समीपवर्तिषु विद्यमानान् ग्रामान् दत्तकरूपेण स्वीकृत्य संस्कृतमयवातावरणं तत्र तत्र सृजन् अस्ति। यथोदाहरणम् -

1. गुरुवायूरु परिसरेण **अदत** (adat) इति ग्रामः दत्तकरूपेण स्वीकृतः।
2. भोपालपरिसरेण **बराई** इति ग्रामः दत्तकरूपेण स्वीकृतः।
3. वेदव्यासपरिसरेण **मसोत** ग्रामः दत्तकरूपेण स्वीकृतः विद्यते।
4. अगरतलाप्रान्ते विद्यमानेन एकलव्यपरिसरेण **जुगुत्रा** इति ग्रामः दत्तकरूपेण स्वीकृतः विद्यते।
5. राजीवगान्धीपरिसरेण शिवमोग्गा प्रान्ते विद्यमानः **चिट्टेबैल** इति ग्रामः दत्तकरूपेण स्वीकृतः वर्तते।

विश्वविद्यालयः जाति- धर्म - लिङ्ग - वयोभेदं विना सर्वेभ्यः संस्कृतक्षेत्रे अध्ययनाय मुक्तावसरं कल्पयति। पुनः एषः प्रमाणपत्रीयान् पाठ्यक्रमान् अपि सञ्चालयति। ज्योतिश्शास्त्रे वास्तुविद्यायां योगादिषु शास्त्रेषु प्रमाणपत्रीयान् पाठ्यक्रमान् प्रकल्प्य विश्वविद्यालयः सर्वदा सर्वत्र संस्कृतभाषयाः प्रचाराय यत्नशीलः वर्तते।

1. संस्कृतच्छात्रः यः कोऽपि भवतु सः स्वयमेव अधिगन्तुं प्राथमिकभाषाज्ञानं च प्राप्तुं संस्कृतेन शक्नुयात् इत्येव सान्द्रमुद्रिकाः निर्माय शताधिकान् पाठान् तत्र निक्षिप्य संस्कृतं सर्वसंसेव्यम् इति भावनां जगतीतले उत्पादयितुं विश्वविद्यालयः क्षमः वर्तते।
2. वैद्युतिकपुस्तकानि विश्वविद्यालयस्य जालपुटे आरोपितानि सन्ति। एतेषां साहाय्येन करतलामलकवत् संस्कृतग्रन्थानां पठनं शक्यते।
3. मुक्तस्वाध्यायपीठेन संस्कृताध्ययनाय सार्वजनिकेभ्यः अपि अवसरः कल्पितः वर्तते। विविधक्षेत्राणां विद्वांसः अपि संस्कृतेन संस्कृतवाङ्मयस्य अध्ययनार्थम् अत्र नामाङ्कनं कुर्वन्ति।
4. IGNOU इत्यनेन मुक्तविश्वविद्यालयेन सह विश्वविद्यालयस्य संविज्ज्ञापकं कृतं दृश्यते। अनेन बहवः संस्कृतक्षेत्रं प्रति समाकृष्टाः सन्ति।
5. विश्वविद्यालयः न केवलं संस्कृतसम्भाषणशिबिराणि परिसरीयेभ्यः एव आयोजनं करोति अपि तु इतरविश्वविद्यालयेषु महाविद्यालयेषु अपि स्वीयान् छात्रान् सम्प्रेष्य तत्रापि संस्कृतभाषायाः प्रचाराय यत्नं करोति।
6. संस्कृतनाट्योत्सव - युवमहोत्सव - वाक्प्रतियोगितासु इतरविश्वविद्यालयानां शिक्षकाः निर्णायकाः भवन्ति। वाक्प्रतियोगितायाः समग्रभारतस्य विभिन्नगुरुकुलानां महाविद्यालयानां विश्वविद्यालयानां छात्राः भागं गृह्णन्ति।

7. केन्द्रसर्वकारस्य केन्द्रीययोजनानां सञ्चालननिर्वहणादिकं दायित्वं विश्वविद्यालयस्य एव वर्तते। एतासु छात्राणां कृते छात्रवृत्तिप्रदानादिकम् अपि अन्यतमा योजना एव । भारतस्य यस्यां कस्यां वा संस्थायां छात्राः भवन्तु यदि ते संस्कृतेन नियमितरूपेण च पठन्ति तर्हि अर्हाः भवन्ति। अष्टादशी योजना अपि अतीव विशिष्टा योजना वर्तते। अत्र विविधपरियोजनानां स्वीकरणाय सर्वेभ्यः अवसरः वर्तते। लक्षशः रूप्यकाणि स्वीकृत्य विभिन्नसंस्थानाम् शिक्षकाः शोधकार्यं कुर्वन्ति। ताः यथा -
    1. **संस्कृतभारती, बेङ्गळूरु**
    2. **संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली**
    3. **संस्कृत-अकादमी, उस्मानिया विश्वविद्यालयः, हैदराबाद**
    4. **पूर्णप्रज्ञशोधसंस्थानम्, बेङ्गळूरु इत्यादीनि**
8. आदर्शमहाविद्यालयाः शोधसंस्थानानि अपि विश्वविद्यालयस्य वर्तन्ते। केन्द्रीययोजनासु एताः अन्तर्भवन्ति। एताभ्यः संस्थाभ्यः अपि प्रभूतं सहयोगं विश्वविद्यालयः एव प्रददाति।

एवं विश्वविद्यालयस्य गतिविधयः परसंस्थानां उद्विकासे सहायकाः सन्ति। संस्कृतेन मूलभूतानि अनुसन्धानकार्याणि कर्तुं तथा अनुप्रयोगात्मकशोधकार्यं कर्तुं विश्वविद्यालयस्य शोधनीतौ विस्तरेण निरूपणं कृतम् अस्ति। विश्वविद्यालयस्य जालपुटे आरोपितानि च सन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |

**3.4 Research Publications and Awards**

***3.4.1 The institution ensures implementation of its  stated Code of Ethics for research***

***The institution has a stated Code of Ethics for research and  the implementation of which is ensured through the following:***

1. ***Inclusion of research ethics in the research methodology course work***
2. ***Presence of institutional Ethics committees (Animal, chemical,bio-ethics etc.,)***
3. ***Plagiarism check***
4. ***Research Advisory Committee***

***संस्था अनुसन्धानार्थं घोषितनीतिसंहितायाः क्रियान्वयनं निश्चिनोति।***

***संस्था अनुसन्धानार्थं घोषितां नीतिसंहितां दधाति यस्याः क्रियान्वयनम् अधो लिखितप्रकारेण सुनिश्चीयते -***

1. ***१. अनुसन्धानप्रविधिपाठ्यक्रमे अनुसन्धाननीतिसिद्धान्तस्य समावेशः।***
2. ***२. सांस्थानिकनीतिसमितीनाम् (पशु-रासायनिक-जैविकनीतिसम्बन्धिनीनाम्) विद्यमानता।***
3. ***३. कृतिचौर्यनिरीक्षणम्।***
4. ***४. अनुसन्धानपरामर्शसमितिः।***

**Answer:** A. All of the above अ. उपरि निर्दिष्टाः सर्वे

| File Description | Document |
|---|---|
| Code of ethics for Research document, Research Advisory committee and ethics committee constitution and list of members on these committees, software used for Plagiarism check, link to Website | View Document |

***3.4.2 The institution provides incentives to teachers who receive state, national and international recognitions/awards***

1. ***Commendation and monetary incentive at a Institution function***
2. ***Commendation and medal at a Institution function***
3. ***Certificate of honor***
4. ***Announcement in the Newsletter/ website***

***संस्था राज्यस्तरीयां/ राष्ट्रियाम्/ अन्ताराष्ट्रियां मान्यतां/ पुरस्कृतिं प्राप्तवतः अध्यापकान् प्रोत्साहयति।***

1. ***१. संस्थासमारोहे प्रशस्तिपत्रप्रदानेन धनराशिप्रदानेन च प्रोत्साहनम्।***
2. ***२. संस्थासमारोहे प्रशस्तिपत्रप्रदानं पदकप्रदानं च।***
3. ***३. सम्मानप्रमाणपत्रम्***
4. ***४. वार्तापत्रे/जालस्थाने उद्घोषणम्***

**Answer:** A. All of the above अ. उपरि निर्दिष्टाः सर्वे

| File Description | Document |
|---|---|
| List of Awardees and Award details (Institutional data as per Data Template) | View Document |
| E- copies of the letters of awards | View Document |
| Any additional information | View Document |

***3.4.3 Patents acquired/Creative writing / or critical Shastric writing composed in Sanskrit / copyright generated / hitherto unknown manuscripts brought to light through publication.***

***प्राप्ताः स्वत्वाधिकाराः/ संस्कृतेन सर्जनात्मकलेखनम्/ अथवा समीक्षात्मकं शास्त्रीयं लेखनम्/ प्राप्तं प्रतिकृतिस्वाम्यम्/ एतावात्पर्यन्तम् अज्ञाताः मुद्रणेन प्राकाश्यमानीताः मातृकाः।***

**Answer:**

संस्कृतेन लिखितानां प्रकाशितानां सृष्टानां च विविधानां साहित्यानाम् इतिहासः सुदीर्घः वर्तते। विश्वविद्यालयस्य सर्वेऽपि शिक्षकाः शास्त्रपण्डिताः च एतादृशेषु नवाचारेषु औत्सुक्यं प्रदर्शयन्ति। समीक्षात्मकानां शास्त्रीयलेखानां प्रकाशनम् अन्तर्जालीयपत्रिकासु वार्षिकशोधपत्रिकासु च प्रकाश्यन्ते। एतावत्पर्यन्तम् अज्ञाताः मातृकाः बह्व्यः गङ्गानाथझा परिसरेण प्रकाशिताः सन्ति। प्रतिकृतिस्वाम्यं विश्वविद्यालयस्य एव शोधग्रन्थानां पत्रिकाणां च प्रकाशनावसरे अनौपचारिकरूपेण वर्तते एव। क्रमशः यथा-

1. '**संस्कृतसाहित्यपरिचयः**' इत्येतत् पाठ्यपुस्तकं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषत् (NCERT) पक्षतः 2022 तमे वर्षे संशोध्य प्रकाशितं वर्तते। अस्य पुस्तकस्य निर्माणे विश्वविद्यालयस्य आचार्याणां योगदानं वर्तते। आचार्य बनमाली बिश्वालवर्यः जनार्दन मणिः प्रभृतयः अत्र योगदानम् अयच्छन्। NCERT, NCTE, AICTE इत्याद्याः परिषदः विश्वविद्यालयस्य तदीयानां शिक्षकाणां च सहयोगेनैव विविधान् नूतनान् नवाचारोपेतान् पाठ्यक्रमान् आरचयन्ति। वेदकाव्यनाटककथादीनां नवयुगे नवशैल्या नवैः विधिभिः च अधिगन्तुं भारतीयेभ्यः छात्रेभ्यः एतादृशानि पुस्तकानि साहाय्यं कुर्वन्ति।
2. समकालिककथाः संस्कृतेन अल्पमात्रेण लिख्यन्ते। लिखितानां प्रकाशनम् अपि प्रचुरमात्रेण न भवन्ति। एनां समस्यां वारयितुं **कथासरित्** इत्येषा षाण्मासिकी पत्रिका सफला वर्तते। सर्जनात्मककथालेखाः अत्र प्रकाश्यन्ते। अस्याः पत्रिकायाः सम्पादकाः विश्वविद्यालयस्य आचार्याः बनमाली बिश्वालवर्याः सन्ति। 2020 तमे वर्षे **कोरोनाकथाविशेषतरङ्गः** इत्येषः विशेषाङ्कः प्रकाशितः अस्ति। आचार्याः बनमाली बिश्वालवर्याः बहूनां नवाचारोपेतानां ग्रन्थानां सृष्टारः सन्ति। दिङ्मात्रं यथा -

1. **विवेकलहरी** - विवेकानन्दस्य चरितमत्र संस्कृतेन वर्णितम् अस्ति।
2. **कुलगीतमालिका** - विश्वविद्यालयस्य वैशिष्ट्यम् अधिकृत्य माहात्म्यम् अधिकृत्य च विभिन्नैः विशिष्टैः च विद्वद्भिः गीतानि रचितानि। तानि अत्र सङ्कलय्य प्रकाशितानि (2022) सन्ति।
3. **दण्डिनः** दशकुमारचरितम् अतीव प्रसिद्धम् अस्ति। तस्य अष्टमात् उच्छ्वासात् स्वीकृतः विश्रुतचरितम् इति भागः नवरूपेण उपस्थापितः।

1. पत्रिकासु अपि विश्वविद्यालयस्य शिक्षकैः बहवः लेखाः लिखिताः सन्ति। online education इत्यस्य विपरिणामान् अधिकृत्य डा.रेखा शर्मा महोदयया सर्जनात्मकशैल्या लेखः (१४/०९/२०२०) लिखितः। कोरोना काले जगतीतले जातस्य परिवर्तनस्य विषये अपि जन प्रखरे महोदयया लिखितम् अस्ति।
2. **अन्ववेषणम्** इत्यस्मिन् शीर्षकोपेते आमुखे (blog मध्ये http://manovinodini21.blogspot.com/2021/06/blog-post_25.html ) डा.गणेश ति .पण्डित महोदयेन विषमपरिस्थितौ संस्कृतक्षेत्रस्य स्थितिगत्योः विषये लिखितम्। विश्लेषणात्मकाः सर्जनात्मकाश्च एते लेखाः कोरोना काले शास्त्रीयज्ञानविकासार्थं के के मार्गाः अनुसर्तुं शक्यन्ते इति विचारं प्राकटयत् ।
3. (Virtual Interview/Smart Interview and Recruitment System in Sanskrit Field) संस्कृतक्षेत्राय इयं प्रणाली नव्या एव। कोरोनाकाले प्रथमावर्ते च अन्तर्जालाश्रितमाध्यमेन तत्र तत्र संस्कृतच्छात्राणां साक्षात्कारः नियुक्तिः इत्यादिकम् अल्पमात्रेण वा जातम् स्यादपि। परं संस्कृतलोके सार्वत्रिकरूपेण च वस्तुनिष्ठः कोऽपि परोक्षयोजकः (Virtual Recrutor) नैव दृष्टः श्रुतो वा। सम्प्रति एतादृशस्य जनस्य संस्थायाश्च महती आवश्यकता वर्तते। संस्कृतसंस्थानां सञ्चालकैः एतद्विषये विशेषादरः वोढव्य एव।

स्वायत्तशैक्षिकसंस्थानां जालानि अनल्पानि भारते सन्ति। तासां पाठ्यक्रमे संस्कृतमपि अस्ति छात्राः अपि लक्षशः पठन्तः सन्ति ।विशिष्य माध्यमिकोच्चमाध्यमिकस्तरयोः समधिकाः सन्ति। ताः संस्थाः एकवर्षादेव परोक्षरूपेण विषमपरिस्थित्यनुरूपशैक्षिकक्रियाकलापानां सञ्चालने नियोजने च समर्थाः अभवन्नपि। सर्वकारीयशैक्षिकसंस्थानामपेक्षया समधिकानि सौकर्याणि अस्माभिः परिकल्प्यन्ते इति दर्शयितुमपि ताभिः संस्थाभिः बहुविधचेष्टाः क्रियन्ते इति सर्वे जानन्ति। परोक्षशिक्षाप्रसङ्गेऽपि वयमेव अग्रगण्याः स्मः इति तेषां वादः। एतादृशीभिः संस्थाभिः संस्कृतसंस्थानां सम्पर्कः सततं स्यात्। Campus Selection इत्येषः सम्प्रत्ययः अभियान्त्रिकप्राविधिकादिषु क्षेत्रेषु आबहोः कालात् वर्तते। सम्प्रति गमनागमनमपि निषिद्धमित्यतः परोक्षरूपेण साक्षात्कारं कृत्वा (Virtual Interview) तत्र तत्र नियुक्तिमपि कुर्वन्त्यः सन्ति ताः। आभासीयनियुक्तिरित्यपि (Virtual Recruitment) अस्याः प्रक्रियायाः नामान्तरम्। एतादृश्यः प्रक्रियाः संस्कृतविषयोपेतासु आधुनिकधारायुक्तासु च शैक्षिकसंस्थासु सदैव चलन्ति। गणितविज्ञानादिषु कृतपरिश्रमाणां विषयविशेषज्ञानां साक्षात्कारनियुक्त्यादिषु तासु संस्थासु कृच्छ्रकाले अपि अहमहमिकता प्रदर्श्यते।

**" पुरतः कृच्छ्रकालस्य धीमाञ्जाग्रति पूरुषः।**

**स कृच्छ्रकालं सम्प्राप्य व्यथां नैवेति कर्हिचित्॥ "**

इतीदं व्यासवचनम् एतादृशेषु सर्जनात्मकसंस्कृतलेखेषु उपनिबद्धम् अस्ति।

1. आचार्य श्रीनिवास वरखेडिवर्याणाम् आध्वर्यवे प्रधानसम्पादनत्वे च नाट्यनवाह्निकम् इति ग्रन्थः नूतनतया सुप्रसिद्धैः आचार्यैः अभिराजेन्द्रमिश्रवर्यैः सम्पादितः। अमृतमहोत्सवग्रन्थमाला इत्यनेन माध्यमेन बहवः विशिष्टाः ग्रन्थाः लोकार्पिताः सन्ति।
2. आचार्य कुलदीपशर्मा महोदयेन प्रहेलिकाशतकम् इत्येतत् विशिष्टं पुस्तकं लिखितम् अस्ति। प्रहेलिकाः संस्कृतस्य वाङ्मयात् विमुखीभवन्ति चेत् वाङ्मयस्यैव क्षतिः हानिः वा भविष्यति इति तन्मतम् ।

   अभिनवसंस्कृतप्रहेलिकाः अत्र सङ्गृह्य प्रदत्ताः सन्ति। बालसाहित्ये सरलमानकसंस्कृतेन च अयं ग्रन्थः रचितः।

   एवमेव विश्वविद्यालयस्य विशिष्टासु शैक्षिकशोधपत्रिकासु समीक्षात्मकाः शास्त्रीयलेखाः उपलभ्यन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| List of the year of the publications of the patents etc. | View Document |

***3.4.4 Number of Ph.Ds awarded per teacher during the last five years***

***विगतेषु पञ्चसु वर्षेषु प्रत्येकम् अध्यापकस्य निर्देशने पी-एच्.डी इत्युपाधिभाजां शोधच्छात्राणां सङ्ख्या।***

**Answer:** 4.16

3.4.4.1 How many Ph.Ds awarded during the last 5 years

विगतेषु पञ्चसु वर्षेषु कतिभिः छात्रैः पी-एच्.डी इत्युपाधयः प्राप्ताः?

Answer: 761
3.4.4.2 Number of teachers who are recognized guides during the last five years

विगतेषु पञ्चसु वर्षेषु मार्गदर्शकत्वेन मानितानाम् अध्यापकानां सङ्ख्या।

Answer: 183

| File Description | Document |
|---|---|
| List of PhD scholars and their details like name of the guide, title of thesis, year of award etc ( Institutional data as per Data Template) | View Document |
| Any additional information | View Document |
| URL to the research page on HEI web site | View Document |

***3.4.5 Number of research papers per teacher in the Journals notified on UGC website/recognised peer reviewed journals/ reputed journals published by Sanskrit/ General Universities/ Departments/ Research Institutes and notified journals by the Central Sanskrit University (Formerly Rashtriya Sanskrit Sansthan) in its website and in the Conference Proceedings***

***विगतेषु पञ्चसु वर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु समीक्षितपत्रिकासु, संस्कृतविश्वविद्यालयैः तद्विभागैः प्रकाशितासु प्रतिष्ठितशोधपत्रिकासु, केन्द्रीयसंस्कृतविश्वविद्यालयस्य (प्राक्तनस्य राष्ट्रियसंस्कृतसंस्थानस्य) जालस्थाने अधिसूचितासु शोधपत्रिकासु सम्मेलनकार्यवृत्तेषु वा प्रत्येकम् अध्यापकस्य प्रकाशितशोधपत्राणां सङ्ख्या।***

**Answer:** 4.19

3.4.5.1 Number of research papers in aforesaid journals year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु उपर्युक्तशोधपत्रिकासु प्रकाशितशोधपत्राणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 154 | 216 | 332 | 492 | 704 |

| File Description | Document |
|---|---|
| List of research papers by title, author, department, name and year of publication (Institutional data as per Data Template) | View Document |
| Any additional information | View Document |

***3.4.6 Number of books/ Monographs edited in Sanskrit and Other Languages (excluding awarded works) per teacher during the last five years***

***विगतेषु पञ्चसु वर्षेषु प्रत्येकम् अध्यापकेन संस्कृतेन इतरभाषया च सम्पादितानां ग्रन्थानां/ लघुप्रबन्धानां सङ्ख्या। (पुरस्कृतग्रन्थान् विहाय)***

**Answer:** 2.06

3.4.6.1 Total number of books /Monographs edited in Sanskrit and Other Languages (excluding awarded works) year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु संस्कृतेन इतरभाषया च सम्पादितानां ग्रन्थानां/ लघुप्रबन्धानां वार्षिकी सम्पूर्णा सङ्ख्या। (पुरस्कृतग्रन्थान् विहाय)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 115 | 83 | 138 | 112 | 484 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template | View Document |
| Any additional information | View Document |

***3.4.7 Number of original creative writings (books) in Sanskrit/Sanskrit shastras etc. (excluding awarded works) per teacher during the last five years***

***विगतेषु पञ्चसु वर्षेषु प्रत्येकम् अध्यापकेन संस्कृतेन लिखितानां मूलसर्जनात्मकलेखनानां/ शास्त्रीयलेखनानाम् अन्यविधलेखनानां च (पुस्तकानाम्) सङ्ख्या। (पुरस्कृतग्रन्थान् विहाय)***

**Answer:** 0.26

3.4.7.1 Total number of original creative writings (books) in Sanskrit/ Sanskrit shastras etc., (excluding awarded works) year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु संस्कृतेन लिखितानां मूलसर्जनात्मकलेखनानां/ शास्त्रीयलेखनानाम् अन्यविधलेखनानां च (पुस्तकानां) वार्षिकी सम्पूर्णा सङ्ख्या। (पुरस्कृतग्रन्थान् विहाय)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 12 | 12 | 35 | 30 | 31 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template | View Document |
| Any additional information | View Document |

***3.4.8 Number of chapters in edited volumes/ other creative short pieces etc., (excluding awarded works) per teacher during the last five years***

***विगतेषु पञ्चसु वर्षेषु प्रत्येकम् अध्यापकेन सम्पादितग्रन्थेषु लिखितानाम् अध्यायानां/ लघुसर्जनात्मकानाम् अंशानाम् अन्यविधलेखनानां च सङ्ख्या। (पुरस्कारप्राप्तग्रन्थान् विहाय)***

**Answer:** 2.75

3.4.8.1 Number of chapters in edited volumes, other creative short pieces etc., (excluding awarded works) year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु सम्पादितग्रन्थेषु लिखितानाम् अध्यायानां/ लघुसर्जनात्मकानाम् अंशानाम् अन्यविधलेखनानां च वार्षिकी सङ्ख्या। (पुरस्कृतग्रन्थान् विहाय)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 19 | 34 | 51 | 421 | 720 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template | View Document |

***3.4.9 Does the Institution publish any research journal(s)***

***If yes, indicate the year of starting the research journal, composition of the editorial board, editorial policies and state whether it is listed in any international database.***

***किं संस्था शोधपत्रिकाः प्रकाशयति? यद्येवम्, तर्हि शोधपत्रिकाणां प्रारम्भवर्षम्, सङ्घटिता सम्पादकसमितिः, सम्पादननियमाः, अपि च यत्र एताः क्वचित् अन्ताराष्ट्रियदत्तांशेषु सूची कृता इति संसूचनीयम्।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालयम् अपि संयोज्य त्रयोदशः परिसराः सन्ति।अधिकाधिकेभ्यः परिसरेभ्यः शोधपत्रिकाः प्रकाश्यन्ते। १४ पत्रिकाणां नामानि विश्वविद्यालयानुदानायोगस्य मानितायां शोधपत्रिकायाः तालिकायां सन्ति। क्रमशः यथा -

1. गङ्गानाथझा परिसरस्य **The Journal of Ganganth Jha** इत्येषा पत्रिका १९४३ तमसंवत्सरस्य नवम्बर- मासात् आरभ्य प्रकाश्यते। सर्वादौ प्रो.आर.डि. रानडे , डा. ए.सिद्दिकि , डा. उमेशमिश्रा इत्येतैः सम्पादिता एषा अन्ताराष्ट्रियदत्तांशेषु सूचीकृता ( ISSN No : 0337-0575) वर्तते। शोधसारः , कुञ्चिकापदानि, शोधप्रस्तावना, प्रतिपाद्यः विषयः , परिशीलितसन्दर्भाः , सहायकग्रन्थसूची इत्यादयः प्रक्रमाः क्रमबद्धरूपेण भवेयुः इति शोधपत्रिकायाः सम्पादननियमाः सन्ति। विश्वविद्यालयस्य प्रथमा शोधपत्रिका एषा एव । द्वितीया उशती इति शोधपत्रिका अपि अस्मात् एव

परिसरात् प्रकाश्यते। आचार्यः ललितकुमारत्रिपाठी , डा. अपराजिता मिश्रा , डा. मोनाली दास इत्येते सम्पादकसमितौ सम्प्रति सन्ति। १९८२ तमसंवत्सरस्य नवम्बर- मासात् आरभ्य इयम् उशती प्रकाश्यते। अन्ताराष्ट्रियदत्तांशेषु सूचीकृतायाः ( ISSN No: 2277-680X ) अस्याः सम्पादकमण्डल्यां सर्वादौ डा. गयाचरणत्रिपाठी, श्री.शिवकुमार मिश्र, डा.गोपराजू रामा , डा. आजाद मिश्र , डा.शिवकुमारत्रिवेदी ,श्रीजीवेश्वर झा , श्री सुबोधचन्द्र पन्त इत्येतेषां सङ्घटितप्रयासेन इयं पत्रिका प्रकाशिता वर्तते।

2.**संस्कृतविमर्शः** इत्येषा शोधपत्रिका केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुख्यालयेन प्रकाश्यते। १९९० तमात् संवत्सरात् इयं शोधपत्रिका नियतरूपेण प्रकाश्यते। डा.प्रियदर्शिनी ठाकुर महोदया अस्याः पत्रिकायाः प्रथमा सम्पादिका वर्तते। अन्ताराष्ट्रियदत्तांशेषु सूचीकृतायाः ( ISSN No: 0975-1769) अस्याः पत्रिकायाः प्रसिद्धिः देशे विदेशे चास्ति। विश्वविद्यालयस्य कुलपतयः एव अस्याः शोधपत्रिकायाः सम्पादनप्रमुखाः भवन्ति सर्वदा। सम्प्रति आचार्याः श्रीनिवासः वरखेडिवर्याः अस्याः प्रधानाः सम्पादकाः सन्ति। डा. मधुकेश्वरभट्टः , डा. देवानन्दशुक्लः च अस्याः शोधपत्रिकायाः सम्पादकौ स्तः।

3. पुरीस्थः सदाशिवपरिसरः सर्वाधिकाः शोधपत्रिकाः प्रकाशयति। पञ्चदशाधिकासु पत्रिकासु **पौर्णमासी**( ISSN No: 2347-9469) इत्येषा प्राचीना । १९५० तमे वर्षे आरब्धा एषा पत्रिका प्रसिद्धा वर्तते। **श्रीसदाशिवम्** इत्येषा वैद्युतिकी अन्ताराष्ट्रिया शोधपत्रिका ( ISSN No: 2582-1326)अपि अनेन परिसरेण प्रकाश्यते। २००५ तमे वर्षे आरब्धा **शिक्षासुरभिः** ( ISSN No: 2582-1326) , **शिक्षाश्रीः** (ISBN- 818822095-6) इत्याद्याः पत्रिकाः अस्य परिसरस्य विशेषताः सन्ति।

4.के.जे.सोमय्या परिसरात् आचार्याणां बोधकुमारझावर्याणां मुख्यसम्पादनेन विद्यारश्मिः ( ISSN No: 2277-6443) इति शोधपत्रिका प्रकाश्यते। इयं २०११ तमे संवत्सरे समारब्धा। २०१६ तमे संवत्सरे **वाग्वै ब्रह्म** ( ISSN No: 2457-0729) इति शोधपत्रिका समारब्धा। **शिक्षारश्मिः** इति शिक्षाविभागीया पत्रिका अपि २०१४ तमे संवत्सरे समारब्धा वर्तते।

5. भोपालपरिसरात् २००५ तमात् संवत्सरात् आरभ्य **राष्ट्री** ( ISSN No: 2321-6948) इति २०११ तमात् संवत्सरात् आरभ्य शास्त्रमीमांसा चेति शोधपत्रिकाद्वयं प्रकाश्यते।

6. जम्मूस्थात् श्री रणबीरपरिसरात् २००७ तः आरभ्य **श्रीवैष्णवी** इति शोधपत्रिका समारब्धा( ISSN No: 7552-2779) वर्तते। एवम् एव **शिक्षामृतम्** इति शिक्षा विभागस्य शोधपत्रिका २०११ तमे संवत्सरे समारब्धा( ISSN No: 2349-6452) वर्तते।

7. शृङ्गगिरिस्थात् राजीवगान्धीपरिसरात् **वाक्यार्थभारती** इति शोधपत्रिकायाः प्रकाशनं २००७ तः समारब्धं वर्तते। परिसरनिदेशकाः एव प्रधानसम्पादकाः अस्य। आचार्यरामानुजदेवनाथवर्याः अस्य प्रथमप्रधानसम्पादकाः आसन्। विश्वविद्यालयानुदानायोगस्य मानितायां शोधपत्रिकायाः तालिकायां **वाक्यार्थभारती** पत्रिका ( ISSN No: 2249-58X) वर्तते। अस्यां शोधपत्रिकायां विभिन्नानां विशिष्टविदुषां व्याख्यानानि लिपिबद्धानि भवन्ति। राष्ट्रपतिपुरस्कृतानां महामहोपाध्यायबिरुदाङ्कितानां , पद्मश्रीः, बादरायणादिभिः पुरस्कारैरपि पुरस्कृतानां च अत्र शोधलेखाः भवन्ति।

8. जयपुरपरिसरस्य **जयन्ती** इति शोधपत्रिका १९९० तमे संवत्सरे समारब्धा।( ISSN No: 2248- 9495) आचार्या भगवती सुदेश महोदया अस्याः पत्रिकायाः प्रधानसम्पादिका वर्तते। **शिक्षासन्देशः** इति पत्रिका २०१३ तः शिक्षाविभागेन प्रकाश्यते( ISSN No: 2248- 9495)।

9. लखनऊ परिसरपक्षतः **गोमति** ( ISSN No: 2231- 0800) इति शोधपत्रिका १९९७ तमे संवत्सरे समारब्धा। **श्रुतिनिःश्वसिता** ( ISSN No: 2456- 2847) **पालिप्राकृतानुशीलनम्** (ISSN No:2349-3097) **साहित्यसमाख्या** ( ISSN No: 2349-851X) च अपि प्रकाश्यते।

10. वेदव्यासपरिसरस्य पञ्च शोधपत्रिकाः सन्ति। **वेदविपाशा** -२०१३ ( ISSN No: 2348-7828) **खगोलः** -२०१५ ( ISSN No: 2546-3420) इति पत्रिकाद्वयं UGC Care Listed मध्ये स्तः । पुनः **निःश्रेयसी , पदगङ्गा , साहित्यवेदिका** चेति तिस्रः शोधपत्रिकाः प्रकाश्यन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |

***3.4.10 Number of books published per teacher in Simple Standard Sanskrit medium during the last five years.***

***विगतेषु पञ्चसु वर्षेषु प्रत्येकम् अध्यापकेन सरलमानकसंस्कृतमाध्यमेन प्रकाशितानां ग्रन्थानां सङ्ख्या।***

**Answer:** 0.22

3.4.10.1 Number of books published in Simple Standard Sanskrit medium during the last five years:

विगतेषु पञ्चसु वर्षेषु सरलमानकसंस्कृतमाध्यमेन प्रकाशितानां ग्रन्थानां सङ्ख्या –

Answer: 101

| File Description | Document |
|---|---|
| List of books | View Document |
| As per Data Template | View Document |

***3.4.11 Number of text/reference books prepared by the institution with the help of teachers from the institution in Simple Standard Sanskrit during the last five years.***

***विगतेषु पञ्चसु वर्षेषु संस्थया तदीयाध्यापकानां साहाय्येन सरलमानकसंस्कृतेन निर्मितानां पाठ्य/सन्दर्भग्रन्थानां सङ्ख्या।***

**Answer:** 76

| File Description | Document |
|---|---|
| List of books | View Document |
| As per Data Template | View Document |

**3.5 Consultancy**

***3.5.1 Institution has a policy for consultancy including revenue sharing between the institution and the individual and encourages its faculty to undertake consultancy***

***संस्था परामर्शकार्याय अथ च संस्थायाः व्यक्तेश्च मध्ये राजस्ववितरणाय कांचित् नीतिं दधाति तथा च अस्याः सङ्कायसदस्यान् परामर्शकार्यं स्वीकर्तुं प्रोत्साहयति।***

**Answer:**

**प्रस्तावना :-**

**परामर्शप्रक्रियाः सम्भूयकारिताः** इत्येतासां नीतिसम्बद्धदिशानिर्देशानां संस्थापनोपद्देश्यमस्ति यत् वर्तमानकाले स्थानीये राष्ट्रीये वैश्विकस्तरे वा उपलभ्यमानानि बौद्धिकभौतिकसंसाधनानि मिथः उपयुज्य पारस्परिकसहयोगेन संस्कृतभाषायाः ज्ञानस्य वा विश्वतोमुखत्वख्यापनाय शैक्षिकनागरिकव्यावसायिकसंस्थाभिः सह परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः औपचारिकरूपेण क्रियान्वयनज्ञानसम्पादनम् । यतोऽहि विश्वमिदं प्राचीनसंस्कृतवाङ्मये सन्निहिताभ्यां ज्ञानविज्ञानाभ्यां

लाभान्वितं सत् परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां माध्यमेन सन्ततं अभिवृद्धं भवेत्। ततो प्राप्तज्ञानानुभवविशेषज्ञताः बृहते समाजाय सम्प्रदाय विश्वविद्यालयसमाजयोरुभयोरपि कल्याणं चिन्तयेत् इति ।

**अभियानम्/ ध्येयम्**

अभियानस्य तात्पर्यम् अस्ति यत् विश्वविद्यालयाय तथा दिशानिर्देशः कर्तव्यः यथा सः **प्राचीनसंस्कृतग्रन्थेषु सन्निहितस्य प्राचीनभारतीयज्ञानस्य (यस्याश्चर्यकरावशेषाः अद्यापि भारतस्य कोणे कोणे विकीर्णाः सन्ति, तस्य) साम्प्रतिकविज्ञानप्रौद्योगिक्योश्च सम्पर्कसेतुः इव कार्यं कर्तुं शक्नुयात्। प्राक्कालिके जगति भारतं ज्ञानविज्ञानप्रौद्योगिक्यादिषु क्षेत्रेषु शीर्षस्थाने तथैव विराजते स्म यथाद्य जगति पाश्चात्यराष्ट्राणि विराजन्ते। विश्वविद्यालयः द्विविधज्ञानाभ्यां साम्प्रतिकाय विश्वाय द्विगुणितं** लाभं दापयितुम् इच्छति।

**दूरदृष्टिः**

ध्येयपथिकेन विश्वविद्यालयेन पूर्वोक्तध्येयानामवाप्तये सम्प्रति मुख्यधारायां वर्तमानैः **शैक्षिकशोधसंस्थानान्तरैः सह (यत्र अभियान्त्रिकी ,वैद्यकीयम्, प्रौद्योगिकी इत्याद्याः संस्थाः सम्मिलिताः स्युः) सम्भूयकारिताः विनिश्चित्य प्राचीनभारतीयग्रन्थावगाहानपूर्वकं तत्र विशुद्धं शोधकार्यं च विधाय एकस्य क्रमबद्धस्य ज्ञानभाण्डागारस्य निर्माणं कर्तव्यं ;  यस्य च लाभं क्षेत्रविशेषे शोधरताः विना क्लेशं सम्प्राप्य स्वशोधकार्यसम्बद्धावश्यकतानां परिपूर्तये अपेक्षितान् विश्वविद्यालयस्य विषयविशेषज्ञान् पार्थक्येन/व्यक्तिशः/ स्वेच्छामात्रेण सम्पर्कयितुं शक्नुयुः।**

**परामर्शप्रक्रियाः**

**परामर्शप्रक्रिया सः महत्वपूर्णः प्रक्रमः  यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य विद्वद्भ्यः स्वज्ञानस्य विशेषज्ञतायाश्च सर्वकाराय सार्वजनिकसंस्थाभ्यः स्वायत्तसङ्घटनाभ्यः सामुदायिकसमूहेभ्यश्च  प्रदातुं अवसरं ददाति।** परामर्शप्रक्रियायां द्विमुखप्रवेशद्वारवत् अन्तःक्रियाः प्रचलन्ति यत्रैकस्मात् मुखात् विभिन्नघटकसङ्घटनभागविभागादिभिः अङ्गैः सहिताय समाजाय तदीयविभिन्नक्षेत्रस्थैः विशेषज्ञैः विश्वविद्यालयात् प्राप्तानां सर्वोत्तमज्ञानानुभवप्रौद्योगिक्यादीनां ज्ञानं सञ्जायते; द्वितीयात् मुखात् अर्थात् परामर्शकरूपेण गत्वा प्रतिनिवृत्तविदुषः ( विश्वविद्यालयप्रतिनिधिभूतस्य) सम्प्राप्तान्तर्दृष्टेः अनुभवस्य सम्पर्कस्य अवलोकनेन तदीयपरवर्तिकालिकाध्ययनानुसन्धानादीनां परीक्षणेन च विश्वविद्यालयोऽपि स्वीयं ज्ञानं विशेषज्ञत्वं च वास्तविकरूपेण सफलं वा विफलं वा इति अभिज्ञातुं प्रभवति ।परामर्शप्रक्रियाभिः परामर्शप्रक्रियायां संलग्नाः विशेषज्ञाः विद्वांसः लाभान्विताः भवन्ति। विश्वविद्यालयस्य राजस्वेऽपि वृद्धिः जायते।

**सम्भूयकारिता**

सम्भूयकारिता इत्येतस्य पदस्य तात्पर्यं तया प्रक्रियया अस्ति यया विश्वविद्यालयस्य सेवासु वृद्धिं विकासं च सम्पादयितुं शक्यते। एवमेव तदीयाः शिक्षकाः व्यक्तिशः विभागशः अथवा समग्रविश्वविद्यालयपक्षतः सर्वकारेण अन्यशैक्षिकसंस्थाभिः सार्वजनिकक्षेत्रस्थोद्यमैः सर्वकारीयेतरसंस्थाभिः व्यापारपरसङ्घटनैः सामुदायिकसमूहैश्च सह सार्थकमेकं संविज्ज्ञापकं प्रवर्तयितुं प्रभवन्ति।

**परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः दिशानिर्देशाः**

1. विश्वविद्यालयः विभिन्नविभागेषु उपलभ्यमानाः विशिष्टदक्षताः स्वशिक्षकाणां विशेषोपलब्धीः विशिष्टक्षमताश्च आदावेव प्रकटीकरोति; कुतश्चेत् या कापि व्यक्तिः स्वीये सम्बद्धक्षेत्रविशेषे परामर्शप्रक्रियायाः आवश्यकताम् अनुभवति तर्हि सा सर्वादौ अस्माकं सम्पर्कं कुर्यात् इति ।
2. प्राचीनभारतीयज्ञानपरम्परायां विशिष्य स्थापत्यकलायां ज्योतिर्विज्ञाने भैषज्ये शल्ये शरीरविज्ञाने अभियान्त्रिक्यां विधिशास्त्रे कृषौ ललितकलासु च अद्यावधि अस्पृष्टाः अनुसन्धेयाश्च ये विषयाः सन्ति तेषु अनुसन्धानकार्यसम्पादनाय विश्वविद्यालयः स्वीयान्  विदुषः छात्रान् च अभिप्रेरयेत्। अन्तःशास्त्रीयविषयेषु शोधकार्यसम्पादनाय विद्वांसः प्रेरणीयाः यत्र प्राचीनज्ञानस्य आधुनिकशोधसाधनानां मापदण्डानां माध्यमेन सत्यापनं कर्तुं शक्यते। अनेन प्राचीनज्ञानं वैज्ञानिकक्रमेण सत्यापनक्षमैः सिद्धान्तैः समाधारितमस्तीति आधुनिकविज्ञानिनोऽपि  विश्वसितुं शक्नुवन्ति।

3. विश्वविद्यालयः परिसरस्तरे केन्द्रस्तरे च  परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः विषये समर्पितचित्तं तादृशम् एकैकम् अधिकारिणं नियोजयेत् यः परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेर्विषये अपेक्षितसूचनाः दातुं समर्थोऽस्ति।
4. परिसरीयः कार्यालयः सूचनाधिकारी च विश्वविद्यालयस्य परामर्शप्रक्रियासम्बद्धविचारवेत्ता सन् तत्सम्बद्धान् सर्वान् अभिलेखान् प्रपत्राणि च स्वकोषे संस्थापयेत् । सः परामर्शकाङ्क्षिभिः क्रियमाणान् प्रश्नान्  स्वीकृत्य  तेषां समाधानान्वेषणाय मुख्यालयस्य कृते तान् प्रश्नान् अग्रे सारयेत् ।
5. परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतेः सम्बद्धानां सेवानां सुचारुरूपेण सञ्चालनाय यदि बाह्यविशेषज्ञानां मानवीयसंसाधनानां वा आवश्यकता अनुभूयते तर्हि विश्वविद्यालयाधिकृताधिकारिणां पूर्वानुमतिं स्वीकृत्य अपेक्षितव्यवस्थां कर्तुं शक्यते।
6. परामर्शप्रक्रियायाः सम्भूयकारितायाश्च सम्बद्धसङ्ख्यानानां परिसमाप्तौ (संविज्ज्ञापकसमाप्तौ) विश्वविद्यालयस्य (आयव्ययमण्डनावधौ) तत्कर्मचारिणां मध्ये  राजस्ववितरणम् अधोलिखिततेन तालिकाक्रमेण सम्भवति।

**विश्वविद्यालयसम्बद्धकर्मचारिणां मध्ये राजस्ववितरणम्**

| प्रकारः | विश्वविद्यालयस्य प्रतिशतता | शिक्षकाणां/कर्मचारिणां  प्रतिशतता |
|---|---|---|
| व्यक्तिगतपरामर्शः | 20% | 80% |
| परियोजनापरीक्षणम् | 40% | 60% |
| सामाजिकप्रशिक्षणम् | 30% | 70% |

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload soft copy of the Consultancy Policy | View Document |
| Upload minutes of the Governing Council/ Syndicate/Board of Management related to consultancy policy | View Document |
| Upload any additional information | View Document |
| Paste URL of the Consultancy policy document | View Document |

***3.5.2 Revenue generated from consultancy during the last five years (INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु संस्थया परामर्शद्वारा अवाप्तं राजस्वं (लक्षशः)***

**Answer:** 14.1

3.5.2.1 ***Total amount generated from consultancy year-wise during the last five years (INR in lakhs).***

विगतेषु पञ्चसु वर्षेषु संस्थया परामर्शद्वारा अवाप्तं राजस्वं संवत्सरक्रमेण (लक्षशः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 0.79932 | 0 | 13.30 | 0 | 0 |

| File Description | Document |
|---|---|

| | |
|---|---|
| List of consultants and revenue generated by them (Institutional data as per Data Template) | View Document |
| Audited statements of accounts indicating the revenue generated through consultancy | View Document |
| Any additional information | View Document |

**3.6 Extension Activities**

***3.6.1 Extension activities in the neighborhood community in terms of impact and sensitising students to social issues and holistic development during the last five years***

***विगतेषु पञ्चसु वर्षेषु छात्रेषु सामाजिकविषये संवेदनशीलताविकासाय, तेषां समग्रविकासाय च प्रातिवेशिकसमुदाये अनुष्ठिताः विस्तारगतिविधयः।***

**Answer:**

**समाजस्य लघुरूपाः सन्ति विश्वविद्यालयस्य परिसराः**। समाजस्य विविधानम् आवश्यकतानां परिपूर्तये समाजे जनजागर्यायाः प्रोन्नयने च विश्वविद्यालयः सर्वदा प्रयतते। छात्रेषु सामाजिकसंवेदनशीलतायाः विकासे तेषां व्यक्तित्वोन्नयनाय च पूरकान् कार्यक्रमान् सर्वोऽपि परिसरः समायोजयति । क्रमशः यथा –

**१. बालचरसङ्घस्य प्रशिक्षणम् -**

बालाः नमनीयाः भवन्ति सदा । अध्ययनदशायाम् एव बालानां समाजोन्मुखीकरणेन ते भाविनि काले सुदृढस्य समाजस्य सुनागरिकाः जायन्ते। सुदृढानां नागरिकाणां निर्माणाय तेभ्यः प्रशिक्षणं देयम् इति मत्वा विश्वविद्यालयेन बालचरसङ्घस्य प्रशिक्षणकार्यक्रमाः नियतरूपेण विशिष्य शिक्षाविभागेन  आयोजिताः। स्कौट एण्ड गैड इत्यस्य माध्यमेन बालानां सामाजिकसंवेदनशीलतायाः विकासः द्रुतगत्या जायते।

**2.संस्कृतसम्भाषणशिबिरम्, वीथीनाटकम् , शोभायात्रा च**

**' ग्रामं ग्रामं गच्छाम संस्कृतशिक्षां यच्छाम '** इति वदन्तो विश्वविद्यालयस्य छात्राः संस्कृतसम्भाषणशिबिराणि सर्वत्र समायोजयन्तः संस्कृतविश्वविद्यालयः समाजेन सह वर्तते पुनः सामाजिकं हितम् अभिलषति इति ख्यापयन्ति। सामाजिकाः अपि सरलसंस्कृतेन भाषितुं सक्षमाः सन्ति। तेष्वपि संस्कृतसाक्षरतायाः सञ्चारः परिदृश्यते। एवम् एव व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य माध्यमेन वीथिनाटकानाम् आयोजनम् अपि विश्वविद्यालयः परिसराणां माध्यमेन सम्पादयति। भ्रष्टाचारनिवारणोपायाः , अनैतिकतायाः वारणम्, पर्यावरणस्य परिरक्षणम् , स्वच्छभारतम् , वरदक्षिणाप्रथायाः उन्मूलनम् इत्यादिषु विषयेषु परिसरच्छात्राः लघुरूपकाणि समाजस्य मध्ये वीथीं विपणिं च प्रविश्य प्रदर्शयन्ति। तथैव पठत संस्कृतम् वदत संस्कृतम्, जयतु भारतम् जयतु संस्कृतम् इत्यादीनि फलकानि गृहीत्वा शोभायात्रामपि स्थानीयेषु परिवेषेषु सम्पादयन्ति। शिक्षाशास्त्रिणां पाठ्यक्रमे एते कार्यक्रमाः विशेषतः वर्तन्ते।

**3. सार्वजनिकयोगप्रशिक्षणकार्यक्रमः**

सर्वेष्वपि परिसरेषु योगप्रशिक्षणं दीयते। अन्ताराष्ट्रिययोगदिवससन्दर्भे तु विशेषरूपेण विशिष्टाः कार्यक्रमाः आयोज्यन्ते यत्र हि सामाजिकसंस्थानां सदस्याः भागं गृह्णन्ति। जयपुरपरिसरस्य योगायुर्वेदविभागेन सार्वजनिकानां कृते 50 सङ्ख्याकानि योगशिबिराणि योगप्रशिक्षणेन सम्बद्धाः विशिष्टाः कार्यक्रमाः च भिन्नभिन्नप्रान्तेषु आयोजिताः सन्ति। नैरन्तर्येण समाजोन्मुखयोगप्रशिक्षणकार्यक्रमान् अस्मात् परिसरविभागात् आयोज्यते ।

**4. रक्तदानशिबिरम्**

रक्तदानेन जीवरक्षा भविष्यति इति परिसरपरिवारः विजानाति। अतः  परिसरेषु रक्तदानशिबिराणि आयोज्यन्ते । सामाजिकसेवासंस्थाः यदा रक्तदानशिबिराणि आयोजयन्ति तदा परिसरस्य छात्राः शिक्षकाः च गत्वा रक्तदानं कुर्वन्ति। एवमेव परिसरेषु अपि रक्तदानस्य शिबिराणाम् आयोजनं भवति। सर्वकारीयवैद्यालयस्य अधिकारिणः वैद्याः च परिसरम् आगत्य रक्तदानाय योग्यान् अभिज्ञाय रक्तसङ्ग्रहकार्यक्रमं सुसम्पादयन्ति।

**5. स्वच्छताभियानम्**

स्वच्छे परिसरे वसतां जनानां स्वास्थ्यं सर्वदा परिरक्षितं भवति। स्वच्छभारतम् इति अभियानं गान्धीमहोदयस्य जयन्तीम् उपलक्ष्य प्रधानमन्त्रिणा सर्वत्र आचरणाय प्रेरणा अपि दत्ता। सर्वोऽपि परिसरः स्वच्छताभियानस्य औपचारिकरूपेण आचरणं करोति। न केवलं परिसरे अपि तु परिसरात् बहिः अपि, मार्गम् उभयतः विपण्यां च छात्राः गत्वा स्वच्छताकार्यक्रमं सम्पादयन्ति। जयपुरपरिसरस्य एन एस.एस. विभागेन प्रतिवर्षं स्वच्छतासप्ताहः, वृक्षारोपणादयः सामाजिकसंवेदनशीलतायाः अभिवर्धकाः कार्यक्रमाः आयोज्यन्ते।

**6.पर्यावरणपरिरक्षणकार्यक्रमः**

परिसरच्छात्राः वायुप्रदूषणस्य जलप्रदूषणस्य ध्वनिप्रदूषणस्य भूप्रदूषणस्य च विषये जनजागर्याम् उत्पादयन्ति। पर्यावरणस्य परिरक्षणाभावे प्राकृतिकदुर्घटनाः अभिवर्धन्ते इति छात्राः जानन्ति। अतः परिसरेषु पर्यावरणपरिरक्षणकार्यक्रमान् औपचारिकरूपेण सङ्घटयन्ति।

**7. वृक्षारोपणम्**

वृक्षाः छायामन्यस्य कुर्वन्ति स्वयमातपे तिष्ठन्ति च । एवं लोकोपकारकत्वं वृक्षेषु वर्तते। अतः वृक्षरक्षा करणीया इति जनजागर्यां सर्वत्र छात्राः समुत्पादयन्ति। वृक्षारोपणेन प्रभूतः प्राणवायुः लभ्यते इति परिज्ञानं सर्वेषु परिसरेषु छात्राः विजानन्ति। अतः एतत्सम्बद्धानि कार्याणि ते सुष्ठु सम्पादितयन्ति ।

**8. ग्रामपालकत्वोपक्रमः**

संस्कृतग्रामस्य परिकल्पना विश्वविद्यालयस्य वर्तते एव। एतदनु परिसराः ग्रामान् एव दत्तकरूपेण स्वीकृत्य तत्र संस्कृतमयं संस्कारपूर्णं च वातावरणं निर्मातुं प्रयतन्ते । वेदव्यासपरिसरीयाः एतद्विषये अग्रेसराः सन्ति। एवं भोपालपरिसरेण अपि ग्रामाः दत्तकरूपेण स्वीकृताः सन्ति।

**9.मठमन्दिरसंस्थानां कार्यक्रमेषु सहयोगः**

विश्वविद्यालयस्य अधिकाधिकाः परिसराः पुण्यक्षेत्रेषु महानगरेषु च सन्ति। अतः धार्मिककार्यक्रमाः अन्नदानादिकं जलपानव्यवस्था इत्यादिकं तत्र तत्र सार्वजनिकानां कृते आयोजयन्ति । एतादृशेषु सन्दर्भेषु परिसरच्छात्राः अपि तासां संस्थानां कार्यक्रमेषु साहाय्यं कुर्वन्ति। तात्कालिकरूपेण सेवामनोभावनया च कार्यं कर्तुम् अस्माकं परिसरीयाः छात्राः सार्वजनिकानां विश्वासभूमिरूपाः सन्ति।

**10.स्वास्थ्यसंवर्धनकार्यक्रमाः**

विश्वविद्यालये योगायुर्वेदविभागः वर्तते जयपुरपरिसरे । अनेन विभागेन स्वास्थ्यसंवर्धनकार्यक्रमाः अपि असकृत् आयोज्यन्ते । आयुर्वेदे शास्त्रे उपवर्णितायाः मात्रायाः अनुगुणं च्यवनप्राशनादीनां निर्माणविज्ञानं प्रायोगिकरूपेण सर्वेषां पुरतः पाठयन्ति शिक्षकाः। एवं प्रशिक्षिताः छात्राः समाजं गत्वा अस्य अनुप्रयोगं कुर्वन्ति। एवं समाजस्य स्वास्थ्यसंवर्धनाय विश्वविद्यालयः प्रयतते। विश्वविद्यालयेन गान्धीजयन्ती, मातृभाषादिवसः, प्रादेशिकभाषादिवसः, कालिदाससमारोहः , शिक्षकदिनम् इत्यादयः कार्यक्रमाः असकृत् आयोज्यन्ते।

एते सर्वेऽपि कार्यक्रमाः समाजेन सह विश्वविद्यालयं संयोजयति। सामाजिकसंवेदनशीलतां जागरयति च।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Upload any additional information | View Document |

| | |
|---|---|
| Provide link for additional information | View Document |

***3.6.2 Number of awards and recognition received for extension activities from Government/recognised bodies during the last five years***

***विस्तारगतिविधीनां कृते सर्वकारात्/ मान्यताप्राप्तनिकायेभ्यः विगतेषु पञ्चसु वर्षेषु प्राप्ताः पुरस्काराः/ सम्मानानि***

**Answer:** 3

3.6.2.1 Total number of awards and recognition received for extension activities from Government/recognised bodies year-wise during the last five years

विस्तारगतिविधीनां कृते सर्वकारात्/ मान्यताप्राप्तनिकायेभ्यः विगतेषु पञ्चसु वर्षेषु प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकः योगः।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 2 | 0 | 0 | 1 | 0 |

| File Description | Document |
|---|---|
| Number of awards for extension activities in last 5 year | View Document |
| Institutional data as per Data Template | View Document |
| E-copy of the award letters | View Document |

***3.6.3 Number of extension and outreach Programmes conducted by the institution including those through NSS/ NCC/ Government and Government recognized bodies during the last five years***

***विगतेषु पञ्चसु वर्षेषु राष्ट्रियसेवायोजनायाः/ राष्ट्रियसैनिकच्छात्रसमूहस्य/ सर्वकारीयसंस्थानां सर्वकारैः मानितनिकायानां च साहाय्येन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणां च सङ्ख्या।***

**Answer:** 105

3.6.3.1 Number of extension and outreach Programmes conducted by the institution including those through NSS/ NCC/ Government and Government recognized bodies year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु राष्ट्रियसेवायोजनायाः/ राष्ट्रियसैनिकच्छात्रसमूहस्य/ सर्वकारीयसंस्थानां सर्वकारैः मानितनिकायानां च साहाय्येन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणां च वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 35 | 17 | 11 | 15 | 27 |

| File Description | Document |
|---|---|
| Reports of the event organized | View Document |
| Number of extension and outreach Programmes conducted | View Document |

| | |
|---|---|
| for the last five years (Institutional data as per Data Template) | |
| Any additional information | View Document |

***3.6.4 Percentage of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/Shibiras/Yoga camps etc. during the last five years.***

***विगतेषु पञ्चसु वर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः प्रतिशतं मानम्।***

**Answer:** 80.66

3.6.4.1 Total number of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/Shibiras/Yoga camps etc. year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 5607 | 2072 | 4972 | 3734 | 4722 |

| File Description | Document |
|---|---|
| Report of the event | View Document |
| Average percentage of students participating in extension activities with Govt. or NGO etc (Institutional data as per Data Template) | View Document |
| Any additional information | View Document |

***3.6.5 The Institution gives attention to make Sanskrit and Shastra learning popular in the surrounding areas by offering evening courses Provide details***

***संस्था प्रतिवेशिक्षेत्रेषु संस्कृतस्य शास्त्राणाञ्च लोकप्रियतासम्पादनाय सान्ध्यपाठ्यक्रमान् प्रस्तौति? यद्येवम्, तर्हि विवरणं देयम्।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः प्रतिवेशिक्षेत्रेषु संस्कृतस्य शास्त्राणाञ्च लोकप्रियतासम्पादनाय सान्ध्यपाठ्यक्रमान् नियतरूपेण निर्वर्तयति ।सान्ध्यपाठ्यक्रमे न केवलं सामाजिकाः अपि तु परिसरच्छात्राः अपि भागं गृह्णन्ति। अतः उभे च काले विविधाः पाठ्यक्रमाः प्रवर्तन्ते। क्रमशः यथा -

**1. एकवर्षीयः वास्तु डिप्लोमा कार्यक्रमः / वास्तुज्यौतिषपरिचयपरः पाठ्यक्रमः**

अयम् एकः शास्त्राणां लोकप्रियतायाः सम्पादनपरः पाठ्यक्रमः वर्तते। अस्य पाठ्यक्रमस्य सञ्चालनं शृङ्गगिरिस्थेन राजीवगान्धीपरिसरेण भोपालपरिसरेण च सम्पाद्यते। जयपुरपरिसरस्य अपि वास्तुज्यौतिषपरिचयपरः पाठ्यक्रमः

सन्ध्याकाले सञ्चाल्यते। प्रत्यक्षं ज्यौतिषं शास्त्रम् इत्यतः सहजतया सामाजिकाः ज्योतिश्शास्त्रम् अध्येतुम् आयान्ति। कालविधानशास्त्रस्य अस्य एकवर्षीयः पाठ्यक्रमः आकर्षकः वर्तते।

अस्मिन् पाठ्यक्रमे पञ्चपत्राणि सन्ति। क्रमशः यथा -

**१. प्रथमपत्रम् -** अस्मिन् पत्रे प्रथमदीक्षायाः द्वितीयदीक्षायाः च पाठ्यपुस्तकानि सन्ति। सामाजिकाः संस्कृतभाषायां दक्षाः सन्तः शास्त्राणि अधिगच्छेयुः इति उद्देश्येन इदं पत्रं कल्पितमस्ति। प्रथमदीक्षायाः उद्देश्यानि सन्ति यत् छात्राः सामाजिकाश्च दैनन्दिनव्यवहारोपयोगिसंस्कृते भाषणस्य लेखनस्य पठनस्य च प्रारम्भिकक्षमतायाः विकासं सम्पादयेयुः इति। द्वितीयदीक्षायाः उद्देश्यम् अस्ति यत् व्यावहारिकदृष्ट्या महत्त्वपूर्णानां समेषां भावानां संस्कृते अभिव्यक्तिक्षमतायाः विकासकरणम्।

**२. द्वितीयं पत्रम्** - अस्मिन् पत्रे तिथि-वार-नक्षत्र- करण - योग इति पञ्चाङ्गानां परिचयात्मकः पाठ्यः वर्तते। अनेन सह जन्मपत्रदीपकः इति अपरः पाठ्यः वर्तते। कुण्डलीनिर्माणविज्ञानम् अधिगन्तुम् एषः उपकारकः वर्तते।

**३. तृतीयपत्रम् -** तृतीये पत्रे वास्तुरत्नावली इति ग्रन्थः वर्तते। भूपरिचयः , प्रशस्ता भूमि , भवननिर्माणे वास्तुशास्त्रदृष्ट्या अवधेयांशाः, द्वारविचारः, पाकशालाविचारः, शयनकक्षास्थानानि, शौचालयनिर्माणम् इत्यादिषु विषयेषु वास्तुसम्मतानि मतानि अत्र लिपिबद्धानि सन्ति।

**४. चतुर्थपत्रम्** - अस्मिन् पत्रे मुहूर्तचिन्तामणिः इति ग्रन्थः वर्तते। सुखदुःखकरं कर्म शुभाशुभमुहूर्त्तजम् इत्युक्तिः प्रसिद्धा एव । शुभस्य कार्यस्य सम्पादनाय विद्यमानः प्रशस्तः मुहूर्तः कः ? अप्रशस्तश्च कः ? इति अत्र विचार्यते। अस्य शास्त्रस्य षडङ्गेषु मुहूर्तस्यापि गणना वर्तते। यथोक्तं प्रश्नमार्गे -

**जातकगोलनिमित्तप्रश्न-**

**मुहूर्त्ताख्यगणितनामानि ।**

**अभिदधतीह षडङ्गानि**

**आचार्या ज्योतिषे महाशास्त्रे ॥**

**५. पञ्चमपत्रम्** - अस्मिन् पत्रे लीलावती, रेखागणितम् , साम्प्रतिकं वास्तुशास्त्राध्ययनम् इति त्रयः पठ्याः विद्यन्ते। लीलावती भास्कराचार्यप्रणीतः विशिष्टः गणितीयग्रन्थः वर्तते यत्र प्रत्येकं गणितीयविषयं प्रतिपाद्य लीलावतीम् उद्दिश्य अन्ते ज्ञातांशस्य दृढीकरणाय प्रश्नाः क्रियन्ते। यथा -

**अये बाले लीलावति मतिमति ब्रूहि सहितान्**

**द्विपञ्चद्वात्रिंशत्त्रिनवतिशताष्टादश दश।**

**शतोपेतानेतानयुतवियुतांश्चापि वद मे**

**यदि व्यक्ते युक्तिव्यवकलनमार्गेऽसि कुशला ॥** (लीलावती,परिकर्माष्टकम् -१३)।

एवम् एकवर्षीयस्य वास्तु डिप्लोमा कार्यक्रमस्य पाठ्यक्रमाः लोकप्रियाः सन्ति इति स्पष्टम्।

जयपुरपरिसरे चातुर्मासिकः प्रमाणपत्रोपेतः वास्तुज्यौतिषयोः पाठ्यक्रमः पार्थक्येन सन्ध्याकाले च सम्पाद्यते । द्वयोः शास्त्रयोः इतिहासः , परिचयः , उद्भवः , विकासः , मुख्याः प्रतिपाद्यविषयाः पार्थक्येन पाठ्यन्ते । ज्यौतिषे - पञ्चाङ्गपरिचयः , ग्रहस्पष्टीकरणम् , राशिपरिचयः , ग्रहमैत्री , लग्नसाधनविधिः , दशाभुक्तिविचारः , अरिष्टविचारः , मुहूर्तविचारः , अष्टकूटानां गुणपरिचयः , योगाः , प्रश्नकुण्डली विचारः इत्यादयः सन्ति।

वास्तुशास्त्रीये पाठ्यक्रमे वास्तुभेदाः , भूखण्डविचारः , वेधविचारः , भवननिर्माणम् , द्वारविचारः , वास्तुसम्मतं प्रतिमानम् , असम्मतं प्रतिमानम् इत्यादयः विषयाः सन्ति।

**2.सन्ध्याकालिकम् अनौपचारिकसंस्कृतशिक्षणम्**

विश्वविद्यालयस्य अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि अनुस्यूततया विभिन्नेषु परिसरेषु दीक्षापाठ्यक्रमान् सन्ध्याकाले सञ्चालयन्ति। अनेन छात्राः नागरिकाः च लाभान्विताः भवन्ति। दीक्षापाठ्यक्रमस्य पञ्च सोपानानि सन्ति। क्रमशः यथा -

**१. प्रथमं सोपानम् -** प्रथमदीक्षायाः उद्देश्यानि सन्ति यत् छात्राः सामाजिकाश्च दैनन्दिनव्यवहारोपयोगिसंस्कृते भाषणस्य

लेखनस्य पठनस्य च प्रारम्भिकक्षमतायाः  विकासं सुष्ठु सम्पादयेयुः इति।

**२. द्वितीयं सोपानम् -** अस्मिन् सोपाने अभिव्यक्तिक्षमतायाः उपरि ध्यानं दीयते। द्वितीयदीक्षायाः उद्देश्यम् अस्ति यत् व्यावहारिकदृष्ट्या महत्त्वपूर्णानां समेषां भावानां संस्कृते अभिव्यक्तिक्षमतायाः विकाससम्पादनम् ।

**३. तृतीयं सोपानम्** - अत्र अध्येतुः भाषायाः परिष्करार्थं तथा संस्कृतस्य सरलकाव्यानाम् अवबोधनसम्पादनार्थं च  यत्नः विधीयते।

**४. चतुर्थं सोपानम् -** अत्र अध्येता उच्चस्तरीयेन संस्कृतभाषायाः शिक्षणेन सह काव्यस्य अध्ययनं कर्तुं शक्नोति।

**५.पञ्चमं सोपानम् -** अत्र अध्येता भाषाप्रयोगकौशलेन सह काव्यस्य अध्ययनं विदधाति।

**संस्कृतसम्भाषणशिबिराणि**

एतैः सह संस्कृतसम्भाषणशिबिराणि अपि चाल्यन्ते यत्र छात्राणाम् एव न अपि तु सामाजिकानाम् अपि भागग्रहणं सञ्जायते। सामाजिकानां संस्कृतस्य अध्ययनोन्मुखतायाः सम्पादनम् अपि अत्र सम्पाद्यते। एवं विश्वविद्यालयस्य समाजोन्मुखकार्येषु एतानि पूर्वोक्तानि अपि अन्तर्भवन्ति।

| File Description | Document |
|---|---|
| Any additional information | View Document |

***3.6.6 Teachers participate in the live commentaries / lectures / discussion  programmes/on the print and electronic media. Provide details.***

***वार्त्तापत्रेषु ई-गणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय/ धाराविवरणप्रसारणाय/ परिसंवादकार्यक्रमाय शिक्षका भागग्राहिणो भवन्ति, विवरणानि देयानि।***

**Answer:**

वार्तापत्रेषु वैद्युतिकगणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय धाराविवरणप्रदानाय परिसंवादकार्यक्रमाय च केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नपरिसरीयाः शिक्षकाः मुख्यालयीयाधिकारिणः प्रशासकाश्च असकृत् भागं गृह्णन्ति। विश्वविद्यालयस्य केचन परिसराः पुण्यक्षेत्रेषु पुराणेतिहासप्रसिद्धेषु च प्रान्तेषु च सन्ति। अतः एतादृशक्षेत्रेषु कार्यक्रमाः अपि प्रचुरमात्रेण आयोज्यन्ते । तत्र अस्माकं परिसरीयाः प्राध्यापकाः प्रस्तुतीकर्तुं परिचर्चां कर्तुं च गच्छन्ति। प्रादेशिकासु वार्तापत्रिकासु अपि अस्माकं शिक्षकाणां सक्रियभागग्रहणं वर्तते एव। विशिष्य दूरदर्शनादिषु सर्वकारीयेषु माध्यमेषु सक्रियसंवादकार्यक्रमेषु शिक्षकाणां भूमिकाम् अधिकृत्य अत्र क्रमशः प्रस्तुतीक्रियते ।

1. भारतस्य साम्प्रतिकानां प्रधानमन्त्रिणां श्रीनरेन्द्र मोदि महाभागानां विशिष्टानि भाषणानि परिसंवादकार्यक्रमाः चर्चासत्राणि साक्षात्कारादयश्च  प्रसारभारत्या आकाशवाण्यां दूरदर्शने च प्रसार्यन्ते। परम् अस्य अनुवादः प्रादेशिकभाषासु अपि जायते

चेत् तर्हि ग्रामीणाः अपि सुखेन अवगन्तुं शक्नुवन्ति इति मत्वा प्रादेशिकभाषासु अनूद्य तेषां कार्यक्रमाणां प्रसारः क्रियते। तत्र जम्मूपरिसरीयाः आङ्ग्लभाषायाः वरिष्ठाचार्याः **श्री शरच्चन्द्रशर्ममहोदयाः डोग्रि भाषायाम् प्रधानमन्त्रिणः भाषणानि चर्चादिकं अनुवदन्ति** । एतादृशाः अनूदिताः कार्यक्रमाः ' चाय पे चर्चा ' मन की बात ' 'गरीब कल्याण के आठ साल ' इत्यादयः प्रसारभारतीपक्षतः प्रसार्यन्ते। गणराज्योत्सवे राष्ट्रम् उद्दिश्य राष्ट्रपतिना कृतस्य भाषणस्य अपि डोग्रि भाषायां लेखनम् अनुवादकथनम् इत्यादिकम् एतैः सम्पादितम् ।

2. **डा.शीबा एम.के.** वर्या गुरुवायूरुपरिसरे अध्यापिका वर्तते। इयं महोदया **आकाशवाण्याः** सक्रियसंवादेषु भागं गृह्णाति। आकाशवाण्याम् आङ्ग्लभाषायां स्त्रीपरव्याख्यानम् अकरोत् । 18/05/2017 तमे वर्षे अस्य प्रसारः जातः वर्तते। वेदान्तविभागीया डा. गायत्री देवी महोदया अपि वेदान्तशास्त्रीयं व्याख्यानम् आकाशवाण्याम् अकरोत्।

3. जयपुरपरिसरस्य सहायकाचार्यः **डा. कुलदीपशर्मवर्यः** 14/08/2018 तमे संवत्सरे प्रवृत्ते **दूरदर्शनस्य राजस्थानीयमाध्यमे संस्कृतवाङ्मये राष्ट्रभक्तिः** इति परिसंवादपरे कार्यक्रमे भागं गृहीत्वा वेदेषु उपनिषत्सु पुराणेषु काव्येषु नाटकेषु च निबद्धान् विचारान् सप्रमाणं सोदाहरणं च न्यरूपयत्। वयं राष्ट्रे जागृयाम इत्यादीन् वेदमन्त्रान् अपि सप्रसङ्गम् उदाहरत् ।

4. केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतीनाम् आचार्याणां श्रीनिवासवरखेडिवर्याणां दूरदर्शने अन्येषु सक्रियसामाजिकमाध्यमेषु साक्षात्कार - संवाद- परिचर्चादिकं च नियतरूपेण प्रसारितं वर्तते। **उत्कर्षमहोत्सवस्य प्रसारः बहुषु दूरदर्शनमाध्यमेषु सुसम्पन्नः** । अस्मिन् महोत्सवे कुलाधिपतयः विभिन्नानां विश्वविद्यालयानां कुलपतयः शिक्षामन्त्रालयाधिकारिणः शिक्षकाः छात्राः च भागम् अगृह्णन् । एतत् सर्वं समग्रे भारते प्रसारितम् अस्ति। अस्य महोत्सवस्य प्रसारः तत्काले परिसरेषु अपि सम्पादितः वर्तते।एतद्विषयकं चर्चादिकं स्थानीयेषु दूरदर्शनेषु राष्ट्रियपत्रिकासु च सम्पन्नम् अस्ति। संस्कृतभाषायाः विश्वतोमुखत्वम् इति विषयकराष्ट्रियसङ्गोष्ठी अपि अस्मिन् सन्दर्भे संवृत्ता। अस्याः अपि प्रसारः दूरदर्शनेषु सम्पादितः वर्तते।

5. पुरीस्थाः सप्त सङ्ख्याकाः सदाशिवपरिसरस्य प्राध्यापकाः **जगन्नाथस्य रथयात्रायाः विवरणं 2020-21 तमे संवत्सरे रथोत्सवसमये दूरदर्शनेषु च समपादयन्** । तत्रत्यः डा. गणेश्वर प्रसाद मिश्रवर्यः **' दैनिक भास्कर '** इत्यस्यां पत्रिकायाम् असकृत् सामयिकं धार्मिकाध्यात्मिकविचारान् आश्रित्य ज्यौतिषशास्त्रीयदृशा च लिखन्ति।

6. भोपालपरिसरीयाः 2016 तमे संवत्सरे प्रवृत्तायाः **सिंहस्थकुम्भमेलायाः** चर्चासत्रे भागम् अगृह्णन् । एषः परिचर्चासम्बद्धः कार्यक्रमः मध्यप्रदेशस्य सर्वकारेण समायोजितः आसीत्।

7.**डा.शैलेन्द्र उनियाल वर्यः** 2021 तमे संवत्सरे **दूरदर्शनेन** आयोजिते आस्था का प्रतीक कुम्भ इति परिसंवादपरे कार्यक्रमे महाकुम्भस्य विषये संवादम् अकुर्वन्। एते उत्तराखण्डराज्यस्य रघुनाथकीर्तिपरिसरे वेदविभागस्य विभागाध्यक्षाः सन्ति।

8. रघुनाथकीर्तिपरिसरस्य निदेशकानां आचार्याणां **बनमाली बिश्वालवर्याणां साक्षात्कारः डा. अनिलकुमारमहोदयेन** 2021 तमे संवत्सरे सम्पादितः। एषः **सारस्वतः संवादः** इति कार्यक्रमः रघुनाथवार्तावल्यां प्रकाशितः वर्तते। अत्र तेषां व्यक्तित्वस्य विद्याध्ययनपरम्परायाः शैक्षिकदृष्टेः प्राशासनिकदृष्टेः च विषये प्रश्नोत्तररूपेण सम्पन्नः संवादः उल्लिखितः वर्तते।

9. भोपालपरिसरीयाः प्राध्यापकाः **क्रिकेट क्रीडाकूटस्य आयोजनावसरे क्रीडाम् अपि संस्कृतेन व्याख्यान्ति**। अस्य प्रसारः **दूरदर्शनेषु पत्रिकासु च सञ्जातः** वर्तते।

10. जयपुरपरिसरस्य आचार्याः **सुदेशकुमारशर्मावर्याः** 04/04/22 तमे दिनाङ्के दूरदर्शनं राजस्थानम् इत्यत्र **'भारतीय नववर्ष के वैज्ञानिक महत्व'** इति विषये प्रवृत्ते संवादकार्यक्रमे भागम् अगृह्णन् । ते पाश्चात्यानां पौरस्त्यानां संवत्सरस्य परिगणनायां कालगणनायां च परिदृश्यमानं साम्यं वैषम्यं च अधिकृत्य सविस्तरम् अब्रुवन्।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |

**3.7 Collaboration**

***3.7.1 Institution's collaboration with other agencies impacted the visibility, identity and diversity of activities on campus? To what extent has the Institution benefitted academically and financially because of collaborations? The nature of the skill development Programmes introduced for students initiated by the Institution in collaboration with professional bodies.***

***संस्थायाः इतरसंस्थाभिः सह संयुक्तोपक्रमः परिसरस्य परिदृश्यं, परिचयं, विविधक्रियाकलापांश्च प्रभावयति? संयुक्तोपक्रमद्वारा संस्था कियता परिमाणेन शैक्षिकदिशा आर्थिकदिशा च लाभान्वितो भवति? अन्यासां वृत्तिप्रदातृसंस्थानां सहयोगेन छात्राणां कौशलविकासाय संस्थया समारब्धानां कार्यक्रमाणां विवरणम्।***

**Answer:**

**'यत्साधितं गुरुतरैर्विविधैः प्रयत्नैः तद् रोचते हि परमं पुरुषस्य लक्ष्यम्'** इति सूक्तं सूक्तिमुक्तावल्याम् । एतदनुव केन्द्रीयसंस्कृतविश्वविद्यालयः इतरसंस्थाभिः सह शैक्षिकक्रियाकलापेषु संस्कृतसंवर्धनकार्यक्रमेषु च औपचारिकरूपेण अनुबन्धं संस्थापयति। **केन्द्रसर्वकारस्य केन्द्रकाभिकरणम् ( Nodal Agency)** इति अयं विश्वविद्यालयः अनुमतः वर्तते। अतः इतराभिः सर्वकारीयाभिः नैजाभिः च संस्कृतशिक्षासंस्थाभिः सह संयुक्तोपक्रमान् समारभते । क्रमशः यथा -

1. विश्वविद्यालयः नवदेहलीस्थेन संस्कृतसंवर्धनप्रतिष्ठानेन क्रियमाणेषु शिक्षणानुसन्धानकार्येषु सहयोगं करोति। **संस्कृतसंवर्धनप्रतिष्ठानेन** हैदराबाद् नगरे 18/08/2018 तः 19/08/2018 पर्यन्तं समायोजितायां संस्कृते अनुप्रयोगात्मकानुसन्धानस्य प्रोन्नयनम् इत्यस्यां कार्यशालायां विश्वविद्यालयस्य विभिन्नपरिसरीयाः त्रयोदशः शिक्षकाः भागम् अगृह्णन् । ते च यथा -

१. सोमय्यापरिसरः , मुंबई- तः **डा. नारायणन् इ. आर् तथा डा. देवदत्त सरोदे** इति द्वौ सहयोगं दत्तवन्तौ ।

२. शृङ्गगिरिस्थात् राजीवगान्धीपरिसरात् **डा.वेङ्कटेशमूर्तिः तथा डा.गणेशपण्डितः** इत्येतौ भागः गृहीतवन्तौ ।

३. भोपालपरिसरात् **डा.पवनकुमारः तथा डा.सोमनाथसाहु** इत्येतौ भागं गृहीतवन्तौ।

४.जयपुरपरिसरात् **डा.पवनव्यासः** भागम् अगृह्णत् ।

५. पुरीपरिसरात् **डा. पद्ममित्रम्** बि पि एम् वर्यः भागं गृहीतवान् ।

६.देवप्रयागात् **डा. मुकेशशर्मा महोदयः** एकलव्यपरिसरात् **डा. जितेन्द्र कुमार रायगुरु** महोदयः च भागं गृहीतवान् ।

७. वेदव्यासपरिसरात् **डा.सीतारामशर्मावर्यः** , जम्मूपरिसरात् **डा. दयानाथवर्यश्च** भागं गृहीतवान् ।

८. गङ्गानाथझा परिसरस्य **आचार्यः ललितकुमारत्रिपाठिवर्यः** अपि असकृत् IIIT हैदराबाद् इत्यस्य भाषाप्रौद्योगिककेन्द्रं प्रति भाषायाः वैज्ञानिकविश्लेषणकार्ये भागं गृह्णाति। अत्र कार्यशालायम् अपि भागम् अगृह्णत्।

**संस्कृतसंवर्धनप्रतिष्ठानमिदं** सर्वेभ्यः भागग्राहिभ्यः आवासस्य भोजनस्य गमनागमनव्ययस्य च व्यवस्थाम् अकल्पयत् । पाणिनेः व्याकरणस्य भाषिकविश्लेषणे संस्कृतविश्वविद्यालयानां भूमिकां योगदानं च अधिकृत्य चर्चा समजनि। शिक्षणाधिगमेन सम्बद्धानां पाठ्यक्रमानुरूपाणां मनोवैज्ञानिकानां च साधनानां विनिर्माणे प्रतिष्ठानमिदं तत्परम् अस्ति। केन्द्रसर्वकारस्य विविधानां विभागानां पक्षतः अनुदानं प्राप्य संस्कृतभाषायाः संवर्धनाय इदं प्रतिष्ठानं तत्परम् अस्ति। विश्वविद्यालयः अपि संस्कृतभाषायाः सर्वाङ्गीणविकासाय प्रवृत्तः वर्तते इत्यतः सहयोगिसंस्थारूपेण प्रतिष्ठानं परिगणयति । लक्ष्यकेन्द्रिताय शिक्षार्थिनां समूहाय अपेक्षितस्य पाठ्यक्रमस्य विकासे प्रतिष्ठानमिदं तत्परम् अस्ति। अतः एतस्य पाठ्यक्रमनिर्माणे अपि विश्वविद्यालयस्य शिक्षकाः अनौपचारिकरूपेण सहयोगं यच्छन्ति। कौशलकेन्द्रितस्य

शिक्षकप्रशिक्षणकार्यक्रमस्य संस्कृतेन सञ्चालनाय केन्द्रम् इदम् उद्युक्तम् अस्ति। अतः आवश्यकतायां सत्यां विश्वविद्यालयः सहयोगं प्रयच्छति। अनुप्रयुक्ते पाणिनीये व्याकरणे शोधसम्भावनाः इति विषयम् अवलम्ब्य प्रतिष्ठानेन सङ्घटितायां कार्यशालायां विश्वविद्यालयस्य शिक्षकाः भागं गृहीतवन्तः। 2018 तः आरभ्य सहयोगस्य प्राप्तिः वर्तते। अस्य अवधिः पूर्वनिर्धारितः नास्ति।

2. केन्द्रीयसंस्कृतविश्वविद्यालयः तिरुपतिस्थाय राष्ट्रियसंस्कृतविश्वविद्यालयाय शास्त्रार्थप्रशिक्षणप्रदानाय आर्थिकं सहयोगं ददाति। ग्रीष्मकालिकवर्गः तस्मात् विश्वविद्यालयात् समयोजितः यत्र अस्माकं विभिन्नाः परिसरीयाः छात्राः गत्वा प्रशिक्षणम् अवाप्नुवन् । एवं परिसरीयाः शिक्षकाः अपि प्रशिक्षकत्वेन तत्र समाहूताः । केन्द्रसर्वकारः विश्वविद्यालयस्य विभिन्नानां योजनानां माध्यमेन इतराभ्यः संस्थाभ्यः धनसाहाय्यं करोति यस्य च लाभः न केवलं प्राप्तसंस्थायै एव अपि तु विश्वविद्यालयस्य शिक्षकेभ्यः छात्रेभ्यः च परम्परया उपलभ्यते । संस्कृतोन्नयनपरेषु कार्यक्रमेषु सर्वेषु विश्वविद्यालयस्य सहयोगः भवति।

3. विश्वविद्यालयस्य परिसरेषु सम्भाषणशिबिराणि प्रशिक्षणवर्गाः भाषाप्रबोधनकार्यशालाः महाविद्यालयच्छात्रप्रशिक्षणवर्गाश्च आयोज्यन्ते। अस्मिन् सन्दर्भे संस्कृतभारती इत्यस्याः संस्थायाः सहयोगः सर्वदा भवति। संस्कृतभारत्याः सहयोगेन अस्माकं परिसरच्छात्राः सम्भाषणशिबिराणि सञ्चालयितुं प्रशिक्षताः सन्तः विभिन्नेषु स्थानेषु गत्वा संस्कृतस्य प्रचारपराणि सरलानि संस्कृतसम्भाषणशिबिराणि सञ्चालयन्ति।

4. केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः -2020 इत्यस्य क्रियान्वयनात् परं त्रयः केन्द्रीयाः विश्वविद्यालयाः स्तरवृद्धिम् अवाप्नुवन् । नवदेहलीस्थः केन्द्रीयसंस्कृतविश्वविद्यालयः तथा लाल बहादूरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालयः , तिरुपतिस्थः राष्ट्रियसंस्कृतविश्वविद्यालयः इत्येते त्रयः अपि सम्भूय प्रतिवर्षम् उत्कर्षमहोत्सवं पर्यायक्रमेण आचरन्ति। त्रिभिः केन्द्रीयैः संस्कृतविश्वविद्यालयैः संस्कृतक्षेत्रस्य विकासाय सम्भूय प्रयासः विधीयते। पारस्परिकसहयोगेन संस्कृतकार्यसम्पादनाय एतैः त्रिभिः यत्नः समारब्धः वर्तते।

5.पुरीस्थः सदाशिवपरिसरः 14/04/2018 तमे दिनाङ्के तथा 25/07/2019 तमे दिनाङ्के च रेभेन्सा इत्यस्य विश्वविद्यालयस्य स्नातकस्तरस्य स्नातकोत्तरस्तरस्य च पाठ्यक्रमैः सह विश्वविद्यालयस्य पाठ्यक्रमस्य तौलनिकम् अध्ययनम् अकरोत्। एवमेव 10/12/2020 तमे दिनाङ्के उभाभ्यां विद्यावारिधेः पाठ्यक्रमस्य समीक्षा सम्भूय सम्पादिता। एवमेव **22/01/22 तमे दिनाङ्के समर्पण** इत्यस्याः समाजसेवासंस्थायाः सहयोगेन सदाशिवे परिसरे रक्तदानशिबिरम् आयोजितम्। एतादृशकार्यक्रमेषु समाजहितसंसाधकेषु गतिविधिषु च विश्वविद्यालयस्य परिसराः सहयोगपूर्णाः एव भवन्ति।

6. तिरुपतिस्थेन राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रतिवर्षं प्रातिभसमारोहः आयोज्यते। एतस्य अङ्गतया छात्रेभ्यः विविधाः शैक्षिकाः सांस्कृतिकाः क्रीडापराः च प्रतियोगिताः आयोज्यन्ते। अस्य समारोहस्य सम्पादने विश्वविद्यालयस्य परिपूर्णः सहयोगः वर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Provide link for additional information | View Document |

***3.7.2 Number of functional MoUs with institutions of national, international importance, other universities, industries, corporate houses etc. during the last five years (only functional MoUs with ongoing activities to be considered)***

***विगतेषु पञ्चसु वर्षेषु राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च सह कृतानाम् आर्थिकानुबन्धानां सङ्ख्या (केवलं प्रवर्तमानगतिविधीनामेव आर्थिकानुबन्धसहयोगपत्राणि स्वीकरणीयानि)***

**Answer:** 11

| File Description | Document |
|---|---|
| e-copies of the MoUs with institution/ industry/ corporate house | View Document |
| Details of functional MoUs with institutions of national, international importance, other universities etc. during the last five years (Institutional data as per Data Template) | View Document |

***3.7.3 Provide details of the Joint publication Programme of the Institution in collaboration with other Universities/institutes and well established publishing firms***

***संस्थायाः अन्यविश्वविद्यालयैः/ लब्धप्रतिष्ठप्रकाशनसंस्थाभिः सह संयुक्तप्रकाशनकार्यक्रमस्य विवरणं प्रदीयताम्***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य विशिष्टायाम् अष्टादशी इत्यस्यां योजनायां प्राचीनदुर्लभसंस्कृतग्रन्थानां प्रकाशनाय विभिन्नेभ्यः विश्वविद्यालयेभ्यः लब्धप्रतिष्ठप्रकाशनसंस्थाभ्यः आर्थिकं योगदानं दातुम् अवसरः प्रकल्पितः वर्तते। एतदनु बहवो हि ग्रन्थाः प्रकाशिताः।

क्रमशः यथा -

1.हैदराबादस्थ - उस्मानियाविश्वविद्यालयस्य संस्कृत अकाडमी इत्यनेन विश्वविद्यालयस्य **विरलग्रन्थपुनर्मुद्रणकार्यक्रमान्तर्गतत्वेन 2019 तमे वर्षे रामकृष्णयुधिष्ठिरचरितचम्पू** इतीदं विशिष्टं चम्पूकाव्यं प्रकाशितम् अस्ति। उस्मानियाविश्वविद्यालयस्य कुलसचिवः आचार्यः गोपालरेड्डिवर्यः अस्य प्रकाशकः वर्तते। संस्कृत-अकाडमी इत्यस्य प्रभारी निदेशकः असौ प्राक्तनस्य राष्ट्रियसंस्कृतसंस्थानस्य आर्थिकं सहयोगम् अवाप्य एनं ग्रन्थम् एकवर्षस्य अवधावेव प्राकाशयत्।

2.संस्कृत-अकाडमी इत्यस्य षष्ठ्यब्दग्रन्थमालायाः षष्ठं कुसुमम् **आन्ध्रकाव्यकथाः नाम्ना 2020 तमे संवत्सरे प्रकाशितम्** । संस्कृत-अकाडमी इत्येषा केन्द्रीयसंस्कृतविश्वविद्यालयस्य मानिता शोधसंस्था वर्तते। शिरोमणिना सन्निधानं सूर्यनारायणशास्त्रिणा विरचितस्य एतस्य विशिष्टस्य कथाग्रन्थस्य प्रकाशनं उस्मानियाविश्वविद्यालयस्य संस्कृत-अकाडमी इत्यनया कृतम् । अस्याः निर्देशकः आचार्यः के. नीलकण्ठम् वर्यः विश्वविद्यालयस्य आर्थिकं सहयोगं सम्प्राप्य वर्षत्रये (2018-2020) एनं ग्रन्थं सम्पादितवान्। **अशीतिसहस्रोत्तरदशलक्षरूप्यकाणि** (10,80,000 ) एकसहस्रपुटात्मकस्य तेलगुलिप्यां विद्यमानस्य ग्रन्थस्य प्रकाशनाय प्रदत्तः ।

3. **2021 तमे संवत्सरे श्रीराघवयादवीयम् इति अनुलोम - विलोमकाव्यम्** एकं विश्वविद्यालयस्य आर्थिकं सहयोगं सम्प्राप्य उस्मानियाविश्वविद्यालयस्य संस्कृत-अकाडमी इत्यनया वर्षद्वये (2020- 2021) एषः ग्रन्थः सम्पादितः। संस्कृत-अकाडमी इत्यस्याः निर्देशकः आचार्यः के. नीलकण्ठम् वर्यः विश्वविद्यालयस्य आर्थिकं सहयोगं सम्प्राप्य एनं प्राकाशयत् । विश्वविद्यालयः ग्रन्थस्य सम्पादनावसरे प्रकाशनावसरे मूल्याङ्कनावसरे पूर्णशः सहयोगं प्रायच्छत्। संस्कृत-अकाडमी विश्वविद्यालययोः संयुक्तेन सहयोगेन विशिष्टाः ग्रन्थाः लोकार्पिताः सन्ति।

4. बेङ्गलूरुनगरस्थम् अक्षरम् इतीदं संस्कृतभारत्याः प्रकाशनं **२०२० तमे संवत्सरे संस्काररत्नमाला** इत्यस्याः ग्रन्थमालायाः प्रकाशनं विश्वविद्यालयस्य संयुक्तसहयोगेन अकरोत्। संस्काररत्नमाला इत्येषः धर्मशास्त्रीयः ग्रन्थः वर्तते। अस्मिन् ग्रन्थे गर्भधानम् उपनयनम् इत्यादयः षोडशः संस्काराः वर्णिताः सन्ति। विकिपीडिया मध्ये अपि अयं ग्रन्थः समारोपितः वर्तते।

**१. संस्काररत्नमाला - प्रथमभागे प्रथमः खण्डः**

**२. संस्काररत्नमाला - प्रथमभागे द्वितीयः खण्डः**

**३. संस्काररत्नमाला - प्रथमभागे तृतीयः खण्डः**

**४. संस्काररत्नमाला-** प्रथमभागे चतुर्थः खण्डः इत्येवं श्रीभट्टगोपीनाथविरचितानां खण्डशः विभक्तानां ग्रन्थानां संयुक्तप्रकाशनकार्यक्रमाङ्गतया प्रकाशितम् । एतेषां प्रकाशनाय १०,००००० परिमितः धनराशिः विश्वविद्यालयेन प्रदत्तः।

5. **आचार्य - राजचूडामणिदीक्षितः** इत्यनेन विरचितः काव्यदर्पणः इत्येषः ग्रन्थः विश्वविद्यालयस्य संयुक्तप्रकाशनकार्यक्रमाङ्गतया प्रकाशितः अस्ति।भागद्वये अयं ग्रन्थः उपनिबद्धः वर्तते। काव्यशास्त्रस्य अध्ययने एषः ग्रन्थः नितराम् उपकरोति इति मत्वा फ्रेन्च् इन्स्टट्यूट् पाण्डिचेरि , पाण्डिचेरि इत्यनया संस्थया विश्वविद्यालयस्य संयुक्तसहयोगेन बहवो हि प्रकाशनप्रयासाः समनुष्ठीयन्ते।

6. 2019 तमे संवत्सरे संस्कृतभारत्याः प्रकाशनेन **अलङ्कारमणिहारः** इत्येषः ग्रन्थः विश्वविद्यालयस्य संयुक्तसहयोगेन प्रकाशितः। कृष्णब्रह्मतन्त्रपरकालसंयमीन्द्रैः विरचितस्य एतस्य ग्रन्थस्य प्रकाशनं भागचतुष्टये जातम् । क्रमशः यथा -

**१.अलङ्कारमणिहारः - प्रथमः भागः। अत्र उपमालङ्कारात् समासोक्तिं यावत् २४ सङ्ख्याकाः अलङ्काराः सोदाहरणं संरक्षणं च उपनिबद्धाः सन्ति।**

**२.अलङ्कारमणिहारः - द्वितीयः भागः। अत्र परिकरालङ्कारात् मालादीपकं यावत् २५ अलङ्काराः सोदाहरणं संरक्षणं च उपनिबद्धाः सन्ति।**

**३. अलङ्कारमणिहारः - तृतीयः भागः।**

अत्र सारालङ्कारात् हेत्वलङ्कारं यावत् 53 संङ्ख्याकाः अलङ्काराः सोदाहरणं संरक्षणं च उपनिबद्धाः सन्ति।

**४.अलङ्कारमणिहारः - चतुर्थः भागः।**

अत्र रसवद्यलङ्काराणां निरूपणम् अस्ति।

**' प्रधानेन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः काव्ये तस्मिन् अलङ्कारो रसादिरिति मे मतिः '**।। इति रसवद्यलङ्काराणां लक्षणम् उक्तम् । अस्मिन् भागे रसवदलङ्कारसरः इत्यस्मात् शब्दालङ्कारसरः इत्येतावत् पर्यन्तं 17 संङ्ख्याकाः अलङ्काराः उपनिबद्धाः वर्तन्ते। एवं भागचतुष्टये उपनिबद्धः लाक्षणिकः ग्रन्थः एषः संयुक्तप्रकाशनकार्यक्रमाङ्गतया सुसम्पादितः ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य संस्कृत-अकाडमी इत्यस्याः सहयोगेन षष्ठ्यब्दग्रन्थमालायाः संयुक्तप्रकाशनकार्यक्रमस्य अङ्गत्वेन प्रकाशिताः केचन विशिष्टाः दुर्लभाः ग्रन्थाः यथा -

१. **तारकम् - 2020** तमे वर्षे प्रकाशितम् । अस्य काव्यस्य आङ्ग्लानुवादः अपि भावार्थदीपिका इत्यनया संस्कृतव्याख्यया सह प्रकाशितः।

२. सन्निधानं सूर्यनारायणशास्त्रि- **लघुकाव्यसङ्ग्रहः - 2022**

३.**दीपिकासर्वस्वम्** - कुरगण्टि रामशास्त्रिणा विरचितम् । 2022 तमे संवत्सरे सम्पादितम् ।

४. अभिज्ञानशाकुन्तलम् - पूर्णचन्द्रिका तथा मृत्युञ्जयभूपालीया इति व्याख्याद्वयोपेतं कालिदासस्य नाटकम् । 2020 तमे संवत्सरे नीलकण्ठं महोदयेन सम्पादितम् ।

५. **श्रीवेङ्कटेशचम्पूप्रबन्धः - 2021**

६. युधिष्ठिराश्वमेधचम्पूप्रबन्धः -2022

७. विक्रमोर्वशीयं नाम नाटकम् - 2022

एवं विश्वविद्यालयः विश्वविद्यालयेतराणां शोधसंस्थानां च सहयोगेन विभिन्नान् ग्रन्थान् संयुक्तप्रकाशनकार्यक्रमाङ्गत्वेन प्रतिवर्षं सम्पादयति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |

**4.Infrastructure and Learning Resources**
**4.1 Physical Facilities**
***4.1.1 The institution has adequate facilities for teaching- learning. viz., classrooms, laboratories, computing equipment, etc.***

***संस्थायां कक्ष्याप्रकोष्ठः, प्रयोगशाला, सङ्गणकयन्त्रादीनि शिक्षणाधिगमसम्बन्धीनि भौतिकसौविध्यानि उपलभ्यन्ते।***

**Answer:**

विश्वविद्यालयोऽयं बहुपरिसरीयो वर्तते।भारतस्य जम्मू, देवप्रयागः, गरली, प्रयागराजः, जयपुरम्, लखनऊ, पुरी, अगर्तला, भोपाल्, मुम्बई, शृङ्गेरी, त्रिशूरु इत्येतेषु स्थानेषु विश्वविद्यालयस्य परिसराः वर्तन्ते।

- **सर्वे परिसराः भारतीयज्ञानशाखानाम् अध्ययनम्, अध्यापनम्, गवेषणम्, प्रकाशनम् इत्येतैः मुख्यैः कार्यैः अग्रेसराः वर्तन्ते।**
- **विश्वविद्यालयस्य मुख्यालयः देहल्यां जनकपुरी इत्यत्र वर्तते। स्वतन्त्रे भवने प्राशासनिकम्, शैक्षिकम्, परीक्षासम्बन्धि च कार्यं प्रवर्तते।**
- **सर्वेषु परिसरेषु शैक्षिकानि प्राशासनिकानि कार्याणि स्वतन्त्रेषु निजभवनेषु प्रवर्तन्ते।**
- **देवप्रयागे स्थितस्य श्रीरघुनाथकीर्तिपरिसरस्य निर्मितं नूतनं भवनम् उद्घाटनार्थं समयं प्रतीक्षते।अनतिकालेन सोऽपि परिसरः निजभवने कार्यं प्रवर्तयिष्यति।**
- **प्रतिपरिसरं शैक्षिकभवनम्, ग्रन्थालयः, प्राशासनिकविभागः, छात्रावासः च वर्तन्ते।**
- **भवनेषु जलव्यवस्था, शौचालयव्यवस्था, पर्याप्तप्रकोष्ठाः, वातायनानि च सन्ति।**
- **विकलचेतनानां कृते अपेक्षिता व्यवस्था कल्पिता वर्तते। भवनेषु राम्प्, चक्रासनम्, उपवेशनकक्ष्यः च परिकल्पितो वर्तते।**
- **परिसरेषु पुरुषाणां महिलानां च प्रत्येकं छात्रावासः वर्तते।**
- **छात्राणां जिज्ञासोपशमनाय ग्रन्थालयः वर्तते।**
- **व्यायामेन स्वास्थ्यं रक्ष्यते। अपेक्षिताभिः सामग्रीभिः उपेता व्यायामशाला परिसरेषु छात्राणां शारीरिकसौख्यवर्धनाय स्थापितास्ति।**
- **सुखासनैः युक्ताः कक्ष्याप्रकोष्ठाः छात्रप्रियाः वर्तन्ते।**

Covid 19 विषमपरिस्थित्या काले कवलिते नूतनाः तन्त्रागमाः उपक्रान्ताः अभूवन्। अध्यापने अधिगमे च नवीनानि विधानानि जनिम् अलभन्त। सद्यस्कमाध्यमेन अध्यापनविधिः लोकप्रियताम् आप्नोत्। विश्वविद्यालयः चतुरस्रैः सम्भारैः समेतः सन् पुनः प्रतिष्ठायै पदं निदधाति।

- **शिक्षा-अनुसन्धानक्षेत्रे कालानुगुणं तन्त्रोपकरणैः अलङ्क्रियमाणे वर्तेते। किञ्च प्राचीननवीनयोः भारतीयशैक्षिकपरिपाट्योः सम्बन्धसेतुश्च वर्तते। कक्ष्याप्रकोष्ठाः विद्यार्थिनां सखायः सन्ति।**
- **कृष्णफलकानि, श्वेतफलकानि, व्यजनानि, विद्युद्दीपाः, गवाक्षाः इत्येतैः उपकरणैः समुपेताः वर्तन्ते।**
- **कक्ष्याप्रकोष्ठेषु अनुकूलः वायुः, प्रकाशः च छात्रान् समाकर्षति सानन्दाधिगमे प्रेरयति च। अनिवार्यविषयककक्ष्याणां वैकल्पिकविषयककक्ष्याणां च यथापेक्ष-परिमाणेन प्रकोष्ठाः निर्मिताः सन्ति।**
- **शौचस्य महत्त्वं परिगणयति विश्वविद्यालयः। प्रतिदिनं स्थलशुद्धिः अपरिहार्यं कार्यं कर्मचारिभिः क्रियते।**
- **छात्राणां कृते मार्जनप्रकोष्ठः कल्पितो वर्तते।**
- **ICT प्रयोगार्थं योग्याः कक्ष्याप्रकोष्ठाः वैद्युतफलकैः सह प्रोन्नतीकृताः सन्ति।**
- **आधुनिकमनोविज्ञानशिक्षणं प्राप्तुं मनोवैज्ञानिक-प्रयोगशाला विद्यते।**
- **विश्वविद्यालये भाषासम्बन्धिनां कार्याणां महत्त्वं वर्तते। सर्वेषु परिसरेषु भाषाप्रयोगशालाः सन्ति।**
- **कतिपयपरिसरेषु प्राविधिकप्रयोगशालाः विलसन्ति।**

- **प्रयोगशलासु सङ्गणकयन्त्राणि पर्याप्तमात्राणि वर्तन्ते।**
- **सङ्गणकप्रकोष्ठाः सङ्गणकयन्त्रैः जवनिकाभिः च युता वर्तन्ते।**
- **यन्त्रोपकरणैः,Wi-Fi इत्यादिभिः निस्तन्त्रीपरिकरैः च उपेताः सङ्गोष्ठी-सभागाराः वर्तन्ते। अनया व्यवस्थया सङ्गोष्ठी, अन्तर्जालसङ्गोष्ठी, सम्मेलनम्, उपवेशनम् इत्यादीनां क्रियाकलापानाम् आयोजनाय आनुकूल्यं कल्पितं वर्तते।**
- **विश्वविद्यालयस्य गुरुवायूरु-भोपाल् इत्यादिषु परिसरेषु प्रेक्षागारा वर्तन्ते। ते प्रेक्षागाराः रङ्गवेदी, प्रकाशनम्, ध्वनिः, आसनानि इत्यादिभिः उत्कृष्टाः सन्ति। राष्ट्रस्तरीयाः, अन्तःपरिसरीयाः विविधाः सांस्कृतिकाः कार्यक्रमाः तेषु प्रेक्षागारेषु समपद्यन्त। विश्वविद्यालयस्य संस्कृतनाट्यमहोत्सवः युवमहोत्सवः इत्यादयः लोकप्रसिद्धाः उत्सवाः अस्यां वेदिकायां सम्प्रावर्तन्त।**
- **विश्वविद्यालयस्य ग्रन्थालयः ई-ग्रन्थालयेन, 0.4 Cloud आवृत्ति-तन्त्रांशेन च समन्वितः वर्तते। सुव्यवस्थितः ग्रन्थालयः परिसरेषु पठनशीलान् छात्रान् आकर्षति। ग्रन्थान्वेषणे छात्राणां सौकर्यं भवति।**
- **ग्रन्थालयेषु पुस्तकानि, मातृकाः च यथाविधि रक्षिताः सन्ति। छात्राणाम्, अध्यापकानाम्, कर्मचारिणां च पुस्तकप्राप्तौ ग्रन्थालये सरलावसरः कल्पितो वर्तते।**
- **परिसरेषु गूढ/ चारचक्षूंषि (CCTV) संयोजितानि । तेन प्राशासनिकस्य कार्यस्य दक्षता संवर्धिता वर्तते। अतः छात्राः जागरूकतां वहन्ति।**
- **शोधच्छात्राणां पृथक्तया प्रकोष्ठव्यवस्था वर्तते। विश्वविद्यालयद्वारा प्रकल्पितानि सङ्गणकयन्त्रम्, Wi-Fi, मुद्रणयन्त्रम् च तेषाम् अनुसन्धानकर्मणि गुणोत्कर्षम् आधातुं सहकारीणि भवन्ति।**
- **कार्यालयः उत्कृष्टोपकरणानि उत्पीटिकादीनि, सङ्गणकयन्त्राणि, मुद्रणयन्त्रम्, अन्तर्जालव्यवस्था, प्रतिकृतियन्त्रम् (Xerox Machine) इत्यादिनासौकर्येणसमन्वितोवर्तते।**
- **कार्यालय एव मुख्यालयस्य परिसरस्य च मध्ये सम्पर्कसूत्रम् अस्ति । कार्याणां शैघ्र्यसम्पादनाय सौकर्याणि सहकुर्वन्ति। 'गृहाय तन्त्रिका' (FTTH) इति वेगवान् जालमार्गी कार्याणि क्षिप्रं साधयति।**

विश्वविद्यालयस्य परिसरेषु प्रकल्पितानि आरोग्यकेन्द्रम्, क्रीडाङ्गनम्, अन्तर्देवनशाला, उद्यानम् इत्यादीनि सौकर्याणि अध्येतृणां कृते गेहप्रीतिं जनयन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***4.1.2 The institution has adequate facilities for***

1. ***Seminar/Conference Hall with infrastructural facilities***
2. ***Auditorium for cultural activities***
3. ***Laboratory for Functional Sanskrit***
4. ***Yajnashala***
5. ***Observatory***
6. ***Language Laboratory***
7. ***Psychology Laboratory***
8. ***Meditation Centre***
9. ***Sports, games (indoor, outdoor, gymnasium, etc)***
10. ***Artifacts Museum Ancient Arts/Objects' Museum***
11. ***Heritage Museum***
12. ***Manuscript Resource Centre (MRC)***
13. ***Manuscript Conservation Centre(MCC)***
14. ***Recording Studio/e-P.G.Pathshala Facilities***

15. *Yoga Training and or Therapy Centre with modern equipments*
16. *Liasion with Bharat Vani Portal*
17. *Sanskrit-Science/Agama Exhibition Facilities*

***संस्थायाम् अधोनिर्दिष्टानि सौविध्यानि पर्याप्तानि सन्ति।***

1. ***मूलसौविध्ययुतं सङ्गोष्ठीभवनम्***
2. ***सांस्कृतिकादिकार्यक्रमाणां कृते सभागृहम्***
3. ***प्रायोगिकसंस्कृतप्रकोष्ठः***
4. ***यज्ञशाला***
5. ***वेधशाला***
6. ***भाषाप्रयोगशाला***
7. ***मनोविज्ञान-प्रयोगशाला***
8. ***ध्यानकेन्द्रम्***
9. ***क्रीडासौविध्यानि (अन्तर्द्वार-बहिर्द्वार-देहदार्ढ्यादिकम्)***
10. ***कलाकृतिसङ्ग्रहालयः (प्राचीनकलानां/ वस्तूनां सङ्ग्रहालयः)***
11. ***प्राचीनशिल्पकलासङ्ग्रहालयः***
12. ***पाण्डुलिपिसंसाधनकेन्द्रम् (एम्.आर्.सि.)***
13. ***पाण्डुलिपिसंरक्षणकेन्द्रम् (एम्.सि.सि.)***
14. ***ध्वनिमुद्रणालयः/इ-पी.जी-पाठशालासुविधाः***
15. ***योगशिक्षणकेन्द्रम् / आधुनिकोपकरणयुक्तंयोगचिकित्साकेन्द्रञ्च***
16. ***भारतवाणीसंसाधनेन सहयोगः***
17. ***संस्कृतविज्ञान-आगमप्रदर्शनसुविधाः***

**Answer:**

विविधराज्येषु विश्वविद्यालयस्य परिसराः वर्तन्ते। तेषु परिसरेषु संस्कृतस्य /शास्त्राणाम् अध्ययनाय अध्यापनाय च सन्ति बहवः सुविधाः। पाठ्यसहगामिक्रियाणां निष्पत्तये च सौविध्यानि वर्तन्ते।

### मूलसौविध्ययुतं सङ्गोष्ठीभवनम्

- सर्वेषु परिसरेषु सङ्गोष्ठीशाला वर्तते।
- सङ्गोष्ठीशालायां प्रक्षेपकः (प्रोजेक्टर्), पटलः (स्क्रीन्) च समवेतो वर्तते। सुखासनैः अलङ्कृता वेदिका, अलङ्कृताः उत्पीठिकाः, सुप्रसारी ध्वनिवर्धकः, उत्तमानि श्रव्यसाधनानि च सङ्गोष्ठीशालायां वर्तन्ते।

### सांस्कृतिकादिकार्यक्रमाणां कृते सभागृहम्

- संस्कृतिः संस्कृताश्रिता' भारतीयानां सांस्कृतिकतत्त्वानां विषये प्रेरणादानार्थं विश्वविद्यालयस्य विशिष्टं सभागृहं वर्तते।
- उत्कृष्टानि श्रव्यसाधनानि, दृश्यसाधनानि, Ultrasound ध्वनिव्यवस्था, बहुवर्णकाः विद्युद्दीपाः, सुखासनानि, अलङ्कृतवेदिका च सन्ति।
- सङ्गोष्ठीशालायां वातनियन्त्रकं योजितं वर्तते।
- स्त्रीणां पुरुषाणां च प्रत्येकं मार्जनप्रकोष्ठाः सन्ति।
- छात्रैः सांस्कृतिककार्यक्रमान् सुचारु प्रस्तोतुं योग्या इयं शाला बहूनां कार्यक्रमाणां स्थानं वर्तते। अन्तःपरिसरीयनाट्यस्पर्धा (संस्कृतनाट्यमहोत्सवः) युवमहोत्सवः इत्यादयः कार्यक्रमाः अस्याम् शालायां प्रवृत्तानि। सांस्कृतिकसभागारे अस्मिन् अखिलभारतीयशास्त्रीयस्पर्धाः आयोजिताः आसन्।

### प्रायोगिकसंस्कृतप्रकोष्ठः

परिसरेषु प्रायोगिकसंस्कृतप्रकोष्ठः वर्तते। तत्र इमानि विशेषाधानहेतूनि संसाधनानि सन्ति।

- सङ्गणकयन्त्राणि
- दृश्यसाधनानि
- श्रव्यसाधनानि
- सुखासनानि
- वैद्युतीयफलकम्
- Wi-Fi

**यज्ञशाला** शैक्षिकसत्रस्य आरम्भावसरे, विशिष्टेषु पर्वसु च याज्ञिककार्यस्य अनुष्ठानाय यज्ञशाला अपेक्ष्यते। निर्विघ्नतया सत्राणां प्रवर्तनाय भगवतः आराधना कर्तव्येति समुदाचारः।

- विश्वविद्यालयस्य अनेकेषु परिसरेषु यज्ञशाला वर्तते।
- यज्ञशालायां यज्ञवेदी, पूजास्थलम्, पूजासामग्री च समासादिता वर्तते।
- छात्रैः तत्सम्बन्धिपाठ्यक्रमेषु लब्धप्रवेशैः याज्ञिकप्रक्रियाः प्रायोगिकतया ज्ञातुम् अवसरः कल्पितो वर्तते।

**वेधशाला**

- पुरीपरिसरे वेधशाला वर्तते।
- वेधशालायां दूरदर्शकादीनि अनेकानि उपकरणानि सन्ति।
- छात्राः अन्ये परिसरसदस्याश्च रात्रौ ग्रहाणां गतिं वीक्षितुं तानि सहायकानि भवन्ति।
- ज्योतिषशास्त्रीयाणि अध्ययनम्, अनुसन्धानम् इत्यादीनि कार्याणि विधातुं शालेयम् उपयुक्ता वर्तते।

**भाषाप्रयोगशाला** संस्कृतवाग्व्यवहारस्य परिवर्धनार्थं प्रयोगशाला इयं सहकरोति। अपेक्षितेन तन्त्रांशेन सह सङ्गणकयन्त्राणि तत्र संस्थापितानि वर्तन्ते।

**मनोविज्ञानप्रयोगशाला** मनोवैज्ञानिकाः प्रयोगाः अस्यां शालायां क्रियन्ते। शिक्षाशास्त्रिपाठ्यक्रमे शिक्षाचार्यपाठ्यक्रमे च अध्ययनांशत्वेन एते प्रयोगाः निर्दिष्टाः सन्ति। अत्र प्रायोगिकपरीक्षा क्रियते। छात्रेभ्यः तदाधारेण अङ्काः दीयन्ते। सर्वेषु परिसरेषु मनोविज्ञानप्रयोगशाला वर्तते। शाला विविधैः प्रयोगोपकरणैः समुपेता वर्तते।

- अवधानविस्तृतिमापनोपकरणम् (Techistoscope)
- दर्पणरेखाचित्रोपकरणम् (Mirror drawing apparatus)
- प्रासङ्गिक-अन्तर्बोधपरीक्षणम् (Thematic Apperception Test (TAT))
- रोषामषीचिह्नपरीक्षा (Rorschach test)
- बुद्धिपरीक्षणम् (Intelligence test)
- व्यक्तित्वपरीक्षणम् (Personality test) इत्यादयः प्रयोगाः अत्र प्रवर्तन्ते।

**सूचना-सम्पर्कप्रौद्योगिकीप्रयोगशाला** डिश्, पटलः, चित्रप्रक्षेपकः, अभ्युन्नतप्रक्षेपकः, सङ्गीतोपकरणम्, सिडीप्रवर्तकम्, दूरदर्शनम्, इत्याद्यैः उपकरणैः समुपेता सूचनासम्पर्कप्रौद्योगिकीप्रयोगशाला वर्तते।

**ध्यानकेन्द्रम्** 'तत्र प्रत्ययैकतानता ध्यानम्' इति पातञ्जलं सूत्रम्। धारणास्थाने चित्तवृत्तेः एकरूपतासम्पादनरूपं ध्यानं अधीयमानायाः विद्यायाः अनुसन्धानाय महोपकारकं वर्तते। विश्वविद्यालयस्य छात्राणाम् अध्यापकानां कर्मचारिणां च मनसः अनुद्वेगतासाधनाय ध्यानकेन्द्रं स्थापितं वर्तते।

**क्रीडासौविध्यानि (अन्तर्द्वार-बहिर्द्वार-देहदार्ढ्यादिकम्)**

- विश्वविधालयस्य सर्वेषु परिसरेषु अन्तर्द्वारक्रीडाङ्गणम्, बहिर्द्वारक्रीडाङ्गणम् च वर्तते।
- अन्तर्द्वारक्रीडाङ्गणे चतुरङ्गम्, कैरम्, फलकीयक्रीडा, सङ्गीत-आसनम्, टेबल टेनिस् इत्यादीनां क्रीडानां क्रीडनाय व्यवस्था वर्तते।
- बहिर्द्वारक्रीडाङ्गणे क्षेपणम्, धावनम्, कूर्दनम्, कोको, कबड्डी, क्रिकेट्, वाल्लिबाल् इत्यादीनां क्रीडाणां क्रीडनाय व्यवस्था वर्तते।

- छात्राणां क्रीडार्थम् अपेक्षितानि उपकरणानि प्रकल्पितानि। तानि स्थानीय-राज्यस्तरीय-अन्तःपरिसरीय-राष्ट्रस्तरीयस्पर्धार्थं सिद्धताः कर्तुं सौविध्यानि साहाय्यम् आचरन्ति।

**पाण्डुलिपिसंरक्षणकेन्द्रम्** विश्वविद्यालयस्य गङ्गानाथझापरिसरे (प्रयागराजः) गुरुवायूरुपरिसरे (त्रिशूरु) च पाण्डुलिपिसंरक्षणस्य व्यवस्था वर्तते। बहवो मातृकाः तत्र संरक्षिताः सन्ति।

**योगशिक्षणकेन्द्रम्**

- परिसरेषु योगशिक्षणस्य सौकर्यं कल्पितं वर्तते।
- प्रातः सायं च छात्राः परिसरसदस्याश्च योगशिक्षणाय प्रोत्साह्यन्ते।
- गुरुवायूरुपरिसरे अन्यत्र च आयुर्वेदीयचिकित्सायाः प्राप्तेः अवसरः कल्पितो वर्तते।

**सांस्कृतिकप्रकोष्ठः** भारतीयनाट्यकलायाः प्रोत्साहनदृष्ट्या  भोपालपरिसरे नाट्यशास्त्रकेन्द्रं स्थापितम्। तत्र सांस्कृतिककार्यक्रमाणां प्रस्तुतेः अपेक्षिताः आहार्यसामग्र्यः सङ्गृहीताः सन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Videos and photographs geotagged | View Document |

***4.1.3 The institution has adequate facilities like health centre, bank, ATM, post office, theatre, women centre, counseling centre and cultural activities centre etc.***

***संस्थायाम् आरोग्यकेन्द्रं, वित्तकोषः, स्वयंचालितधनदयन्त्रम्, पत्रालयः, रङ्गमण्डपः, महिलाकेन्द्रम्, परामर्शकेन्द्रं तथा सांस्कृतिककार्यक्रमकेन्द्रम् इत्यादीनि पर्याप्तरूपेण उपलभ्यन्ते।***

**Answer:**

विश्वविद्यालयस्य प्रतिष्ठा उपकल्पिताभिः व्यवस्थाभिःसिद्ध्यति। अस्मिन् विश्वविद्यालये आरोग्यकेन्द्रादीनि उपलभ्यन्ते। विश्वविद्यालयस्य मुख्यालयः देहल्यां जनकपुरी इत्यत्र वर्तते। मुख्यालयः विभिन्नराज्येषु स्थितानां सर्वेषां परिसराणां प्राशासनिकं केन्द्रं वर्तते।

- विश्वविद्यालयः **'भारतीय स्टेट बैंक'** इत्यनेन वित्तकोषेण सह कृताभिसन्धिः वर्तते।  मुख्यालयस्य क्रोशार्धमात्रदूर एव वित्तकोषः **स्वयंचालितधनदयन्त्रं** च आस्ते।  तेन विश्वविद्यालयीयं दैनन्दिनं वित्तीयकार्यम् अनायासेन निरूह्यते। मुख्यालयस्य अन्तः पत्रालये  अविद्यमानेऽपि सम्बद्धकार्याणि विना विलम्बं साध्यते।
- समीपतरवर्ती **पत्रालयः** आद्यतापूर्वकं मुख्यालयीयं कार्यं निर्वहति।

यद्यपि मुख्यालये रङ्गमण्डपः, सांस्कृतिककार्यक्रमकेन्द्रं च न वर्तते तथापि तयोः अनुपलब्धिं न अनुभवन्ति उद्योगिनः।

- विश्वविद्यालये **महिलाकक्षः** घटितो वर्तते। मुख्यालये कार्यनिरताः महिलाः सौहार्देन कार्यं विदधति।  सम्भवति अल्पक्लेशे तस्य महिलाकक्षस्य मुख्याभिः सह समालोच्य क्लेशं परिहरन्ति।
- विश्वविद्यालयस्य परिसरेषु **आरोग्यकेन्द्रं** वर्तते। बहुषु परिसरेषु **बालकच्छात्रावासे बालिकाच्छात्रावासे च पृथक् आरोग्यकेन्द्रं स्थापितं विद्यते।** तत्र वैद्यस्य उपस्थितिः सप्ताहे सकृत् भवति । अनिवार्यतायान्तु आहूतः सः अनुक्षणम् उपलभ्यते । तेन परिसरस्य सदस्यानाम् आरोग्यपरीक्षणे आनुकूल्यं वर्तते। अतः छात्राः उद्योगिनः च गृहप्रीतिम् अनुभवन्ति।
- परिसरान् निकषा पत्रालयः वर्तते। प्रश्नपत्रप्राप्तिः, उत्तरपुस्तिकाप्रेषणम् इत्यादीनि गम्भीरकार्याणि अपि सुखेन साध्यन्ते। किञ्च मुख्यालयेन सह परिसरीयः सर्वः पत्राचारः सुचारु सम्पद्यते।

- महिलानां समस्यायाः समाधानाय **'महिलाकक्षः'** (Women`s Cell) वर्तते। सर्वोच्चन्यायालयस्य विश्वविद्यालयानुसन्धान-आयोगस्य च निर्देशानुसारं विश्वविद्यालयः कक्षममुम् अस्थापयत्। वरिष्ठा महिला कक्षस्य मुख्याधिकारिणी भवति। सर्वेषु परिसरेषु विद्यमानः अयं कक्षः काले काले उपवेशनम् आयोजयति। कार्यनिरतानां महिलानाम् अध्ययनरतानां बालिकानां च समस्यायाम् अवधानं ददाति। **'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'** इति धारणा वर्तते विश्वविद्यालयस्य। अतः महिलासम्बन्धिन्यः समस्याः प्रायेण न भवन्ति। सत्यां समस्यायां, महिलाकक्षः तां समस्यां समाधाय महिलाः सोल्लासं कार्यं कर्तुं प्रेरयति। अधिकारिण्यः सावधानं बालिकानां समस्यां शृणोति परिहरत्यपि। अतः अस्मिन् महिलाकक्षे बालिकाः विश्वस्ताः सन्ति। एवं **महिलाकक्षः महिलाकेन्द्रस्य** कार्यं निर्वहति।
- परिसरेषु सांस्कृतिकगतिविधीनां निर्वाहाय 'सांस्कृतिकसमितिः' 'क्रीडासमितिः' च वर्तेते। संस्कृतनाट्यमहोत्सवः, युवमहोत्सवः इत्यादीनां विश्वविद्यालयस्य बहुश्रुतेषु सांस्कृतिकपर्वसु समिती इमे छात्रान् प्रेरयतः । छात्राणां कृते मार्गदर्शनस्य व्यवस्थां कुरुतः। परिसरेषु सम्पद्यमानानां सांस्कृतिककार्यक्रमाणां सांस्कृतिकस्पर्धानां च सुचारु सम्पादने सांस्कृतिकसमितेः उत्तरदायित्वं वर्तते।
- विश्वविद्यालयस्य परिसरेषु रङ्गमण्डपः वर्तते। **भोपालपरिसरे गुरुवायूरुपरिसरे च विशिष्टः प्रेक्षागारः** वर्तते। तेषु ६०० आसनानि सहृदयान् उपवेशनार्थम् आह्वयन्ति। सांस्कृतिककार्यक्रमाणां विशिष्टानां प्रदर्शने रङ्गमण्डपस्य वेदिका महत्त्वं भजते। विश्वविद्यालयद्वारा प्रतिवर्षं संस्कृतनाट्यमहोत्सवः आयोज्यते। संस्कृतनाट्यपरम्परायाः समुन्नयने उत्सवस्य अस्य महती भूमिका वर्तते। भारतीयरङ्गप्रयोगपरम्परायाः तात्त्विकं प्रदर्शनम् अस्मिन् उत्सवे सम्पद्यमानं वर्तते। नाट्यमहोत्सवेषु एते प्रेक्षागाराः परिसरीयसदस्यैः सह बाह्यान् सामाजिकान् अतिथीकुर्वन्ति। **ध्वनिवर्धकव्यवस्था, बहुवर्णकदीपव्यवस्था, वातनियन्त्रणव्यवस्था सुखासनव्यवस्था** च सांस्कृतिककार्यक्रमेषु रसानुभूतौ प्रेक्षकाणां निमित्तकारणानि भवन्ति। सिद्धतायै बालकानां बालिकानां च पृथग् नेपथ्यागारः वर्तते। परिसरेषु अभ्यासशाला पूर्वाभ्यासार्थम् उपकरोति। प्रेक्षागारे शौचालयाः वर्तन्ते। प्रस्तोतॄणाम् उपयोगाय नेपथ्यागारे बालकानां बालिकानां पृथग् मार्जनप्रकोष्ठाः सन्ति।
- **'व्यायामशाला'** छात्राणां शारीरिकस्वास्थ्यरक्षणे सहकरोति। सर्वेषु परिसरेषु व्यायामशाला वर्तते। **हस्तबन्धः (Wrist straps) रक्षाकवचम् (Guard) सुग्राहिका (Grips) वलयः (Rings) भारोत्तुला (weight lift)** इत्यादीनि व्यायामसाधनानि शालायां विद्यमानानि व्यायामपटूनाम् 'आहोपुरुषुकां' जनयन्ति। व्यायामशाला इयं बालकानां बालिकानां च प्रत्येकतया स्थापिता विद्यते। इयं शाला योगाभ्यासेन सह व्यायामम् उत्तेजयति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Provide link for additional information | View Document |

***4.1.4 Percentage of classrooms and seminar halls with ICT - enabled facilities such as smart class, LMS (Learning Management System), etc. (Latest completed academic year data)***

***सूचनासंप्रेषणप्रविधि-स्फूर्तकक्ष्या-अधिगमप्रबन्धप्रणालीप्रभृतिभिः उपोद्बलितकक्ष्याणां सङ्गोष्ठीकक्ष्याणां च प्रतिशतं मानम्। (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 32.46

4.1.4.1 *Number of classrooms and seminar halls with ICT facilities.*

**उपोद्बलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च सङ्ख्या।**

Answer: 111
4.1.4.2 Total number of classrooms and seminar halls

कक्ष्याणां सङ्गोष्ठीकक्ष्याणां च सम्पूर्णा सङ्ख्या

Answer: 342

| File Description | Document |
|---|---|
| Upload Number of classrooms and seminar halls with ICT enabled facilities (Institutional data as per Data Template) | View Document |
| Upload any additional information | View Document |
| Provide link for additional information, (Hyper linked video) | View Document |

***4.1.5 Percentage of expenditure, excluding salary for infrastructure augmentation during the last five years (INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु वेतनं विहाय मूलभूतसौविध्यसंवर्धनाय कृतस्य व्ययस्य प्रतिशतं मानम् (लक्षशः)***

**Answer:** 40.87

4.1.5.1 ***Expenditure for infrastructure augmentation, excluding salary year-wise during the last five years (INR in lakhs).***

विगतेषु पञ्चसु वर्षेषु वेतनं विहाय मूलभूतसौविध्यसंवर्धनाय कृतः व्ययः वार्षिकक्रमेण। (लक्षशः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 2133.46 | 2876.59 | 5077.33 | 5106.59 | 7106.25 |

| File Description | Document |
|---|---|
| Upload Details of budget allocation, excluding salary during the last five years | View Document |
| Upload audited utilization statements | View Document |

**4.2 Library as a Learning Resource**
***4.2.1 Library is automated using Integrated Library Management System (ILMS)***

***ग्रन्थालयः पूर्णरूपेण स्वयंप्रवृत्तः यत्र समन्वितग्रन्थालय-प्रबन्धनप्रणाली उपयुज्यते।***

**Answer:**

विश्वविद्यालयस्य परिसराणां ग्रन्थालयेषु समन्वितग्रन्थालयप्रबन्धनप्रणाल्याः तन्त्रांशः उपयुज्यते। तत्र विश्वविद्यालयस्य परिसरेषु **‘ई-ग्रन्थालयः ‘तन्त्राशः 0.4 Cloud’** इति आवृत्त्या संयुक्तो वर्तते। पूर्वं ई-ग्रन्थालयः 0.3 आवृत्तिः उपयुज्यते स्म। **ई-ग्रन्थालयः भारतसर्वकारस्य एलेक्ट्रानिक् एवं सूचनाप्रौद्योगिकी मन्त्रालयः** इत्यनेन विकसितः सन् निरूह्यमाणो वर्तते। असौ सर्वकारीयग्रन्थालयानां यान्त्रीकृतव्यवस्था भवति। अस्यां वेदिकायां **राष्ट्रियसूचनाकेन्द्रम्** (NIC) डिजिटल् मापकाङ्केन सह ग्रन्थालयप्रबन्धनतन्त्रांशस्य कार्यप्रणालीं निर्वहति। असौ प्रत्येकस्थानदः तन्त्रांशः, कार्यनिर्वाहाय सिद्धः

तन्त्रांशः वर्तते। अयं **PostgreSQL तन्त्रं** स्वीकृत्य कार्यं कर्तुं क्षमतां धत्ते। सद्यस्कतया दत्तांशानाम् उपारोपणम् अत्र सुशकं भवति। आरोपितायां ग्रन्थावल्यां ग्रन्थानाम् अन्वेषणे सौविध्यं वर्तते।

ई-ग्रन्थालये सरलेन विधानेन स्वाभीष्टं ग्रन्थम् अन्वेष्टुम् शक्नोति। तदर्थं परिसराणां ग्रन्थालयेषु एकैकम् **OPAC यन्त्रं** संयोजितं वर्तते। किञ्च NICSI आवलिनिर्मितिगुणोपेतं वर्तते। अस्मिन् ग्रन्थालये छात्राः, शोधच्छात्राः, अध्यापकाः, उद्योगिनः अन्ये च विश्वविद्यालयस्य सदस्याः सुलभतया प्रवेशं प्राप्तुं शक्नुवन्ति। इच्छुकाः बाह्या अपि परिसरनिदेशकस्य विशेषानुमत्या प्रवेशं लब्धुं शक्नुवन्ति।

**Cloud आवृत्त्या समन्वितस्य 'ई-ग्रन्थालयस्य लक्षणानि एवं सन्ति-**

1. सद्यस्कं सार्वजनिकोपयुक्तं केटलाग् (OPAC)

1. सुलभतया अन्वेषणसौकर्यम् – ग्रन्थनाम, अनुपलब्धपुस्तकान्वेषणम्, सन्दायिपञ्जिका इत्यादि।
2. पाठकानां कृते ई मेल् तथा सन्देशद्वारा सूचनादानम्
3. विविधसूचीनिर्माणम्- लेखकानुसारं विषयानुसारं च कवाटिकासूची, ग्रन्थसूची

प्राचीनतन्त्रांशगतानां दत्तांशानां नवीनतन्त्रांशे समारोपणकारणात् विश्वविद्यालयस्य समयसाध्यस्य स्वयंचलितग्रन्थालयस्य आंशिकरूपेण कार्यं सम्पन्नं वर्तते।

**विश्वविद्यालयस्य ग्रन्थालयाः अधोनिर्दिष्ट-आचरणाय समन्वितग्रन्थालयप्रबन्धनतन्त्राशम् (ILMS) उपयुञ्जते।**

1. तन्त्रांशे शीर्षकाणां सूचीनिर्माणम्

2. तन्त्रांशे शीर्षकाणां प्रतीनां सूचीनिर्माणम्

3. पुस्तकानां वितरणस्य विवरणम् (पुस्तकानां निर्गमः तथा स्वीकृतिः)

4.**OPAC माध्यमेन कैटलॉग- अन्वेषणे उपयोक्तृणां कृते मुक्तावसरप्रदानम्।**

5. पुस्तकानां निर्गमस्य स्वीकृतेः च **एसएमएस अथवा ईमेलद्वारा** पाठकानां कृते सूचनादानम्।

**केन्द्रीयसंस्कृतविश्वविद्यालयस्य पुस्तकालयेषु ILMS कार्यान्वयनस्य संस्करणम् तथा वर्षम् अधोनिर्दिष्टरीत्या वर्तते।**

| **परिसरग्रन्थालयस्य नाम** | **तन्त्रांशस्य नाम** | **आवृत्तिः** | **स्वयंप्रवृत्तप्रकियावर्षम्** | **पूर्वम् उपयुक्ता तन्त्रांशः आवृत्तिः च** | **स्वयंचलितस्य प्रकृतिः** |
|---|---|---|---|---|---|
| गङ्गानाथ झा परिसरः, प्रयागराजः | ई-ग्रन्थालयः | 4.0 | 2022 | ई-ग्रन्थालयः 3.0 (2009) | आंशिकरूपेण |
| श्रीरणवीरपरिसरः, जम्मू | ई-ग्रन्थालयः | 4.0 | 2022 | ई-ग्रन्थालयः 3.0 | आंशिकरूपेण |
| श्रीसदाशिवपरिसरः, पुरी | ई-ग्रन्थालयः | 4.0 | 2022 | - | आंशिकरूपेण |
| गुरुवायूर् परिसरः, केरलम् | ई-ग्रन्थालयः | 4.0 | 2022 | ई-ग्रन्थालयः, 3.0 | आंशिकरूपेण |
| जैपुरपरिसरः, जैपुरम् | ई-ग्रन्थालयः | 4.0 | 2017 | ई-ग्रन्थालयः, 3.0 (2007) | आंशिकरूपेण |
| लखनऊ परिसरः | ई-ग्रन्थालयः | 4.0 | 2022 | - | आंशिकरूपेण |
| वेदव्यासपरिसरः, | ई-ग्रन्थालयः | 4.0 | 2021 | ई-ग्रन्थालयः, 3.0 | पूर्णरूपेण |

| | | | | | |
|---|---|---|---|---|---|
| हिमाचलप्रदेशः | | | | (2007) | |
| भोपालपरिसरः, भोपाल् | ई-ग्रन्थालयः | 4.0 | 2021 | ई-ग्रन्थालयः, 3.0 | आंशिकरूपेण |
| के.जे. सोमयापरिसरः, मुम्बई | ई-ग्रन्थालयः | 3.0 | 2012 | - | आंशिकरूपेण |
| एकलव्यपरिसरः, अगर्तला | ई-ग्रन्थालयः | 4.0 | 2015-16 | - | आंशिकरूपेण |
| श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | ई-ग्रन्थालयः | 4.0 | 2019 | - | पूर्णरूपेण |

परिसरग्रन्थालयानां ग्रन्थसूचीनां सद्यस्कमाध्यमेन सार्वजनिकोपयोगाय सम्पर्कसूत्रम्

| **परिसरग्रन्थालयस्य नाम** | **OPAC सम्पर्कसूत्रम्** |
|---|---|
| गङ्गानाथ झा परिसरः, प्रयागराजः | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSUGJCLIB |
| श्रीरणवीरपरिसरः, जम्मू | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSUSRCLIB |
| श्रीसदाशिवपरिसरः, पुरी | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSUSSCLIB |
| गुरुवायूर् परिसरः, केरलम् | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSUGCKL |
| जयपुरपरिसरः, जयपुरम् | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=RSKSJPR |
| लखनऊ परिसरः | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSULCLIB |
| वेदव्यासपरिसरः, हिमाचलप्रदेशः | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSUVCCLIB |
| भोपालपरिसरः, भोपाल् | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=RSKSBHOPAL |
| के.जे. सोमयापरिसरः, मुम्बई | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=RSKJMUMBAI |
| एकलव्यपरिसरः, अगरतला | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=RSKSELC |
| श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=SRKLIB |
| केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली | https://eg4.nic.in/sanskrit/OPAC/Default.aspx?LIB_CODE=CSUDELHI |

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Provide link for additional information | View Document |

***4.2.2 Collection of rare books, manuscripts, special reports or any other knowledge resource for library enrichment***

***ग्रन्थालयसंवर्धनार्थं विरलपुस्तकानां, पाण्डुलिपीनां, विशिष्टप्रतिवेदनानाम्, अन्यान्यशैक्षिकसंसाधनानां च संग्रहः।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य ग्रन्थालये विरलपुस्तकानाम्, पाण्डुलिपीनाम्, विशिष्टप्रतिवेदनानाम्, अन्यान्यशैक्षिकसंसाधनानां च सङ्ग्रहः वर्तते। संस्कृत/शास्त्रसम्बद्धाः ग्रन्थाः विरलोपलभ्याः, पाण्डुलिपिनिष्ठाः च सन्ति। तेषां ग्रन्थानां सामान्यरूपेण एवं वर्गीकरणं कर्तुं शक्यते।

- विरलपुस्तकानि/ पाण्डुलिपयः/ तालपत्राणि/ कागदम्/ भूर्जपत्राणि/ इतरपत्राणि
- निर्णयसागरः इत्यादौ प्राचीनस्थाने  प्रकाशितानि पुस्तकानि
- प्रकाशकस्य नाम
- लेखकस्य नाम
- प्रतीनां संख्या
- प्रकाशनवर्षम् इत्यादि।

विश्वविद्यालयस्य परिसरेषु विद्यमानानां तादृशपुस्तकानां हस्तप्रतीनां च विवरणम् एवं वर्तते।

### १.गङ्गानाथझा परिसरः, प्रयागराजः

- **विरलपुस्तकानि/ / तालपत्राणि/ कागदम्/ भूर्जपत्राणि/ इतरपत्राणि – KCC 5331**
- **विरलपाण्डुलिपयः - 56475**

कश्मीरशैवदर्शनस्य पुस्तकानि, शारदालिप्यां लिखिताः मातृकाः इति दुर्लभग्रन्थाः व्यवस्थितरूपेण संरक्षिताः सन्ति।

### ३. श्रीसदाशिवपरिसरः, पुरी

- पण्डित हरिहर दाशग्रन्थालये तालपत्रेषु लिखिताः दुर्लभाः पाण्डुलिपिग्रन्थाः संरक्षिताः सन्ति ।

### ४. जयपुरपरिसरः

- **मधुसूदन ओझा पुस्तकालये 32,296 संख्यया मुद्रितपुस्तकानि सन्ति।**
- 24 ई-पुस्तकानि सन्ति।
- 250  मुद्रितनियतकालिकाः पत्रिकाः सन्ति।
- 315 शोधप्रबन्धाः सन्ति।
- 188 शोधच्छात्राणां शोधप्रबन्धाः सन्ति।
- 100 अत्यन्तं दुर्लभानि पुस्तकानि सन्ति।
- कानिचन  दुर्लभानि पुस्तकानि स्वतन्त्रतायाः पूर्वं प्रकाशितानि।
- बह्व्यः प्राचीनपत्रिकाः  विशेषरूपेण सङ्ग्रहीताः सन्ति।
- 100 पुस्तकानि राजस्थानसाहित्यसम्बद्धानि। तानि  विशिष्टसंस्कृतेः प्रतिनिधित्वं वहन्ति।
- 30 पत्रिकाः, 12 वार्त्तापत्रिकाः च सन्ति।

### ५. श्रीराजीवगान्धी परिसरः , शृङ्गेरी

- तालपत्रेषु लिखिताः ग्रन्थाः **128** संख्यकाः सन्ति। एताः मातृकाः व्यवस्थितरूपेण संरक्षिताः सन्ति।

### ६. वेदव्यासपरिसरः, गरली

- साहित्यम्, ज्योतिषम्, न्यायः, अद्वैतवेदान्तः, सांख्यम्, मीमांसा, रामायणम्, धर्मशास्त्रम्, महाभारतम्, तन्त्रम्, उपनिषदः, संहिता, शिक्षाशास्त्रम्, आङ्ग्लम्, हिन्दी इत्यादिविषयकानि  25,000 तः अधिकानि मुद्रितपुस्तकानि सङ्गृहीतानि सन्ति।

### ७. भोपालपरिसरः

- भोपालपरिसरस्य वररुचिग्रन्थालये पुस्तकानां महान् सङ्ग्रहः वर्तते। शिक्षा, सङ्गणकविज्ञानम्, मानविकीशास्त्रम्, सामाजिकविज्ञानम्, हिन्दी, आङ्ग्लम् इत्यादिविषयकानि पुस्तकानि वर्तन्ते। विशिष्टाः पत्रिकाः, सामान्याः पत्रिकाः, शोधप्रबन्धाः च सङ्गृहीताः सन्ति। तेषां संख्या प्रायेण **20940** वर्तते। ग्रन्थालये तानि पुस्तकानि व्यवस्थिततया स्थापितानि वर्तन्ते।
- छात्राणाम् उद्योगिनां च सुलभतया प्राप्तव्यतया पुस्तककोषे 1537 पुस्तकानि संरक्षितानि। एतानि **20940** पुस्तकेषु न अन्तर्भवन्ति।
- 59 पुस्तकानि विश्वकोशपराणि वर्तन्ते।
- साप्ताहिकी, मासिकी, त्रैमासिकी, अर्धवार्षिकी वार्षिकी च पत्रिकाः बहुसंख्यायां सन्ति।
- **5 अन्ताराष्ट्रिय –पत्रिकाः सन्ति।**
- 2 अनुशीलिते समीक्षात्मिके च पत्रिके स्तः।

### ८. क. जे. सोमैयापरिसरः, मुम्बई

- **116** दुर्लभानि पुस्तकानि संरक्षितानि सन्ति।

### ९. गुरुवायूरु परिसरः, केरलम्

- 172 दुर्लभाः पाण्डुलिपिग्रन्थाः सन्ति। तेषां पाण्डुलिपिग्रन्थानां व्यवस्थितरूपेण संरक्षणं विहितं वर्तते।
- **32208** पुस्तकानि छात्राणाम् उद्योगिनां च कृते उपलब्धानि सन्ति ।

### १०. श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

- कालिदासविरचितस्य अभिज्ञानशाकुन्तलस्य राघवभट्टीयव्याख्योपेतस्य गोडेबोले नारायण बालकृष्णद्वारा सम्पादितस्य 1926वर्षे प्रकाशितस्य संरक्षणं कृतं वर्तते।
- भवभूतिविरचितं मालतीमाधवम्, भट्टाचार्यद्वारा सम्पादितम्। प्रकाशनवर्षम् **1936**
- मम्मटभट्टविरचितस्य काव्यप्रकाशस्य गिरिधर लाल व्यासद्वारा सम्पादितस्य संरक्षणं विहितम्। 1934 तमे वर्षे प्रकाशितम्।
- मम्मटभट्टविरचितस्य काव्यप्रकाशस्य गिरिधर लाल व्यासद्वारा सम्पादितस्य संरक्षणं विहितम्। 1948 तमे वर्षे दिल्ली-शारदामन्दिरद्वारा पुनः प्रकाशितम्।
- आनन्दवर्धनविरचितः ध्वन्यलोकः 1953 तमे वर्षे चौखम्बातः प्रकाशितः।
- महाकविमाघविरचितं शिशुपालवधम्, देववल्लभ- मल्लिनाथयोः व्याख्याद्वयेन युक्तम्, 1985 तमे वर्षे प्रकाशितम्।

उपरिनिर्दिष्टानां तेषां ग्रन्थानां सम्पादनं शोधकार्यं वा अपेक्षितं वर्तते। शोधच्छात्राः तस्मिन् कर्मणि प्रेर्यन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Provide link for additional information | View Document |

*4.2.3 Does the Institution/ Library have the following:*

1. *Back Volumes of Rare Sanskrit Journals/Indological Journals/Journals Related to Sanskrit Studies like Indian Historical Quarterly (IHQ)/ Annals of Bhandarkar Oriental Research Institute (ABORI)/Brahmavidya/Sarasvati-sushama etc*
2. *Sanskrit magazines and Sanskrit Periodicals*
3. *e-journals*

4. *e-books*
5. *e-dictionaries of Sanskrit*
6. *Sanskrit Databases*
7. *Bharatavani Portal*
8. *CD's/ DVD's/ other e-materials for the study of Vedas*
9. *Electronic Display Board*
10. *Internet/Wifi Facility*
11. *Search Facility*
12. *Reprographic facility*

***ग्रन्थालये अधोदर्शितानि कियन्ति सन्ति ?***

1. ***विरलसंस्कृतपत्रिकाणां/भारतीयविद्यापत्रिकाणां प्राचीनसम्पुटानि/ संस्कृतविद्यासम्बद्धपत्रिकाः यथा – भारतीयेतिहासत्रैमासिकी/ भण्डारकरप्राच्यविद्यापत्रिका/ ब्रह्मविद्या/ सारस्वतीसुषमाप्रभृतयः***
2. ***संस्कृतपत्रिकाः नियतकालिकसंस्कृतपत्रिकाश्च***
3. ***ई-पत्रिकाः***
4. ***ई-पुस्तकानि***
5. ***ई-संस्कृतभाषाकोषाः***
6. ***संस्कृततदत्तांशनिधिः***
7. ***भारतवाणीसंसाधनानि***
8. ***वेदग्रन्थानां पाठनाय ध्वनिमुद्रिकाः सान्द्रमुद्रिकाः अन्याश्च***
9. ***ई-प्रदर्शनफलकम्***
10. ***अन्तर्जाल/निस्तन्त्रिजालसौविध्यम्***
11. ***सङ्गणकीयगवेषणसौविध्यम्***
12. ***छायाप्रतिसौविध्यम्***

**Answer:** A. Any 4 or more of the above 1. उपरि निर्दिष्टेषु ये केचित् चत्वारः अथवा सर्वे

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Details of subscriptions like e-journals, e-ShodhSindhu, Shodhganga Membership etc (Institutional data as per Data Template) | View Document |

***4.2.4 Average annual expenditure for purchase of books/e-books and journals during the last five years (INR in Lakhs)***

***पुस्तकानाम्/ ई-पुस्तकानां पत्रिकाणां च क्रयणाय विगतेषु पञ्चसु वर्षेषु व्ययितस्य धनस्य वार्षिकं मध्यमानम्। (लक्षशः)***

**Answer:** 58.71

4.2.4.1 Annual expenditure for purchase of books/e-books and journals year-wise during the last five years (INR in lakhs)

पुस्तकानाम्/ ई-पुस्तकानां पत्रिकाणां च क्रयणाय विगतेषु पञ्चसु वर्षेषु व्ययितस्य धनस्य वार्षिकः व्ययः (लक्षशः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 6.16 | 3.41 | 6.95 | 3.01 | 13.35 |

| File Description | Document |
|---|---|
| Details of annual expenditure for purchase of books/e-books and journals during the last five years (Institutional data as per Data Template) | View Document |
| Audited statements of accounts | View Document |
| Any additional information | View Document |

***4.2.5 Percentage per day usage of library by teachers and students (Latest completed academic year data)***

***अध्यापकैः छात्रैश्च प्रतिदिनं ग्रन्थालयोपयोगस्य प्रतिशतं मानम् (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 15.59

4.2.5.1 ***Number of teachers and students using library per day over last one year.***

**गतवर्षे प्रतिदिनं ग्रन्थालयोपयोगं कृतवताम् अध्यापकानां छात्राणाञ्च सङ्ख्या।**

Answer: 998

| File Description | Document |
|---|---|
| Details of library usage by teachers and students | View Document |
| Any additional information | View Document |
| Provide a link of the data uploaded in the institutions website | View Document |

***4.2.6 e-content is developed by teachers :***

***1. For e-PG-Pathashala***
***2. For CEC (Under Graduate)***
***3. For SWAYAM***
***4. For other MOOCs platform***
***5. Any other Government initiative***
***6. For institutional LMS***
***7. e-books Uploaded on Website, Youtube channels etc***

***अध्यापकैः विकासिताः ई-सामग्र्यः***

***1. ई-पीजी-पाठशालायै***
***2. शैक्षिक-सम्प्रेषण-सङ्घाय (स्नातकस्तरे)***
***3. 'स्वयम्' इत्यस्मै***
***4. अन्य 'मूक्स' इत्याधाराय***
***5. अन्येभ्यः सर्वकारीयोपक्रमेभ्यः***
***6. सांस्थानिक्यै अधिगमप्रबन्धनप्रणाल्यै***
***7. जालस्थाने उपारोपिताः ई-ग्रन्थाः, यूट्यूब्-वाहिन्यः इत्यादयः***

**Answer:** A. Any 4 or more of the above अ. उपरि निर्दिष्टेषु ये केचित् चत्वारः अथवा ततोऽप्यधिकाः

| File Description | Document |
|---|---|
| Details of e-content developed by teachers for e-PG-Pathshala, CEC (UG) (Institutional data as per Data Template) | View Document |
| Any additional information | View Document |
| Give links or upload document of e-content developed | View Document |

***4.2.7 Number of books based on Modern Knowledge System in Sanskrit knowledge tradition (Simple Standard Sanskrit) added to the library during the last five years.***

***विगतेषु पञ्चसु वर्षेषु आधुनिकज्ञानप्रणालीम् आश्रित्य संस्कृतज्ञानपरम्पराधारितानां (सरलमानकसंस्कृतेन लिखितानां) ग्रन्थालये वर्धितानां ग्रन्थानां सङ्ख्या।***

**Answer:** 493

| File Description | Document |
|---|---|
| List of books | View Document |
| As per Data Template | View Document |
| Any additional information | View Document |

**4.3 IT Infrastructure**

***4.3.1 Institution has an IT policy, makes appropriate budgetary provisions and updates its IT facilities including the Wi-Fi facility***

***संस्था सूचनाप्रौद्योगिकीनीतिं दधाति, तदर्थं पर्याप्तं वित्तीयं प्रावधानं च करोति, तथा च निस्तन्त्रिसौविध्यसहितानि सूचनाप्रौद्योगिकीयसौविध्यानि नवीकरोति।***

**Answer:**

साम्प्रतिके काले शौक्षिकेषु प्राशासनिकेषु च कार्येषु निस्तन्त्रिव्यवस्थायाः अन्तर्जालव्यवस्थायाश्च अनिवार्यता वर्तते। काले काले व्यवस्थायाः अस्याः संवर्धनं मुख्यं कर्म भवति। अतः परिवर्त्यमानायाः अपेक्षायाः अनुसारं विश्वविद्यालयद्वारा सङ्गणकेषु तन्त्रांशस्य स्थापना क्रियते। सङ्गणकीय- कार्यतन्त्रस्य यथासमयं संवर्धनमपि विधीयते। वैराणुनिरोधकः सङ्गणकस्य रक्षाकवचः भवति। अतः समये समये वैराणुनिरोधकस्य नवीकरणं क्रियते।

- सङ्गणकानां लघु समीकरणकार्यं/ शोधनं चेत्तत् परिसरस्तरे सम्पद्यते। यदि **हार्ड- डिस्क्** इत्यादिषु अवयवेषु मुख्यं शोधनम् अपेक्षितम् तर्हि सम्बद्धायाः संस्थायाः यन्त्रज्ञद्वारा शोधनं कार्यते।
- **निस्तन्त्रि अक्षरफलकं, मौस्** इत्यादिकं वस्तुजातं तान्त्रिकव्यवस्थायां नवीनत्वं निरूपयति। अतः विश्वविद्यलयीय -तान्त्रिकव्यवस्थायां तादृशानि अक्षरफलकानि संयोजितानि।
- गुणोत्कृष्टं **मुद्रणयन्त्रम्** (Printer) मुद्रणे उत्कर्षम् आनयति। अतः विश्वविद्यालये परिसरेषु च गुणोपेतं मुद्रणयन्त्रं व्यवस्थापितं वर्तते।
- अन्तर्जालस्य वेगवर्धने, बहुसम्पर्चणे च 'Wi-Fi साधनम्' महोपकारकं वर्तते। छात्राणाम् अध्यापकानां कर्मचारिणां च उपयोगाय परिसरेषु Wi-Fi व्यवस्था कल्पिता वर्तते। काले काले तस्याः व्यवस्थायाः संवर्धनं नवीकरणं च विधीयमानम् अस्ति।
- परिसरेषु विद्यमानायां भाषाप्रयोगशालायां तन्त्रांशः काले काले नवीकृतो वर्तते।
- परिसरेषु ई-सामग्रीणां निर्माणं विहितं वर्तते। Covid 19 विषमकाले छात्र- अध्यापकयोः सम्पर्कसाधनन्तु अन्तर्जालमेव अभवत्। अन्तर्जालावलम्बि- अध्यापनकर्मणा छात्राः क्लेशम् अन्वभूवन्। तेषु वेगवतः तत्साधनस्य

दौर्लभ्यात्। तस्मिन् काले **Wi-Fi साधनस्य अपेक्षाः अवर्धन्त।** अपेक्षानुगुणं विश्वविद्यालयद्वारा तत्स्थापितं वर्तते। तस्मिन् विषमकाले **ई-अध्ययनसामग्रीनिर्माणकार्यम्** आरभ्यत। तत्परिणामेन सम्प्रति विविधेषु शास्त्रीयेषु विषयेषु ई-सामग्र्यः निर्मिताः अभूवन्।

- विश्वविद्यालयः भारतसर्वकारस्य 'डिजिटल् इंडिया' इति योजनाम् अनुसरति। तां सफलयितुं प्रयतते। अतः विश्वविद्यालयः आत्मनः परिसराणां च कार्यालयेषु कागजरहितं पत्रव्यवहारम् उत्तेजयति।
- सर्वेषां सदस्यानां पात्त्रिकं सम्पर्कम् अपि ई-मैल् माध्यमेन निर्वहति। तदर्थं सर्वेभ्यः विश्वविद्यालयस्य सदस्येभ्यः वैद्युत-पत्राङ्कः प्रदत्तः वर्तते। सदस्याः सूचनापत्राणि, अधिसूचनानि, आदेशपत्त्राणि, निर्देशपत्त्राणि च वैद्युतपत्त्राङ्कद्वारा प्राप्नुवन्ति। छात्राश्च स्वीयं **वैद्युत-पत्त्राङ्कं** रक्षन्ति। प्रवेशप्रक्रिया, परीक्षाशुल्कप्रदानम् इत्यादिकार्यार्थं तेषां कृते वैद्युत-पत्त्राङ्कस्य अनिवार्यता कृता वर्तते। तद्द्वारा ते शुल्कप्रदानादिकार्यं निर्वहन्ति। प्राक्-शास्त्रिपाठ्यक्रमे प्रविविक्षूणां प्रवेशपरीक्षा सद्यस्कमाध्यमेन क्रियते। अभ्यर्थिनः **मोबाइल् द्वारा वौद्युतप्रश्नपत्त्रं** प्राप्य निर्दिष्टे समये उत्तरन्ति। इयं व्यवस्था अपि 'डिजिटल् इंडिया' इति योजनां प्रोत्साहयति।
- परिसरेषु सर्वोऽपि वित्तीयः व्यवहारः सद्यस्कमाध्यमेन प्रवर्तनीयः इत्यतः तादृशी व्यवस्था कल्पिता वर्तते। उद्योगिनां वेतनम्, छात्राणां छात्रवृत्तिः, शोधच्छात्राणां शोधवित्तिः, अन्यानि देयानि च सद्यस्कमाध्यमेन प्रवर्त्यन्ते। विश्वविद्यालयः एतानि कार्याणि सद्यस्कमाध्यमेन निर्वहन् 'डिजिटल् इंडिया' इति योजनाम् ईश्वरीकरोति।
- छात्राणाम्, अध्यापकानाम्, उद्योगिनां च अपेक्षाः पूरयितुं विश्वविद्यालयः ICT सौलभ्यं काले काले नवीकरोति।
- **दर्शनीयकक्ष्या (स्मार्ट्-क्लास्)** व्यवस्थापिता वर्तते। विशेषतः शिक्षाशास्त्रिच्छात्रेषु, शिक्षाचार्यच्छात्रेषु च शैक्षणिकप्रविधेः, अध्यापनकौशलानां च आधाने इयं कक्ष्या बहूपयोगिनी वर्तते।
- साम्प्रतं वैद्युत-वेदिकायाः सर्वत्र विद्यमानं प्राधान्यं जानता विश्वविद्यालयेन कागजस्योपयोगम् अत्यर्थमेव न्यूनीकरोति। प्रक्रियायां पारदर्शकता बहुगुणेन वर्ध्यते। विश्वविद्यालयस्य शैक्षिककार्याणां प्रसारः ट्विट्टर्, फेस् बूक् माध्यमेन क्रियमाणो वर्तते। **छात्राणां वाट्स्-आप् गणाः निर्मिताः सन्ति।** तेन कक्ष्यायाः टिप्पणीः, शैक्षणिकवार्त्ताः च छात्रैः तूर्णं प्राप्तुं शक्यन्ते।
- कक्ष्यासु छात्राणाम् उपस्थितिग्रहणाय वैद्युत- उपस्थितिपुस्तिका सज्जीकृता। तेन समयस्य, कागजस्य च अधिकव्ययः न भविष्यति। अस्याः पुस्तिकायाः कार्यान्वयः भागशः अभवत्।

**विश्वविद्यालयस्य उच्चशिक्षासंस्थानस्य च कार्यनिर्वहणाय वैद्युतमाध्यमः वर्तते समर्थपटलम्। सर्वकारीयस्य अस्य पटलस्य मुक्तता, सुरक्षता, प्रामाणिकता इति गुणाः वर्तन्ते। विश्वविद्यालयस्य सर्वे शैक्षिकसदस्याः समर्थपटले स्वीयं शैक्षिकं सामाजिकं प्राशासनिकं कार्यं तत्र उपारोपयन्ति।** विभिन्नयोग्यताः अपि तत्र आरोपयन्ति। तेन सदस्य-दत्तांशाः समये प्राप्तुं शक्यन्ते। सम्प्रति अस्य समर्थपटलस्य उपयोगः आरब्धो वर्तते। अनतिकाले पूर्णरूपेण तदुपयोगः सम्पत्स्यते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide the link for additional information | View Document |

***4.3.2 Student - Computer ratio (Latest completed academic year data)***

***छात्र –सङ्गणकयन्त्रानुपातः (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 15.59

4.3.2.1 ***Total number of computers in the campus for academic purpose.***

पठनप्रक्रियार्थं परिसरेषु वर्तमानानां गणकयन्त्राणां सङ्ख्या

Answer: 645

| File Description | Document |
|---|---|
| Student – computer ratio | View Document |
| Geotagged photo | View Document |

***4.3.3 Available bandwidth of internet connection in the Institution***

***संस्थायाम् अन्तर्जालस्य (साक्षाद्दीर्घकालिकस्य) वेगसामर्थ्योपलब्धिः***

**Answer:** A. ≥1 GBPS 1. ≥1 जीबीपीएस्

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Details of available bandwidth of internet connection in the Institution | View Document |

***4.3.4 ICT enabled facilities at DDE: Percentage of the classrooms and seminar halls of the DDE with ICT enabled facilities***

***दूरस्थशिक्षानिदेशालये सूचना-सञ्चार-प्रौद्योगिकीसंबलितानि सौविध्यानि - दूरस्थशिक्षानिदेशालये सूचना-सञ्चार-प्रौद्योगिकी-संबलितसौविध्ययुतानां कक्ष्याणां सङ्गोष्ठीकक्ष्याणां च प्रतिशतं मानम्।***

**Answer:** 46.88

4.3.4.1 Number of classrooms and seminar halls of the DDE (cumulative) with ICT enabled facilities

दूरस्थशिक्षानिदेशालये सूचना-सञ्चार-प्रौद्योगिकी-संबलितसौविध्ययुतानां कक्ष्याणां सङ्गोष्ठीकक्ष्याणां च सङ्ख्या (सञ्चिता)

Answer: 15

4.3.4.2 Total number of classrooms and seminar halls of the DDE (cumulative)

दूरस्थशिक्षानिदेशालयस्य कक्ष्याणां सङ्गोष्ठीकक्ष्याणां च सम्पूर्णा सङ्ख्या (सञ्चिता)

Answer: 32

| File Description | Document |
|---|---|
| Photographs of infrastructure facilities at DDE | View Document |
| As per Data Template | View Document |
| Any other relevant information | View Document |

**4.4 Maintenance of Campus Infrastructure**

***4.4.1 Percentage of expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component during the last five years***

***विगतेषु पञ्चसु वर्षेषु वैतनिकघटकं विहाय भौतिकसौविध्यानाम् अनुरक्षणार्थं शैक्षिकसाहाय्यसौविध्यार्थं च व्ययस्य प्रतिशतं मानम्***

**Answer:** 59.06

4.4.1.1 Expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component year-wise during the last five years (INR in lakhs)

विगतेषु पञ्चसु वर्षेषु वैतनिकघटकं विहाय भौतिकसौविध्यानाम् अनुरक्षणार्थं शैक्षिकसाहाय्यसौविध्यार्थं च वार्षिकः व्ययः (लक्षशः रूप्यकेषु)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 7059.63 | 5846.01 | 7645.38 | 6232.72 | 5440.41 |

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Details about assigned budget allocation and expenditure on physical facilities and academic facilities (Data Templates as in 4.1.4) | View Document |
| Audited statements of accounts. | View Document |

***4.4.2 Established systems and procedures for maintaining and utilizing physical, academic and support facilities - laboratory, library, sports complex, computers, classrooms etc., exists.***

***प्रयोगशाला-ग्रन्थालय-क्रीडाङ्गण-सङ्गणकयन्त्र-पठनकक्ष्या-प्रभृतीनां भौतिक-शैक्षणिक-सहायकसौविध्ययुतानां परिरक्षणार्थं समुपयोगार्थं च संस्थायां सुनिश्चिता प्रणाली कार्यपद्धतिश्च विद्यते।***

**Answer:**

संस्थायां, प्रयोगशाला-ग्रन्थालय-क्रीडाङ्गण-सङ्गणकयन्त्र-पठनकक्ष्या-प्रभृतीनां भौतिक-शैक्षणिक-सहायकसौविध्ययुतानां परिरक्षणार्थं समुपयोगार्थं च सुनिश्चिता प्रणाली कार्यपद्धतिश्च विद्यते। संरचिताभिः परिषद्भिः समितिभिः वा निर्दिष्टानां कार्याणां निर्वाहः क्रियते। विश्वविद्यालये/ परिसरेषु प्रयोगशालादीनां परिरक्षणाणार्थं समुपयोगार्थं च समितयः संरचिताः वर्तन्ते। विषयविशेषज्ञाः, शैक्षिकप्रमुखाः, छात्रप्रतिनिधयः च समितिषु भवन्ति।

- ग्रन्थालयपरामर्श/ पुस्तकक्रयणसमितिः –**समितिः काले काले अपेक्षितानां पुस्तकानां क्रयणम् अनुशंसति। प्राचीनानां पुस्तकानां विसर्जनं जीर्णानां बैण्डिंग् कार्यं च अनुशंसति।**

ग्रन्थालये पुस्तकविभागः, आडियो/वीडियो विभागः च वर्तते। तत्र पुस्तकानाम्, सङ्गणकानाम्, पीठोपकरणानां च संरक्षणम्, **कीटनिरोधकप्रयोगः** इत्यादिकार्यं यथापेक्षं क्रियते।

- क्रीडासमितिः –समितिः छात्राणां विविधक्रीडानां निर्वाहं करोति। अन्तःपरिसरीयाः युवमहोत्सवस्पर्धाः, परिसरीयाः वार्षिकस्पर्धाः राज्यस्तरीयादिस्पर्धाः इत्येतासु स्पर्धासु छात्राः प्रशिक्ष्यन्ते। क्रीडाङ्गणस्य लघुनिर्वाहः समितिसूचनानुसारं सम्पद्यते। मुख्यं निर्वहणं लोकनिर्मितिकेन्द्रद्वारा (CPWD) क्रियमाणं वर्तते। अत्र क्रीडाङ्गणेषु अभ्यस्तक्रीडाः विश्वविद्यालयस्य छात्राः अन्यविश्वविद्यालयानां छात्रैः सह समबलेन स्पर्धितुं शक्नुवन्ति।
- लेखनसामग्री-क्रयणसमितिः –अपेक्षिताः लेखनसामग्रीः क्रेतुम् अनुशंसां करोति।

- सामग्रीक्रयणसमितिः –सङ्गणकम्, श्वेतफलकम्, कवाटिका इत्यादेः वस्तुजातस्य काले काले क्रयणाय अनुशंसां ददाति।
- समीकरण-निर्वहणसमितिः – भवनेषु कार्ये जीर्णानाम् /अनुपयुक्तानां वस्तूनां परिशीलनम् इयं समितिः करोति। **विद्युद्दीपः, व्यजनम्, द्वारम्, वातायनम्, उत्पीठिकाः, आसनानि, सङ्गणकानि इत्यादीनां नाशोन्मुखानां समीकरणाय अनुशंसां करोति।**

मुख्यं समीकरणकार्यं लोकनिर्मितिकेन्द्रद्वारा (CPWD) सम्पद्यते। यथा जलनिर्वहणम्, विद्युदुपकरणानि, भवनेषु मुख्यतया क्रियमाणानि समीकरणकार्याणि इत्यादीनि। भवनस्य भित्तिषु वलभिषु वा जायमानः जलस्रावः निर्मितिकेन्द्रद्वारा समीक्रियते।

- परिसरसौन्दर्यनिर्वहणसमितिः – अनया समित्या भवनानां/ प्रकोष्ठानां शुभ्रताविषये अवधानं दत्तं वर्तते। समितिरियं मार्जनप्रकोष्ठानां शुचित्वं परिशीलयति। भवनानि परितः विद्यमानस्य प्रदेशस्य नैर्मल्यरक्षणे समितेः मुख्या दृष्टिः वर्तते। परिसरेषु प्लास्टिक् उपयोगविषये जागर्या वर्तते। अवकराणां प्रतिदिनम् अन्यत्र नयनेन निर्वहणं सम्पद्यते। **उद्याननिर्वहणम्, वाटिकानिर्वहणम्, अवान्तरमार्गाणां निर्वहणम्, यानमुक्तवातावरणस्य निर्वाहः इत्यादिषु विषयेषु परिसराः अवधानं यच्छन्ति।**
- नाटकसांस्कृतिकसमितिः –समितिः अन्तःपरिसरीयनाट्यमहोत्सवे प्रदर्शनार्थं निर्दिष्टस्य रूपकस्य सिद्धतां करोति। परिसरेषु प्रवर्तमानानां सांस्कृतिककार्यक्रमाणां मार्गदर्शनं च करोति। अत्र कलासामग्रीणाम् उपयोगः क्रियते।
- सद्यस्ककक्ष्यासर्वेक्षणसमितिः Covid19 समये इयं समितिः घटिता। इयं **सद्यस्ककक्ष्यायाः सञ्चालनस्य सर्वेक्षणकार्यम् अकरोत्।**
- सङ्गणकीयकक्ष्यायाः प्रायोगिककक्ष्यायाः सञ्चालनम्, छात्रैः आवेदनपत्रपूरणम् इत्यादीनां कार्याणां सम्पादनाय सङ्गणकशालायाः निर्वहणं क्रियते।
- छात्राणां भाषाध्ययनकौशलस्य ज्ञानाय भाषाप्रयोगशालायाः निर्वहणं क्रियमाणं वर्तते। संस्कृतभाषायाः आङ्ग्लभाषायाश्च वाक्कौशलस्य सम्पादनाय एकं मुख्यं सङ्गणकम्, अन्यानि निर्देशवाहि-सङ्गणकानि भाषाप्रयोगशालायां योजितानि वर्तन्ते।
- शिक्षापाठ्यक्रमे विद्यमानानां मनोवैज्ञानिकप्रयोगाणां दर्शनाय मनोवैज्ञानिकप्रयोगशालायाः निर्वहणं क्रियते। सङ्गणकज्ञाः एतासाम् शालानां निर्वहणार्थं निर्दिष्टा भवन्ति। तत्र **जनरेटर् व्यवस्था** कल्पिता विद्यते।
- बालकानां बालिकानां च पृथक्तया छात्रावासः वर्तते। प्रकोष्ठेषु विद्युद्दीपः, व्यजनम्, मञ्चः, कवाटिका इत्यादीनि सौविध्यानि कल्पितानि । छात्रावासस्य निर्वहणाय छात्रावासाध्यक्षः नियुक्तो वर्तते।
- विकलचेतनानां कृते आनुकूल्यं कल्पितं वर्तते। तेषां गमनागमनयोः सौविध्याय निम्नावरोही मार्गः कल्पितो वर्तते।
- मुख्यस्थानेषु भवनं परितः उन्नताः प्राकाराः निर्मिताः सन्ति। **गूढचक्षूंषि (CCTV) योजितानि सन्ति। परिसरेषु रक्षकभटाः** नियुक्ताः वर्तन्ते।

**शैक्षिणिक-सहायकसौविध्यानां समुपयोगाय अन्याः अपि समितयः परोक्षतया साहाय्यम्** आचरन्ति। केन्द्रीय/ स्थानीयशोधमण्डली, एंटी रैगिंग सेल, स्वस्थसंवादसमितिः, छात्रकल्याणसमितिः, अनुशासनसमितिः, प्रकाशनसमितिः, मानवाधिकार/यौन-उत्पीडनसमितिः, छात्रपरामर्श- नियुक्तिसमितिः इत्यादयः।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

**5.Student Support and Progression**

**5.1 Student Support**

***5.1.1 Percentage of students benefited by scholarships/ freeships provided by the Government and non-government bodies/ industries/ individuals/ philanthropists/UGC/ Central Sanskrit University (Formerly Rashtriya Sanskrit Sansthan) during the last five years***

***विगतेषु पञ्चसु वर्षेषु सर्वकारद्वारा असर्वकारीयनिकारयद्वारा च/ उद्यमकेन्द्रद्वारा/ व्यक्तिद्वारा/ समाजसेविद्वारा/ वि.अ.आ द्वारा/ केन्द्रीयसंस्कृतविश्वविद्यालय (प्राक्तनराष्ट्रियसंस्कृतसंस्थान) द्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां प्रतिशतं मानम्।***

**Answer:** 54.18

5.1.1.1 Number of students benefited by scholarships/ freeships provided by the Government and non-government bodies/ industries/ individuals/ philanthropists/UGC/ Central Sanskrit University (Formerly Rashtriya Sanskrit Sansthan) year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु सर्वकारद्वारा असर्वकारीयनिकारयद्वारा च/ उद्यमकेन्द्रद्वारा/ व्यक्तिद्वारा/ समाजसेविद्वारा/ वि.अ.आ द्वारा/ केन्द्रीयसंस्कृतविश्वविद्यालय (प्राक्तन राष्ट्रियसंस्कृतसंस्थान) द्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 3124 | 2480 | 2824 | 3068 | 2683 |

| File Description | Document |
|---|---|
| upload self attested letter with the list of students sanctioned scholarship | View Document |
| Average percentage of students benefited by scholarships and freeships provided during the last five years (Institutional data as per Data Template) | View Document |

***5.1.2 Percentage of students benefited by scholarships, freeships,etc. provided by the institution besides Government schemes during the last five years***

***विगतेषु पञ्चसु वर्षेषु सर्वकारीययोजनातिरिक्तं संस्थया प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिश्च लाभान्वितानां छात्राणां प्रतिशतं मानम्।***

**Answer:** 54.18

5.1.2.1 ***Number of students benefited by scholarships, freeships, etc provided by the institution besides government schemes year-wise during the last five years.***

विगतेषु पञ्चसु वर्षेषु सर्वकारीययोजनातिरिक्तं संस्थया प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिश्च लाभान्वितानां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 3124 | 2480 | 2824 | 3068 | 2683 |

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload any additional information | View Document |
| Number of students benefited by scholarships and freeships besides government schemes in last 5 years (Institutional data as per Data Template) | View Document |

***5.1.3 Number of capability enhancement and development schemes***

***1. Guidance for competitive examinations***
***2. Career counselling***
***3. Softskill development***
***4. Remedial coaching***
***5. Language lab***
***6. Bridge courses***
***7. Yoga and Meditation***
***8. Personal Counselling***
***9. Training for deciphering ancient manuscripts***
***10. Training on Composing Sanskrit Creative poetry and Dramaturgy***
***11. Shastra Vakyartha Training***
***12. Proof Reading for Devanagari Texts***
***13. Spoken Sanskrit Classes***
***14. Foreign Language Study and Training***
***15. Training on Vedic Recitation with correct Intonation***
***16. Training on Karma-Kanda***
***17. Fine Arts, Performing Arts and Theatre***

***सामर्थ्यसंवर्धनाय तद्विकासाय च सञ्चालितानां योजनानां सङ्ख्या***

***1. स्पर्धात्मकपरीक्षाणां कृते मार्गदर्शनम्***
***2. वृत्तिपरामर्शः***
***3. सूक्ष्मकौशलविकासः***
***4. उपचारात्मकम् अनुशिक्षणम्***
***5. भाषाप्रयोगशाला***
***6. सेतुपाठ्यक्रमाः***
***7. योगः ध्यानं च***
***8. वैयक्तिकपरामर्शः***
***9. प्राचीन-पाण्डुलिपि-पठनप्रशिक्षणम्***
***10. काव्यलेखन-नाट्यप्रशिक्षणम्***
***11. शास्त्रार्थ/वाक्यार्थ-प्रशिक्षणम्***
***12. देवनागरी-मुद्राक्षरशोधनप्रशिक्षणम्***
***13. संस्कृतसम्भाषणप्रशिक्षणम्***
***14. वैदेशिकभाषाध्ययनम्***
***15. वेदानां सस्वरपाठप्रशिक्षणम्***
***16. कर्मकाण्डप्रशिक्षणम्***
***17. ललितकला प्रदर्शनकला अभिनयकला वा***

**Answer:** A. 10 or more of the above 1. उपर्युक्तेषु ये केचिद् दश अथवा ततोऽप्यधिकाः

| File Description | Document |
|---|---|
| Details of capability enhancement and development schemes (Institutional data as per Data Template) | View Document |

| | |
|---|---|
| Any additional information | View Document |
| Link to Institutional website | View Document |

***5.1.4 Percentage of students benefited by guidance for competitive examinations and career counselling offered by the institution during the last five years***

***विगतेषु पञ्चसु वर्षेषु संस्थया प्रदत्तेन स्पर्धात्मकपरीक्षामार्गदर्शनेन वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां प्रतिशतं मानम्।***

**Answer:** 35.91

5.1.4.1 ***Number of students benefited by guidance for competitive examinations and career counselling offered by the institution year-wise during the last five years.***

विगतेषु पञ्चसु वर्षेषु संस्थया प्रस्तुतेन स्पर्धात्मकपरीक्षामार्गदर्शनेन वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 2003 | 1912 | 1809 | 1767 | 1905 |

| File Description | Document |
|---|---|
| Number of students benefited by guidance for competitive examinations and career counselling during the last five years (Institutional data as per Data Template) | View Document |
| Any additional information | View Document |

***5.1.5 The Institution adopts the following for redressal of student grievances including sexual harassment and ragging cases***

1. ***Implementation of guidelines of statutory/regulatory bodies***
2. ***Organisation-wide awareness and undertakings on policies with zero tolerance***
3. ***Mechanisms for submission of online/offline students' grievances***
4. ***Timely redressal of the grievances through appropriate committees***

***संस्था लैङ्गिकम् उत्पीडनम् आधर्षणं च समावेश्य छात्रव्यथानां निवारणार्थं अधो लिखितान् आश्रयति -***

1. ***शासिकनिकायानां/नियामकनिकायानां मार्गदर्शिकायाः क्रियान्वयनम्।***
2. ***संस्थास्तरे जागरूकता अपि च शून्यसहिष्णुततया नीतीनाम् अनुसरणम्।***
3. ***छात्रव्यथानां निवारणाय अधितन्त्रि/अनधितन्त्रि क्रियाविधिः।***
4. ***समुचितसमितीभिः समयेन व्यथानां निवारणम्।***

**Answer:** A. All of the above अ. उपरि निर्दिष्टाः सर्वे

| File Description | Document |
|---|---|
| Minutes of the meetings of student redressal committee, Internal Complaints Committee prevention of sexual harassment committee and Anti-Ragging committee | View Document |
| Details of student grievances including sexual harassment and ragging cases | View Document |

***5.1.6 The Institution organises Inter-University Talent Festival, Vakyartha, Shastrartha, Salakapareeksha, Sanskrit elocution contest, Inter-Sanskrit-university Youth festival, Inter College Youth festival, Sanskrit Poets' Meet, special coaching or training in creative writing, Sanskrit-Poetry writing/DTP, Copy editing, Proof reading, Cultural tourism, Hospitality, Purana Pravachana, lalita-kala etc.***

***संस्था अन्तर्विश्वविद्यालयप्रातिभसमारोहं, वाक्यार्थसभां, शास्त्रार्थसभां, शलाकापरीक्षां, संस्कृतभाषणस्पर्धां, अन्तस्संस्कृत-विश्वविद्यालय-युवसमारोहम्, अन्तर्महाविद्यालय-युवसमारोहं, संस्कृत-कविसमवायादि-कार्यक्रमान् आयोजयति। अपि च सर्जनात्मकलेखनस्य, संस्कृतकाव्यलेखनस्य/ सङ्गणक-विज्ञान-विषयक-पुस्तकप्रकाशनस्य, प्रतिकृतिसम्पादनस्य, प्रेक्ष्यवाचनस्य (Proof Reading), सांस्कृतिकपर्यटनस्य, आतिथ्य-निर्वहणस्य, पुराण-प्रवचनस्य, ललितकलानाम् अन्येषां च विषयाणां विशिष्टम् अनुशिक्षणं/प्रशिक्षणं प्रददाति।***

**Answer:**

**केन्द्रीयसंस्कृतविश्वविद्यालयस्य केन्द्रबिन्दवः सन्ति तच्छात्राः** । छात्राणां सर्वातोमुखाभिवृद्धये विश्वविद्यालयः बहुविधान् शैक्षिकान् रचनात्मकान् सर्जनात्मकान् सांस्कृतिकान् च कार्यक्रमान् आयोजयति। अपेक्षितेषु क्रियाकलापेषु विशेषतः शिक्षणम् अनुशिक्षणं प्रशिक्षणं च प्रयच्छति। एतत्फलस्वरूपेणैव विश्वविद्यालयस्य छात्राः बह्वीसु स्पर्धासु कलासु च सर्वप्रथमस्थानम् अलङ्कुर्वन्ति । विश्वविद्यालयस्य पाठ्यसहागामिनः क्रियाकलापाः अत्यन्तं विशिष्टाः व्यापकाश्च सन्ति। अमीषां क्रियाकलापानाम् आयोजनात् प्राक् छात्राणां सज्जीकरणे संलग्नो भवति विश्वविद्यालयस्य शिक्षकगणः। विश्वविद्यालयस्य शिक्षकगणेन शिक्षिताः अनुशिक्षिताः प्रशिक्षिताश्च छात्राः भारतस्य कोणे कोणे सम्पद्यमानेषु कार्यक्रमेषु प्रतियोगितासु परीक्षासु शास्त्रार्थसभासु च भागं गृहीत्वा विजयवैजयन्त्या सहैव प्रत्यायान्ति। विश्वविद्यालयेन सङ्घटिताः विशिष्टाः क्रियाकलापाः यथा -

**1. अन्तःपरिसरीयः युवमहोत्सवः**

विश्वस्य सर्वाधिकसंस्कृतच्छात्रोपेतस्य संस्कृतविश्वविद्यालयस्यास्य बृहत्तमः उत्सवः नाम **अन्तःपरिसरीयः युवमहोत्सवः** एव। उपपञ्चाशत्सङ्ख्याकाः प्रतियोगिताः अत्र आयोज्यन्ते । क्रीडाकलावाद्यनृत्यलेखनसर्जननिर्माणादिषु विविधविभागेषु स्पर्धाः आयोज्यन्ते । एकैकस्मिन् वर्षे एकैकस्मिन् परिसरे प्रवर्तमाने अस्मिन् महोत्सवे प्रत्येकं परिसरस्य चिताः एव प्रतिभाशालिनः भागं गृहीत्वा स्वीयाम् अनितरसाधारणीं प्रतिभां प्रदर्शयन्ति। विश्वविद्यालयस्य प्रतिभाभाण्डागारस्य अनावरणम् अस्मिन् महोत्सवसन्दर्भे सम्भवति। अत्र चिताः प्रथमस्थानापन्नाः च विभिन्नपरिसरच्छात्राः सामान्यविश्वविद्यालयस्तरीययुवमहोत्सवार्थमपि चिताः भवन्ति। **अखिलभारतीयक्रीडाप्रतियोगितायां योगासने मल्लयुद्धे धावनस्पर्धायां खो-खो क्रीडायां** च विश्वविद्यालयस्य छात्राः यशस्वितया भागं गृहीतवन्तः। एवमेव इतरसंस्कृतविश्वविद्यालयेषु महाविद्यालयेषु च प्रवर्तमानेषु युवमहोत्सवेषु प्रातिभसमारोहेषु च भागं गृहीत्वा तत्रापि विजयवैजयन्तीम् अवाप्य बहुधा समागताः सन्ति। तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य वार्षिके **प्रातिभसमारोहे** अस्माकं परिसरच्छात्राः नियतरूपेण भागं गृहीत्वा बहून् पुरस्कारान् अविन्दन्।अन्तर्महाविद्यालययुवसमारोहादिकं परिसरः यस्मिन् राज्ये वर्तते तत्र पार्थक्येन क्वचित् आयोज्यते। अन्तस्संस्कृतविश्वविद्यालययुवसमारोहः संस्कृतविश्वविद्यालयान्तरेषु यत्र चलन्ति तत्र अस्माकं छात्राः भागं गृहीत्वा पुरस्कारं प्राप्नुवन्ति।

**2. वाक्यार्थसभा शास्त्रसभा  शास्त्रार्थगोष्ठी इत्याद्याः**

**वाक्यार्थप्रणाली** पारम्परिकशास्त्रशिक्षणस्य जीवातुभूता प्रणाली वर्तते। अतः वाक्यार्थपरम्परायाः परिरक्षणाय आदर्शवाक्यार्थानाम् आयोजनं क्रियते। **वाक्यार्थभारती नाम्नी शोधपत्रिका** अपि राजीवगान्धीपरिसरेण प्रतिवर्षं प्रकाश्यते । वाक्यार्थसभासु छात्राः अपि भागं गृहीत्वा शास्त्रज्ञानां शिक्षकाणां वाग्वैखरीं प्रत्यक्षीकर्तुं प्रभवन्ति। जिज्ञासूनां समाधानानि सभामुखमेव यच्छन्ति शिक्षकाः ।

**शास्त्रसभासु शृङ्गगिरिस्थेन श्रीशारदामठेन आयोज्यमाना शास्त्रसभा** अतीव विशिष्टा । अत्रापि विश्वविद्यालयस्य प्राध्यापकाः शास्त्रार्थविवेचनाय समामन्त्र्यन्ते । श्रोतारः छात्राः सोत्साहं भागं गृहीत्वा अभिप्रेरिताः भवन्ति। काशी ,काञ्ची, तेनालि, पुण्यपत्तनम्, त्रिपणत्तूरु इत्यादिषु स्थानेषु अपि शास्त्रसभाः सम्भवन्ति। अत्र वरिष्ठाः छात्राः शिक्षकाः च भागं गृह्णन्ति। युगलवाक्यार्थस्पर्धाः अपि विशेषरूपेण आयोज्यन्ते ।

### 3. संस्कृतभाषणस्पर्धा, शलाकापरीक्षा

**केन्द्रीयसंस्कृतविश्वविद्यालयः प्रतिवर्षं राष्ट्रस्तरीयसंस्कृतभाषणस्पर्धां शलाकापरीक्षां** च आयोजयति। सर्वादौ राज्यसर्वकारैः राज्यस्तरीयाः संस्कृतभाषणस्पर्धाः, शलाकापरीक्षाः च विविधशास्त्रेषु समायोज्यन्ते । तत्र चिताः एव छात्राः राष्ट्रस्तरीयशास्त्रीयभाषणस्पर्धासु शलाकापरीक्षासु भागं गृहीतुं प्रभवन्ति। राष्ट्रस्तरीयसंस्कृतभाषणस्पर्धानां शलाकापरीक्षाणां च आयोजनं केन्द्रीयसंस्कृतविश्वविद्यालयेन एव क्रियते। एतदर्थं विभिन्नराज्यस्थाः विश्वविद्यालयस्य परिसराः बालान् सज्जीकुर्वन्ति। सम्पूर्णप्रतियोगितानां सर्वविधव्ययं व्यवस्थां च विश्वविद्यालयः एव निर्वहति। अत्र ये प्रथमद्वितीयतृतीयस्थानानि प्राप्नुवन्ति ते स्वर्णपदकेन रजटपदकेन कांस्यपदकेन च सह दशसहस्राणि सप्तसहस्राणि पञ्चसहस्राणि च रूप्यकाणि क्रमशः प्राप्नुवन्ति। एतादृशकार्यक्रमाणाम् आयोजनाय लक्षशः व्ययीकरोति विश्वविद्यालयः। शलाकापरीक्षा तु अत्यन्तं विशिष्टा वर्तते। विभिन्नराज्यानां विभिन्नानां संस्कृतविश्वविद्यालयानां युवानः छात्राः अत्र भागं गृह्णन्ति इत्यतः अयमेकःअन्तस्संस्कृतविश्वविद्यालययुवसमारोहः इत्यपि वक्तुं शक्यते।

### 4. सर्जनात्मकलेखनस्य काव्यलेखनस्य सङ्गणकानुप्रयोगस्य पुराणप्रवचनस्य च प्रशिक्षणम्

अथ **अतीत्य बन्धून् अवलङ्घ्य मित्राण्याचार्यमागच्छति शिष्यदोषः** इति विश्वविद्यालयः विभावयति । अतः काले काले बालानां कृते **सर्जनात्मकलेखने काव्यलेखने सङ्गणकानुप्रयोगे पुराणप्रवचने च अनुशिक्षणस्य प्रशिक्षणस्य च व्यवस्थां प्रकल्पयति।** सर्जनात्मकलेखने तु सामयिकं परिप्रेक्ष्यं मनसि निधाय कथं लेखितुं शक्यते इति शिक्षकाः आदर्शलेखनमाध्यमेन पाठयन्ति। छात्राः छात्रप्रतिभाप्रदर्शनफलकेषु स्वीयां सर्जनात्मकप्रतिभां प्रदर्शयन्ति। परिसरीयवार्षिकपत्रिकास्वपि छात्राणां सर्जनात्मकलेखाः काव्यानि च प्रकाश्यन्ते। सङ्गणककक्ष्या तु बालानाम् अनिवार्या वर्तते। एतद्विहाय युवसमारोहादिषु स्पर्धाः गणकानुप्रयोगसम्बद्धाः आयोज्यन्ते। छात्राणाम् उट्टङ्कनपुटविन्यासादीनां शक्तीनां संवर्धनाय अत्र विशेषरूपेण अनुशिक्षणव्यवस्था अपि वर्तते। भागवतप्रवचनं रामायणप्रवचनं गीतापारायणम् इत्यादिकं परिसरेषु आयोज्यन्ते ।

### 5. प्रेक्ष्यवाचनम्, सांस्कृतिकपर्यटनम्, आतिथ्यनिर्वहणम्, ललितकलाः च

परिसरीयपत्रिकायाः प्रकाशनस्य च सम्पादकसमितौ छात्राः अपि भवन्ति। ते प्रेक्ष्यवाचनादीनि कार्याणि प्रधानसम्पादकानां मार्गदर्शने सम्पादयन्ति। कक्ष्यास्वपि अयम् अभ्यासः सन्दर्भानुगुणं कार्यते । सांस्कृतिकपर्यटनादिकमपि छात्राः विविधस्थानेषु प्रतियोगितादिकं परिसमाप्य लब्धे समये कुर्वन्ति। शैक्षिकयात्रादिष्वपि शिक्षाशास्त्रिणः छात्राः शिक्षकैः सह गच्छन्ति। आतिथ्यनिर्वहणेऽपि अस्माकं छात्राः अग्रेसराः सन्ति। युवमहोत्सवे नाट्यमहोत्सवे च छात्राः समागतानाम् अभ्यागतानाम् अतिथीनां च निर्वहणं कारं कारं अभ्यस्ताः भवन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Provide link for additional information | View Document |

***5.1.7 Making Study Material available to Learners in a timely fashion by DDE  Strategy followed by DDE for timely availability of study material to learners***

***दूरस्थशिक्षानिदेशालयेन अध्येतृभ्यः यथासमयं स्वाध्यायसामग्र्याः  प्रापणम्  दूरस्थशिक्षानिदेशालयेन अध्येतृभ्यः यथासमयं स्वाध्यायसामग्र्याः प्रापणार्थं  स्वीकृता रणनीतिः***

**Answer:**

**दूरस्थशिक्षानिदेशालयस्य केन्द्रमात्रं दूरस्थं भवति न तु सौकर्यम्।** दूरस्थशिक्षानिदेशालयस्य स्वाध्यायकेन्द्राणि परिसरेषु संस्थापितानि सन्ति। अतः विभिन्नानां राज्यानां छात्राः विना क्लेशं स्वाध्यायकेन्द्राणां माध्यमेन स्वाध्यायसामग्रीं विना क्लेशं विन्दन्ति। मुक्तस्वाध्यायकेन्द्रेषु कल्पितानि सौकर्याणि यथा -

1. प्रवेशप्रक्रियायाः अनन्तरं **मुद्रितस्वाध्यायसामग्र्यः (SLM), केचन दृश्य/श्रव्यपाठाः प्रेष्यन्ते।** आदौ स्वाध्यायसामग्र्यः मुक्तस्वाध्यायपीठस्य मुख्यालयतः स्वाध्यायकेन्द्रेभ्यः प्रेष्यन्ते। तदनन्तरं स्वाध्यायकेन्द्राणि अध्येतृभ्यः तेषां पाठ्यक्रमानुसारेण स्वाध्यायसामग्रीः प्रेषयन्ति। प्रवेशसुनिश्चितेः अनन्तरं पञ्चदशदिवसाभ्यन्तरे पाठ्यक्रममार्गदर्शिकया सह पाठ्यसामग्रीणां प्रथमबन्धं प्रेषयितुं प्रयासः क्रियते। मुद्रितस्वाध्यायसामग्र्यः पत्रालयमाध्यमेन अध्येतुः पत्रसङ्केतं प्रति प्रेष्यन्ते। स्वाध्यायसामग्रीणां संगणकीयप्रतिः (पीडीएफ) अध्येतृणाम् आवश्यकतानुगुणम् अन्तर्जालमाध्यमेन प्रेष्यते। केचन **दृश्य/ श्रव्यपाठाः, ई-पाठाः, अन्तर्जालसंकेतसूत्राणि च ईमेल्-माध्यमेन अन्यप्रसारमाध्यमेन वा वितीर्यन्ते।**

2.कक्ष्यानुगुणम् एव सामाजिकमाध्यमानां साहाय्येन अध्ययनसमूहाः केन्द्रेण निर्मिताः सन्ति। अनेन अध्ययनसामग्रीं क्षणाभ्यान्तरे एव समूहे प्रसारयितुं शक्यते । छात्राणां स्वाध्यायसामग्रीसम्बद्धाः समस्याः अपि अत्र उपारोपयितुम् अवसरः वर्तते। परस्परं भावयन्तः सर्वे सदस्याः अध्ययनं कुर्वन्ति।

3. मुक्तस्वाध्यायपीठस्य माध्यमेन निदेशालयः दृश्यश्रव्यपाठान् प्रसारयति। **सम्पर्कजालसूत्रम् आदौ एव दीयते।** तत् उद्घाट्य अपेक्ष्यानुगुणं दृश्यश्रव्यपाठान् पठितुं प्रभवन्ति छात्राः। विविधवयोदेशीयाः छात्राः दृश्यश्रव्यैः साधनैः बहुधा उपकृताः भवन्ति।

4.सन्देहनिवारणाय सन्देहनिवारणसत्राणि अपि परोक्षरूपेण सञ्चाल्यते । छात्राः दूरभाषायाः मुखेन वैद्युतिकपत्रमुखेन अपि व्यक्तिशः सम्पर्कं कर्तुं शक्नुवन्ति। तत् क्षणे एव स्थानीयाः निदेशकाः तेषां अपेक्षायाः पूरणाय यत्नं कुर्वन्ति।

5.**मुखप्रतिमुख-सम्प्रेषणस्य व्यवस्था** अपि कल्पिता भवति। अनेन छात्राः लाभान्विताः भवन्ति। अद्य गूगल मीट, जूम इत्यादीनि अन्तर्जालाश्रितानि साधनानि सन्ति। तेषां साहाय्येन छात्राः संसाधनानि विन्दन्ति सन्देहान् च प्रकटय्य तेषां परिहारम् अपि अवाप्नुवन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Material availability related information at DDE | View Document |

***5.1.8 Addressing learners' grievances – The Institution has a transparent mechanism for timely redressal of learner grievances. Percentage of grievances received at HQ and redressed during the last five years***

***अध्येतृणां व्यथानां निदानम् - संस्थायां यथासमयं अध्येतृणां व्यथानिवारणार्थम् एकः पारदर्शिक्रियाविधिः वर्तते। विगतेषु पञ्चसु वर्षेषु मुख्यालये प्राप्तानां व्यथानां तासां निवारणानां च प्रतिशतं मानम्।***

**Answer:** 93.67

5.1.8.1 Number of grievances received at HQ year wise during the last five years

विगतेषु पञ्चसु वर्षेषु मुख्यालये प्राप्तानां व्यथानां वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 46 | 26 | 33 | 25 | 28 |

5.1.8.2 Number of grievances received at HQ that are redressed year wise during the last five years

विगतेषु पञ्चसु वर्षेषु मुख्यालये प्राप्तानां व्यथानां तासां निवारणानां च वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 42 | 24 | 32 | 24 | 26 |

| File Description | Document |
|---|---|
| Data Template | View Document |
| Any other relevant information | View Document |
| Web link to Grievance Redressal Mechanism Committee for learners | View Document |

***5.1.9 Efforts taken by Institution to enhance the capabilities of students for both speaking and writing in Simple Standard Sanskrit fluently, correctly and naturally.***

***संस्थया सरलमानकसंस्कृतेन भाषणलेखनाभ्यां छात्राणां सामर्थ्यं धाराप्रवाहरूपेण साधुरीत्या स्वाभाविकतया च वर्धयितुं स्वीकृताः प्रयासाः।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः **सरलमानकसंस्कृतेन** भाषणलेखनाभ्यां छात्राणां सामर्थ्यं धाराप्रवाहरूपेण साधुरीत्या स्वाभाविकतया च वर्धयितुं नैकविधान् प्रयासान् प्रकरोति । क्रमशः यथा -

**1.सरलमानकसंस्कृतेन भाषणकलायाः प्रशिक्षणम्**

श्रवणपठनभाषणलेखनानि मूलभूतानि कौशलानि इति निश्चप्रचम्।यः कोऽपि या कापि भाषाभाषी भवतु सः भाषादक्षतां सम्पादयितुम् इमानि चत्वारि मूलभूतानि कौशलानि अधिगच्छेदेव।अन्यथा सः श्रुतार्थं नाधिगच्छति। पठितान् विचारान् आत्मसात्कर्तुं न प्रभवति।एवमेव प्रभावोत्पदकरीत्या स्वीयान् विचारान् मौखिकरूपेण लिपिबद्धरूपेण च अभिव्यञ्जयितुं न प्रभवति। अतः चत्वारि भाषाकौशलानि सर्वेणापि मानवेन अधिगन्तव्यानि एव भवन्ति। अतः एव विश्वविद्यालयः सर्वदा परिसरेषु सरलमानकसंस्कृतेन भाषणकलायाः प्रशिक्षणं प्रयच्छति। एतदर्थं संस्कृतसम्भाषणशिबिराणि सत्रारम्भे एव सञ्चालयति। दशदिनात्मके सम्भाषणशिबिरे भागं गृहीत्वा सर्वेऽपि छात्राः सरलमानकसंस्कृतेन व्यवहर्तुं प्रशिक्षणं प्राप्नुवन्ति। द्वित्राणि उदाहरणानि यथा-

**१. संस्कृतगीतानाम् अभ्यासः** - परिसरीयाः छात्राः सरलसंस्कृतगीतानि कण्ठस्थीकृत्य अनुगायन्ति। रचयेम संस्कृतभवनम् , संस्कृतस्य वर्धनाय बद्धपरिकरा वयम् , पठत संस्कृतं वदत संस्कृतम् इत्यादीनि गीतानि अभ्यस्यन्ति।

**२.भाषाक्रीडाः** - परिसरच्छात्राः भाषाक्रीडाभिः अपि विशेषरूपेण लाभान्विताः भवन्ति। क्रीडावल्ली इति पुस्तकम् अपि अत्र सहायकं वर्तते।

**३. कथाकथनाभ्यासः** - परिसरच्छात्राः कथानां वाचनेन अपि सरलमानकसंस्कृतेन भाषितुम् अभ्यस्ताः भवन्ति। कथानां वाचनेन बालेषु वाचिकं प्रशिक्षणम् अपि सहजतया उपलभ्यते।

**४. रूपकाणां प्रदर्शनम्** :- सांस्कृतिकाः कार्यक्रमाः सर्वे संस्कृतेन एव प्रचलन्ति। संस्कृतोत्सवे वार्षिकोत्सवे वाग्वर्धिनीमहोत्सवे प्रतियोगितासु च बालाः सरलसंस्कृतेन एव नाटकम् एकपात्राभिनयं कलां च प्रदर्शयन्ति। एवं तेषां

भाषाभ्यासः जायते।

**1.सरलमानकसंस्कृतेन लेखनकलायाः प्रशिक्षणम्**

लेखनम् अपि बालानाम् अभिव्यक्त्यात्मककौशलस्य परिचायकं वर्तते। सरलमानकसंस्कृतेन लेखितुं बालाः प्रतिपदं प्रशिक्षणं प्राप्नुवन्ति। यथा -

**१. दत्तकार्यम् -** बालाः शिक्षकैः प्रदत्तानि कक्ष्याकार्याणि गृहकार्याणि च स्वपट्टिकासु लिखित्वा अभ्यासं कुर्वन्ति । कक्ष्याकार्याणां मूल्याङ्कनं शिक्षकाः कृत्वा मार्गदर्शनं विधास्यन्ति। छात्रकृतान् दोषान् परिमार्जयन्ति च । अनेन शुद्धतया स्पष्टतया लेखितुं ते प्रशिक्षिताः भवन्ति।

**२. वार्षिकपत्रिकासु लेखाः :-** परिसरीयेषु वार्षिकपत्रिकासु भित्तिपत्रिकासु च छात्राः **सरलमानकसंस्कृतेन** लेखान् कथाः कविताः गद्यानि सर्जनात्मकनिबन्धान् च नियतरूपेण लिखन्ति। अनेन लेखनकलायां प्रशिक्षणम् उपलभ्यते । एतेषां लेखानां गुणवत्तां शिक्षकाः परीक्षन्ते । शिक्षकाः अपि बालानां सुखबोधाय योग्यान् एव लेखान् अत्र विलिख्य स्थापयन्ति। पुरा लेखनार्थम् अपि प्रशिक्षणं आसीत् एव । माण्डूक्ये उक्तमपि -

***किञ्चिद्यो नभसः स्वांसाद् बाहुं दृष्टिं निपातयेत्।***

***प्रसार्य चाङ्गुलीः सर्वा- श्चालयेत् करमण्डलम्।। इति।***

सुलेखस्य अभ्यासं कृत्वा छात्राः सुष्ठु लेखने समर्थाः भवन्ति।

**३. कक्ष्यापरीक्षासु लेखनम् आदर्शलेखाः च :-** अध्यापकाः सर्वे छात्राणाम् उत्तरपत्रिकायाः मूल्याङ्कनमपि सकाले कुर्वन्ति। छात्राः यदि दोषपूर्णानि लिखन्ति चेत् तेषां कृते व्यक्तिशः उद्बोधयन्ति । यथा गुरुः तथा शिष्यः इति उच्यते। अतः गुरवः कृष्णफलके पत्रेषु आदर्शलेखान् विलिख्य प्रदर्शयन्ति। सरलमानकसंस्कृतेन लेखनाय शिक्षकाः व्यक्तिगतरूपेण अपि साहाय्यं कुर्वन्ति। एवं विश्वविद्यालयस्य शैक्षिकक्रियाकलापेषु विशिष्य भाषाकौशलेषु सरलमानकसंस्कृतस्य अभ्यासः जायते इत्यतः छात्राणां सामर्थ्यं धाराप्रवाहरूपेण साधुरीत्या स्वाभाविकतया च वर्धते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any Additional information | View Document |
| Link for Additional Information | View Document |

**5.2 Student Progression**

***5.2.1 Percentage of placement of outgoing students during the last five years***

***विगतेषु पञ्चसु वर्षेषु प्राप्तोद्योगानाम् अन्तिमवर्षच्छात्राणां प्रतिशतं मानम्।***

**Answer:** 2.67

5.2.1.1 ***Number of outgoing students placed year-wise during the last five years.***

विगतेषु पञ्चसु वर्षेषु प्राप्तोद्योगानाम् छात्राणां वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 95 | 50 | 40 | 59 | 17 |

| File Description | Document |
|---|---|
| Self attested list of students placed | View Document |
| Details of student placement during the last five years (Institutional data as per Data Template) | View Document |

***5.2.2 Percentage of student progression to higher education (Latest completed academic year data)***

***उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां प्रतिशतं मानम् (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 26.17

5.2.2.1 Number of outgoing students progressing to higher education during the latest completed academic year

सद्यः समाप्तशैक्षिकवर्षे उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां सङ्ख्या

Answer: 539

| File Description | Document |
|---|---|
| Upload supporting data for student/alumni | View Document |
| Details of student progression to higher education (Institutional data as per Data Template) | View Document |

***5.2.3 Percentage of students qualifying in state/ national/ international level examinations during the last five years***

***(eg: NET/SLET/ TOEFL/Civil Services/State government examinations)***

***विगतेषु पञ्चसु वर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्रस्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां प्रतिशतं मानम् (उदा.नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)***

**Answer:** 100

5.2.3.1 Number of students qualifying in state/ national/ international level examinations (eg: NET/SLET/TOEFL/ Civil services/ State government examinations) year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां वार्षिकी सङ्ख्या (उदा-नेट्-स्लेट्- टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 68 | 45 | 72 | 23 | 11 |

5.2.3.2 Number of students appearing in state/ national/ international level examinations (eg: NET/SLET/TOEFL/ Civil Services/ State government examinations) year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु भागं गृहीतवतां छात्राणां वार्षिकी सङ्ख्या (उदा-नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 68 | 45 | 72 | 23 | 11 |

| File Description | Document |
|---|---|
| Upload supporting data for the same | View Document |
| Number of students qualifying in state/ national/ international level examinations during the last five years (Institutional data as per Data Template) | View Document |

***5.2.4 Details of the programme for the exchange/participation of students at national/international level for academic and cultural activities with other institutions***

### *विश्वविद्यालयान्तरेण अन्यया संस्थया सह वा राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु शैक्षिकसांस्कृतिकगतिविधीनां कृते छात्राणां विनिमयाय सञ्चालितस्य कार्यक्रमस्य विवरणम्*

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य दृष्टिः वैश्विकी वर्तते। अयं सर्वाभिः संस्कृतोच्चसंस्थाभिः सह मधुरसम्बन्धं वहति। अस्य विश्वविद्यालयस्य छात्राः इतरैः संस्कृतविश्वविद्यालयैः आयोजितेषु कार्यक्रमेषु भागं गृह्णन्ति। अमृतस्य पुत्राः वयम् इति भावना सर्वेषु छात्रेषु वर्तते। त्रयः केन्द्रीयाः संस्कृतविश्वविद्यालयाः भारते सन्ति। त्रयः अपि सम्भूय उत्कर्षमहोत्सवं महता वैभवेन प्रतिवर्षं समाचरन्ति। एतादृशेषु कार्यक्रमेषु त्रयाणां विश्वविद्यालयानां शिक्षकाः कर्मचारिणः छात्राः च सम्भूय संस्कृतकार्यक्रमान् सञ्चालयन्ति। समग्रभारतस्य संस्कृतविश्वविद्यालयानां प्रतिनिधयः अत्र उपस्थिताः भवन्ति। अग्रिमेषु दिवसेषु अध्ययनार्थम् अपि छात्राणां विनिमयः भवत्विति चिन्तनं प्रवर्तते। अधुना स्नातकोत्तरशिक्षाम् अस्माकं परिसरेषु सम्प्राप्य अग्रे अनुसन्धानकार्यसम्पादनाय विश्वविद्यालयान्तरं गच्छन्ति पुनः अन्यस्मात् विश्वविद्यालयात् स्नातकशिक्षामवाप्य उच्चशिक्षां प्राप्तुम् अत्र आयान्ति। यद्यपि एतद्विषये विनिमयानुबन्धः नैव कृतः तथापि प्राकृतिकरूपेण एव छात्राणां अध्ययनार्थं गमनागमनं वर्तते।

**'एकं भारतं श्रेष्ठं भारतम् '** इति घोषवाक्यं 2019 तमे वर्षे प्रकटीकृतम् । एतदनु विश्वविद्यालयस्य प्रत्येकम् अपि परिसरात् 50 सङ्ख्याकानां छात्राणां सामान्यविश्वविद्यालयेषु सांस्कृतिकविनिमययोजनानुगुणं प्रेषणाय विश्वविद्यालयेन सकलाः सिद्धताः कृताः । विरामदिवसेषु ग्रीष्मावकाशेषु च छात्राः विश्वविद्यालयान्तरं गत्वा तत्रत्येषु क्रियाकलापेषु भागं गृह्णन्ति पुनः तत्र स्वसंस्कृतिं परिचाययन्ति चेत् महान् लाभः भवति इति मत्वा एतादृशाः छात्राणां विनिमयाय योजनाः कृताः आसन्। परन्तु कोरोना कारणेन एताः योजनाः हठादेव स्थगिताः। इदानीं पुनः विश्वविद्यालयेन एतादृशाः प्रयासाः आरभ्यन्ते।

वस्तुतः ' **बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम्** ' इति भावनया अस्माकं सर्वेऽपि छात्राः इतरविश्वविद्यालयानां युवसमारोहेषु प्रातिभसमारोहेषु च भागं गृह्णन्ति। केन्द्रसर्वकारस्य चिन्तनम् आसीत् यत् 50 सङ्ख्यकाः एकैकस्मात् परिसरात् इत्युक्ते 600 सङ्ख्याकाः छात्राः विनिमययोजनायां विश्वविद्यालयान्तरेषु प्रविश्य तत्रत्यान् विशेषान् आत्मसात्कुर्युः इति।सामान्यविश्वविद्यालयीयैः सह परिसरच्छात्राः संवादं कुर्युः । धनात्मकाः विकासपराश्च चर्चाकार्यक्रमाः छात्राणां विनिमयेन भवति। छात्राणां विनिमयेन छात्राणां दृष्टिः व्यापिका भवति। बहुमुखी संस्कृतिः कीदृशी इति विज्ञाय तदनु सांस्कृतिकमूल्यानां ग्रहणे विनिमयकार्यक्रमाः भृशम् उपकुर्वन्ति।

शैक्षिकसांस्कृतिकगतिविधीनां माध्यमेन विश्वविद्यालयः अन्ताराष्ट्रिये स्तरे प्रसिद्धः वर्तते। विश्वसंस्कृतसम्मेलनस्य आयोजनं विभिन्नेषु राष्ट्रेषु विश्वविद्यालयः करोति। एवमेव समग्रभारते शताधिकानाम् अनौपचारिकसंस्कृतकेन्द्राणां माध्यमेन संस्कृतस्य शिक्षणं प्रददाति। अनेन अभिप्रेरिताः बालाः औपचारिकशिक्षायाः ग्रहणाय विश्वविद्यालयस्य विभिन्नेषु परिसरेषु

प्रवेशं प्राप्नुवन्ति। विश्वविद्यालयस्य बहुषु स्थानीयेषु कार्यक्रमेषु अनौपचारिकरूपेण परस्परं छात्राणां विनिमयः जायते। ग्रीष्मकाले यदा महाविद्यालयच्छात्रवर्गस्य आयोजनं क्रियते तदा इतरेषाम् अपि महाविद्यालयानां संस्कृतमहापाठशालानां छात्राः परिसरम् आयान्ति। **शृङ्गगिरिपरिसरे महाविद्यालयच्छात्रवर्गस्य** आयोजनावसरे तिरुपतिस्थस्य संस्कृतविश्वविद्यालयस्य वरिष्ठाः छात्राः आगत्य परिसरीयान् अन्यान् छात्रान् च पाठयन्ति। विश्वविद्यालयस्य परिसराः सामाजिकसंस्कृतप्रचारपरैः सङ्घटनैः सह सर्वदा मधुरं सम्बन्धं स्थापयति। अनेन समाजोन्मुखाः भूत्वा संस्कृतकार्यं मम कार्यम् इति मत्वा छात्राः संस्कृतशिबिराणि अन्यान् कार्यक्रमान् च आयोजयन्ति। एवं राष्ट्रीयाणाम् अन्ताराष्ट्रियाणां च कार्यक्रमाणां सञ्चालने छात्राणां विनिमयादिषु विश्वविद्यालयस्य सर्वदा उत्साहः भवति।

छात्राणां विनिमयार्थम् अद्यत्वे विश्वविद्यालयः विशिष्टां परिकल्पनां कुर्वन् अस्ति। अनौपचारिकरूपेण छात्राणां विनियमः तु जायमानः एव वर्तते। परन्तु कोरोना कारणेन बहुषु कार्येषु विघ्नाः समजनि । विषमपरिस्थितेः प्रभावेण बहवः योजनाः क्रियारूपं नैव अवाप्नुवन् । इतः परं एतद्विषये सक्रिययोजनाः निर्मातुं शक्यते। भारतीयायाः संस्कृतेः समग्रः परिचयः छात्राणां विनिमयादिभिः क्रियाभिः जायते। पुनः अनेन व्याजेन छात्राः अनेकतायाम् एकता अस्ति इति विज्ञाय तदनु स्वीयं मनोभावं विकासयितुं प्रभवन्ति। विशिष्य संस्कृतविश्वविद्यालयाः संस्कृतेतरैः विश्वविद्यालयैः सह एतद्विषये सहकारानुबन्धं कुर्वन्ति चेत्तर्हि संस्कृतेतराणां विश्वविद्यालयानां छात्राः अपि संस्कृतम् अवगन्तुं शक्नुवन्ति। विशिष्टानां स्थानीयानां जनपदविशेषस्य कार्यक्रमाणाम् अपि परस्परं प्रस्तुतीकरणेन **एकं भारतं श्रेष्ठं भारतम्** इति भावना छात्रेषु आयाति । गणतन्त्रव्यवस्था भारते देशे वर्तते। गणतन्त्रव्यवस्थायाम् अस्यां विविधराज्यानां छात्राणां जोडनाय विशिष्टानाम् कार्यक्रमाणाम् आयोजनाय चिन्तनं प्रवर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any additional information | View Document |
| Provide link for additional information | View Document |

***5.2.5 Percentage of learners passed term end examination (data for latest completed academic year)***

***दूरस्थशिक्षानिदेशालयस्य सत्रान्तपरीक्षाम् उत्तीर्णानां शिक्षार्थिनां प्रतिशतं मानम् (सद्यः समाप्तशैक्षिकवर्षस्य दत्तांशः)***

**Answer:** 98.88

5.2.5.1 Number of learners passed the term end examination (only newly enrolled in programmes offered by DDE)

सत्रान्तपरीक्षाम् उत्तीर्णानां शिक्षार्थिनां सङ्ख्या (केवलं दूरस्थशिक्षानिदेशालयेन प्रस्तुतकार्यक्रमेषु नूतनतया नामाङ्कनं कृतवताम्)

Answer: 792
5.2.5.2 Total Number of learners enrolled in the latest completed year (only in programmes offered by DDE who are newly enrolled)

सद्यः समाप्तशैक्षिकवर्षे नामाङ्कनं कृतवतां शिक्षार्थिनां सम्पूर्णा सङ्ख्या (दूरस्थशिक्षानिदेशालयेन प्रस्तुतकार्यक्रमेषु नूतनतया नामाङ्कनं कृतवताम्)

Answer: 801

| File Description | Document |
|---|---|
| Number of learners (only freshly enrolled)who have passed term end examination | View Document |
| List of programmes on offer | View Document |
| Data Template | View Document |
| Web-link of examination schedule | View Document |

***5.2.6 Support mechanism and initiatives taken out by the institution for preparing the students to participate, succeed in reputed examination and indepth shastra knowledge/ Avadhana/ shastrartha to the students and encouraging them to take various shastra exams conducted by different organisations in addition to regular teaching.***

***संस्थया नियताध्यापनेन सह विविधसंस्थाभिः आयोज्यमानासु प्रसिद्धासु परीक्षासु/ गभीरशास्त्रज्ञानाय विविधेषु उपक्रमेषु/ अवधानकार्यक्रमेषु/ शास्त्रार्थसभासु भागं ग्रहीतुं साफल्यं च प्राप्तुं सज्जतायै छात्राणां प्रोत्साहनाय स्वीकृताः साहाय्यक्रियाविधयः उपायाश्च।***

**Answer:**

विश्वविद्यालयः नैजसंस्थाभिः सञ्चाल्यमानासु विविधासु वेदशास्त्रपरीक्षासु भागग्रहणाय छात्रान् सर्वदा प्रेरयति। एतदर्थं शास्त्राध्यापकानां माध्यमेन शिक्षणं प्रशिक्षणं च परिकल्पयति। न केवलं कक्ष्याशिक्षणमात्रम् अपि तु विविधपरीक्षार्थम् अतिरिक्तरूपेण व्यक्तिशः अपि विदुषां निर्माणाय विश्वविद्यालयस्य **शास्त्रशिक्षकाः** प्रयतन्ते। **'विद्वान् सर्वत्र पूज्यते'** इति सुभाषितस्य वचनानुसारं विदुषां प्रतिभाशालिनां च छात्राणां सर्वत्र सम्माननं भवत्येव। भारते मुख्यतया तिस्रः संस्थाः विशेषरूपेण परीक्षाः सञ्चालयन्ति। एतदर्थं शृङ्गगिरिस्थाः गुरुवायूरुपरिस्थाः छात्राः विशेषतः भागं गृह्णन्ति। क्रमशः यथा -

1. **वेदशास्त्रोपबृंहणपरिषदः परीक्षार्थं** छात्राणां सज्जीकरणम् । महाराष्ट्रराज्यस्य अहमदनगरे वर्तमानेन वेदान्तविद्यापीठस्थेन श्रीदत्तदेवस्थानन्यासेन वेदशास्त्रोपबृंहणपरिषत् इति एका परिषत् न्यायव्याकरणपूर्वोत्तरमीमांसादिषु शास्त्रेषु प्रतिवर्षं सत्रद्वये परीक्षां चालयति। अस्यां परीक्षायां विश्वविद्यालयस्य छात्राः भागं गृह्णन्ति। विशेषरूपेण **राजीवगान्धीपरिसरच्छात्राः** भागं गृह्णन्ति तदा तदा। एताः परीक्षाः सर्वैः छात्रैः स्वीकर्तुं शक्यन्ते। १५ परीक्षाः भवन्ति। आसु परीक्षासु प्रतिसत्रं द्वितीयप्रथमविशिष्टश्रेण्याम् उत्तीर्णतां प्राप्तवद्भ्यः छात्रेभ्यः क्रमशः १५००, २०००, २५०० रूप्यकाणि च प्रतिमासं छात्रवृत्तिरूपेण परिषदा दीयते। अग्रिमपरीक्षासु अपि प्राप्तश्रेण्याः परिरक्षणं परिवर्धनं च करणीयं भवति।एवमेव शास्त्रशिक्षकेभ्यः प्रतिसत्रं प्रतिछात्रं सज्जीकर्तुं गौरवधनरूपेण १००० रूप्यकाणि दीयन्ते।
2. **तेनालिशास्त्रपोषकसभायाः परीक्षार्थं** छात्राणां सज्जीकरणम् आन्ध्रप्रदेशस्य गुण्टूरु जनपदे वर्तमानेन तेनालिशास्त्रपोषकसभा इत्यनेन संस्थानेन षट्सु दर्शनेषु षट्सु वेदाङ्गेषु च परीक्षाः प्रतिवर्षं चाल्यन्ते। १९९१ तः अनेन संस्थानेन परीक्षाः समारब्धाः सन्ति। आसु परीक्षासु विश्वविद्यालयस्य बहवः छात्राः भागं गृह्णन्ति। अन्तिमपरीक्षा (१५) महापरीक्षा इति कथ्यते। अस्यां परीक्षायाम् उत्तीर्णतां प्राप्तवद्भ्यः छात्रेभ्यः विशिष्टपुरस्काराः दीयन्ते। विशिष्टश्रेण्याम् उत्तीर्णाः लक्षशः धनराशिं पुरस्काररूपेण प्राप्नुवन्ति। आसु परीक्षासु प्रतिसत्रं द्वितीयप्रथमविशिष्टश्रेण्याम् उत्तीर्णतां प्राप्तवद्भ्यः छात्रेभ्यः क्रमशः १५००, २०००, २५०० रूप्यकाणि च प्रतिमासं छात्रवृत्तिरूपेण परिषदा दीयते। एवम् एव शिक्षकेभ्यः गौरवधनम् अपि यथोचितं यच्छन्ति। तेनालिपरीक्षायाः अन्तिमे घट्टे अर्थात् **महापरीक्षासन्दर्भे काञ्चीमठस्य पीठाधीश्वराः** छात्रस्य परीक्षणं कृत्वा उपाधिं यच्छन्ति। **नगरपरीक्षायाः अन्तिमे घट्टे शृङ्गगिरेः पीठाधीश्वराः** परीक्षणं कुर्वन्ति।
3. **संस्कृतभारत्याः शलाकापरीक्षार्थं** छात्राणां सज्जीकरणं **संस्कृतभारती** इत्येषा संस्था प्रतिवर्षं राष्ट्रस्तरे विशिष्य व्याकरणे शलाकापरीक्षाम् आयोजयति। अस्यां परीक्षायां विभिन्नेषु परिसरेषु अधीयानाः छात्राः भागं गृह्णन्ति। भाषायां प्रभुत्वसम्पादनाय व्याकरणशास्त्रे गतिः अनिवार्या। एतासु परीक्षासु ये प्रथमद्वितीयतृतीयादीन् पुरस्कारान् प्राप्नुवन्ति ते

सहस्रशः रूप्यकाणि विन्दन्ति। **शृङ्गगिरौ महागणपतिवाक्यार्थसभा** प्रतिवर्षं भाद्रपदे मासे प्रवर्तते । अत्रापि विश्वविद्यालयस्य शास्त्रपण्डिताः शिक्षकाः छात्रचराः भागं गृह्णन्ति। एवं विश्वविद्यालयस्य छात्राः पाठ्यक्रमाध्ययनेन सह बाह्यपरीक्षासु सभासु च भागं गृह्णन्ति। विश्वविद्यालयस्य सर्वेषु परिसरेषु भागग्राहिणाम् उत्साहिनां छात्राणां सज्जीकरणाय प्रशिक्षणप्रदानाय च सर्वदा शिक्षकाः विविधान् शिक्षणोपक्रमान् समाश्रयन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Link for additional Information | View Document |

**5.3 Student Participation and Activities**

***5.3.1 Number of awards/medals for outstanding performance in sports/cultural activities at Inter-university, State/ national/international level (award for a team event should be counted as one) during the last five years***

***विगतेषु पञ्चसु वर्षेषु अन्तर्विश्वविद्यालय-राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्ट-योग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां सङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)***

**Answer:** 140

5.3.1.1 Number of awards/medals for outstanding performance in sports/cultural activities atInter-university**,** State/ national/international level (award for a team event should be counted as one) year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु अन्तर्विश्वविद्यालय-राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्टयोग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां वार्षिकी सङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 22 | 11 | 45 | 30 | 32 |

| File Description | Document |
|---|---|
| Number of awards/medals for outstanding performance in sports/cultural activities at inter-university national/international level during the last five year (Institutional data as per Data Template) | View Document |
| e-copies of award letters and certificates | View Document |

***5.3.2 Presence of an active Student council/Chatra-parishat/ Chatra-mandal and representation of students on academic and administrative bodies/committees of the institution***

***संस्थायाः प्राशासनिकशैक्षिकसमितिषु छात्राणां प्रतिनिधित्वं तथा सक्रियायाः छात्रपरिषदः विद्यमानता।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशः परिसराः सन्ति। एतेषु सर्वेषु परिसरेषु **छात्राः एव केन्द्रबिन्दवः** सन्ति। अतः सर्वेषु प्राशसनिकासु शैक्षिकासु च समितिषु छात्राः नियमितरूपेण प्रतिनिधयः भवन्ति। विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रे अपि छात्राणां प्रतिनिधयः सन्ति। प्रत्येकम् अपि परिसरे छात्राणां परिषत् विशिष्टा काचित् भवति। वाग्वर्धिनीपरिषत् , छात्रसभा, छात्रसङ्घः, युवसभा इत्यादीनि नामानि अस्याः परिषदः सन्ति। सामान्यतः छात्राणां परिषदः कार्यदर्शिनः कार्यदर्शिन्यः अन्येषां प्रतिनिधीनां च चयनं निर्वाचनमुखेन अपि भवति। परं विश्वविद्यालयीयः परिसरः शैक्षिकदृष्ट्या सर्वप्रथमं छात्रम् एव स्वप्रतिनिधिरूपेण नियोजयति। एवं ये वरिष्ठाः शोधाध्येतारः सन्ति ते एव

छात्राणां प्रतिनिधयः भूत्वा आन्तरिकगुणवत्ताश्वासनकेन्द्रादिषु सन्तिष्ठन्ते । पूर्वतनकक्ष्यासु ये छात्राः अधिकान् अङ्कान् प्राप्नुवन्ति ते एव कक्ष्याप्रतिनिधिरूपेण चिताः भवन्ति। विविधानां कार्यक्रमाणाम् आयोजनावसरे परिसरीयानाम् अध्यापकानां आवल्यां छात्रप्रतिनिधीनाम् अपि समावेशः क्रियते। परिसरेषु विविधानां पाठ्यक्रमाणाम् अपि प्रतिनिधयः भवन्ति। यथा -

1. प्राक्शास्त्री प्रथमवर्षम् - छात्रप्रतिनिधिः - बालकानां पक्षतः एकः यश्च दशम्यां सर्वाधिकान् अङ्कान् अवाप्नोति सः । बालिकानां पक्षतः एका प्रतिनिधिः या सर्वाधिकाङ्कैः उत्तीर्णा । क्वचित् द्वौ बालकौ द्वे बालिके इति प्रतिनिधिचतुष्टयस्य नियोजनम् अपि क्रियते।
2. एवमेव प्राक्शास्त्री द्वितीये वर्षे अपि प्रतिनिधयः भवन्ति।
3. शास्त्रीस्तरे प्रथमे द्वितीये तृतीये च वर्षे कक्ष्यानुगुणं षट् सङ्ख्याकाः अधिकाधिकरूपेण द्वादशः छात्राः प्रतिनिधयः भवन्ति।
4. आचार्यस्तरे प्रथमे द्वितीये च वर्षे मिलित्वा षट् सङ्ख्याकाः छात्राः प्रतिनिधयः भवन्ति। छात्रसभायाः अथवा छात्रसङ्घस्य कार्यदर्शिस्थाने/अध्यक्षस्थाने वरिष्ठः छात्रः चितः भवति। अत्र अपि सर्वाधिकाङ्कान् प्राप्तवताम् एव अर्हता भवति। उपाध्यक्षस्य स्थाने शिक्षाचार्यस्तरीयस्य अपि अवसरः कल्प्यते। एवं छात्रसभायाम् ४० सङ्ख्याकाः अपि छात्राः भवन्ति। एते परिसरीयेषु शैक्षिकेषु प्राशासनिकेषु कार्येषु आवश्यकतायां सत्यां साहाय्यं कुर्वन्ति। छात्राणां भूमिकाः एकैकत्र परिसरे एकैकरूपेण वर्तते। दिङ्मात्रं परिषत्सदस्याः यथा -

1. **वाग्वर्धिनीपरिषदः कार्यदर्शी कार्यदर्शिनी च**
2. **स्पर्धिष्णुपरिषदः कार्यदर्शी कार्यदर्शिनी सदस्यः च**
3. **पत्रिकाकार्यदर्शी कार्यदर्शिन्यः च ।**
4. **वेदिकासज्जतायाः कार्यदर्शिनः कार्यदर्शिन्यः च।**
5. **शारदाप्रसादवितरकाः**
6. **कक्ष्याप्रतिनिधयः च।**

शृङ्गगिरौ वर्तमाने राजीवगान्धीपरिसरे श्रीमठात् आगतस्य **शारदाप्रसादस्य वितरणं** (माध्याह्निकभोजनस्य) छात्राः एव कुर्वन्ति। श्रीशारदापीठाधीश्वराणाम् अनुग्रहेण **कोरोनाकाले सर्वेभ्यः परिसरच्छात्रेभ्यः त्रैकालिकभोजनव्यवस्था कृता** आसीत्। एवम् एव विभिन्नसमितौ छात्राः स्थित्वा साहाय्यं कुर्वन्ति।

जयपुरपरिसरे व्याकरणविभागीया छात्रपरिषत् इति काचित् विशिष्टा परिषत् वर्तते। अत्र पञ्चदश सङ्ख्याकाः छात्रप्रतिनिधयः सन्ति। एवमेव **छात्रकल्याणपरिषत्** इति विशिष्टा एका परिषत् वर्तते अस्मिन् परिसरे। इयं परिषत् परिसरीयस्य छात्रकोषस्य निर्वहणावसरे योगदानं ददाति। छात्रकोषात् एकम् अपि पणकं व्ययीक्रियते चेत्तर्हि छात्रकल्याणपरिषदः संज्ञाने तत् भवति एव । एवं छात्रकोषात् तेषां सर्वाङ्गीणविकासाय क्रियमाणेषु सर्वविधेषु कार्यक्रमेषु अस्याः परिषदः सदस्याः योगदानं कुर्वन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***5.3.3 Average number of sports and cultural activities / competitions organised at the institution level per year***

***प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां सङ्ख्यायाः मध्यमानम्***

**Answer:** 60.2

5.3.3.1 ***Number of sports and cultural activities / competitions organised at the institution level year-wise during the last five years***.

विगतेषु पञ्चसु वर्षेषु आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां वार्षिकी सङ्ख्या

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 26 | 23 | 62 | 77 | 113 |

| File Description | Document |
|---|---|
| Report of the event (for ex. Sanskrit Pratibha Samaroha, Natya Mohotsava etc..) | View Document |
| Number of sports and cultural activities / competitions organised per year (Institutional data as per Data Template) | View Document |

***5.3.4 The Institution involves and encourages its students to publish materials like catalogues, wall magazines, Institution magazine, and other materials. List the major publications/ materials brought out by the students during the last four academic sessions.***

***संस्थया संग्रहसूचीनां, भित्तिपत्रिकाणां, संस्थापत्रिकाणां तदितरसामग्रीणां च प्रकाशनाय छात्राः समावेश्यन्ते/ प्रोत्साह्यन्ते च। विगतशैक्षिकवर्षचतुष्टये/ अर्धसत्रचतुष्टये छात्रैः प्रकाशितानां प्रमुखप्रकाशनानां/ सामग्रीणां च सूची दीयताम्।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वेषु परिसरेषु वार्षिकपत्रिकाः प्रकाश्यन्ते। शोधपत्रिकाः प्रकाश्यन्ते। भित्तिपत्रिकाः अपि तत्र तत्र प्रकाश्यन्ते। सर्वासां पत्रिकाणां प्रकाशनावसरे परिसरः छात्राणां साहाय्यं स्वीकरोति। पत्रिकायां लेखाः भवन्ति चेत्तर्हि तेषां लेखानां सङ्ग्रहणे त्रुटिनिष्कासने मुद्रणे च छात्राणां सहयोगं स्वीकरोति प्रकाशनसमितिः। प्रकाशनसमितौ छात्राणां प्रतिनिधयः अपि भवन्ति।

सर्वोऽपि परिसरः पत्रिकाद्वयं पत्रिकात्रयं प्रकाशयति। सर्वाधिकाः पाठ्यक्रमाः विश्वविद्यालयस्य पुरीपरिसरे सन्ति। सर्वाधिकाः विभागाः छात्राः पत्रिकाः अपि अत्र सन्ति। छात्राणां सहयोगेन पुरीस्थः सदाशिवपरिसरः 13 सङ्ख्याकाः पत्रिकाः प्रकाशयति। क्रमशः यथा-

1. ***पौर्णमासी*** - इयं परिसरीया वार्षिकपत्रिका वर्तते। एवमेव सदाशिवसन्देशः इति वार्तापत्रिका अपि अनेन परिसरेण प्रकाश्यते। वार्षिकपत्रिकायां छात्राणां शिक्षकाणां लेखाः भवन्ति। एषा प्राचीना पत्रिका अपि वर्तते।
2. मुखं व्याकरणं स्मृतम् इति उच्यते। एतदनु व्याकरणविभागस्य *गोणिका* इति पत्रिका प्रकाश्यते। यत्र व्याकरणविभागस्य शिक्षकाणां छात्राणां च लेखाः भवन्ति।
3. साहित्यसौरभम् इति पत्रिका साहित्यविभागेन पुराणज्योत्स्ना इति पत्रिका पुराणविभागेन ***श्रीदेवयानः*** इति पत्रिका धर्मशास्त्रविभागेन अद्वैतनिधिः इति पत्रिका वेदान्तविभागेन दर्शनप्रभा इति दर्शनविभागेन तर्कतरङ्गिणी इति नव्यन्यायविभागेन ज्योतिषामृतम् इति ज्योतिषविभागेन साङ्ख्ययोगामृतम् इति साङ्ख्ययोगविभागस्य शिक्षासुरभिः इति शिक्षाशास्त्रविभागस्य ***नीलाचलसौरभम्*** इति हिन्दीविभागस्य च पत्रिकाः अनेन परिसरेण प्रकाश्यन्ते।

4. जयपुरपरिसरे ***जयन्ती*** इति विशिष्टा पत्रिका प्रकाश्यते। अस्यां शिक्षकाणां छात्राणां च चिताः विशिष्टाः लेखाः भवन्ति। आचार्यवैद्यनाथझा- अभिनन्दनग्रन्थविशेषाङ्कः (२२४८-९४९५) अपि २०१८ तमे वर्षे जयन्त्याः पञ्चदश पुष्परूपेण प्रकाशितम् । ६७ सङ्ख्याकाः लेखाः कविताः आत्मवृत्तान्ताः अत्र उपनिबद्धाः सन्ति। एवमेव शिक्षासन्देशः इति पत्रिका शिक्षाविभागेन प्रकाश्यते। यदि राष्ट्रियगोष्ठ्यः सम्भवन्ति चेत्तर्हि तदा तत्र मण्डितान् शोधलेखान् सङ्कलय्य अपि प्रकाशनं क्रियते। एवं व्याकृतिः इति पत्रिका व्याकरणविभागेन प्रकाशिता वर्तते। एवं छात्राणां विकासाय भित्तिपत्रिकायाः दिनचन्द्रिका इत्यस्याः प्रकाशनं फलके भवति। अत्र दैनिकं पञ्चाङ्गं लिख्यते। एवमेव नीतिश्लोकानां भित्तिफलके लेखनपरम्परा अपि वर्तते अत्र।
5. गुरुवायूरुपरिसरे ***"गुरुदीपिका"*** इति छात्राणां पत्रिका वर्तते। पत्रिकायाम् अस्यां छात्राणां सर्वविधप्रतिभापाटवं दृश्यते। तत्रापि विशिष्य कवितासु, लघुकथासु, पत्रिकानिर्माणे एवं चित्रलेखनादिषु तेषां पाण्डित्यं, सर्जनात्मकता, चिन्तनशैली च दृष्टुं शक्यते। इयं पत्रिका छात्राणां रचनाकौशलव्यक्तीकरणार्थं, विकासार्थञ्च वर्तते। एवं सकारात्मकालोचनावर्धनार्थं छात्राणां उपयोगाय वर्तते। इयं पत्रिका प्रतिशैक्षिकवर्षे वार्षिकोत्सवदिने विमोच्यते। पत्रिकायाः प्रधानसम्पादकः निदेशकः, एवं सम्पादकमण्डल्यां छात्रकल्याणसमितेः प्रतिनिधिः तथा सम्बद्धसदस्याः अपि अन्तर्भूताः भवन्ति। निबन्धमाला इति वार्षिकपत्रिका परिसरेण प्रकाश्यते । पुनः शिक्षावाहिनी इति पत्रिका अपि शिक्षाविभागेन प्रकाश्यते।
6. राजीवगान्धीपरिसरेण ***शारदा*** इत्येषा पत्रिका प्रकाश्यते। इयं पत्रिका वार्षिकी वर्तते। अस्यां पत्रिकायां छात्रैः लिखिताः लेखाः, काव्यानि, कथाः , अनुभववचांसि, गद्यपद्यादीनि च भवन्ति। अस्यां पत्रिकायां संस्कृतविभागः, कन्नडविभागः, हिन्दीविभागः , आङ्ग्लविभागः इति विभागचतुष्टयं वर्तते। अस्याः पत्रिकायाः निर्वहणं वाग्वर्धिनी इति छात्रपरिषत् करोति। छात्राः अत्यन्तं श्रद्धया स्वीयान् लेखान् लिखन्ति। दिनचन्द्रिका इत्येषा भित्तिपत्रिका अपि परिसरेण प्रकाश्यते। अत्र तिथिनक्षत्रवासराणाम् उल्लेखः प्राप्यते। एवमेव संवेद्या इत्यस्यां छात्राः नीतिश्लोकान् लिखन्ति। **राजीवगान्धीपरिसरस्य शोधच्छात्रेण आयुष्मता स्वर्णमन्दार आर्य इत्यनेन 2018 तमे वर्षे शिक्षाशास्त्रस्य अध्ययनप्रसङ्गे नीतिवल्लरी** इति पुस्तकस्य रचना कृता। अस्मिन् पुस्तके विशिष्टाः नीतिश्लोकाः सविस्तरम् उल्लिखिताः सन्ति। श्लोकानां अर्थाः भावार्थः च भाषाचतुष्टये निबद्धाः सन्ति। संस्कृतेन हिन्द्याम् आङ्ग्ले मराठी भाषायां नीतिश्लोकाः सुष्ठु व्याख्याताः सन्ति। सत्यम् , अहिंसा , परोपकारः, विद्या , निष्ठा, श्रद्धा इत्यादिषु विषयेषु संस्कृतवाङ्मये उपलभ्यमानान् श्लोकान् चित्वा अनेन छात्रदशायाम् एव अस्य नीतिवल्लरी इत्यस्य पुस्तकस्य रचना कृता।
7. एवमेव ***श्रीवैष्णवी ,व्याससन्देशः, गोमती*** इत्याद्याः पत्रिकाः विभिन्नेषु परिसरेषु प्रकाश्यन्ते। एतद्विहाय मुख्यालयेन अपि संस्कृतविमर्शः इति प्राचीनपत्रिका प्रकाश्यते । अत्र शोधच्छात्राः अपि लेखान् लिखन्ति। एवमेव प्रतिवर्षं गङ्गानाथझापरिसरेण अपि विशिष्टाः शोधपत्रिकाः प्रकाश्यन्ते। उशती इति पत्रिका अतीव प्रसिद्धा वर्तते। एवं केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नैः परिसरैः प्रकाशितासु पत्रिकासु छात्राणां भूमिकाः प्रधानाः भवन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Data Provide the list of Published Materials | View Document |

***5.3.5 Percentage of students' participation in Simple Standard Sanskrit training sessions regarding communication practice during the last five years.***

***विगतेषु पञ्चसु वर्षेषु संवादाभ्याससम्बद्धेषु सरलमानकसंस्कृतप्रशिक्षणसत्रेषु छात्राणां भागग्राहितायाः प्रतिशतं मानम्।***

**Answer:** 18.86

5.3.5.1 Number of students participated in Simple Standard Sanskrit training sessions regarding communication practice year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु संवादाभ्याससम्बद्धेषु सरलमानकसंस्कृतप्रशिक्षणसत्रेषु भागग्राहिणां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 1075 | 935 | 1043 | 911 | 972 |

| File Description | Document |
|---|---|
| As per Data Template | View Document |
| Any Additional information | View Document |

**5.4 Alumni Engagement**

***5.4.1 The Alumni Association/Chapters (registered and functional) contributes significantly to the development of the institution through financial and non financial means during the last five years***

***पूर्वच्छात्रसङ्घः (पञ्जीकृतः कार्यं कुर्वन् च) विगतेषु पञ्चसु वर्षेषु आर्थिकयोगदानेन अन्यैः उपायैश्च संस्थायाः उन्नत्यर्थं सार्थकतया प्रयतमानः विद्यते।***

**Answer:**

परिसरेषु **छात्रचरसङ्घाः** सक्रियाः सन्ति। छात्रचरसङ्घाः छात्रचरेभ्यः स्वाधीतसंस्थया सह सर्वदा सम्पर्के भवितुम् अवसरं कल्पयति। छात्राः अध्ययनोत्तरमपि स्वाधीतेन परिसरेण संलग्नाः भवन्ति चेत्तर्हि ते परिसरस्य परम्परया विश्वविद्यालयस्य च प्रगतिं विज्ञातुं प्रभवन्ति। स्वीयं योगदानं व्यक्तिशः दातुम् अपि छात्रचरसङ्घेषु व्यवस्थाः वर्तन्ते। वित्तकोषेषु छात्रचरसङ्घस्य कोषाः अपि भवन्ति। अतः यत्र क्वापि स्थित्वा यदा कदापि धनं संस्थापयितुं शक्नुवन्ति छात्रचराः।

सामान्यतः अध्ययनोत्तरं छात्राः छात्रचरसङ्घस्य सदस्यतां स्वीकुर्वन्ति। सदस्यतायाः शुल्कम् अपि सामान्यमेव भवति। राजीवगान्धीपरिसरस्य छात्रचरसङ्घेन सदस्यतायाः शुल्कं 100 रूप्यकाणि निर्दिष्टानि सन्ति। केचन छात्राः निर्दिष्टस्य धनस्य अपेक्षया अधिकं धनम् अपि समर्पयन्ति। कुमुदा राव् इत्येका बालिका 400 रूप्यकाणि कोषे स्थापितवती । 2012 तमे वर्षे आरब्धे अत्रत्ये **छात्रचरसङ्घस्य कोषे 2022 नवम्बरपर्यन्तं 1,60,782 रूप्यकाणि** सन्ति। अद्यावधि 1000 संङ्ख्याकाः छात्रचराः अस्य सदस्यतां स्व्यकुर्वन् । यथाशीघ्रम् द्विलक्षात्मकधनराशेः सङ्ग्रहणाय सङ्घः क्रियाशीलः वर्तते। अनेन अधिकृतरूपेण अस्य पञ्जीकरणं शक्यते।

परिसरेषु यदा यदा विशिष्टाः कार्यक्रमाः सञ्चाल्यन्ते तदा तदा स्थानीयाः छात्रचराः स्वप्रेरणया आगत्य स्वीयं योगदानं यच्छन्ति। रजतोत्सवे ,अमृतमहोत्सवे , स्वर्णजयन्त्युत्सवे अन्येषु सन्दर्भेषु छात्रचराणां मुख्यभूमिकाः भवन्ति।

पुरीस्थे सदाशिवपरिसरे **शतमानोत्सवः** आचरितः। तत्रत्यः परिसरः पुरा संस्कृतमहाविद्यालयरूपेण अपि प्रसिद्धः आसीत् एव। शतमानोत्सवस्य कार्यक्रमे छात्रचराः महता उत्साहेन भागम् अगृह्णन् । राजीवगान्धीपरिसरेण रजतमहोत्सवः महता वैभवेन आचरितः। अस्मिन् महोत्सवे छात्रचरैः अपि सहस्रशः धनं दत्तम् । छात्रचराणां गोष्ठी अपि समायोजिता आसीत्। एवमेव छात्रचरैः परिसरे नाटकस्य यक्षगानस्य नृत्यादीनां प्रदर्शनं कृतम् । छात्रचराणाम् आगमनेन उत्सवः अत्यन्तं प्रसिद्धः अभवत्। अस्मिन् उत्सवे छात्रचराणां सम्माननम् अपि कृतम् आसीत्।

**छात्रचराः अपि विश्वविद्यालयस्य सम्पदः** एव सन्ति। **ते संस्कृतस्य दूताः इव कार्यं कुर्वन्ति**। स्वतन्त्रतायाः अमृतमहोत्सवसन्दर्भे विश्वविद्यालयस्य कुलपतिभिः आचार्यैः श्रीनिवासवरखेडिवर्यैः उक्तम् अस्ति यत् विभिन्नेषु परिसरेषु अध्ययनरताः छात्राः विश्वस्मिन् अपि विश्वे सर्वत्र सञ्चरन्तः संस्कृतस्य संस्कृतविश्वविद्यालयस्य च प्रचारं प्रसारं कुर्वाणाः सन्देशवाहकाः दूताः इव विलसन्ति इति। अनेन ज्ञायते यत् छात्रचराः विश्वविद्यालयस्य अभिन्नाः सम्पदः सन्ति इति।

सामान्यतः **पूर्वच्छात्रसङ्घस्य अध्यक्षाः कार्यदर्शिनः अन्येषु सदस्येषु अधिकाः परिसरस्य साम्प्रतिकाः कर्मचारिणः अपि भवन्ति**। अतः पूर्वच्छात्रसङ्घस्य सर्वेषु क्रियाकलापेषु पारदर्शकता भवति एव। छात्रचरसङ्घाः यत्र पञ्जीकृताः न सन्ति

तत्र अपि अनौपचारिकरूपेण ते क्रियाशीलाः सन्ति। एतादृशाः सङ्घाः समाजस्य हिताय कार्यं कुर्वन्ति। छात्रचरसङ्घेन काले काले रक्तदानादिकाः कार्यक्रमाः आयोज्यन्ते । एतादृशानां कार्यक्रमाणां साहाय्येन बहवो हि जनाः रोगिणः उपकृताः भवन्ति। स्वच्छभारतम् इत्यस्य अभियानस्य अन्तर्गतरूपेण परिसरेषु स्वच्छताकार्यक्रमाणाम् आयोजनम् अपि विहितम् एव। एवं छात्रचरसङ्घाः परिसरीयैः छात्रचरैः अर्थात् साम्प्रतिकैः कर्मचारिभिः शिक्षकैश्च सम्भूय रचनात्मकानि कार्याणि सम्पादयति। अस्य सङ्घस्य कृते सर्वेषु कार्यक्रमेषु औपचारिकरूपेण आह्वानम् अपि दीयते। छात्रचरसङ्घस्य सहयोगेन अध्ययनरताः छात्राः अपि प्रेरिताः भवन्ति। तेषां कृते एते आदर्शप्रायाः सम्भवन्ति। अतः छात्रसङ्घस्य आवश्यकता सर्वदा अनुभूयते। सामान्यतः परिसरस्य मुख्यकोषादपि विविधानां कार्यक्रमाणां सञ्चालनावसरे प्रशासकाः साहाय्यम् आचरन्ति। अतः सङ्घः स्वकोषात् अधिकं व्ययं न करोति। एवं जागरूकतया धनस्य विनियोगिर्थं प्रयतते असौ सङ्घः ।

छात्रचरसङ्घस्य सङ्घटनावसरे सर्वदा विश्वविद्यालयस्य पारदर्शिता भवति एव। अस्य सङ्घस्य साहाय्यं स्वीकृत्य विविधानां समाजोन्मुखकार्याणाम् आयोजनं शक्यम् इति परिसरः जानाति। अतः समाजोऽपि सर्वदा परिसरेण सह मधुरं सम्बन्धं स्थापयति। सामाजिकप्रतिष्ठां लब्ध्वा अपि पूर्वाधीतसंस्थायाः विकासे योगदानं देयम् इति छात्रचराः चिन्तनं कुर्वन्ति। अतः ते सर्वदा परिसरोन्मुखाः भवन्ति। **परिसरस्य वार्षिकोत्सवे परिसरे अभिनन्दनग्रन्थादीनां मुद्रणावसरे तेन सम्बद्धेषु कार्यक्रमेषु छात्रचराणां छात्रचरसङ्घस्य च योगदानं** भवति ।

छात्रचरसङ्घः प्राक्कालिकैः छात्रैः सह नवप्रविष्टानां छात्राणां सम्पर्कं साधयितुं सेतुः इव कार्यं करोति। पूर्वतनानां छात्राणां यशोगाथायाः ज्ञानेन तेषां व्यक्तित्वोन्नयनस्य उपक्रमाणां दर्शनेन साम्प्रतम् अध्ययनरताः छात्राः अभिप्रेरिताः जायन्ते। एवं छात्राणां छात्रचराणां च साहाय्येन विश्वविद्यालयस्य प्रतिष्ठा वर्धतेतमाम् ।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

*5.4.2 Alumni contribution during the last five years (Amount in Rupees)*
***विगतेषु पञ्चसु वर्षेषु पूर्वच्छात्रसङ्घेन प्रस्तुतं वित्तीयं योगदानम्-(रूप्यकेषु)***

**Answer:** A. ≥ 1.00 Lakhs अ. ≥ १.०० लक्षाः

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Alumni association audited statements (Institutional data as per Data Template) | View Document |

## 6.Governance, Leadership and Management
### 6.1 Institutional Vision and Leadership
*6.1.1 The governance of the Institution is reflective of an effective leadership in tune with the vision and mission of the University*

***संस्थायाः दूरदृष्टिध्येयानुसारेण प्रवर्तमानस्य कार्यदक्षस्य नेतृत्वस्य प्रतिफलनं संस्थायाः प्रशासने भवति।***

**Answer:**

अथ अनूचानपरम्परायाः परिरक्षणाय प्रतिष्ठापितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य **' योऽनूचानः स नो महान्'** इतीदं ध्येयवाक्यमस्य ध्येयं दूरदृष्टिं च साङ्केतिकरूपेण अभिव्यनक्ति। अयं विश्वविद्यालयः पारदर्शकप्रशासनप्रणाल्याः

क्रियान्वनयनस्य फलस्वरूपेण मुख्यालयेन सह द्वादशभिः परिसरैः संयुक्तः आभारतं व्याप्तश्च वर्तते। व्यापकस्यास्य विश्वविद्यालयस्य दृष्टिरपि व्यापिका एव अस्ति। **दृष्टिपूतं न्यसेत् पादम्** इति वचनमभ्युपगम्य विश्वविद्यालयः समेधमानः वर्तते।

## दूरदृष्टिः प्रशासनञ्च-

1. मुख्यालयस्य विविधपरिसराणां च भवनप्रकोष्ठप्रयोगशालाक्रीडाङ्गणावासस्थानानां ग्रन्थालयवाचनालयकार्यालयादीनां आसन्दपीठोपकरणदृश्यश्रव्यसंसाधनानां च अभिवृद्धिसम्पादनं स्तरोन्नयनञ्च।
2. विविधशैक्षिकप्राशासनिकसौकर्याणां प्रकल्पनपुरस्सरं संस्थायाः पुनारचना।
3. राष्ट्रियशिक्षानीतेः (NEP-2020) क्रियान्वयनपुरस्सरं भारतीयज्ञानप्रणाल्याः तदन्तर्गतभाषाकलासंस्कृतेश्च प्रचाराय विकासाय च अपेक्षितानां सार्थकमार्गोपायानम् अन्ववेषणम्।
4. विश्वविद्यालये संस्कृतविद्याशाखानां विद्यास्थानानां च अध्ययनानुसन्धानार्थम् अपेक्षितानाम् अन्ताराष्ट्रियस्तरीयसौकर्याणां प्रकल्पनम् अन्ताराष्ट्रियाध्ययनकेन्द्राणां प्रतिष्ठापनं च ।
5. विश्वविद्यालयस्य विद्यास्थानानां विद्याशाखानां च पुनः सङ्घटनपुरस्सरं नवाचारस्य प्रौद्योगिक्याश्च अनुप्रयोगपुरस्सरं छात्रेभ्यः अध्ययनाय स्वतन्त्रावसरप्रकल्पनम् ।
6. वैश्विकस्तरे संस्कृतभाषायाः प्रचाराय प्रसाराय च अपेक्षितस्य उत्कृष्टोपक्रमस्य उद्विकासः ।
7. संस्कृत-पालि-प्राकृताद्यानां प्राचीनभारतीयभाषाणां संरक्षणप्रसारविकासैः सह नवसन्ततेः अपेक्ष्यानुरूपायाः भाषाध्ययनाध्यापनपरम्परायाः सर्जनम्। सरलमानकसंस्कृतस्य समाश्रयणं च।
8. संस्कृतवाङ्मये निबद्धानां तत्त्वानां गवेषणपुरस्सरम् अस्य वाङ्मयस्य सर्वसाधारणीकरणम् ।
9. धनस्य समयस्य शक्तेश्च अल्पमात्रेण अनुप्रयोगपुरस्सरं सरलसंस्कृतेन प्राविधिकोपकरणानां साहाय्येन च गभीरशास्त्रीयविचाराणां सरलशैल्या प्रस्तुतीकरणम् ।
10. संस्कृतवाङ्मये सन्निहितानां तत्त्वानाम् अध्ययनाय अनुसन्धानाय शिक्षणाय च उत्सुकेभ्यः जनेभ्यः देश-काल-जाति-लिङ्ग-स्तरादीनां बाधकानां वारणपूर्वकम् अवसरकल्पनम् इत्यादीनि विश्वविद्यालयस्य अग्रदृष्टौ सन्ति।

## ध्येयं प्रशासनञ्च -

अनुदिनं लोकसम्मतानि ध्येयानि ध्यायतः जनस्य/सङ्घटनस्य ध्येयपदार्थविशेषेषु सङ्गः सहजतया सञ्जायते। एतदनु ध्येयेषु पारम्परिकशास्त्रीयविषयविशेषेषु विश्वविद्यालयस्य सङ्गः सञ्जातोऽस्ति। विश्वविद्यालयस्य विभिन्नेषु परिसरेषु विभिन्नानां शास्त्राणाम् अध्ययनाध्यापनपरम्परा अवच्छिन्नरूपेण प्रचलति। देशस्य विदेशस्य च छात्रेभ्यः स्वाभीष्टं शास्त्रीयं विषयं स्वाभीष्टपरिसरे पठितुमत्र अवसरः प्रकल्पितोऽस्ति। **यत्र विश्वं भवत्येकनीडम्** इतीमां वैदिकसूक्तिं ध्यायतः विश्वविद्यालयस्य प्रशासनेन परिसरेषु एतदर्थं सुव्यवस्था परिकल्पिता अस्ति । पुनः भारतीयज्ञानप्रणाल्याः संरक्षणोपायन् अनुक्षणं ध्यायन् केन्द्रीयसंस्कृतविश्वविद्यालयः प्राचीनज्ञानविज्ञानयोः प्रचाराकान् संरक्षकान् च विना भेदभावं प्रोत्साहयति। विश्वविद्यालयस्य विशिष्टाः योजनाः एतदर्थमेव सक्रियाः सन्ति। तासु प्रमुखाः यथा -

## आदर्शसंस्कृतमहाविद्यालयाः/शोधसंस्थानानि

केन्द्रीयसंस्कृतविश्वविद्यालयेन २२ आदर्शसंस्कृतमहाविद्यालयाः एवं ०४ शोधसंस्थानानि च सम्पूर्णभारते प्रवर्त्यन्ते, एताः संस्थाः केन्द्रीयसंस्कृतविश्वविद्यालयात् ९५% आवर्तकधनराशिं तथा ७५% अनावर्तकधनराशिम् आर्थिकानुदानरूपेण प्राप्नुवन्ति।

- **स्नातकस्तरे शिक्षाशास्त्रिस्तरे च अध्यापकप्रशिक्षणम्**

विश्वविद्यालयः प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। प्रत्येकस्मिन् परिसरे (गङ्गानाथझापरिसरं विहाय) अध्यापकप्रशिक्षणम् आधुनिकतन्त्राणि आश्रित्य प्रवर्त्यते। प्रत्येकस्मिन् वर्षे बहवः योग्याश्च संस्कृताध्यापकाः विश्वविद्यालयेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।

- **विभिन्नस्तरेषु संस्कृताध्ययनविषयकसंशोधनकार्याणां व्यवस्थापनम्**

संस्थानस्य सर्वेष्वपि परिसरेषु बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय संस्थानेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः प्रदीयते तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते ।

**संस्कृतस्य समुन्नतये मानवसंसाधनविकासमन्त्रालयद्वारा प्रकल्पितानां योजनानां कार्यान्वयः** –

संस्कृतभाषायाः एवं शास्त्राणां संरक्षणाय प्रचारप्रसाराय च भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयेन कल्पितानां योजनानां कार्यान्वयः विश्वविद्यालयेन अधोलिखितेषु विषयेषु क्रियते ।

- **शास्त्रचूडामणियोजना** –

अस्यां योजनायां विभिन्नशास्त्रेषु छात्राणां कृते पाठनाय सुप्रसिद्धाः विद्वांसः/सेवातः निवृत्ताः ये तत्तादृशानां विदुषां नियुक्तिः संस्थानेन क्रियते । अस्याः योजनायाः लक्ष्यं गभीरशास्त्राणां प्रशिक्षणम् ।

- **पुस्तकक्रयणयोजना**

अस्यां योजनायाम् विश्वविद्यालयः संस्कृतपुस्तकानि लेखकात् अथवा प्रकाशकात् क्रीत्वा संस्कृतपुस्तकालयेभ्यः निःशुल्कं प्रयच्छति ।

- **व्यावसायिकप्रशिक्षणयोजना**

अत्र अल्पकालिकं व्यवसायात्मकं शिक्षणं छात्राणां कृते दीयते। तत्र इमे विषयाः मुख्यतया भवन्ति – ज्योतिषम्, कर्मकाण्डः, शिलालेखाध्ययनम् (Paleography) सूचिबद्धाध्ययनम् (Cataloguing) पाण्डुलिपीनामध्ययनं संस्कृताशुलिप्यध्ययनम्, टङ्कणाध्ययनम् इत्यादयो विषयाः।

- **स्वयंसेविसंस्थाभ्यः आर्थिकसहायताप्रदानम्**

अस्यां योजनायां संस्कृतस्य प्रचार-प्रसाराय यानि संस्कृतसंस्थानानि वर्तन्ते तेभ्यः सर्वेभ्यः तेषां कार्यनिर्वहणाय ७५% आर्थिकसहायता प्रदीयते ।

- **आदर्शसंस्कृतमहाविद्यालयशोधसंस्थानेभ्यः च आर्थिकसहायताप्रदानम् ।**

अस्यां योजनायां देशे विद्यमानेभ्यः चितेभ्यः पारम्परिकसंस्कृतमहाविद्यालयेभ्यः, शोधसंस्थानेभ्यश्च सुचारुरूपेण कार्यसम्पादनाय ९५% आर्थिकसहायता तथैव आवश्यकानां वस्तूनां कृते ७५% आर्थिकसाहाय्यञ्च आचर्यते । सम्प्रति देशे अस्यां योजनायां 25 संस्थानानि वर्तन्ते ।

- **प्रसिद्धानां संस्कृत-अरबिक-पारसीविदुषां सम्माननम्** –

अस्यां योजनायां प्रतिहायनं स्वतन्त्रतादिवससमारोहे भारतसर्वकारः १५ संस्कृतविदुषां ३ अरबिकविदुषां ३ पारसीविदुषां प्रमाणपत्रेण सह आजीवनं ५००००(प्रतिवर्षम्) वित्तीयानुदानं च ददाति ।

- **अखिलभारतीयसंस्कृतशास्त्रीयस्पर्धा**

एतदङ्गतया पारम्परिकसंस्कृतशिक्षणसंस्थासु अधीयानानां प्रतिभां प्रोत्साहयितुम् अखिलभारतस्तरे विविधाः शास्त्रीयस्पर्धाः आयोज्यन्ते ।

- **ग्रन्थप्रकाशनाय अनुदानम्**

अस्यां योजनायां विदुषां कृते संस्थानाञ्च कृते संस्कृतभाषायाः ग्रन्थानां प्रकाशनाय ८०% यावत् आर्थिकानुदानं प्रदीयते ।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

*6.1.2 The institution practices decentralization and participative management*

## *संस्था सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च अनुसरति।*

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रबन्धनव्यवस्था पूर्णशः सहभागिनी विकेन्द्रीकरणप्रक्रियाश्रिता चास्ति। **सङ्घे शक्तिः कलौ युगे** इति वचनमनुसृत्य प्रशासनव्यवस्था स्वीयानां मानवीयतत्त्वानां सहयोगं स्वीकृत्य एव कार्यं करोति। प्रबन्धनपरिश्रमयोः सुचारुरूपेण सङ्घटनाभावे प्रशासनकार्याणि निर्विघ्नं न सम्भवन्ति। अतः सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च केन्द्रीयसंस्कृतविश्वविद्यालयः अनुसरति । सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च केन्द्रीयसंस्कृतविश्वविद्यालयस्य कृते जायमानाः लाभाः यथा -

1. संस्कृतेन सम्बद्धानां नूतनविचाराणां योजनानां च क्रियान्वयनावसरे विश्वविद्यालयस्य प्रबन्धनव्यवस्था आत्मानं सबलम् इति भावयति। यतोऽहि समेषां परिसरीयाणां परिपूर्णः सहयोगः एव प्रबन्धनव्यवस्थायाः बलमस्ति।
2. लक्ष्यप्राप्तिप्रसङ्गे समयसीम्नि कार्यकारणावसरे समस्यायाः समाधानान्वेषणावसरे च प्रत्येकमपि परिसरः व्यक्तिगतभूमिकां दायित्वं च अवगम्य प्रतिपदं व्यक्तिगतं योगदानं प्रयच्छति।अनेन विश्वविद्यालयस्य धनसमयशक्तीनां सदुपयोगः जायते।
3. सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य समेषां कर्मचारिणां मनोबलं प्रतिपदं समभिवर्धतेतमाम् ।
4. प्रत्येकमपि परिसरस्य स्थानीयप्रबन्धनव्यवस्था विश्वविद्यालयस्य प्रबन्धनव्यवस्थायाः सशक्तीकरणाय कायेन वाचा मनसा कार्यं करोति। अतः परिसरेषु विकीर्णोऽपि विश्वविद्यालयः सुदृढप्रशासनव्यवस्थां निर्विघ्नं वहति।
5. सहभागिप्रबन्धनव्यवस्थायाः अनुसरणेन विकेन्द्रीकरणप्रक्रियायाः क्रियान्वयनेन च विश्वविद्यालयः आभारतं व्याप्तः एकमेवाद्वितीयः अन्तःपरिसरीयः संस्कृतविश्वविद्यालयः इति प्रकीर्त्यते।
6. विश्वविद्यालयः नूतनयोजनानां क्रियाकलापानां च अनुप्रयोगात् पूर्वं परामर्शशैलीम् आश्रित्य समेषां परामर्शान् स्वीकृत्य अन्तिमनिर्णयं स्वीकरोति । एवमेव अन्तिमनिर्णयप्रसङ्गेऽपि संयुक्तनिर्णयशैलीं समाश्रित्य प्रशास्ति। विभिन्नाः परिषदः, समितयः, प्रकोष्ठाः, मण्डलानि ,विद्यास्थानानि विद्याशाखाश्च प्रशासनव्यस्थां सबलीकर्तुमेव संरिचिताः सन्ति।

विश्वविद्यालयस्य प्रतिनिधिभूताः परिसरीयाः विभिन्नाः समितयः संस्थायाः हितं विकासं च मनसि निधाय कार्यं कुर्वन्ति। तासु प्रमुखाः समितयः यथा -

**1. परीक्षासमितिः**

मुख्यालयात् प्रश्नपत्रस्वीकरणम्, परीक्षायाः व्यवस्थापनम्, केन्द्रस्थानस्य निर्धारणम्, प्रवेशपत्रप्रश्नपत्रादीनां वितरणम्, उत्तरपत्रिकाणां स्वीकरणम्, मूल्याङ्कनार्थं मुख्यालयं प्रति प्रेषणम् इत्यादीनि कार्याणि परिसरस्तरेषु सम्भवन्ति।

**2. स्थानीयशोधसमितिः**

स्थानीयशोधसमितिः चितानां शोधार्थिनां शोधप्रस्तावं परिशीलयति । समीक्ष्य च मुख्यालयं प्रेषयति । छात्रवृत्तिप्रदाने संस्तौति । कार्यप्रगतेः निरीक्षणं करोति। शोधस्तरपरिरक्षणाय अपेक्षितव्यवस्थादिकं परिसरस्तरे विधाय केन्द्रीयशोधसमितेः

संसूचनानां अनुपालनं करोति।

**3. ग्रन्थालयसमितिः**

ग्रन्थालयसमितिः पुस्तकानां क्रयणसंरक्षणसंस्थापनवितरणादिषु कार्येषु प्रतिपदं मार्गदर्शनं करोति।

**4. वित्तसमितिः**

वित्तसमितिः परिसरस्तरे वेतनछात्रवृत्तिनित्यनैमित्तिकव्ययादीनां प्रबन्धनाय कार्यं करोति। स्थानीयवित्तीयसमितेः अनुमोदनेन सहयोगेन च क्रियाकलापान् परिसरः संयोजयति।

**5. परामर्शसमितिः**

परामर्शसमितिः परिसरस्य उपलब्धसंसाधनानां सुचारुरूपेण विनियोगाय परामर्शं प्रयच्छति।

**6. प्रवेशसमितिः**

प्रवेशसमितिः छात्राणां प्रवेशप्रक्रियायाः नामाङ्कनस्य परिचयपत्रप्रवेशिकादीनां च वितरणकार्यं निर्वहति। प्रवेशसमिते: अनुशासनेन विद्यार्थिनां प्रवेश: नियमानुसरं क्रियते।

**7. अनुशासनसमितिः**

अनुशासनसमितिः अनुशासनभङ्गकरान् परिवेषान् वारयितुम् अनुशासनव्यवस्थां परिरक्षितुं च साहाय्यं करोति ।

**8. छात्रावाससमितिः**

छात्रावाससमितिः परिसरेषु छात्राणां आवासभोजनव्यस्थादीनां व्यवस्थादिकं निर्वहति । छात्रावासे प्रवेशाय अपेक्षितान् नियमान् निर्धारयति । छात्राणां प्रतिनिधिभ्य: छात्रावासनिर्वहणादिषु सहयोगप्रदानाय प्रचोदयति।

**9. छात्रवृत्तिसमितिः**

छात्रवृत्तिसमितिः छात्रवृत्तिप्राप्तये अर्हाणां छात्राणां नामावलीं सज्जीकृत्य वस्तुनिष्ठमाध्यमेन छात्रवृत्तिप्रदानाय व्यवस्थां कल्पयति।

**10. शैक्षिकसमितिः**

शैक्षिकसमितिः शैक्षिकक्रियाकलापानां सञ्चालनाय प्रतिपदं शासनस्य साहाय्यम् आचरति।

**11. प्रकाशनसमितिः**

प्रकाशनसमितिः परिसरीयवार्षिकपत्रिकायाः शोधपत्रिकायाः निमन्त्रणपत्रिकादीनां च प्रकाशनाय उपकरोति ।

**12. समयसारिणीनिर्माणसमितिः**

समयसारिणीनिर्माणसमितिः कक्ष्यानुगुणं विषयानुगुणं शिक्षकानुगुणं विभागानुगुणं च समयसारिणीनिर्माणकार्यं सम्पादयति ।

**13. उत्पीडनावरोधकसमितिः**

उत्पीडनावरोधकसमितिः परिसरे उत्पीडनादीनाम् अनैतिकगतिविधीनां नियन्त्रणाय तत्र संलग्नान् दण्डनाय च संस्तुतिं प्रयच्छति।

**14. शिक्षकाभिभावकसमितिः**

शिक्षकाभिभावकसमितिः छात्राणाम् अभिभावकैः दीयमानान् परामर्शान् स्वीकृत्य छात्राणां व्यक्तिगतविकासं अभिभावकेभ्यः संसूचयति।

**15. प्रतियोगितासमितिः**

प्रतियोगितासमितिः छात्राणां सर्वाङ्गीणविकासाय अपेक्षिताः विविधप्रतियोगिताः आयोजयति प्रेरयति च।

**16. क्रयणविक्रयणसमितिः**

क्रयणविक्रयणसमितिः परिसराय अपेक्षितपदार्थानां क्रयणाय नष्टपदार्थानां विक्रयणाय च संस्तौति।

**17. मुद्रणविज्ञापनसमितिः**

मुद्रणविज्ञापनसमितिः परिसरस्य शैक्षिकशैक्षिकेतरकार्यक्रमैः सम्बद्धानां दत्तांशानां मुद्रणाय कार्यं करोति ।

एवं विशिष्टासु समितिषु विश्वविद्यालयस्य शिक्षकाः कर्मचारिणश्च शासनाय परिपूर्णं सहयोगं यच्छन्ति। एताः समितयः भिन्नभिन्नपरिसरेषु तत्तद्परिसरानुगुणं भिन्नभिन्नाः एव सन्ति । आसां माध्यमेन सर्वेऽपि शैक्षिकप्राशासनिककार्याणि सुचारुरूपेण जायन्ते।

1. संस्थायाः उत्पादकतायां गुणवत्तायां च उत्तरोत्तरोत्तरं  वृद्धिसम्पादनाय सहभागिप्रबन्धनव्यवस्था भृशं साहाय्यम् आचरति।
2. प्रजातन्त्रात्मकप्रणाल्याः उद्विकासे सहभागिप्रबन्धनव्यवस्थायाः मुख्यभूमिका अस्ति इत्यत्र विश्वविद्यालयस्य दृढविश्वासः विद्यते।
3. प्रबन्धनकौशलानां विकासे उपार्जने च सहभागितायाः प्रमुखं स्थानम् अस्ति इति विश्वविद्यालयः अभिप्रैति।

कार्यात्मक-वित्तीय-प्राशासनिकस्वायत्तताः अपि स्थानान्तरेषु न्यस्तानि भवन्ति अत्र । विभिन्नेषु परिसरेषु स्थानीयप्रशासनव्यवस्था परिकल्पिता अस्ति इत्यतः शासनव्यवस्थायां पारदर्शिता परिदृश्यते। प्रशासनं भारभूतमिति भावः विकेन्द्रीकरणप्रणाल्यां नैव आयाति ।

एवं विभिन्नस्तरेषु शासनस्य अधिकारस्य शक्तीनां च वितरणं विश्वविद्यालयस्य वर्तते। **सूत्रे मणिगणाः इव** प्रशासने विकेन्द्रीकरणप्रणाली शोभते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***6.1.3 Sanskrit-Version of vision, mission statement of the Institution, the Act, Statute, MoA and Rules,Official notification/information, Regulations are available in Institutional website***

***Sanskrit is adopted as medium in the process of administration/ management/ writing of notes on files/ official notification on notice board/ faculty information etc., in the Institution***

***संस्थायां दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, संस्थायाः लिखितनियमानाम्, औद्योगिकसूचनानां विनियमानाञ्च संस्कृतरूपान्तरणम् उपलभ्यते***

***संस्थया प्रशासने/ प्रबन्धने/ सञ्चिकानामुपरिटिप्पणीलेखने/ सूचनाफलकस्योपरि कार्यालयीयसूचनासु/ शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु वा माध्यमरूपेण संस्कृतभाषा स्वीकृता***

**Answer:**

**विश्वविद्यालयोस्माकं**
**केन्द्रीयसंस्कृताभिधः।**
**दीर्घदृष्ट्योन्नतैर्लक्ष्यैः**
**राजते बहुभिर्गुणैः।।**

अथ संस्कृतभाषायाः सर्वतोमुखविकासाय आभारतं संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण **१९७० तमस्य अक्टोबर् मासस्य १५ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितम्** । यदा **केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः -२०२०** इत्येषः अधिनियमः लोकसभायां पारितोऽभूत् तदा संस्थानमिदं केन्द्रीयसंस्कृतविश्वऔद्योगिकसूचनानां विनियमानाञ्च संस्कृतरूपान्तरणम् उपलभ्यते। अस्मिन् विश्वविद्यालये **दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां विनियमानाञ्च अधिकाधिकानि संस्कृतरूपान्तराणि सम्पादितानि** । तेषु कानिचन जालपुटे आरोपितानि सन्ति। विश्वविद्यालयस्य जालपुटे एतद्विषयकं विवरणमपि अस्ति। एवं **प्रशासने, प्रबन्धने, सञ्चिकानामुपरि टिप्पणीलेखने, सूचनाफलकस्योपरि , कार्यालयीयसूचनासु, शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु च मुख्यमाध्यमरूपेण संस्कृतभाषा स्वीकृता** वर्तते। सर्वेषु **परिसरेषु संस्कृतमाध्यमेन अधिकाधिकाः सूचनाः प्रसार्यन्ते**। परिसरनिदेशकाः सर्वे संस्कृतज्ञाः प्रशासकाः एव। अधिकाधिकाः कार्यालयीयकर्मचारिणश्च संस्कृतेन व्यवहर्तुं लेखितुं च प्रभवन्ति। अतः कार्यालयीयसूचनाः स्थानीयपरिवेषानुगुणं संस्कृतेन प्रादेशिकभाषासु च प्रसार्यन्ते। छात्रसम्बद्धाः शैक्षकक्रियाकलापानां सम्बद्धाः सूचनाः अधिकाधिकाः संस्कृतेन सह हिन्द्याम् , आङ्ग्लभाषायां वा प्रसार्यन्ते। विश्वविद्यालयः सर्वपरिसराणां प्रबन्धनार्थं केन्द्रीयप्राशासनिकसमन्वयरूपेण कार्यं करोति ।भारतसर्वकारद्वारा संस्कृतशिक्षाविकासाय स्वीकृतविभिन्नयोजनानां कार्यक्रमाणां च क्रियान्वयनं विश्वविद्यालयः संस्कृतमाध्यमेन एव करोति। मुख्यालयस्य प्रवेशद्वारे **संस्कृतेन सह हिन्द्याम् आंग्लभाषायाञ्च प्राशासनिकशब्दानां संस्कृतसूक्तीनाञ्च दर्शनाय अनुसरणाय च योग्यं वैद्युतिकं फलकं** (डिजिटल-डिस्प्ले) निक्षिप्तं वर्तते। परिसरेषु अपि सूचना प्रसाराय शब्दपरिचयाय पञ्चाङ्गपठनाय योग्यानि वैद्युतिकफलकानि तत्र तत्र सन्ति।

स्वोद्देश्यस्य प्राप्त्यर्थं सर्वकारस्य विभिन्नयोजनानाम्/कार्यक्रमाणां निष्पादनाय विश्वविद्यालयः अधोलिखितगतिविधीन् संचालयति।

1. विभिन्नराज्येषु परिसराणां स्थापना।
2. माध्यमिक- पूर्वस्नातक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षम्।
3. स्नातक-(शिक्षाशास्त्रम्/बि.एड्.)स्नातकोत्तर-(शिक्षाचार्य/एम्.एड्.)स्तरयोः संस्कृतशिक्षणप्रशिक्षम्।
4. संस्कृतस्य विभिन्नविषयेषु शोधकार्यार्थं प्रोत्साहनम्।
5. संस्कृतस्य प्रचाराय मानवसंसाधनविकासमन्त्रालयस्य योजनानां कार्यान्वयम्।
6. संस्कृतपुस्तकालयानां पाण्डुलिपिसंग्रहालयानां स्थापना तथा दुर्लभपाण्डुलिपीनां महत्त्वपूर्णयोग्यपुस्तकानां प्रकाशनम्
7. संस्कृताध्यायनार्थं पत्राचारपाठ्यक्रमस्य संचालनम् इत्यादीनाम् उल्लेखः विश्वविद्यालयस्य जालपुटे संस्कृतेन एव कृतः वर्तते।

एवमेव दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते।अधिकाधिकानां प्रलेखानां संस्कृतरूपान्तरणस्य कार्यम् अद्यावधि सम्पादितमस्ति ।

लक्ष्यम् उद्देश्यानि च संस्कृतभाषायाम् अनूद्य जालपुटे स्थापितानि सन्ति । यथा -

**1. विभिन्नराज्येषु परिसराणां स्थापना**

अस्य शैक्षिकगतिविधयः द्वादशसु परिसरेषु प्रचलन्ति । मुख्यालयं संयोज्य त्रयोदश परिसराः आभारतं विलसन्ति।

**2. परम्परागतमाध्यमेन माध्यमिक-स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु अध्यापनम् -**

त्रयोदशभ्यः परिसरेभ्यः अतिरिक्ताः २३ आदर्शसंस्कृतमहाविद्यालयाः एवं शोधसंस्थानानि तथैव ८४ स्वयंसेविसंस्कृतसंस्थाश्च विश्वविद्यालयेन सम्बद्धाः सन्ति।

विश्वविद्यालयस्य प्रत्येकस्मिन् परिसरे (प्रयागराजपरिसरं विहाय) आचार्यकक्ष्यापर्यन्तं पठनपाठने भवतः । तत्र इमे विभागाः विलसन्ति यथा – साहित्यविभागः, न्यायविभागः, व्याकरणविभागः, धर्मशास्त्रविभागः, पुराणेतिहासविभागः, अद्वैतवेदान्तविभागः, जैनदर्शनविभागः, नव्यन्यायविभागः, साङ्ख्ययोगविभागः, मीमांसाविभागः वेदविभागः ज्यौतिषविभागश्च सन्ति । विभागीयसूचनाः अधिकाधिकाः संस्कृतेन निर्गच्छन्ति। गङ्गानाथझापरिसरः शोधकार्याय भारते एव अद्वितीयकेन्द्रत्वेन प्रसिद्धो वर्तते । परिसरोऽयं १९७१ तमे वर्षे संस्थानेन स्वायत्तीकृतः। अस्मिन् परिसरे बहवः छात्राः विद्यावारिधिः इत्युपाधिं प्राप्तुं शोधकार्ये प्रवेशं लभन्ते। सर्वाणि अनुसन्धानकार्याणि संस्कृतमाध्यमेन एव जायन्ते। बृहत्पुस्तकालयोऽपि परिसरेऽस्मिन् वर्तते यत्र सर्वशास्त्रसम्बद्धानि पुस्तकानि तथैव पाण्डुलिपयः, ताडपत्राणि,भूर्जपत्राणि च विद्यन्ते।

**3. स्नातकस्तरे शिक्षाशास्त्रिस्तरे च अध्यापकप्रशिक्षणम्**

प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे संस्कृतेन प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। प्रत्येकस्मिन् परिसरे (गङ्गानाथझापरिसरं विहाय)अध्यापकप्रशिक्षणम् आधुनिकतन्त्राणि आश्रित्य संस्कृतमाध्यमेन प्रवर्त्यते। प्रत्येकस्मिन् वर्षे बहवः योग्याश्च संस्कृताध्यापकाः संस्थानेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।

**4. विभिन्नस्तरेषु संस्कृताध्ययनविषयकसंशोधनकार्याणां व्यवस्थापनम्**

सर्वेष्वपि परिसरेषु बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय संस्थानेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः प्रदीयते तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते सर्वेषु परिसरेषु ।

**5. संस्कृतस्य समुन्नतये मानवसंसाधनविकासमन्त्रालयद्वारा प्रकल्पितानां योजनानां कार्यान्वयः।**

**6. विशिष्टपाण्डुलिपिग्रन्थानां शोधग्रन्थानाञ्च प्रकाशनम्**

विश्वविद्यालयः विभिन्नैः विद्वद्भिः सुष्ठु सम्पादितानां विविधानां पाण्डुलिपिग्रन्थानाम्, शोधग्रन्थानां च प्रकाशनं करोति ।

**7. पत्राचारपाठ्यक्रमः**

भारते विदेशेषु च संस्कृतभाषायाः परिचयं प्राथमिकशिक्षणञ्च प्रदातुं संस्थानेन हिन्दीमाध्यमेन, आङ्ग्लमाध्यमेन च वर्षद्वयात्मकः संस्कृतभाषापरिचयपाठ्यक्रमः सञ्चाल्यते।

**8. संस्कृतान्तर्जाल (NET) परियोजना**

विश्वविद्यालयः इन्दिरागान्धीराष्ट्रियमुक्तविश्वविद्यालयस्य सहयोगेन भाषामन्दाकिनी नाम्न्यां ज्ञानदर्शनान्तर्गतवाहिन्यां विविधान् संस्कृतभाषामयान् शैक्षिककार्यक्रमान् प्रसारयति । विश्वविद्यालयेन सज्जीकृतपाठ्यसामग्री वी.सी.डी. माध्यमेनापि उपलभ्यते। एवमेव विद्यावारिधेः नियमावलिः , परामर्शप्रक्रियाः सम्भूयकारिताः इत्येतासां नीतिः , छात्रार्था आचारसंहिता ,शिक्षकार्था आचारसंहिता इत्यादीनां संस्कृतरूपान्तराणि विश्वविद्यालयस्य जालपुटे आरोपितानि सन्ति।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Sanskrit-Version of vision, mission statement documents on the website | View Document |
| Provide the weblink of the Sanskrit versionofall documents | View Document |
| Provide link for additional information | View Document |

**6.2 Strategy Development and Deployment**

***6.2.1 Perspective/Strategic plan and deployment documents are available in the institution***

***संस्थायां भविष्यद्योजनायाः/ व्यूहात्मकयोजनायाः नियोजनप्रलेखाः क्रियान्वयनसम्बद्धानि प्रमाणानि वा उपलभ्यन्ते।***

**Answer:**

संस्कृतवाङ्गयं विविधशास्त्रभूयिष्ठमस्तीति विदितमेव । न केवलम् आध्यात्मिकशास्त्राणाम् अपि तु लौकिकानां वैज्ञानिकानां च बहूनां शास्त्राणां बहद्ब्राण्डागारोपमं वर्तते वाङ्गयमिदम् । अतः समग्रः सम्प्रत्ययः विश्वविद्यालयस्य भविष्यद्योजनायां सन्निहितः वर्तते यत्र हि **शास्त्रसर्वस्वम्** + **सम्पत्सर्वस्वम्** सङ्कलितं सम्मिलितं चास्ति। क्रमशः यथा -

१. **शास्त्रोज्जीविका** ( Mission mode project) हितशासकानि शास्त्राणि । अतः शास्त्राणां पुनरुज्जीवनाय विश्वविद्यालयः क्रियाशीलाः परियोजनाः निर्मांति। विविधानां विद्यास्थानानां विद्याशाखानां च समुद्घाटनेन प्रचारेण च शास्त्राणि परिरक्षितानि भवन्ति।
२.**शास्त्रसेतुः** (Shastra bridge program) एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकम् इत्युच्यते। शास्त्राणि यद्यपि विभिन्नानि परं तानि सर्वाणि परस्परं सम्बद्धानि एव सन्ति। साङ्ख्ययोगयोः न्यायवैशेषिकयोः योगायुर्वेदयोः प्राचीनार्वाचीनयोः शास्त्रयोः इत्येवं विभिन्नानां शास्त्राणां सेतुपाठ्यक्रमाणां सम्प्रयोगः औपचारिकरूपेण विधातुम् विश्वविद्यालयः चिन्तयति।
३.**शास्त्रबीजरक्षा** ( Seed saving for the future)
शास्त्राणि अनन्तानि। तत्र आद्यं शास्त्रम् इति प्रकीर्तितं साङ्ख्यशास्त्रं सम्प्रति नेपथ्यं गतमस्ति। सहस्रवर्त्मा सामवेदः इति उच्यते। सम्प्रति केवलं शाखात्रयम् उपलभ्यते । अतः वेदशास्त्राणां परिरक्षणाय अग्रिमसन्तत्यै प्रदानाय च शास्त्रबीजरक्षा इति योजना विश्वविद्यालयस्य भविष्यद्योजनायां समाहितम् अस्ति।
४. **शास्त्रदृष्टिः** (Shastric perception program) दृष्टिपूतं न्यसेत् पादम् इति उच्यते। शास्त्रदृष्टिः लौकिकालौकिकसुखमूला अस्ति इति ख्यापनाय तस्याः प्रत्यक्षीकरणरूपाणां कार्यक्रमाणां सङ्घटनाय विश्वविद्यालयः चिन्तनं करोति।
५.**शास्त्रप्रयोगः** (Application of Shastric Principles) '**शास्त्राण्यधीत्यापि भवन्ति मूर्खाः यस्तु क्रियावान् पुरुषः स विद्वान्** ' इति सुभाषितकारः वदति। शास्त्राणि प्रयोगपथे न सन्ति चेत्तर्हि तानि निष्प्रयोजकानि सम्भवन्ति। न केवलं शिक्षाक्षेत्रे अपि प्रशासने प्रबन्धने च शास्त्रीयसिद्धान्तानाम् अनुप्रयोगाय विश्वविद्यालयः योजनाः विनिर्माति।
६. **शास्त्रसमन्वयः** (Shastra + Modern social science) सर्वे भवन्तु सुखिनः इति भारतीयानां चिन्तनधारा। एतदनु प्राचीनशास्त्राणाम्  आधुनिकसामाजिकविज्ञानानां च मध्ये समन्वयं सम्पाद्य सम्मिश्रितपाठ्यचर्यां निर्माय तदध्ययनाय स्वतन्त्रतावसरकल्पनं विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गम् अस्ति। सर्वविधानां छात्राणां सर्वविधापेक्षायाः पूर्तिं कर्तुं समन्वयः अनिवार्यः एव ।नवशिक्षानीतिरपि प्राचीन-अर्वाचीनशास्त्राणां समन्वयसम्पदानाय संसूचनाः प्रायच्छत्।
७. **शास्त्रजीविका** (Employment/Livelihood focus) उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः दैवेन देयमिति कापुरुषा वदन्ति इति सूक्तं सुभाषितकारेण। आजीविकाप्रदानाभावे शास्त्राणाम् अध्ययनाध्यापने समधिकोत्साहं न प्रकटयेयुः । संस्कृतज्ञानां कृते संस्कृतक्षेत्रे संस्कृतेतरेषु इतरेष्वपि क्षेत्रेषु विविधोद्योगावसरप्रकल्पनम् अपि विश्वविद्यालयस्य भविष्यद्योजनायाः एकम् अङ्गं वर्तते।
८.**मुक्तशास्त्रशाला** (Open , online , short time courses) **बृहन्मुक्तान्तर्जालाश्रितपाठ्यक्रमः** ( MOOCs) इत्येषः अन्तर्जालाश्रितः दूरस्थशिक्षाकार्यक्रमः अद्यत्वे शिक्षणाधिगमक्षेत्रे प्रसिद्धः प्रासङ्गिकः सामयिकश्च वर्तते। भौगोलिकदृष्ट्या दूरस्थाः अपि छात्राः शिक्षकाः च अस्य जालस्य माध्यमेन समीपस्थाः एकत्रिताः वा भवन्ति । जगतीतले यस्मिन् कस्मिन्नपि कोणे वसता शिक्षार्थिना निःशुल्कशिक्षाग्रहणाय परिकल्पितायाम् अस्यां अन्तर्जालाश्रितशैक्षिकव्यवस्थायां प्रत्यक्षरूपेण नियतरूपेण च  ज्ञानसम्पादनाय विफलाः छात्राः लाभान्विताः सम्भवन्ति। अतः मुक्तशास्त्रशालानां प्रतिष्ठापनं विश्वविद्यालयस्य भविष्यद्योजनायाम् अन्तर्भवति।

९. **शास्त्रान्तरानुसन्धानम्** (Multidisciplinary research) बहुविषयकाध्ययनानुसन्धानसौकर्याणि प्रकल्प्य उच्चशिक्षासंस्थानां स्तरोन्नयनाय राष्ट्रियशिक्षानीतौ (NEP -2020) नैकाः संसूचनाः प्रदत्ताः। Multi-disciplinary Education and Research Universities (MERU) इत्यस्य परिकल्पनानुसारं विश्वविद्यालये शास्त्रान्तरानुसन्धानाय विविधाः सक्रियाः भविष्यद्योजनाः सङ्कल्पिताः सन्ति।
१०. **शास्त्रज्योतिः** (Establishment of research centres) शास्त्रशस्त्राः आसन् बहवो हि मनीषिणः। आधारभूतम् अथवा विशुद्धम् अनुसन्धानं पूर्ववत् सम्पादयितुम् अनुसन्धानकेन्द्राणि अपेक्ष्यन्ते। सर्वेषु परिसरेषु शास्त्रानुसन्धानकेन्द्राणि प्रतिष्ठाप्य नवनवीनतथ्यानां संशोधनाय शिक्षकेभ्यः शोधार्थिभ्यः च अवसरप्रकल्पनम् अपि भविष्यद्योजनासु मुख्या योजना एव वर्तते

यथा शास्त्रसर्वस्वं भविष्यद्योजनायां सन्निहितं वर्तते तथैव सम्पत्सर्वस्वम् अपि सन्निहितं वर्तते। तद्यथा-

1. **भारतीयज्ञानप्रणाल्याः केन्द्रम्**
2. **विश्वशान्त्यै बहुधार्मिकसंवादकेन्द्रम्**
3. **सिन्धीपीठम् , उत्कलपीठम्**
4. **अन्ताराष्ट्रियं भारताध्ययनकेन्द्रम्**
5. **अन्ताराष्ट्रियं योगकेन्द्रम्**
6. **अन्ताराष्ट्रियं कौशलविकासकेन्द्रम्**
7. **अन्ताराष्ट्रियं पुरातत्त्वसंस्कृतकेन्द्रम्**

**ज्ञानं भारः क्रियां विना'** इत्युक्तिं स्मारं स्मारं केन्द्रीयसंस्कृतविश्वविद्यालयः संस्कृतक्षेत्रस्य सर्वाङ्गीणविकासाय नैकविधाः भविष्यद्योजनाः निर्माति। विश्वविद्यालयस्य जालस्थाने एताः सर्वविधयोजनाः सविस्तरम् उल्लिखिताः सन्ति। व्यूहात्मकयोजनासु क्रियापराः समयसाध्याश्च याः योजनाः सन्ति तासां निर्वहणाय केन्द्रीयसंस्कृतविश्वविद्यालयस्य योजनाविभागः अनुदिनं कार्यं करोति। प्रतिवर्षं विश्वविद्यालयस्य योजनासम्बद्धानि विविधानि विज्ञापनानि पत्रिकासु सामाजिकमाध्यमेषु च प्रकटीक्रियन्ते। विश्वविद्यालयस्य वार्षिकप्रतिवेदनेऽपि एतद्विषयकं विवरणं सविस्तरम् उपलभ्यते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Strategic Plan and deployment documents on the website | View Document |
| Provide link for additional information | View Document |

***6.2.2 Organizational structure of the Institution including governing body, administrative setup, and functions of various bodies, service rules, procedures, recruitment, promotional policies as well as grievance redressal mechanism***

***संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः, व्यथानिवारणक्रियाविधयश्च उपलभ्यन्ते।***

**Answer:**

अथ संस्कृतभाषायाः सर्वाङ्गीणविकासाय आभारतं संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण १९७० तमसंवत्सरे अक्टोबर मासस्य १५ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितम् । यदा **केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः - २०२०** इत्येषः अधिनियमः लोकसभायां पारितोऽभूत् तदा संस्थानमिदं केन्द्रीयसंस्कृतविश्वविद्यालयनाम्ना प्रथितमभूत्।

**परिदर्शकः/कुलाध्यक्षः**

भारतस्य राष्ट्रपतिः केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिदर्शकस्थाने अर्थात् कुलाध्यक्षस्थाने विलसति। कुलाध्यक्षः विश्वविद्यालयस्य कार्यस्य प्रगतेश्च काले काले अवलोकनाय मूल्याङ्कनाय च व्यक्तिविशेषान् नियोज्य ततः प्राप्तप्रतिवेदनं कुलाधिपतेः कुलपतेश्च माध्यमेन व्यवस्थापनपरिषदि मण्डयितुं सूचयति । ततः प्राप्तपरामर्शान् अवलोक्य विश्वविद्यालयस्य हिताय अपेक्षितमार्गदर्शनं करोति।

**केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रशासनव्यवस्थायाम्  अधोलिखिताः सम्मिलिताः सन्ति।**

**1. कुलाधिपतिः**

भारतस्य शिक्षामन्त्रीकेन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलाधिपतिः अस्ति। कुलाधिपतेः चयनं कुलाध्यक्षः परिनियमानाम् आधारेण करोति। पदाभिधानदृष्ट्याकुलाधिपतिः केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रधानः वर्तते। सः विश्वविद्यालयस्य उपाधिप्रदानप्रसङ्गे दीक्षान्तसमरोहादिषु अध्यक्षपीठम् अलङ्करोति।

**2. कुलपतिः**

कुलपतेः नियुक्त्यर्थं कुलाधिपतिना संरचिता एकाचयनसमितिः तदर्थम् अर्हाणाम् एकां तालिकां निर्माति।तालिकातः कुलाध्यक्षः एकं व्यक्तिविशेषं कुलपतित्वेन नियोजयितुम् अनुज्ञां ददाति। परिनियमानुगुणमेव कुलपतेः चयनं जायते। कुलपतेः अधीने कुलसचिवः, परीक्षानियन्त्रकः, वित्ताधिकारी, ग्रन्थपालकः, परिसरनिदेशकाः, सङ्कायप्रमुखाः, मुकतस्वाध्यायपीठनिदेशकादयः  कार्यं कुर्वन्ति। विश्वविद्यालयस्य प्राधिकरणं प्रबन्धनव्यवस्थां निर्वहति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रबन्धनव्यवस्थायाम् एतानि अन्तर्भवन्ति। यथा -

**1. सभा :-** केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः - 2020 इत्यस्य 20 तमधारायां सभायाः अधिकारः स्वरूपं कार्याणि च निरूपितानि सन्ति। इयं सभा प्रबन्धनव्यवस्थायां शीर्षस्थाने तिष्ठति।

**2. व्यवस्थापनपरिषत्/कार्यकारिणी परिषत् :-** विश्वविद्यालयस्य सुचारुरूपेण सञ्चालनाय विद्यमाना मुख्या परिषत् इत्युक्ते व्यवस्थापनपरिषत्/कार्यकारिणी परिषत् एव वर्तते। इयं परिषत् विश्वविद्यालयस्य नीतिनिर्धारणे तेषाम् अनुप्रयोगे च प्रधानं पात्रं वहति।

**3. विद्वत्परिषत् :-** विश्वविद्यालयीयशिक्षायाः , शिक्षणप्रक्रियायाः, प्रशिक्षणस्य, परीक्षायाः, अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि  विद्वत्परिषत् मुख्यं स्थानं भजते।

**4. अध्ययनमण्डलम् :-** विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं अध्ययनमण्डलं करोति। अध्ययनमण्डलं काले काले च विभिन्नपाठ्यक्रमाणां संशोधनं परिवर्तनादिकं कृत्वा कृतसंशोधनानां परिवर्तनादीनाम् अनुमोदनाय विद्वत्परिषदं प्रतिसारयति।

**5. योजना तथा अनुश्रवणमण्डलम् :-** विश्वविद्यालयस्य विकासाय अपेक्षितानां योजनानां निर्माणम् अस्य मण्डलस्य कार्यं वर्तते। मण्डलमिदं केन्द्रीयसंस्कृतविश्वविद्यालयस्य योजनानां निर्माणे अनुश्रवणे च प्रधानं पात्रं वहति।

**6. विद्यास्थानानि विद्याशाखाश्च :-** विद्यास्थानानि विद्याशाखाश्च विश्वविद्यालयस्य दर्शनशिक्षादीनि विद्यास्थानानि द्योतयन्ति। प्रत्येकं विद्यास्थानस्य एकः निर्दिष्टः केन्द्रीयः  सङ्कायप्रमुखः विद्याशाखायाः निमित्तम् एकः निर्दिष्टः केन्द्रीयः विभागाध्यक्षश्च भवति।

**7. अनुदानसमितिः  :-** अनुदानसमितिः विविधयोजनानां क्रियान्वयनाय अपेक्षितस्य अनुदानस्य निर्धारणनिर्वहणादीनि कार्याणि करोति। योजना तथा अनुश्रवणमण्डलस्य सम्बद्धसमितिरूपेण अनुदानसमितिः, प्रकाशनसमितिः, छात्रवृत्तिचयनसमितिः, अनुसन्धानमण्डली, परीक्षामण्डली इत्याद्याः समितयः कार्यं कुर्वन्ति। विश्वविद्यालयस्य वार्षिकप्रतिवेदने जालस्थाने च विविधनिकायानां कार्याणि विस्तरेण उल्लिखितानि सन्ति।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशसु परिसरेषु नियुक्ताः निदेशकाः परिसरीयप्रशासनव्यवस्थां सम्पादयन्ति। परिसरस्तरे विभिन्नाः समितयः सन्ति। यथा -

1. **परीक्षासमितिः**
2. **स्थानीयशोधसमितिः**
3. **ग्रन्थालयसमितिः**
4. **वित्तसमितिः**
5. **छात्रपरिदेवनानिवारणसमितिः**
6. **महिलापरिदेवनानिवारणसमितिः**
7. **छात्रवृत्तिसमिति** इत्याद्याः समितयः परिसरनिदेशकानां मार्गदर्शने गतिशीलाः सन्ति।

विश्वविद्यालयस्य अस्य द्वादशः परिसराः सन्ति। एते विभिन्नेषु राज्येषु विकीर्णाः सन्ति। एकैकस्य अपि परिसरस्य एकैकः निदेशकः विद्यते। एते स्थानीयाः प्रशासकाः इति व्यपदिश्यन्ते। एतेषां मार्गदर्शने एव सर्वाः परिसरीयाः शैक्षिकाः प्राशासनिकाः च क्रियाकलापाः प्रवर्तन्ते। क्रमशः विश्वविद्यालयस्य परिसराः यथा -

1. **श्री गङ्गानाथझापरिसरः, प्रयागराजः (उत्तरप्रदेशराज्यम्)**
2. **श्री सदाशिवपरिसरः, पुरी (उत्कलराज्यम् )**
3. **रणबीरपरिसरः जम्मु (जम्मु एवं काश्मीरः)**
4. **गुरुवायूरुपरिसरः त्रिशूरु (केरलराज्यम्)**
5. **जयपुरपरिसरः जयपुरम् (राजस्थानराज्यम्)**
6. **लखनऊ परिसरः लखनऊ (उत्तरप्रदेशराज्यम्)**
7. **राजीवगान्धीपरिसरः शृङ्गेरी (कर्णाटकराज्यम्)**
8. **श्रीवेदव्यासपरिसरः बलाहरः (हिमाचलप्रदेशराज्यम्)**
9. **भोपालपरिसरः भोपालम् (मध्यप्रदेशराज्यम्)**
10. **के.जे. सोमय्यापरिसरः मुम्बई (महाराष्ट्रराज्यम्)**
11. **एकलव्यपरिसरः अगर्तला (त्रिपुराराज्यम्)**
12. **श्रीरघुनाथकीर्तिपरिसरः देवप्रयागः (उत्तराखण्डराज्यम्)**

**परिदेवनानिवारणकार्यक्रमः**

परिदेवनानिवारणकार्यक्रमाणां सङ्घटनस्य आधारः विश्वविद्यालयानुदानायोगाधिनियमः -2018 इत्येषः वर्तते। प्रवेशप्रक्रियादिषु छात्राणां समस्याः सन्ति चेदपि एषः अधिनियमः क्रियान्वितः भवति। पुनः विश्वविद्यालयस्य परिसरेषु परिदेवनानिवारणकार्यक्रमप्रणाल्याः सुचारुरूपेण सञ्चालनाय विविधाः समितयः रचिताः सन्ति। आभिः समितिभिः गोपनीयतापूर्वकं समस्यायाः वस्तुनिष्ठपरिहारोपायाः संसूच्यन्ते। यौनोत्पीडनसम्बद्धसमितिः, छात्रसमस्यानिवारणसमितिः, कर्मचारिणां सन्तापापनोदनसमितिः इत्याद्याः सक्रियाः समितयः परिसरेषु सन्ति।

**सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः च**

केन्द्रीयसंस्कृतविश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य 2018 तमसंवत्सरस्य नियमावलिं समाश्रित्य सेवानियमान् पदोन्नतिनियमान् च निर्धारयति। विश्वविद्यालयस्य 34 तमे अध्यादेशे शिक्षकाणां कार्यालयीयकर्मचारिणां नियुक्तिः सेवानियमाः च सङ्ग्रहेण उल्लिखिताः सन्ति। प्रत्यक्षनियुक्तौ ज्येष्ठतायाः आधारेण नियुक्तौ च विश्वविद्यालयानुदानायोगस्य नियमावलिमेव समाश्रयति विश्वविद्यालयः।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Provide link for additional information | View Document |

***6.2.3 Implementation of e-governance in areas of operation***

*1. Administration*
*2. Finance and Accounts*
*3. Student Admission and Support*
*4. Examination*

***क्रियान्वयनक्षेत्रेषु ई-प्रशासनस्य नियोजनम्***

*1. **प्रशासनम्***
*2. **वित्तं,लेखाश्च***
*3. **छात्राणां प्रवेशः, प्रोद्बलनं च***
*4. **परीक्षा***

**Answer:** A. All of the above अ. उपर्युक्तेषु सर्वे

| File Description | Document |
|---|---|
| Screen shots of user interfaces | View Document |
| ERP (Enterprise Resource Planning) Document | View Document |
| Details of implementation of e-governance in areas of operation Administration etc. (Institutional data as per Data Template) | View Document |
| Any additional information | View Document |

***6.2.4 Effectiveness of various bodies/cells/committees is evident through minutes of meetings and implementation of their resolutions***

***विविधसमितीनां कार्यविवरणेभ्यः, निर्णयानां क्रियान्वयनात् च ज्ञायते यत् संस्थायाः विविधनिकायाः/ विभागाः/ समितयः प्रभावितया फलोन्मुखतया च कार्यतत्पराः सन्ति इति।***

**Answer:**

**यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्** तथा सर्वे निकायाः विभागाः समितयश्च समग्रस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य दूरदृष्टेः अनुरूपं ध्येयानाम् आपूर्तये च संस्थिताः सन्ति। करचरणाद्यङ्गानां शरीरसंरचनायां यादृशी भूमिका वर्तते तादृशी एव भूमिका विविधानां विद्यास्थानानां विद्याशाखानां विभिन्नसमितीनां च वर्तते। अवयववैकल्ये न्यूनतायां वा यथा शरीरं न शोभते तथैव विविधानां निकायानां विभागानां समितीनां सुचारुरूपेण सङ्घटनाभावे विश्वविद्यालयः अपि न शोभते। अतः केन्द्रीयसंस्कृतविश्वविद्यालयः अमीषां सक्रियतायाः विषये विशिष्टं ध्यानं वहति। विशिष्य विकेन्द्रीकरणप्रशासनप्रणाली वर्तते इत्यतः अमीषां मध्ये सामञ्जस्यम् अपि संस्थापयति।

विकेन्द्रीकरणप्रशासनप्रणालीं समाश्रित्य संरचितस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य विविधनिकायाः विभागाः समितयश्च क्रियाशीलाः सन्तः विश्वविद्यालयस्य अभिवृद्धये सन्ततं चेष्टन्ते। विश्वविद्यालयस्य **व्यवस्थापनपरिषदः** सभाः नियतरूपेण प्रतिवर्षं जायन्ते यत्र हि विकासपरनीतयः निर्णीयन्ते। निर्धारितनिर्णयानां क्रियान्वयनदृष्ट्या अपि इयं परिषत् प्रधानभूमिकां निर्वहति। **विद्वत्परिषत्** विश्वविद्यालयीयशिक्षायाः, शिक्षणप्रक्रियायाः, प्रशिक्षणस्य, परीक्षायाः, अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि कार्यरता भवति। अस्याः संसूचनाः विभागमुखेन समितिमुखेन च क्रियान्विताः भवन्ति। अध्ययनमण्डलं विश्वविद्यालयस्य विभिन्नपाठ्यक्रमाणां निर्माणं करोति।

आन्तरिकगुणवत्ताश्वासनप्रकोष्ठानां विविधसमितीनां माध्यमेन च पाठ्यक्रमाणां प्रवर्तनाय मार्गदर्शनं लभ्यते। **योजना तथा अनुश्रवणमण्डलं** विश्वविद्यालयस्य विकासाय अपेक्षितानां योजनानां निर्माणकार्यं करोति। अस्य मण्डलस्य निर्णयाः विकासदृष्ट्या प्रधानाः भवन्ति। विद्यास्थानानि विद्याशाखाश्च विश्वविद्यालयस्य दर्शनशिक्षादीनि विद्यास्थानानि द्योतयति।

एतानि विविधतायाम् एकतायाः द्योतकानि सन्ति। विश्वविद्यालयस्य विविधयोजनानां क्रियान्वयनाय अपेक्षितस्य अनुदानस्य निर्धारणनिर्वहणादीनि कार्याणि अनुदानसमितिः करोति।

पुनः विश्वविद्यालयस्य **आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः** शैक्षिकेषु प्राशासनिकेषु च क्रियाकलापेषु गतिशीलतायाः संवर्धनाय एकस्याः प्रणाल्याः विकासं करोति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्राथमिकोद्देश्येषु संस्थायाः गुणवत्तासंवर्धनाय विश्वविद्यालयेन अनुसर्तव्याः मार्गोपायाः प्रमुखाः सन्ति। प्रकोष्ठोऽयं मुख्यालयेन सह प्रत्येकस्मिन्नपि परिसरे स्वसंयोजकमुखेन कार्यं करोति। काले काले सभासङ्गोष्ठ्यादीनाम् आयोजनेन आर्थिकसहयोगादीनां प्रदानेन च विश्वविद्यालयस्य विकासाय प्रयतते। तदीयप्रतिवेदनेषु विश्वविद्यालयस्य गुणवत्तानिर्धारकमानकानां क्रियान्वयनेन प्राप्तस्य फलस्य विवरणम् उल्लिखितं वर्तते। विश्वविद्यालयस्य सर्वपरिसरीयाः सर्वेऽपि क्रियाकलापाः छात्राणां विकासाय पूरकाः स्युरिति सङ्कल्पेन आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्रतिष्ठापनं विहितम् अस्ति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य संसूचनाः आश्रित्य सक्रियाणां विभागसमित्यादीनां कार्येषु सञ्जाताः प्रगतयः यथा -

1. विश्वविद्यालये तदीयपरिसरेषु च **छात्रकेन्द्रितवातावरणं** विद्यते येन शिक्षणाधिगमप्रक्रियायां प्रौद्योगिक्याः समावेशः क्रमशः जायमानः वर्तते।
2. गुणवत्तासम्बद्धेषु तत्वेषु छात्राणाम् अभिभावकानां सामाजिकानां च प्रतिक्रियाः स्वीकृत्य शिक्षणाधिगमप्रक्रियायाः संवर्धनदिशि विश्वविद्यालयः सन्ततम् अग्रेसरः वर्तते।
3. उच्चशिक्षायाः विशिष्य शास्त्रशिक्षणस्य परम्परागतपाठ्यक्रमाणां च अभिवर्धने विद्यमानान् मानकान् विनिश्चित्य तेषां पूर्णशः क्रियान्वयनाय यत्नः विधीयते।
4. विश्वविद्यालयस्य गुणवत्तायाः संवर्धनाय अन्तःपरिसरीयैः परिसरीयेतरैः सह सम्मील्य काले काले कार्यशालानां सङ्गोष्ठीनां सभासमारोहाणाम् आयोजनं क्रियते।
5. विश्वविद्यालयस्य विभागाः फलोन्मुखतया कार्यतत्पराः भवितुम् अपेक्षितानां भौतिकसंसाधनानां व्यवस्थापनं कुर्वन्ति।
6. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य सहयोगेन परिसरेषु **विभागीयाः ग्रन्थालयाः** समारब्धाः। पुनः बहूनि पुस्तकानि क्रीत्वा संस्थापितानि इत्यतः विभागाः सर्वे स्तरोन्नतिं प्राप्नुवन्तः सन्ति।
7. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः विकासस्य माध्यमरूपेण कार्यं करोति इत्यतः सर्वे विभागाः समितयः कार्यतत्पराः विद्यन्ते।
8. नियतरूपेण विभागानां पर्यवेक्षणं प्रकोष्ठेन विधीयते इत्यतः विभागानां कार्यतत्परतायाः मूल्याङ्कनं जायमानं वर्तते।

**परीक्षासमितिः, स्थानीयशोधसमितिः, ग्रन्थालयसमितिः, वित्तसमितिः, छात्रावाससमितिः, क्रीडासमितिः, कलासंस्कृतिसम्बद्धसमितिः** इत्येवं बह्व्यः समितयः सदा सक्रियाः एव सन्तिष्ठन्ते। आसां निर्णयाः परिसरनिदेशकेन ससूक्ष्मम् अवलोक्य अन्तिमाः निर्णयाः स्वीक्रियन्ते। छात्रपरिदेवनानिवारणप्रकोष्ठः, महिलाकक्षः इत्यादयः अपि स्थानीयस्तरे समस्यानां निवारणाय कार्यं कुर्वन्ति। केन्द्रीयानुसन्धानमण्डल्याः निर्णयानां यथावत् परिपालनं परिसरीया स्थानीयशोधसमितिः करोति। एवं सर्वे विभागसमितिनिकायाः फलदाः क्रियापराश्च सन्ति।

सामान्यतः परिसरेषु प्रतिवर्षं शैक्षिकसत्रारम्भात् आसत्रान्तं कार्यक्रमाणां सञ्चालनाय विविधाः समितयः निदेशकेन संरच्यन्ते। वार्षिकोत्सवस्य संस्कृतोत्सवस्य वाग्वर्धिनीमहोत्सवस्य राष्ट्रियसङ्गोष्ठ्याः क्रीडाप्रतियोगितादीनां च आयोजनाय पार्थक्येन समितयः रच्यन्ते। कार्यक्रमसमितिः परिसरीयाणां प्रधानकार्यक्रमाणां निर्वहणाय कार्यं करोति। एषा समितिः कार्यक्रमाणां प्रतिवेदनमपि निदेशकाय समर्पयति। वेदिकासमितिः वेदिकानिर्माणादिषु कार्येषु मार्गदर्शनं विदधाति। सभासञ्चालनसमितिः सभाकार्यक्रमाणां सञ्चालनाय व्यवस्थां करोति। पुरस्कारवितरणसमितिः छात्राणां कृते स्पर्धादिषु प्राप्तपुरस्काराणां वितरणाय व्यवस्थां करोति। एवमेव अनुशासनसमितिः अनुशासनपरिरक्षणकर्मणि साहाय्यं विदधाति। स्वच्छतासमितिः परिसरस्य स्वच्छतापरिरक्षणे प्रतिपदं मार्गदर्शनं करोति। एवं विंशत्यधिकाः समितयः प्रत्येकस्मिन् अपि परिसरे सक्रियाः सन्ति। सप्त अष्टौ शास्त्रविभागाः परिसरेषु भवन्ति। एतेषां विभागानां विभागाध्यक्षाः विभागीयप्रतिवेदनं सज्जीकृत्य निदेशकाय समर्पयन्ति। विविधसमितीनां प्रधानसंयोजकाः अपि विभागाध्यक्षाः एव भवन्ति। विभागाध्यक्षाः एव उत्तरदायिनः अपि भवन्ति। विश्वविद्यालयस्य सङ्कायप्रमुखाः विभागाध्यक्षाश्च सम्बद्धसङ्कायानां विभागानां कार्यनिर्वहणादिकम् अवलोकयन्ति।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***6.2.5 Institution has a strategy to implement Simple Standard Sanskrit in the following ways:***

***सरलमानकसंस्कृतस्य क्रियान्वयनाय संस्थायाः व्यूहः एवं प्रकारेण वर्तते -***

**Answer:** A. Prominently included in the mission statement, in the main entrance, webpage and all major policy documents अ) ध्येयपत्रे मुख्यप्रवेशद्वारे जालपुटे सर्वेषु प्रमुखनीतिप्रपत्रेषु च समाविष्टम्।

| File Description | Document |
| --- | --- |
| Upload policy document and geo-tagged photographs. | View Document |
| Upload any additional information | View Document |
| URL for particular content on webpage of official institutional website. | View Document |

***6.2.6 The strategies adopted by the Institution for initiating the concept of Simple Standard Sanskrit by conducting events in following ways:***

***सरलमानकसंस्कृतसङ्कल्पनायाः उपक्रमाय संस्थया अधोलिखितप्रकारेण कार्यक्रमाणाम् आयोजनद्वारा स्वीकृताः व्यूहाः–***

**Answer:** A. Programs of communication practice in Simple Standard Sanskrit/ training Sessions - 12 camps over the year covering at least 80% of the students and teachers. अ) सरलमानकसंस्कृतेन/प्रशिक्षणसत्रैः संवादाभ्यसस्य कार्यक्रमाः – वर्षे न्यूनातिन्यूनं ८०% छात्रान् शिक्षकान् च आकलय्य १२ शिबिराणि।

| File Description | Document |
| --- | --- |
| Upload reports of the training programs along with list of students attended in each program. | View Document |
| Upload course module, event schedule and report of the program, geo-tagged photographs. | View Document |
| Upload any additional information | View Document |

***6.2.7 Institution has adopted the following strategies for the successful implementation of Simple Standard Sanskrit as medium of communication in campus, hostel etc.,:***

***परिसरे छात्रावासादिषु च संवादमाध्यमरूपेण सरलमानकसंस्कृतस्य सफलक्रियान्वयनाय संस्थया अधोलिखिताः व्यूहाः स्वीकृताः –***

**Answer:** A. Stakeholders have been given capacity building training and quality improvement inputs necessary for time - bound implementation of Simple Standard Sanskrit as medium of communication and Written directions given to all residents of campus अ) हितधारकेभ्यः सरलमानकसंस्कृतं संवादमाध्यमं भवेत् एतदर्थम् अपेक्षितं सामर्थ्यनिर्माणप्रशिक्षणं गुणवत्तापरिष्करणनिवेशाः अपि च सर्वेभ्यः परिसरवासिभ्यः सावधिकः निर्देशश्च प्रदत्तः।

| File Description | Document |
| --- | --- |
| Any Additional information | View Document |

***6.2.8 Institution has adopted the strategies for the implementation of Simple Standard Sanskrit as medium of teaching.***

***संस्थया सरलमानकसंस्कृतस्य क्रियान्वयनाय अध्यापनमाध्यमरूपेण स्वीकृताः व्यूहाः।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः **07/07/2020** तमे संवत्सरे प्रवृत्ते तदीये आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य उपवेशने सरलमानकसंस्कृतस्य क्रियान्वयनाय सार्थकं निर्णयं स्व्यकरोत्। एतदनु विश्वविद्यालयस्य सर्वेषु परिसरेषु **सरलमानकसंस्कृतस्य माध्यमेन एव अध्यापनाय** औपचारिकी सूचना प्रदत्ता। पुनः सप्टम्बर मासस्य नवमे दिनाङ्के ( **09/09/2020** ) **सरलमानकसंस्कृतस्य अनुप्रयोगात् परं जातायाः प्रगतेः समीक्षा आन्तरिकगुणवत्ताश्वासनप्रकोष्ठेन विहिता**। यद्यपि कोरोना कारणेन द्रुतगत्या परिणामः नैव लब्धः तथापि परोक्षरूपेण दृश्यश्रव्योपकरणानां साहाय्येन Google meet, Zoom इत्यादीनि सामाजिकानि माध्यमानि आश्रित्य शिक्षकाः पाठयितुम् आरभन्त। अधुना कोरोना रोगस्य दुष्प्रभावः न्यूनः जातः। अतः प्रत्यक्षरूपेण शिक्षणं दातुं शक्ताः सन्ति सर्वत्र। एतदनु अध्यापनव्यूहाः अपि केचन निर्मिताः । क्रमशः यथा -

१. व्यूहः लक्ष्यप्राप्तेः सार्थकः प्रक्रमः वर्तते। तत्र सम्भाषणशिबिरं प्रधानः व्यूहः अवर्तत। **सत्रारम्भे एव प्राक्शास्त्रीतः आरभ्य आचार्यस्तरपर्यन्तं संस्कृतसम्भाषणशिबिराणि सर्वेषु परिसरेषु सञ्चाल्यन्ते** । सुरससुबोधा विश्वमनोज्ञा ललिता हृद्या च संस्कृतभाषा सम्भाषणेन एव अधिगन्तुं शक्या। अतः सम्भाषणशिबिराणि बालानां संस्कृतकक्ष्यासु प्रवेशाय भाषणकलायां दक्षतासम्पादनाय च भृशम् उपाकरोत् ।

२. **बालानां सुखबोधाय** शिक्षकैः उपयुज्यमानाः विधयः अपि सरलाः संवृत्ताः। कालानुकूलतायाः अभावं मनसिकृत्य समयसीमानं मनसि निधाय च शिक्षकाः प्राविधिकोपकरणाश्रितान् एव विधीन् उपयुज्य अपाठयन् । अनेन बालाः अत्यन्तं लाभान्विताः भवन्ति इति ज्ञापयितुम् एव अमूदृक्षः प्रयासः विश्वविद्यालयेन विहितः। अधुना प्रत्यक्षरूपेण सदृष्टान्तं पाठयितुम् अवसरः वर्तते।

३.विश्वविद्यालये बालानां आन्तरिकं मूल्याकलनं विधीयते। सत्रीयलिखितपरीक्षयां प्राप्ताङ्कैः सह छात्रैः सम्पादितस्य सरलसंस्कृताश्रितस्य कक्ष्याकार्यस्य गृहकार्यस्य परीक्षणं कृत्वा आन्तरिकान् अङ्कान् शिक्षकाः प्रयच्छन्ति। ग्रन्थालयेषु विद्यमानानां **सरलमानकसंस्कृताश्रितानां सम्भाषणसन्देशः , चन्दमामा , सुधर्मा, भारती** इत्यादीनां पठनेन अपि छात्राः लाभान्विताः भवन्ति। अतः ग्रन्थालयेषु अध्ययनाय अपि कालांशाः निर्धारिताः भवन्ति। शिक्षकाः एतस्य अपि मूल्याकलनं कुर्वन्ति।

४. शिक्षकाः प्रतिसप्ताहं **छात्रगोष्ठीं वाग्वर्धिनीसभां** च आयोजयन्ति। अत्र कक्ष्यानुगुणं स्तरानुगुणं छात्राः विविधेषु पाठ्यक्रमेषु सन्निहितानां गभीरशास्त्रीयविचाराणां सरलमानकसंस्कृतभाषामाध्यमेन प्रस्तुतीकरणं कुर्वन्ति। अत्रापि छात्राणां मूल्याङ्कनं विधीयते। एवमेव अयम् अपि एकः उत्कृष्टः व्यूहः एव।

५. छात्राणां कृते शिक्षकाः पाठ्सहगामिक्रियाः प्रतिसप्ताहम् आयोजयन्ति। समयसारण्याम् अस्य उल्लेखः भवति। विश्वविद्यालयेन सर्वस्तरीयाः याः समयसारिण्यः विनिर्मिताः सन्ति ताः सर्वाः अपि सरलमानकसंस्कृतभाषायाः अभ्यासाय प्रचाराय प्रोन्नयनाय च पूरकाः एव सन्ति।

६. शिक्षाशास्त्रिणः भाविनि काले शिक्षकाः सन्तः समाजे विविधेषु विद्यालयेषु संस्कृतस्य प्रचारं कुर्वन्ति। अतः एतेषां पाठ्यक्रमे पूर्णशः सरलमानकसंस्कृतस्य अनुप्रयोगः दृश्यते। प्रशिक्षुताकार्यक्रमेषु ( Internship) व्यावसायिक - क्षमतोन्नयन- कार्यक्रमेषु च विविधाः सरलमानकसंस्कृताश्रिताः क्रियाकलापाः नयनपथम् अवतरन्ति। शिक्षणाभ्यासे नियमितरूपेण सर्वेऽपि छात्राध्यापकाः
छात्राध्यापिकाः सरलमानकसंस्कृतेन एव पाठयन्ति।

७. **कार्यालये संस्कृतेन व्यवहारः** परिदृश्येत इति मत्वा सरलमानकसंस्कृतेन कार्यालयीयेभ्यः कर्मचारिभ्यः संस्कृतेन व्यवहाराय प्रशिक्षणं प्रारब्धम्। मुख्यालयेन **कार्यालये संस्कृतम्** इति विशिष्टः प्रयोगः अपि प्रारब्धः वर्तते। २०२२ तमे संस्कृतोत्सवे अयं कार्यक्रमः विशेषतः मुख्यालये समारब्धः।

एवं न केवलम् अध्यापने अपि तु **प्राशासनिककार्येष्वपि सरलमानकसंस्कृतस्य विकासाय पूरकाः व्यूहाः उपनिबद्धाः** सन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any Additional information | View Document |
| Link for Additional Information | View Document |

***6.2.9 Institution has adopted the strategies for implementation of Simple Standard Sanskrit as medium of entertainment or cultural programs.***

### *मनोरञ्जनकार्यक्रमस्य सांस्कृतिककार्यक्रमस्य वा माध्यमरूपेण सरलमानकसंस्कृतस्य क्रियान्वयनाय संस्थया स्वीकृताः व्यूहाः।*

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयः द्वादशसु परिसरेषु सर्वदा अन्तःपरिसरीयान् मनोरञ्जकान् सांस्कृतिकान् च कार्यक्रमान् आयोजयति। एतेषु प्रतिवर्षम् आयोज्यमानः युवमहोत्सवः नाट्यमहोत्सवः च प्रधानः वर्तते। एतेषु सरलमानकसंस्कृताश्रिताः एव कार्यक्रमाः अधिकाः । गभीरशास्त्रीयविषयेषु वाक्प्रतियोगितां पार्थक्येन राष्ट्रस्तरे प्रतिवर्षं समायोजयति। तत्र प्रौढविषयान् प्रौढशैल्या उपस्थापयन्ति छात्राः। अतः मनोरञ्जकसांस्कृतिककार्यक्रमाणां परिप्रक्ष्ये सरलमानकसंस्कृतस्य माध्यमरूपेण प्रयुक्ताः व्यूहाः एव अत्र क्रमशः उपस्थाप्यन्ते ।

**१. मनोरञ्जककार्यक्रमाणां माध्यमभाषा सरलमानकसंस्कृतभाषा**

विश्वविद्यालये बालानां सुखबोधाय सर्वदा विविधाः मनोरञ्जककार्यक्रमाः आयोज्यन्ते । बालाः विविधेषु उत्सवेषु मनोरञ्जककार्यक्रमान् प्रदर्शयन्ति। तत्र परिसरीयैः आयोज्यमानाः प्रमुखाः कार्यक्रमाः यथा-

- **वार्षिकोत्सवः**
- **संस्कृतसप्ताहः**
- **वाग्वर्धिनिमहोत्सवः**
- **सामाजिकमाध्यमाश्रिताः इत्यादयः**

वार्षिकोत्सवे मनोरञ्जककार्यक्रमाणां प्रदर्शनात् पूर्वं संयोजकसमितिः कार्यक्रमाणां मूल्याङ्कनं करोति। तेषाम् औचित्यं ज्ञात्वा एव अनुमतिं ददाति। प्रेक्षकाणां बुद्धिगम्यान् एव नृत्यगीतवाद्ययन्त्ररूपकाणां प्रदर्शनाय अनुमतिं ददाति। सरलमानकसंस्कृतभाषायाः माध्यमेन छात्राः मनोरञ्जनं कारयन्ति चेत्तर्हि कालान्तरे प्रेक्षकाः संस्कृतक्षेत्रं प्रति आकृष्टाः भवन्ति इति परिसराः विभावयन्ति । संस्कृतसप्ताहे अपि एषैव स्थितिः । बालेभ्यः विविधानां पद्यानां गीतानां वाचनाय अवसरः दीयते। स्पर्धाः अपि आयोज्यन्ते । मनोरञ्जनेन सह ज्ञानस्य वर्धनाय पूरकान् एव व्यूहान् विरचय्य परिसराः सफलाः भवन्ति। पुरस्कारवितरणम् अपि कुर्वन्ति इत्यतः छात्रेषु धनात्मकाभिप्रवृत्तिः परिदृश्यते। छात्राः वाग्वर्धिनीपरिषत् पक्षतः क्वचित् कार्यक्रमान् आयोजयन्ति । तत्रापि सरलभाषया एव कार्यक्रमाः भवन्ति। YouTube, Facebook, Twitter इत्यादिषु सामाजिकमाध्यमेषु अपि बालाः सरससंस्कृताश्रितान् कार्यक्रमान् निर्माय आरोपयन्ति। एकं भारतं श्रेष्ठं भारतम् इति ध्येयं स्वीकृत्य विभिन्नाः परिसरीयाः छात्राःYouTube मध्ये लघुचित्राणि निर्माय आरोपितवन्तः । तत्र प्रयुक्ता भाषा सरलमानकसंस्कृतभाषा एव अवर्तत। परिसरच्छात्राः सरलसम्भाषणशिबिराणां चालनावसरे सरलसंस्कृतेन भागग्राहिणां मनोरञ्जनाय अपि विविधान् कार्यक्रमान् आयोजयन्ति। युवमहोत्सवे अपि दशाधिकाः विशिष्टाः नृत्यगीतादयो मनोरञ्जककार्यक्रमाः प्रतियोगितारूपेण आयोज्यन्ते ।

**२. सांस्कृतिककार्यक्रमाणां माध्यमभाषा सरलमानकसंस्कृतभाषा**

नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् इति श्लोकवाक्यं प्रसिद्धम् अस्ति। अतः सरलशैल्या परिष्कृतभाषया एव छात्राः अभिनयन्ति । नाट्योत्सवेषु विविधपात्राणि वहन्तः रामादिवत् प्रवर्तितव्यं न रावणादिवत् इति सन्देशं यच्छन्ति। साभिनयं नाटकेषु संस्कृतेन वार्तालापं कुर्वन्ति इत्यतः आबालवृद्धा अपि सामाजिकाः संस्कृतनाटकम् आस्वादयितुं प्रभवन्ति। विभिन्नेषु परिसरेषु विश्वविद्यालयः नाट्योत्सवम् आयोज्य सरलसंस्कृतभाषामुखेन सर्वान् सामाजिकान् समाकर्षयति।

पाठ्यसहगामिक्रियाकलापान् अपि क्रमशः विश्वविद्यालयस्य परिसराः आयोजयन्ति। मनोरञ्जनेन सह ज्ञानम् अपि अर्जयन्ति बालाः । तत्र प्रमुखाः क्रियाकलापाः यथा -

**1. भाषाक्रीडाः**
**2. शिबिरगीतानि**
**3. गीताजयन्त्युत्सवाङ्गतया कार्यक्रमाः**
**4. संस्कृतसंवादवर्गाः**
**5. विनोदकणिकाः**
**6. वीथीनाटकम्**
**7.शोभायात्रा इत्यादयः**
एतेषां सर्वेषां क्रियाकलापानाम् उद्देश्यम् अस्ति यत् बालाः सरलमानकसंस्कृतेन परस्परं व्यवहरन्तः कालान्तरे अन्यान् अपि एतद्दिशि प्रेरयेयुः इति।
**" पठामि संस्कृतं नित्यं**
**वदामि संस्कृतं सदा।**
**ध्यायामि संस्कृतं नित्यं**
**वन्दे संस्कृतमातरम्।। "**
**इति प्रतिदिनं प्रार्थनां कुर्वन्ति बालाः।**
**" पठत संस्कृतं वदत संस्कृतं**
**लसतु संस्कृतं चिरं**
**गृहे गृहे च पुनरपि "**
इति वदन्तः **शिबिरसञ्चालकाः वरिष्ठाः छात्राः** सुश्राव्यगीतमुखेन कनिष्ठान् छात्रान् अभिप्रेरयन्ति। एतदर्थं सर्वेषु परिसरेषु अपेक्षितां व्यवस्थां स्थानीयाः प्रशासकाः कुर्वन्ति। एतादृशैः विभिन्नैः विशिष्टैः व्यूहैः **सरलमानकसंस्कृतभाषा** सर्वत्र व्याप्ता वर्तते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any Additional information | View Document |
| Link for Additional Information | View Document |

**6.3 Faculty Empowerment Strategies**
***6.3.1 The institution has effective welfare measures for teaching and non-teaching staff***

***संस्थया अध्यापकेभ्यः अध्यापकेतरकर्मचारिभ्यश्च प्रभाविसंक्षेमोपायाः अनुस्रियन्ते।***

**Answer:**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च तदीयाः **मानवीयसम्पदः** सन्ति। अतः एतेषां क्षेमाय विश्वविद्यालयः सर्वदा कटिबद्धः वर्तते। न केवलं कार्यरतस्यकर्मचारिणः अपि तु तस्य सम्पूर्णपरिवारस्य अपि क्षेमचिन्तनं विश्वविद्यालयः करोति। शारीरिकरूपेण मानसिकरूपेण पारिवारिकरूपेण आर्थिकरूपेण सामाजिकरूपेण च कर्मचारी सन्तृप्तः चेत्तर्हि सः विगतक्लेशः सन् विश्वविद्यालये स्वीयं कर्तव्योत्तरदायित्वादिकं सम्यक् निर्वोढुं प्रभवति न अन्यथा। अतः एव समेषाम् अध्यापकानाम् अध्यापकेतरकर्मचारिणां क्षेमाय नैके मार्गोपायाः विश्वविद्यालयेन अनुस्रियन्ते । क्रमशः यथा

**वैद्यकीयौषधोपचारसौकर्यम्, प्राथमिकोपचारव्यवस्था, वैद्यकीयविरमादयः संक्षेमोपायाः**

‘**शरीरमाद्यं खलु धर्मसाधनम्**’ इत्युक्तिं मनसि निधाय समेषां कर्मचारिणां स्वास्थ्यपरिरक्षणाय विश्वविद्यालयेन नानाविधानि सौकर्याणि प्रकल्पितानि सन्ति। सर्वेष्वपि परिसरेषु प्राथमिकोपचारव्यवस्था सर्वेभ्यः विश्वविद्यालयीयेभ्यः निःशुल्कं परिकल्पिता अस्ति। आकस्मिकरूपेण क्षतिग्रस्तानां तात्कालिकरूपेण उपचाराय प्राथमिकोपचारपेटिकाः सर्वत्र परिसरे संस्थापिताः सन्ति। यदि नियतकर्मचारिणः गभीररूपेण अस्वस्थाः भवन्ति चेत्तर्हि रुग्णालयं गत्वा औषधोपचारं कर्तुं

शक्नुवन्ति। न केवलं कर्मचारिणः अपि तु तेषां सम्पूर्णः परिवारः वैद्यकीयसौकर्याणि सर्वविधानि विन्दति। वैद्यकीयविरामसौकर्यमपि प्रकल्पितानि सन्ति सर्वेभ्यः नियतकर्मचारिभ्यः। **कोरोनाप्रतिरोधकसूचिकाः सर्वादौ निःशुल्कं सर्वेभ्यः कर्मचारिभ्यः प्रदानाय विश्वविद्यालयेन अपेक्षितव्यवस्था कृता।**

**शैक्षिकपरिकरसौकर्याणि**

अध्यापकानाम् अध्यापकेतरकर्मचारिणां सन्ततयः सुशिक्षिताः भवेयुः इति कृत्वा ताभ्यः वार्षिकशैक्षिकपरिकराणां व्यवस्थापनाय शैक्षिकसौकर्यवेतनम् अतिरिक्तरूपेण दीयते। कर्मचारिणां सन्ततेः प्रवेशशुल्कम्, समवस्त्रशुल्कम्, वाहनशुल्कम्, पुस्तकशुल्कम् इत्यादीनि शुल्कानि दातुम् अपेक्षितः निर्दिष्टधनराशिः नियमानुगुणं दीयते। अतः कर्मचारिणां परिवारोऽपि लाभान्वितः भवति। सन्ततेः शैक्षिकार्थिकभारं विश्वविद्यालयः एव निर्वहति इत्यपि विशेषः।

**सञ्चारवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि**

अध्यापकानाम् अध्यापकेतरकर्मचारिणां कृते सञ्चारवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि विशिष्टानि वेतनसौकर्याणि विश्वविद्यालयेन दीयन्ते। मूलवेतनेन सह महार्घतावेतनं देशस्य आर्थिकमहार्घतां संवीक्ष्य सर्वकारेण निर्धार्यते। सर्वकारेण उद्घुष्टानां महार्घतावेतनादीनां प्राप्तिः सकाले जायते इत्यतः विश्वविद्यालयस्य कर्मचारिणः सर्वे ससन्तोषं कार्यं कुर्वन्ति। यात्राप्रसङ्गेषु जायमानस्य अतिरिक्तयात्राव्ययस्य दायित्वं विश्वविद्यालयः एव वहति। भाटकगृहार्थमपि विशिष्टं सौकर्यं कल्पितं भवति।

**कर्तव्यावकाशः, सामान्यावकाशः, प्रसवावकाशः, प्रसवित्र्याः पोषणावकाशः, शैक्षिकावकाशः, अध्ययनावकाशः इत्यादयः।**

विश्वविद्यालयस्य कर्मचारिणः तस्य मूलसम्पदः सन्ति इत्यतः तेभ्यः विविधसन्दर्भेषु अपेक्षितानाम् अवकाशानां प्रदाने विश्वविद्यालयः सर्वदा उत्सुकोऽस्ति। प्रसवावकाशः, प्रसवित्र्याः पोषणावकाशः इत्यादयः अवकाशाः न कदापि निराक्रियन्ते। विषमपरिस्थितौ विश्वविद्यालयः कर्मचारिणा सह सन्तिष्ठते।

**गृहनिर्माणार्थं गणकयन्त्राद्युपकारणानां क्रयणाय च साहाय्यम्**

गणकयन्त्राद्युपकारणानां अनुप्रयोगेण कर्मचारिणः सर्वे सामयिकाः भवन्ति। अतः ५०, ००० रूप्यकाणि एतदर्थम् अग्रिमधनरूपेण स्वीकर्तुं शक्नुवन्ति। अनन्तरं क्रमशः स्वीकृतधनस्य प्रत्यर्पणं निर्धारितनियमानुगुणं कर्तव्यम्। एवमेव पदयोग्यतानुरूपं गृहनिर्माणाय निर्मितगृहस्वीकरणाय च अधिकाधिकम् एककोटिपर्यन्तमपि अग्रिमधनराशिरूपेण (मूलवेतनस्य १३९ गुणितः धनराशिः अग्रिमधनराशिरूपेण) कर्मचारी स्वीकर्तुं शक्नोति। सप्तमस्य वेतनायोगस्य क्रियान्वयनात् पूर्वं वाहनक्रमणाय द्विचक्रिकाक्रयणाय च अग्रिमधनराशिरूपेण विश्वविद्यालयः बहुभ्यः कर्मचारिभ्यः व्यवस्थाम् अकरोत्।

**यात्रासौकर्याणि**

विमानयात्रा, समुद्रमार्गयात्रा, स्थानीययात्रा, भारतदर्शनहेतुकी सविरामयात्रा, गृहगमनार्थकसविरामयात्रा, स्थानान्तरयात्रा, सेवानिवृत्तियात्रा, अग्रिमयात्रा इत्यादिषु यात्राप्रसङ्गेषु कर्मचारिभ्यः विशिष्टानि सौकर्याणि विश्वविद्यालयः प्रकल्पयति। भारतदर्शनादिषु सविरामयात्राप्रसङ्गेषु अर्जितविरामदिवसान् वेतनत्वेन परिवर्त्य सुखेन सपरिवारं यात्रां कर्तुम् अपि अवसरः वर्तते।

**स्वैच्छिकनिवृत्तिः, समयपूर्वनिवृत्तिः, चिकित्साधारितनिवृत्तिः, असाधारणनिवृत्तिः इत्यादिषु प्रसङ्गेषु सौकर्याणि।**

सेवात्यागप्रसङ्गेषु केन्द्रीयसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च विशिष्टानि सौकर्याणि प्राप्स्यन्ति।

**सेवानिवृत्तेः सौकर्याणि**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अध्यापकानां अध्यापकेतरकर्मचारिणां स्वाभाविकनिवृत्तिसन्दर्भे विशिष्टानि सौकर्याणि कल्पितानि सन्ति। स्वाभाविकनिवृत्तेः परमपि कार्यं कर्तुं निवृत्तिधनेन सह विशिष्टवेतनं दातुमपि अत्र अवसरः वर्तते। सेवावधौ अर्जितविरामानां धनत्वेन परिवर्तनाय अपि अवसरः अस्ति। निवृत्तस्य देहावसनात् परमपि विश्वविद्यालयः नियमानुगुणं व्यवस्थां करोति।

एतदतिरिच्य अन्यानि आरक्षितानां कृते नियुक्तौ सौकर्याणि यथा -

1. अनुसूचितजातीयानां जनजातीयानां क्षेमाय आरक्षणसौकर्याणि।
2. सामाजिकरूपेण शैक्षिकरूपेण च पृष्ठगामिनां क्षेमाय आरक्षणसौकर्याणि ।
3. पदाधारितानि आरक्षणसौकर्याणि ।
4. विकलाङ्गानाम् आरक्षणसौकर्याणि।
5. मेधाविनां क्रीडापटूनां कृते आरक्षणसौकर्याणि।
6. दुर्बलानाम् आरक्षणसौकर्याणि इत्यादीनि।

एवं बहुविधानि सौकर्याणि विश्वविद्यालयेन कल्पितानि सन्ति। विश्वविद्यालयः केन्द्रसर्वकारस्य कर्मचारिणां संक्षेमोपायानां निमित्तं विद्यमानान् सर्वकारीयान् अध्यादेशान् यथावत् परिपालयति। वेतनायोगस्य प्रतिवेदनं प्रतिवर्षं परिशील्य नवीनादेशान् यथावत् परिपालयन् स्वस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च यथा ससुखं सक्षेमं च जीवनं यापयेयुः तथा व्यवस्थां कल्पयति ।

उत्सवप्रियाः भारतीयाः । अतः **स्थानीयोत्सवसन्दर्भेषु** (ओणम् इत्यादिषु) स्थानीयपरिवेषं मनसि निधाय विशेषावकाशाः कर्मचारिभ्यः दीयन्ते। **उत्सवार्थमेव अग्रिमवेतनरूपेणापि** शिक्षकेतरकर्मचारिणां कृते निर्दिष्टः धनराशिः प्रदीयते। एतद्विहाय मानवीयदृष्ट्या विश्वविद्यालयीयकर्मचारिणां क्षेमाय निदेशकाः अन्ये सदस्याः च साहाय्यं व्यक्तिशः अपि कुर्वन्ति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***6.3.2 Percentage of teachers provided with financial support to attend conferences/ workshops and towards membership fee of professional bodies during the last five years***

***विगतेषु पञ्चसु वर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च वित्तीयसहायतां प्राप्तवताम् अध्यापकानां प्रतिशतं मानम्।***

**Answer:** 33.11

6.3.2.1 Number of teachers provided with financial support to attend conferences/ workshops and towards membership fee of professional bodies during the last five years

विगतेषु पञ्चसु वर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय,व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां सङ्ख्या

Answer: 150

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Details of teachers provided with financial support to attend conferences, workshops etc. during the last five years (Institutional data as per Data Template) | View Document |

***6.3.3 Average number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff during the last five years***

***विगतेषु पञ्चसु वर्षेषु शिक्षकाणां वृत्तिविकासार्थं शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च संस्थया समायोजिताः कार्यक्रमाः।***

**Answer:** 18.6

6.3.3.1 ***Total number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff year-wise during the last five years.***

विगतेषु पञ्चसु वर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च संस्थया समायोजितानां कार्यक्रमाणां वार्षिकी सम्पूर्णा सङ्ख्या।

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 28 | 12 | 11 | 17 | 25 |

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centres). | View Document |
| Reports of HRDC or similar centers | View Document |
| Details of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff (Institutional data as per Data Template) | View Document |

***6.3.4 Percentage of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years***

***विगतेषु पञ्चसु वर्षेषु अभिविन्यासकार्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां प्रतिशतं मानम्।***

**Answer:** 99.78

6.3.4.1 Number of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years

विगतेषु पञ्चसु वर्षेषु अभिविन्यासकार्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां सङ्ख्या।

Answer: 452

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centers). | View Document |
| IQAC report summary | View Document |
| Details of teachers attending professional development Programmes during the last five years (Institutional data as per Data Template) | View Document |

***6.3.5 Institution has Performance Appraisal System for teaching and non-teaching staff***

***संस्थायां शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली वर्तते।***

**Answer:**

सर्वेषां शैक्षिककर्मचारिणां प्रशासनिककर्मचारिणां च कार्यनिष्पादनप्रणाली गोपनीयं विवरणं च संस्कृतविश्वविद्यालयस्य तथा केन्द्रसर्वकारस्य नियमानुगुणं सम्पाद्यते । **सर्वविधप्रक्रियाः विश्वविद्यालय-अनुदान-आयोगस्य मानकमवलम्ब्य आन्तरिकगुणवत्ताप्रकोष्ठेन** क्रियते ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरीयाः सर्वे शिक्षकाः शिक्षकेतरकर्मचारिणश्च निर्दिष्टनियमानुगुणं कार्यनिष्पादनस्य प्रपत्रं परिपूरयन्ति । प्रपत्रं प्रपूर्य स्वविभागाध्यक्षेभ्यः समर्पयन्ति । विभागाध्यक्षाः तानि प्रपत्राणि परिशील्य निदेशकानां समक्षं प्रेषयन्ति । तदनु निदेशकः पुनः परिशीलयति । एवं प्रकारेण विविधानां विभागानां विभागाध्यक्षाणाम् अग्रेसारणेन परिसरनिदेशकानाम् अनुमोदनेन च कार्यप्रणालीयं सम्पादिता भवति । एवं प्रकारेण सर्वाणि प्रपत्राणि प्रपूर्य संस्कृतविश्वविद्यालयं नवदेहलीं प्रति अर्थात् मुख्यालयं प्रति प्रेषितानि भवन्ति । तत्र एतेषां प्रपत्राणां समीक्षा भवति । प्रपत्राणाम् आधारेण योग्याध्यापकेभ्यः कर्मचारिभ्यश्च पदोन्नतिः अन्ये लाभाश्च दीयन्ते ।एतत् मूल्याङ्कनं प्रतिवर्षं भवति । एतेषां कर्मचारिणां कार्यनिष्पादनस्य मूल्याङ्कनं च भवति । यथा –

**(क) सर्वेषां नियमितशैक्षिककर्मचारिणाम् ।**

**(ख) सर्वेषां नियमितप्रशासनिककर्मचारिणाम् ।**

**(ग) सर्वेषाम् अनुबन्धितशैक्षिककर्मचारिणाम् ।**

**(घ) सर्वेषाम् अनुबन्धितप्रशासनिककर्मचारिणाम् ।**

**(ङ) सर्वेषाम् अतिथिशैक्षिककर्मचारिणाम् ।**

सर्वेषां कर्मचारिणां नाम, अर्हता, परिचायकपत्रम्, विभागः, कार्यस्थानम्, शैक्षिकसत्रम् इत्यादीनाम् उल्लेखः प्रपत्रे क्रियते। सर्वेषां नियमितशैक्षिककर्मचारिणाम् अनुबन्धितशैक्षिककर्मचारिणाम् अतिथिशैक्षिककर्मचारिणाम् तदितराणां च आत्ममूल्याकलनेन सम्बद्धं विवरणं प्रपत्रस्य प्रथमभागे वर्तते। तत्र एते अंशाः पूरणीयाः भवन्ति। यथा -

1. **नाम, पदवी, सङ्केतः, स्तरः**
2. **प्रथमनियुक्तेः विवरणम्, नियुक्तेः निवृत्तेश्च तिथिः**
3. **शैक्षिकयोग्यताः**
4. **स्थिरोद्योगी/संविदा/आंशकालिकः** इत्यस्य पदस्य उल्लेखः।

ततः स्नातकस्नातकोत्तरस्तरीयाणां शिक्षकाणाम् कक्ष्याकार्यादीनाम् उल्लेखः वर्तते। यथा-

1. **सत्रे वितीर्णाः कालांशाः**
2. **सत्रे स्वीकृताः कालांशाः**
3. **प्रायोगिककार्यार्थं वितीर्णाः कालांशाः**
4. **प्रायोगिककार्यार्थं  स्वीकृताः कालांशाः**
5. **कक्ष्यादीनाम् अस्वीकरणे हेतवः**

शिक्षकाणां शोधप्रवृत्तेः मूल्याकलनव्यवस्था अपि विश्वविद्यालयेन क्रियते। यथा -

1. **वर्षेऽस्मिन् मार्गदर्शकत्वेन स्वीकृतानां शोधच्छात्राणां सङ्ख्या ।**
2. **उपाधिप्राप्तवतां शोधच्छात्राणां सङ्ख्या ।**
3. **शोधपरियोजनानां विवरणम्  -कृतानां करिष्यमाणानां च सङ्ख्या ।**
4. **धनदायिनी संस्था ।**
5. **मुख्यः गवेषकः ।**
6. **प्राप्यपरिणामाः ।**
7. **राष्ट्रिये अन्ताराष्ट्रिये च स्तरे शोधपत्राणि प्रस्तुतीकृतं चेत्तर्हि तद्विषये विवरणम् ।**
8. **शोधकेन्द्रितसङ्गोष्ठ्यादिषु भागग्रहणस्य उल्लेखः।**
9. **पुस्तकप्रकाशनादीनि कार्याणि ।**
10. **रचनात्मकसर्जनात्मकगतिविधीनाम् उल्लेखः ।**
11. **सभायाः कार्यशालायाः राष्ट्रियसङ्गोष्ठ्याः तदितरेषां कार्यक्रमाणां संयोजकत्वेन कृतकार्यस्य विवरणम् ।**
12. **विश्वविद्यालयस्य परीक्षाकार्येषु सर्वेषां नियमितशैक्षिककर्मचारिणां सर्वेषां नियमितप्रशासनिककर्मचारिणां सर्वेषाम् अनुबन्धितशैक्षिककर्मचारिणां सर्वेषां अनुबन्धितप्रशासनिककर्मचारिणां सर्वेषाम् अतिथिशैक्षिककर्मचारिणां कार्यनिष्पादनस्यापि परीक्षणं विधीयते।**
13. **पाठ्यसहगामिक्रियासु, सामाजिकेषु सांस्कृतिकेषु च क्रियाकलापेषु कर्मचारिणां भूमिकायाः परिगणनं विधीयते।**
14. **एकस्मिन् वर्षे निदेशकेन विभागाध्यक्ष्येण च तदितरप्रशासकैः प्रदत्तानां दायित्वानां विवरणम् ।**
15. **शिक्षकैः प्रयुज्यमानानां प्राविधिकोपकरणानां पुनः शिक्षणार्थं गवेषितानां च नूतनोपकरणानाम् उल्लेखः।**

एतत्सम्बद्धानि अधिकविवरणानि कृतकार्याणां प्रमाणैः सह प्रपूर्य कर्मचारिणा दीयते। प्रतिवेदनाधिकारी पुनः प्रमाणीकरणं करोति। प्रतिवेदनाधिकारी अधोलिखितानां विवरणं पूरयति । यथा -

1. **विषयज्ञानम्**
2. **विषयज्ञानवर्धनाय शिक्षकेण कृताः प्रयासाः**
3. **शिक्षणसामर्थ्यम्**
4. **नियमितता**
5. **शिक्षायाः गुणवत्ता**
6. **छात्रैः सह सम्बन्धः**
7. **सहोद्योगिभिः सह सम्बन्धः**
8. **योजनानिर्माणक्षमता**
9. **साधनसम्पन्नता**
10. **भागग्राहिता** इत्यादीनि।

समीक्षकाधिकारिणा अधोलिखिताः सारांशरूपेण लिख्यन्ते। यथा -

1. **शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अत्युत्तमानि सन्ति।**
2. **शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि उत्तमानि सन्ति।**
3. **शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि तृप्तिकराणि सन्ति।**
4. **शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अतृप्तिकराणि सन्ति।**

अत्र सर्वत्रापि अधिकारी प्रत्येकमपि शिक्षकस्य कार्यनिष्पादनस्य विवरणं व्यक्तिशः वस्तुनिष्ठरूपेण च पूरयति। तत्प्रतिवेदनम् अतीव महत्त्वपूर्णं भवति।

1. **शिक्षकस्य शिक्षकेतरकर्मचारिणः चरित्रम् अत्युत्तमम् अस्ति।**
2. **शिक्षकस्य शिक्षकेतरकर्मचारिणः समन्वयः अत्युत्तमः अस्ति।**
3. **शिक्षकस्य शिक्षकेतरकर्मचारिणः प्रतिपुष्टिः अत्युत्तमा अस्ति।**
4. **शिक्षकस्य शिक्षकेतरकर्मचारिणः अन्यः कोऽपि विशेषांशः अस्ति** चेत्तर्हि तस्य उल्लेखः।

एतस्य समीक्षणं सम्यक् विहाय निदेशकः अग्रे सारयति। एवं विश्वविद्यालयस्य शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली व्यवस्थिता वस्तुनिष्ठा च प्रचलति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***6.3.6 Percentage of participation of non-Sanskrit background teachers/Non-teaching staff in programs of communication practice in Simple Standard Sanskrit/ Sanskrit training sessions etc., during the last five years.***

***विगतेषु पञ्चसु वर्षेषु सरलमानकसंस्कृत/संस्कृतप्रशिक्षणसत्रादिषु संवादाभ्यासकार्यक्रमेषु संस्कृतेतरपृष्ठभूमेः अध्यापकानां/शिक्षकेतरकर्मचारिणां भागग्राहितायाः प्रतिशतं मानम्।***

**Answer:** 55.84

6.3.6.1 Number of non-Sanskrit background teachers/Non-teaching staff participated in programs of communication practice in Simple Standard Sanskrit/ Sanskrit training sessions etc., during the last five years:

विगतेषु पञ्चसु वर्षेषु सरलमानकसंस्कृत/संस्कृतप्रशिक्षणसत्रादिषु संवादाभ्यासकार्यक्रमेषु भागग्रहीतॄणां संस्कृतेतरपृष्ठभूमेः अध्यापकानां/शिक्षकेतरकर्मचारिणां सङ्ख्या –

Answer: 153

6.3.6.2 Number of non-Sanskrit background teachers/Non-teaching staff during the last five years:

विगतेषु पञ्चसु वर्षेषु संस्कृतेतरपृष्ठभूमेः अध्यापकानां/शिक्षकेतरकर्मचारिणां सङ्ख्या –

Answer: 274

| File Description | Document |
|---|---|
| As per Data Template | View Document |
| Any Additional information | View Document |

| Other Upload Files |
|---|

***6.3.7 Strategies adopted for capacity building of all staff by giving training etc., necessary for making Simple Standard Sanskrit as medium of administration and management.***

***सरलमानकसंस्कृतं प्रशासनप्रबन्धनयोः माध्यमरूपेण प्रतिष्ठापयितुम् अनिवार्यतया प्रशिक्षणादिद्वारा सर्वेषां कर्मकराणां सामर्थ्यं निर्मातुं स्वीकृताः व्यूहाः।***

**Answer:**

प्रशासनप्रबन्धनयोः माध्यमरूपेण सरलमानकसंस्कृतस्य प्रतिष्ठापनाय विश्वविद्यालयेन कोरोना कालखण्डोत्तरं विविधाः नवव्यूहाः संरचिताः सन्ति। यद्यपि विश्वविद्यालये संस्कृतज्ञाः/शास्त्रज्ञाः एव अधिकाः प्रशासकाः प्रबन्धकाः च सन्ति तथापि अन्येषाम् अपि कार्यालयीयकर्मचारिणां कृते सरलमानकसंस्कृतमुखेन प्रशिक्षणप्रदानाय विश्वविद्यालयेन विविधाः व्यूहाः रचिताः सन्ति। ते च क्रमशः यथा -

**१. कार्यालये संस्कृतम्**

कार्यालयः प्रशासनप्रबन्धनयोः कृते गतिशीलतां यच्छति। कार्यालयः यदि पूर्णशः संस्कृतमयः भवति तर्हि प्रशासनप्रबन्धनयोः संस्कृतपरकार्याणां गतिशीलता समभिवर्धतेतमाम् । अतः एव मुख्यालयेन कार्यालये संस्कृतम् इति नव्यः व्यूहः विरचितः वर्तते। सर्वान् कार्यालयीयान् सरलमानकसंस्कृतमुखेन प्रशिक्षयितुमेव अयं व्यूहः कुलपतिभिः परिकल्पितः वर्तते। अस्मिन् वर्षे २०२२ तमे संवत्सरे संस्कृतोत्सवाङ्गतया अयं '**कार्यालये संस्कृतम्**' इति विशिष्टः व्यूहः औपचारिकरूपेण क्रियारूपम् अविन्दत। कार्यालयेभ्यः सूचनापत्राणि आदेशपत्राणि विज्ञापनानि यानि निर्गच्छन्ति तानि संस्कृतेन प्रकाश्यन्ते चेत्तर्हि धनात्मकः परिणामः आयाति। विविधानां विभागीयानां सूचनापत्राणि संस्कृतेन एव संलग्नानि भवन्ति। तदुपरि राष्ट्रस्य प्राशासनिकभाषायाम् अर्थात् हिन्द्यां कुत्रचित् आङ्ग्ले प्रादेशिकभाषायां च सूचनापत्राणि आरोप्य प्रसारयन्ति कार्यालयीयाः। व्याकरणविभागीया गोष्ठी प्रचलति चेत्तर्हि गोष्ठीसम्बद्धं विज्ञापनादिकं विवरणादिकं च सरलमानकसंस्कृतेन एव भवन्ति। तदुपरि कार्यालयादेशपत्रं संयोजयन्ति। इतः परं सर्वविधानि सूचनापत्राणि सरलमानकसंस्कृतेन अपि प्रकाशयितुं यत्नः आरब्धः वर्तते।

**२. विश्वविद्यालयस्य जालस्थानेषु सरलमानकसंस्कृतम्**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य जालस्थाने सम्पूर्णस्य विश्वविद्यालयस्य विभागादीनां समितीनां सौकर्याणां च विवरणं हिन्दी भाषायाम् आङ्ग्लभाषायां च इतः पूर्वम् आसीदेव। प्रगतवर्षात् आरभ्य सरलमानकसंस्कृतेन अपि जालस्थाने विश्वविद्यालयस्य लघुपरिचयरूपाणि विवरणानि संयोजितानि सन्ति। **विश्वविद्यालयस्य प्रतिष्ठापनं कदा अभवत्? कति विभागाः सन्ति? कार्यक्षेत्राणि कानि ? विश्वविद्यालयस्य दूरदृष्टिः कीदृशी? ध्येयानि कानि ? कति परिसराः सन्ति? कति आदर्शमहाविद्यालयाः शोधसंस्थानानि च विश्वविद्यालयस्य वर्तन्ते? इत्यादीनि तत्र सरलमानकसंस्कृतेन उल्लिखितानि सन्ति।** अतः बालाः अत्रत्यं प्रशासनप्रबन्धनयोः लिपिबद्धं परिचयं सरलमानकसंस्कृतमुखेन प्राप्तुं प्रभवन्ति।

**३.प्रशासनप्रबन्धनप्रकोष्ठेषु सरलमानकसंस्कृतम्**

विश्वविद्यालयस्य द्वादशः परिसराः सन्ति। तत्रत्येषु प्रशासनप्रबन्धनप्रकोष्ठेषु इतरत्र च भित्तिषु सरलसुभाषितवाक्यानि नीतिवाक्यानि मूल्ययुक्ताः मन्त्राः उल्लिखिताः सन्ति। वेदोऽखिलो धर्ममूलम् , सत्यं वद धर्मं चर , स्वाध्यायान्मा प्रमदः, विद्याधनं सर्वधनप्रधानम्, विद्यया विन्दतेऽमृतम् इत्यादीनि सरलवाक्यानि मन्त्राश्च कार्यपथे वर्तमानान् प्रशासकान् प्रबन्धकान् अनुदिनं प्रेरयन्ति।

**४.संस्कृतसम्भाषणशिबिरैः सरलमानकसंस्कृतम्**

परिसरस्तरे स्थानीयाः प्रशासकाः कार्यालयीयकर्मचारिणां कृते सरलमानकसंस्कृतमुखेन प्रशिक्षणप्रदानाय संस्कृतसम्भाषणशिबिराणि काले काले आयोजयन्ति। एतेषां शिबिराणां साहाय्येन कार्यालयीयकर्मचारिणः सरलसंस्कृतेन व्यवहर्तुम् अपेक्षितं सामर्थ्यं विन्दन्ति। केचन प्रबन्धकाः कार्यालयीयकर्मचारिणः च यथा शिक्षकाः सरलमानकसंस्कृतमुखेन भाषणं कुर्वन्ति तथा एते अपि कर्तुं शक्नुवन्ति। ग्रन्थालये, गणकयन्त्रविभागे शारीरिकशिक्षाविभागे , छात्रावासेषु च कार्यरताः अधिकाधिकाः कर्मचारिणः सरलमानकसंस्कृतेन भाषितुं समर्थाः सन्ति। वाटिकासु , वराण्डेषु , प्रवेशद्वारेषु , निर्गमद्वारेषु अपि संस्कृतभाषाभाषिणः परिसरेषु नयनपथमवतरन्ति।

**५. दीक्षापाठ्यक्रमः सरलमानकसंस्कृतं च ।**

न केवलं छात्राः अपि तु विविधपरिसरीयाः कर्मचारिणः अपि दीक्षापाठ्यक्रमम् अधीत्य प्रमाणपत्राणि प्राप्तवन्तः। अयं पाठ्यक्रमः पूर्णशः सरलमानकसंस्कृतेन एव लिपिबद्धः वर्तते। दीक्षापाठ्यक्रमम् अधीत्य प्रमाणपत्राणि आसाद्य कर्मचारिणः

वयं संस्कृतस्य प्रचारपराणि कार्याणि कर्तुं शक्नुमः इति निरूपयन्ति। एतादृशैः विविधैः उपायैः व्यूहैश्च प्रशासनव्यवस्था पूर्णशः संस्कृतपरा वर्तते इति फलितम्।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Provide copy of the training schedule | View Document |
| Any additional information | View Document |
| Provide link for written directions given to all with time frame | View Document |

**6.4 Financial Management and Resource Mobilization**

***6.4.1 Institution conducts internal and external financial audits regularly***

***संस्था नियमितम् आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं करोति।***

**Answer:**

सर्वस्याः अपि संस्थायाः **आर्थिकस्वास्थ्यपरिरक्षणदृष्ट्या आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं** प्राथम्यं भजते। एतदनु केन्द्रीयसंस्कृतविश्वविद्यालयोऽपि नियतरूपेण आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं सम्पादयति। प्रतिवर्षं वित्तलेखाङ्केक्षणेन विश्वविद्यालयस्य वित्तीयव्यहाराणां परिज्ञानं सम्भवति। वित्तीयकोषस्य परीक्षणेन मूल्याङ्कनेन च आयव्ययाभ्यां सह न्यूनतायाः दोषस्य वा ज्ञानं भवति। वित्तीयव्यवहारेषु पारदर्शितायाः परिरक्षणदृष्ट्या वित्तलेखाङ्केक्षणम् अतीव प्रधानं कार्यम् अस्ति। वित्तलेखाङ्केक्षणं तु आन्तरं बाह्यम् इति द्वैविध्यं भजते। क्रमशः यथा -

**1. केन्द्रीयसंस्कृतविश्वविद्यालयस्य आन्तरं वित्तलेखाङ्केक्षणम् -**

मुख्यालयस्य वित्तसमितिः प्रत्येकम् अपि परिसरस्य आन्तरं वित्तलेखाङ्केक्षणं कर्तुम् एकां समितिं विरचय्य प्रति परिसरंप्रेषयति। अस्यां समितौ एकः निवृत्तः लेखाधिकारी भवति। अनेन सह आन्तरिकाः लेखाधिकारिणः परिसरान्तरवित्तविभागाधिकारिणश्च सदस्यरूपेण भवन्ति। ते अधिकारिणः प्रत्येकमपि परिसरस्य आन्तरं वित्तलेखाङ्केक्षणं कृत्वा प्रतिवेदनं मुख्यालयाय प्रेषयन्ति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य द्वादशः परिसराः सन्ति। एतदतिरिच्य मुख्यालयोऽपि स्वस्य आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं सम्पादयति। अन्ते समग्रस्य विश्वविद्यालयस्य सङ्कलितं वित्तलेखाङ्केक्षणं व्यवस्थापनवित्तपरिषदोः अनुमोदनेनजायते।

विश्वविद्यालयस्य प्रत्येकं परिसरः आयव्यययोः 100% लेखाङ्केक्षणं सम्पादयति।आन्तरं वित्तलेखाङ्केक्षणं कर्तुं या समितिः नियतरूपेण परिसरं गच्छति तस्याः कार्याणि यथा -

1. परिसरनिदेशकस्य विवरणप्राप्तिः।
2. प्रगतवित्तलेखाङ्केक्षणप्रतिवेदनस्य तथा संसूचनानां च परिशीलनम् ।
3. परिसरीयदूरभाषादीनाम् उपयोगस्य तत्सम्बद्धपञ्जिकायाः च परीक्षणम् ।
4. परिसरीयानां समेषाम् अभिलेखानां पञ्जिकानां च परीक्षणम् ।
5. भाटकरूपेण स्वीकृतानां भवनानां छात्रावासानाम् आवासस्थानानां च सम्बद्धपञ्जिकानां परीक्षणम् ।
6. मासिककोषस्य शेषांशस्य तत्सम्बद्धपत्राणां च परीक्षणम्।
7. वित्तीयवर्षस्य सर्वासां वित्तीयपत्रिकाणां परीक्षणम् ।
8. अनुबन्धितदेयेन परिवहनदेयेन च सम्बद्धानां पञ्जिकानां परिशीलनम् ।
9. सर्वकारीयवाहनसौकर्यव्यवस्था परिसरे अस्ति चेत्तर्हि तत्सम्बद्धपञ्जिकायाः निरीक्षणम् ।

10. सर्वकारीयकर्मकराय संस्थायै अन्येभ्यः सौकर्यप्रकल्पकेभ्यः अप्रदत्तधनराशेः विवरणं यदि अस्ति तर्हि तत्पञ्जिकायाः परिशीलनम् ।
11. चरभौतिकपदार्थानां परिशीलनम् । पुनः तेषां भौतिकपर्यवेक्षणेन सम्बद्धानाम् अभिलेखानां परीक्षणम्।
12. परिसरे नष्टानां निरुपयुक्तानां च पदार्थानां परित्यागार्थं निर्मितसूच्याः तथा निरूपयुक्तधनराशेश्च परीक्षणम् ।
13. स्थिरकर्मचारिणां सेवापुस्तिकायाः व्यक्तिगतपुस्तिकायाश्च परीक्षणम् ।
14. सर्वकारीयमानितसंस्थाभ्यः पदार्थानां क्रयणावसरे अनुसृतानां प्रक्रमाणां विवरणोपेतायाः पुस्तिकायाः परीक्षणम्। क्रयणसमितेः माध्यमेन क्रीतं वा नवेति परीक्षणम्।
15. वार्षिकसहकारानुबन्धः बाह्यसंस्थाभिः सह परिसरेण कृतश्चेत् तर्हि तत्परिशीलनम् ।
16. न्यायालयाभियोगादीनां सत्वे तेषां परिशीलनम् । आर.टि.आइ .सम्बद्धानां दत्तांशानां परिशीलनम्।
17. चेक बुक इत्यस्य जि.पि.एफ् .कोषस्य तथा सामान्यकोषस्य च परिशीलनम् ।
18. व्ययपत्रस्य परिसरीयकर्मचारिणां आयकरविभागसम्बद्धपत्रावलीनां च परिशीलनम् ।
19. व्ययार्थं निर्दिष्टधनराशेः अपेक्षया ऊर्ध्वं व्ययितस्य धनराशेः सकारणं परिशीलनम् ।
20. आयकरविभागसम्बद्धाभिलेखानां व्यवस्थापनक्रमपरिशीलनम् ।
21. पूर्ववर्षस्य पञ्जिकायाः पर्यवेक्षणम् ।
22. प्रधानव्ययपञ्जिकायाः अवलोकनम् ।
23. नष्टधनपदार्थादीनां विवरणपञ्जिकायाः अवलोकनम्
24. ग्रन्थालयीयपरीक्षितपुस्तकसम्बद्धप्रतिवेदनस्य अवलोकनम् ।
25. सक्रिययोजनानां तत्सम्बद्धाभिलेखानां च परीक्षणम्।

एतत्सर्वं कार्यं आन्तरवित्तलेखाङ्केक्षणेन सम्बद्धं वर्तते। प्रत्येकं परिसरस्य निदेशकः एतद्विषये उत्तरदायी भवति। अतः आन्तरवित्तलेखाङ्केक्षणात् पूर्वमेव तदर्थम् अपेक्षितां सर्वविधसिद्धतां सर्वत्र कुर्वन्ति।

**2. केन्द्रीयसंस्कृतविश्वविद्यालयस्य बाह्यं वित्तलेखाङ्केक्षणम् -**

परिसरः यस्मिन् राज्ये वर्तते तत् राज्यस्य प्रधानलेखाङ्केक्षणकार्यालयस्य लेखाधिकारिणः बाह्यवित्तलेखाङ्केक्षणस्य कार्यं सम्पादयितुम् आयान्ति। एते परिसरस्य कार्यालयेन व्यवस्थापितानाम् अभिलेखानां परिशीलनं कुर्वन्ति। मासानुगुणं जातस्य व्ययस्य परिशीलनं कुर्वन्ति। परिसरस्य वित्तकोषेन सम्बद्धानां समेषां पत्रावलीनाम् निरीक्षणकार्यं सम्पादयन्ति। तेषां निरीक्षणेन सम्बद्धाः प्रधानाः पञ्जिकाः अभिलेखाः च यथा -

1. अनुमोदितानि पदानि तेषां विवरणसम्बद्धा पञ्जिका।
2. कार्यरतानां कर्मचारिणां विवरणपञ्जिका,रिक्तपदानि च।
3. वित्तकोषस्य विविधानि विगणनानि ।
4. सेवाप्रदानसंस्थासम्बद्धानुबन्धानां पञ्जिका।
5. वाहनानां सङ्ख्या। तेषां निर्वहणव्ययः।
6. सञ्चितकोषाः।
7. बाह्यकर्मचारिणां विवरणपञ्जिका ।
8. आन्तरिकवित्तलेखाङ्केक्षणस्य प्रतिवेदनपत्राणि।
9. विभागीयलेखाङ्केक्षणम् ।
10. पूर्वतनलेखाङ्केक्षणसन्दर्भे उद्भाविताः समस्याः समाधानानि ।
11. ग्रन्थालयपञ्जिका।
12. क्रीतानां पदार्थानां विवरणपञ्जिका।
13. धनस्य अपव्ययेन अतिव्ययेन च सम्बद्धाः पञ्जिकाः।
14. एकस्मिन् वर्षे सम्पादितानां साधितानां च कार्याणां विवरणम् ।
15. राजस्वसङ्क्रमणस्य विवरणम्।
16. यात्राविरामप्रवासादिभिः सम्बद्धाः अभिलेखाः ।

एवं बहुविधपत्राणां पञ्जिकानाम् अभिलेखानां पर्यवेक्षणात् परं परिसरनिदेशकानां स्पष्टीकरणं पृच्छन्ति। तदग्रे प्रतिवेदनं सिद्धं भवति। सामान्यतः वित्तीयसन्देहान् निदेशकः परिहरति चेत्तर्हि तदग्रे प्रसारितः न भवति। तदभावे सकारणसूचनायाः उल्लेखम् अधिकारिणः कुर्वन्ति।

एवं सिद्धानि प्रतिवेदनानि मुख्यालयस्य वित्तसमितेः पर्यवेक्षणे भवन्ति। अतिरिक्तलेखाङ्केक्षणस्य निमित्तं विश्वविद्यालयस्य व्यवस्थापनपरिषदः अनुमोदनं स्वीक्रियते। पुनरपि लेखाङ्केक्षणं सम्पाद्य लोकसभायां तस्य उपस्थापनं क्रियते। वित्तीयानुदानादीनां प्राप्तौ एतदेव प्रतिवेदनं प्रधानं भवति।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload any additional information | View Document |
| Provide link for additional information | View Document |

***6.4.2 Funds / Grants received from government bodies during the last five years for development and maintenance of infrastructure (not covered under Criteria III and V ) (INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु आधारभूतसंरचनायाः विकासाय अनुरक्षणाय च सर्वकारीयनिकायेभ्यः प्राप्तधनम्/ अनुदानम् (यदि तृतीये पञ्चमे च निकषे न अन्तर्भूतम्) (लक्षशः रूप्यकेषु)***

**Answer:** 345136.56

6.4.2.1 Total Grants received from government bodies for development and maintenance of infrastructure (not covered under Criteria III and V) year-wise during the last five years (INR in *Lakhs*)

विगतेषु पञ्चसु वर्षेषु आधारभूतसंरचनायाः विकासाय अनुरक्षणाय च सर्वकारीयनिकायेभ्यः प्रतिवर्षम् अनुदानस्य वार्षिकः योगः (यदि तृतीये पञ्चमे च निकषे न अन्तर्भूतम्) (लक्षशःरूप्यकेषु)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 19883.16 | 19285.07 | 264699.28 | 21437.99 | 19831.06 |

| File Description | Document |
|---|---|
| Details of Funds / Grants received from government bodies during the last five years (Data Template) | View Document |
| Any additional information | View Document |
| Annual statements of accounts | View Document |

***6.4.3 Funds / Grants received from non-government bodies, individuals, philanthropists during the last five years for development and maintenance of infrastructure (not covered under Criteria III and V ) (INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु आधारभूतसंरचनायाः विकासाय अनुरक्षणाय च असर्वकारीयनिकायेभ्यः, व्यक्तिभ्यः, समाजसेविभ्यः च प्राप्तधनम्/ अनुदानं गृहीतम् (यदि तृतीये पञ्चमे च निकषे न अन्तर्भूतम्) (लक्षशः रूप्यकेषु)***

**Answer:** 18.05

6.4.3.1 Total Grants received from non-government bodies, individuals, philanthropists for development and maintenance of infrastructure (not covered under Criteria III and V ) year-wise during the last five years (INR in *Lakhs*)

विगतेषु पञ्चसु वर्षेषु आधारभूतसंरचनायाः विकासाय अनुरक्षणाय च असर्वकारीयनिकायेभ्यः, व्यक्तिभ्यः, समाजसेविभ्यः च प्रतिवर्षं गृहीतस्य अनुदानस्य वार्षिकः योगः (लक्षशः रूप्यकेषु)

Answer:

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 9.99692 | 2.27849 | 2.31903 | 1.89762 | 1.56 |

| File Description | Document |
|---|---|
| Details of Funds / Grants received from non-government bodies during the last five years (Data Template as of 6.4.2) | View Document |
| Any additional information | View Document |
| Annual statements of accounts | View Document |

***6.4.4 Institutional strategies for mobilisation of funds and the optimal utilisation of resources***

***विविधसंसाधनानां सर्वाधिकसमुपयोगार्थं, वित्तराशिसङ्ग्रहार्थञ्च संस्थायाः व्यूहाः।***

**Answer:**

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्** इत्युक्तिं मनसि सङ्कलय्य केन्द्रीयसंस्कृतविश्वविद्यालयः स्वस्य मानवीयसंसाधनानां भौतिकसंसाधनानां च सदुपयोगार्थं सदैव प्रयतते। विविधसंसाधनानां सदुपयोगः भवेदिति मत्वा स्वकर्मचारिषु अन्यतमान्  प्रबन्धकत्वेन पर्यवेक्षकत्वेन संरक्षकत्वेन च नियोजयति । परिसरनिदेशकाः अपि परिसरीयपदार्थानां सर्वाधिकसमुपयोगार्थं विविधाः समितीः रचयन्ति। समितीनां मार्गदर्शने सर्वेषां मानवीयसंसाधनानां भौतिकसंसाधनानां च उपयोगः क्रियते। तदर्थं विशिष्टान् व्यूहान् अपि आरचयति विश्वविद्यालयपरिसरः ।

क्रमशः यथा -

### 1. विविधसंसाधनानां सर्वाधिकोपयोगसम्बद्धाः व्यूहाः

1. विश्वविद्यालयस्य परिसरेषु **सुव्यवस्थितक्रीडाङ्गणानि** सन्ति बहुत्र। एतेषां क्रीडाङ्गणानाम् उपयोगः न केवलं क्रीडाकलापानां निमित्तमेव अपि तु बृहत्सभादीनां सङ्घटनावसरे विविधगोष्ठीनां सञ्चालनावसरे च मुक्तसभाङ्गणरूपेणापि क्रियते। युवमहोत्सवादिषु नाट्योत्सवसन्दर्भेषु च  सहस्राधिकाः जनाः सम्मिलिताः भवन्ति इत्यतः तस्मिन् सन्दर्भे क्रीडाङ्गणस्य परिपूर्णः उपयोगः जायते।
2. **सुव्यवस्थिताः ग्रन्थालयाः** परिसरेषु सन्ति। एतेषां निर्वाहकाः ग्रन्थपालकाः न केवलं  पुस्तकनिर्वहणवितरणादिकं कार्यं कुर्वन्ति अपि तु  विश्वविद्यालयेन प्रकाशितानां पुस्तकानां विक्रयणार्थमपि व्यवस्थां कुर्वन्ति। विश्वविद्यालयेन अद्यावधि प्रकाशितानां 116 सङ्ख्याकानां  वेद-शास्त्र-पुराण-इतिहास-काव्य-कोष-स्मृतिग्रन्थानां 137 सङ्ख्याकानां सन्दर्भग्रन्थानां पुनः परिसरेण प्रकाशितानां विविधशास्त्रकोषग्रन्थानां विक्रयकेन्द्राणि द्वादशेषु केन्द्रेषु चलन्ति।
3. **व्यायामशालायाः प्रयोगशालायाः गणकशालायाः अन्यासां च संसाधनानाम् उपयोगः**  व्यायामशालाः प्रयोगशालाः गणकशालाः, प्राविधिकप्रयोगशालाः, मनोविज्ञानप्रयोगशालाश्च अधिकाधिकेषु परिसरेषु सन्ति। व्यायामशालायाः सदुपयोगं छात्राः नियतं कृत्वा शारिरिकसौष्ठवं सम्पादयन्ति। प्रयोगशालाभिः छात्राः प्रत्यक्षरूपेण अधिगच्छन्ति। प्रयोज्यप्रयोजकस्थानापन्नाः छात्राः विविधप्रयोगशालानां साहाय्येन स्वयं प्रयोगं कृत्वा अधिगच्छन्ति।

4. **उपवनोद्यानपुष्पवाटिकादीनां सदुपयोगः** विश्वविद्यालयस्य परिसरीयपरिवेषाः पुष्पोद्यानैः वाटिकाभिः उपवनैश्च सर्वदा सुशोभन्ते । गङ्गानाथझापरिसरस्तु बृहदुद्यानमध्ये शोभते। अत्र विकसितानां पुष्पाणां सदुपयोगं सरस्वत्याः पूजने मालानिर्माणप्रसङ्गेषु अर्चनोत्सवादिषु क्रियते।
5. **छात्रावास-अतिथिभवन-शिक्षकावासादीनाम् उपयोगः** परिसरेषु अधिकाधिकेषु सुव्यवस्थिताः छात्रावासाः सन्ति। बालकानां बालिकानां च छात्रावासाः सर्वदा पूर्णाः एव भवन्ति। अतिथिभवनानि अपि व्यवस्थितरूपेण सज्जीकृत्य संस्थापितानि सन्ति। के.जे.सोमय्या परिसरे यद्यपि भवनानि पर्याप्तमात्रेण न सन्ति तथापि छात्राणां कृते उत्तमपर्यायव्यवस्थां दातुं स्थानीयप्रशासनं प्रयतते।
6. **कक्ष्यासभाङ्गणान्तर्दौवारिकक्रीडाङ्गणादीनाम् उपयोगः** परिसरेषु कक्ष्यासभाङ्गणान्तर्दौवारिकक्रीडाङ्गणादीनाम् उपयोगः नियतरूपेण जायन्ते। रिक्ते समये कक्ष्योत्तरप्रसङ्गेषु च शिक्षकाणाम् उपवेशनादिकं कर्तुमपि कक्ष्यादीनाम् उपयोगः जायते। ग्रीष्मकालिकावकाशेषु अनौपचारिकसंस्कृतशिक्षणादीनां प्रदानावसरे परिसरीयकक्ष्याणाम् उपयोगः जायते। अतः विश्वविद्यालयस्य भौतिकसंसाधनानि विरामदिवसेष्वपि उपयोगयोग्यानि एव भवन्ति बहुधा।

**2. वित्तराशिसङ्ग्रहार्थं विश्वविद्यालयस्य व्यूहाः**

विश्वविद्यालयः यद्यपि स्वस्य व्ययनिर्वहणाय पूर्णशः केन्द्रसर्वकारावलम्बितः वर्तते तथापि अयं व्यक्तिशः अपि वित्तराशिसङ्ग्रहार्थं नैकान् व्यूहान् रचयति । क्रमशः यथा -

1. **विश्वविद्यालयस्य प्रकाशनविक्रयकेन्द्राणि** भारतस्य विभिन्नेषु प्रदेशेषु/परिसरेषु/ आदर्शमहाविद्यालयेषु विश्वविद्यालयस्य द्वादशसङ्ख्याकानि स्थिरविक्रयकेन्द्राणि सन्ति। अत्र विश्वविद्यालयस्य उपत्रिशतं प्रकाशनानि क्रयणाय उपलभ्यन्ते। पुस्तकानां विक्रयणेन अद्यावधि लक्षशः रूप्यकाणि विश्वविद्यालयेन अर्जितानि सन्ति। पुस्तकस्य मूल्येषु ४०% धनम् उद्धृतभागरूपेण त्यज्यते। बहूनि पुस्तकानि विना लाभं विना हानिं च विक्रीयन्ते। विश्वविद्यालयस्य दीक्षापुस्तकानि विश्वप्रसिद्धानि सन्ति। अद्यावधि ३,००,००० परिमितानि पुस्तकानि विक्रीतानि सन्ति। दीक्षापुस्तकगुच्छस्य मूल्यमधुना केवलं ५०० रूप्यकाणि एव । स्वाध्याययोग्यानि सरलसंस्कृतपुस्तकानि इमानि । एवमेव अनौपचारिकसंस्कृतशिक्षणेन सम्बद्धायाः सान्द्रमुद्रिकायाः गुच्छोऽपि बहुधा विक्रीताः । एवं सान्द्रमुद्रिकाभिरपि धनमर्जयति विश्वविद्यालयः। संस्कृतमहोत्सव - पुस्तकमेला च यत्र यत्र प्रचलन्ति तत्र बहुत्र अस्थिरविक्रयणकेन्द्राणि विश्वविद्यालयेन प्रतिष्ठाप्यन्ते । पुस्तकानां क्रेतारः उत्सुकाः भवेयुः इति मध्ये मध्ये मूल्योद्धारमपि उद्घोषयति विश्वविद्यालयः।
2. **न्यासधनसङ्ग्रहव्यूहः** विश्वविद्यालयस्य मुख्यालये परिसरेषु च न्यासधनसङ्ग्रहार्थं धनदायिभ्यः दानिभ्यः अवसरः कल्पितः वर्तते। बहुषु परिसरेषु न्यासधनत्वेन लक्षशः धनं दानिभिः प्रदत्तं वर्तते। तैः प्रदत्तधनं मूलधनत्वेन परिसरकोषे एव सन्तिष्ठते।तद्धनस्य वार्षिकलाभांशमात्रस्य विनियोगः पुरस्कारसत्कारादीनां निमित्तं क्रियते । विविधमठाधीशैः सामाजिकसङ्घटनैश्च छात्राणां प्रोत्साहनाय न्यासधनं परिसरेषु निक्षिप्तं वर्तते। शृङ्गगिरिपरिसरच्छात्राणां प्रोत्साहनाय तत्रत्यैः पीठाधीश्वरैः २१८००० रूप्यकाणि न्यासधनत्वेन निक्षिप्तानि वर्तन्ते। कुलपतिचरैः उडुपवर्यैः लक्षद्वयं न्यासधनत्वेन प्रदत्तमस्ति।
3. **विश्वविद्यालयन्यासधनप्रतीहारः** केन्द्रीयसंस्कृतविश्वविद्यालयेन वित्तराशिसङ्ग्रहार्थमेव विश्वविद्यालयन्यासधनकोषः इति कश्चन नव्यः कोषः प्रकल्पितोऽस्ति । स्वयं कुलपतिभिः अपि एतदर्थं निजकोषात् आदर्शधनं निक्षिप्तमस्ति। मुख्यालयन्यासधनकोषे **१०,००,००० परिमित-रुप्यकाणि** अद्यावधि संग्रहीतानि। विश्वविद्यालयन्यासधनप्रतीहारस्य विवरणं विश्वविद्यालयस्य जालस्थाने सविस्तरम् उपलभ्यते।
4. **प्राचीनवार्तापत्रिकाणां तदितरपदार्थानां च विक्रयणम्** परिसरेषु विद्यमानानां प्राचीनवार्तापत्रिकाणां तदितरपदार्थानां च विक्रयणं क्वचित् सम्भवति । अनेन सहस्रशः रूप्यकाणि परिसरेण अर्ज्यन्ते ।
5. **अतिथिभवनभाटकधनैः फलविक्रयणादिभिः च वित्तसङ्ग्रहणव्यूहः** परिसरीयेषु अतिथिभवनेषु वासाय अपि नियमानुगुणं व्यवस्था अस्ति। अल्पमूल्येन सुसज्जितसुन्दरप्रकोष्ठाः सम्बद्धेभ्यः भाटकरूपेण दीयन्ते। तेनापि संस्थायै ईषदिव धनम् उपलभ्यते।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Any additional information | View Document |
| Provide link for additional information | View Document |

**6.5 Internal Quality Assurance System**

***6.5.1 Internal Quality Assurance Cell (IQAC) has contributed significantly for institutionalizing the quality assurance strategies and processes, by constantly reviewing the teaching-learning process, structures & methodologies of operations and learning outcomes, at periodic intervals***

***आन्तरिकगुणवत्ताश्वासनकेन्द्रम् अध्यापनाधिगमप्रक्रियायाः, क्रियान्वयनस्य संरचनायाः कार्यपद्धतेश्च, अधिगमपरिणामानां च नियतान्तराले पुनरीक्षणेन गुणवत्ताश्वासनव्यूहानां तत्प्रक्रियाणां च संस्थागतं रूपं प्रदातुम् उल्लेखनीयम् अवदानम् अकरोत्।***

**Answer:**

संस्थायाः आन्तरिकगुणवत्ताश्वासनकेन्द्रं संस्थायाः शैक्षिकस्तराभिवृद्धये स्तरपरिरक्षणाय च कार्यं कुरुते। गुणवत्तापूर्णा नीतिः एव अस्य केन्द्रस्य द्योतकम् विद्यते। नीतेः अनुप्रयोगाय विश्वविद्यालयस्य प्रत्येकस्मिन् अपि अङ्गाय केन्द्रमिदं मार्गदर्शनं करोति। संस्थानीकरणेन उच्चशिक्षासंस्थायाम् अर्थात् केन्द्रीयसंस्कृतविश्वविद्यालये गुणात्मकसंस्कृतेः विकासः जायते इति आन्तरिकगुणवत्ताश्वासनकेन्द्रं विभावयति। आभ्यन्तरैः बाह्यैः च सहयोगैः विश्वविद्यालयस्य सर्वाङ्गीणविकासं सम्पादयितुम् असौ प्रयतते। अभिवृद्धेः विकासस्य च मितयः काः काः सन्ति इति सर्वदा केन्द्रम् इदं चिन्तनं करोति। अधिगन्तुः केन्द्रितं शैक्षिकं वातावरणं निर्मातुं तदर्थम् अपेक्षितानां परिपक्वदशासम्पन्नानां शिक्षकाणां च सज्जीकर्तुं केन्द्रमिदं चेष्टते।स्वस्य गुणवत्तापरस्य कार्यस्य सम्पादनाय सांस्थानिकैः संस्थान्तरस्थैः सह परिचर्चाम् अपि इदं करोति।

**गुणाः पूजास्थानम्** इत्युक्तिः प्रसिद्धा एव । एतदनु संस्कृतशिक्षणस्य प्रत्येकस्मिन् अपि पक्षे विद्यमानान् गुणान् आकलयितुम् आवर्धयितुं च आश्वासनं ददाति केन्द्रीयसंस्कृतविश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रम् । केन्द्रमिदं २०१६ तमे वर्षे पुनः सङ्घटितं सत् शिक्षणाधिगमप्रक्रियाभिः सम्बद्धानां समेषां पक्षाणां गुणवत्ताम् अभिवर्धयितुम् अपेक्षितान् व्यूहान् नैरन्तर्येण रचयदस्ति । तत्र हि गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय अनेन केन्द्रेण क्रियमाणाः प्रयासाः यथा -

1. **कार्येण सह तत्सम्बद्धगुणवत्तावर्धकमानकानां निर्धारणम् ।**
2. **शैक्षिकाणां शैक्षिकेतराणां च अधिगमलक्ष्याणां सम्प्राप्तये विद्यमानानां मानदण्डानां निर्धारणम् ।**
3. **विश्वविद्यालये छात्रकेन्द्रितस्य शैक्षिकवातावरणस्य सर्जनम् ।**
4. **शिक्षणेन सम्बद्धानां नवाचाराणां अनुप्रयोगाय प्रौद्योगिक्याः आत्मसात्करणाय च शिक्षकाणां प्रचोदनं तेषां सज्जीकरणं च ।**
5. **केन्द्रीयसंस्कृतविश्वविद्यालये सर्वोत्तमशिक्षाव्यवस्थायाः संवर्धनदिशि शिक्षकाणां छात्राणाम् अभिभावकानां च अभिप्रायसङ्ग्रहणम्।**
6. **गुणवत्तापूर्णशैक्षिकवातावरणस्य परिरक्षणाय पूरकाणां कार्यक्रमाणां कार्यशालानां सङ्गोष्ठीनां च आयोजनम्।**
7. **कालानुगुणं विकासपरकार्याणाम् अभिलेखसङ्ग्रहणम्।**
8. **राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः मानकानुगुणं विश्वविद्यालयस्य मूल्याङ्कनयोग्यत्वसम्पादनदृष्ट्या सज्जीकरणम् ।**
9. **आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सम्बद्धानां सर्वविधानाम् अभिलेखानां वार्षिकप्रतिवेदनानां पञ्जिकानां च व्यवस्थिरूपेण सम्पादनम् ।**

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण कृतानां कार्याणाम् आमूलचूलं परिशीलनं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निरीक्षणावसरे जायते। अतः आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्वकर्तव्यानि सर्वदा निर्वहति। तत्कर्तव्यानि यथा -

1. **प्रभावपूर्णनेतृत्ववहनम्**

2. **प्रबन्धने भागग्रहणम्**
3. **क्रियासाध्यानां योजनानां निर्माणम्**
4. **वैद्युतिकप्रशासनव्यवस्थायाः प्रशंसनं प्रोत्साहनं च**
5. **विभिन्नानां निकायानां विभागानां प्रकोष्ठानां कक्षाणां च प्रभावस्य मापनं तेषां प्रोत्साहनम्**
6. **आर्थिकसहयोगप्रदानम्**
7. **व्यावसायिकविकाससम्पादनम्**
8. **शिक्षणेन सह इतरशैक्षिकक्रियाकलापेषु भागग्रहणाय प्रचोदनम्**
9. **शैक्षिकलेखाङ्केक्षणस्य प्राशासनिकलेखाङ्केक्षणस्य प्रतिवेदननिर्माणम्**
10. **विभिन्नप्रत्यायनप्रसङ्गेषु भागग्रहणम्**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य नवसङ्घटिते आन्तरिकगुणवत्ताश्वासनकेन्द्रे 30 सङ्ख्याकाः सदस्याः सन्ति । कुलपतयः आचार्याः श्रीनिवासवरखेडिवर्याः अस्य अध्यक्षाः सन्ति। आचार्याः सुदेशकुमारशर्मवर्याः अस्य सदस्यसचिवाः सन्ति। आचार्याः सुकान्तकुमारसेनापतिवर्याः आचार्याः ललितकुमारत्रिपाठिवर्याः आचार्याः ईश्वरभट्टाः अन्ये आभ्यन्तराः बाह्याः च सदस्याः छात्रप्रतिनिधयश्च अस्मिन् वर्तन्ते। एवं विशिष्टं केन्द्रमिदं केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुणवत्ताश्वासनप्रदाने सक्रियमस्ति।

आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य प्रधानं कार्यम् अस्ति यत् अस्य हितधारकाणां चिन्तनेषु नवाचाराणां समावेशः। वर्तमानकार्यप्रणालीम् अवगमयितुम् आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा प्रयतते। गुणवत्तापूर्णसंस्कृतेः स्वायत्तीकरणाय अपेक्षितान् व्यूहान् काले काले संरचयति। अस्य सदस्याः सर्वे मुक्तकण्ठेन गुणवत्तासंवर्धनोपायान् मण्डयितुं समर्थाः सन्ति। आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य परिपूर्णं सहयोगं स्वीकृत्य एव विश्वविद्यालयः प्रतिपदं कार्यं करोति। अतः विश्वविद्यालयस्य स्तरः समेधमानः एव वर्तते। केन्द्रीयसंस्कृतविश्वविद्यालयस्य साहित्यव्याकरणन्यायसर्वदर्शनशिक्षाशास्त्रादिषु विभागेषु अपेक्षितसाहाय्यं कर्तुं केन्द्रमिदं सर्वदा सन्नद्धं भवति। संस्थायाः निर्णयेषु उत्कृष्टतायाः परिरक्षणे अपि अस्य अनितरसाधारणं योगदानम् अस्ति। अनुसन्धानविभागे अपि अस्य महत्वपूर्णं योगदानं वर्तते। यथा -

1. प्राक्शोधपाठ्यक्रमार्थं प्रशिक्षणसन्दर्भे
2. शोधच्छात्राणां मार्गदर्शनवेलायाम्
3. शोधकर्मणि गुणवत्तासंवर्धनसन्दर्भे
4. पुस्तकालयस्य उद्विकाससन्दर्भे
5. शिक्षकाणां व्यावसायिकाभिक्षमतायाः अभिवर्धनप्रसङ्गे
6. अपेक्षितसंसाधनानां व्यवस्थापनप्रसङ्गे च

आन्तरिकगुणवत्ताश्वासनकेन्द्रेण सर्वेषु परिसरेषु विशिष्टाः गुणवत्तापूर्णाः च कार्यक्रमाः आयोज्यन्ते। यथा-

- **वृक्षारोपणम् - वृक्षो रक्षति रक्षितः** इति उच्यते। वृक्षैः प्राणवायुरपि प्रचुरमात्रेण लभ्यते। अनेन मानवीयतत्त्वानां समेषां स्वास्थ्यं संवर्धते ।
- **कर्गजरहितकार्यम् -** मितव्ययी परिसरः भवेत्। अतः अत्यन्तम् अनिवार्यं चेत्तर्हि कर्गजानां प्रयोगः कर्त्तव्यः इति हितोपदेशाय केन्द्रमिदं सर्वान् प्रचोदयति।
- **प्लास्टिक् पदार्थानां रासायनिकौषधानां च उन्मूलनम् -** परिसरस्य परिवेषः प्लास्टिक् - पदार्थैः मुक्तः भवेत्। विश्वविद्यालये रासायनिकपदार्थानाम् उपयोगः अपि यथासम्भवं न स्यात् इति स्थानीयकेन्द्रं चिन्तयति।
- **स्वच्छता सुन्दरीकरणं च -** परिसरस्य स्वच्छतापरिरक्षणे सौन्दर्यवर्धने च केन्द्रं सर्वदा मार्गदर्शनं करोति।
- **पर्यावरणपरिरक्षणदिवसाचरणम्, स्वच्छभारताभियानम् -** परिसरेषु पर्यावरणपरिरक्षणदिवसाचरणावसरे स्वच्छभारताभियाने च केन्द्रमिदं प्रचोदककार्यं करोति।

एवं विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं स्थानीयस्तरानुरूपं चिन्तनं करोति वैश्विकस्तरानुरूपं कार्यं करोति।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Upload any additional information | View Document |
| Provide the link for additional information | View Document |

***6.5.2 Quality assurance initiatives of the institution include:***

1. ***Regular meeting of Internal Quality Assurance Cell (IQAC);***
2. ***Timely submission of Annual Quality Assurance Report (AQAR) to NAAC;***
3. ***Academic Administrative Audit (AAA) and initiation of follow up action***
4. ***Participation in NIRF***
5. ***UGC Recognition for any other Academic Excellence or any other quality audit recognized by state, national agencies.***

***संस्थायाः गुणवत्ताश्वासनोपक्रमेषु अन्तर्भूताः सन्ति -***

1. ***आ.गु.आ.केन्द्रस्य नियमितमुपवेशनम्,***
2. ***रा.मू.प्र.परिषदे समयेन वार्षिकगुणवत्ताश्वासनप्रतिवेदनसमर्पणम्।***
3. ***शैक्षिकं प्राशासनिकं लेखापत्रम्, अनुगतक्रियाणामुपक्रमणम्।***
4. ***राष्ट्रियसांस्थानिकश्रेणिकरूपरेखायां भागग्रहणम्।***
5. ***विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तः यः कश्चन शैक्षिकोत्कर्षः अथवा राष्ट्र/राज्य-अभिकरणैः मान्यताप्राप्तं किमपि गुणावत्ताङ्केक्षणम्।***

**Answer:** A. Any 4 or all of the above (अ) उपर्युक्तेषु केचन चत्वारः अथवा सर्वे

| File Description | Document |
| --- | --- |
| Upload e-copies of the accreditations and certifications | View Document |
| Upload details of Quality assurance initiatives of the institution (Institutional data as per Data Template) | View Document |
| Upload any additional information | View Document |
| Paste web link of Annual reports of Institution | View Document |

***6.5.3 Incremental improvements made during the preceding five years (in case of first cycle) Post accreditation quality initiatives (second and subsequent cycles)***

***गतेषु पञ्चसु वर्षेषु सम्पादिताः क्रमविकासाः (प्रथमचक्रसन्दर्भे) प्रत्यायनोत्तरं कृताः गुणवत्तोपक्रमाः (द्वितीयादिचक्रेषु)***

**Answer:**

उत्तरोत्तरं विकासं कामयमानः विश्वविद्यालयः विगतेषु पञ्चसु वर्षेषु यथाशक्ति स्वीये शैक्षिके प्राशासनिके च क्षेत्रे गुणाभिवर्धनाय प्रायतत। कोरोना-कारणेन अर्थात् विषमपरिस्थितेः प्रभावेण मध्ये यद्यपि अवरोधः जातः तथापि केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः-२०२० इत्यस्य क्रियान्वयनात् परं विश्वविद्यालयस्य विकासः द्रुतगत्या जायमानः वर्तते। नूतनस्य अधिनियमस्य अध्यादेशेषु प्रशासनस्य स्वरूपं कार्यप्रणाली च वर्णिता अस्ति। विश्वविद्यालयस्य शैक्षिके प्राशासनिके च कार्ये सम्प्रति आधुनिकप्रौद्योगिक्याः पूर्णशः अनुप्रयोगः जायमानः वर्तते। वैद्युतिकप्राशासनिकव्यवस्थायाः अनुप्रयोगेण सर्वाणि कार्याणि द्रुतगत्या जायमानानि सन्ति। क्रमशः यथा -

**1. विगतपञ्चवर्षेषु प्राशासनिकक्षेत्रस्य गुणाभिवर्धने कृताः सफलप्रयासाः ।**

विकासो नाम परिवर्तनम् । तच्च गतेषु पञ्चसु वर्षेषु बहुधा जातमेव । विगतपञ्चवर्षेषु प्राशासनिकसंरचनायां परिवर्तनं जातमस्ति।प्राक्कालिकस्य राष्ट्रियसंस्कृतसंस्थानस्य प्राशासनिकसंरचनातः साम्प्रतिकस्य केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्राशासनिकसंरचना भिन्ना व्यापिका समुन्नता चास्ति। २०१६ तमे संवत्सरे (१६/०६/२०१६) उत्तराखण्डराज्यस्य देवप्रयागः इत्यस्मिन् स्थाने विश्वविद्यालयस्य नूतनः परिसरः समारब्धः। प्रशासनस्य अविरतेन प्रयासेन तत्र रघुनाथकीर्तिपरिसरः इत्येषः परिसरः प्रतिष्ठापितः । एवमेव पर्वतीयप्रान्तेषु विद्यमानानां परिसराणां विषये प्रशासनं सर्वदा विशिष्टं ध्यानं वहति। अनेन प्रशासनस्य विकासपरेषु कार्येषु वृद्धिः दृश्यते।

1. प्रबन्धनव्यवस्थायाः संरचनात्मकस्वरूपे अपि परिवर्तनं जातम् अस्ति। केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमस्य क्रियान्वयनात् परं प्रबन्धनव्यवस्थायाः स्वरूपपरिवर्तनम् अपि जातम् इत्यतः तत् अपि विकासस्य द्योतकम् एव। परिसरेषु इदानीं **प्राचार्याणां स्थाने निदेशकाः** सन्ति। तेषां चयने अपि विद्यमानाः मानदण्डाः अध्यादेशे लिपिबद्धाः वर्तन्ते। परिसरनिदेशकचयनसमितेः अध्यक्षस्थाने कुलपतिः उपविशति। व्यवस्थापनपरिषदः अध्यक्षेण नामाङ्कितः तत्परिषदः सदस्यः अत्रापि सदस्यः भवति। व्यवस्थापनपरिषदः अध्यक्षेण नामाङ्कितौ द्वौ बाह्यौ विशेषज्ञौ तथा एकः वरिष्ठः सङ्कायप्रमुखः, कुलसचिवः इत्येते सदस्याः भवन्ति। निदेशकः एव परिसरस्य प्राशासनिकप्रमुखः शैक्षिकप्रमुखः चास्ति।
2. प्रशासनं यद्यपि इतरकेन्द्रीयविश्वविद्यालयवत् एव वर्तते तथापि अस्य प्राशासनिकसंरचना अधुना व्यापिका सञ्जाता। **द्वादशः परिसराः द्वादशः स्थानीयाः प्रशासकाः अर्थात् निदेशकाः सन्ति ।** तेषाम् उत्तरदायित्वेषु कार्यभारेषु च वृद्धिः सञ्जाता अस्ति।
3. द्वादशे अध्यादेशे प्रधानप्रशासकस्य अर्थात् कुलपतेः सेवानियमाः, अधिकाराः, कार्याणि च निरूपितानि सन्ति। कुलपतिः एव निदेशकानां विभागप्रमुखानां सङ्कायप्रमुखानां छात्रसंरक्षकाणां नियोजकः वर्तते। एवं विभिन्नेषु लिपिबद्धेषु विश्वविद्यालयस्य अध्यादेशेषु प्राशासनिकसंरचनायाः कार्याणां च नूतनं स्वरूपम् उपवर्णितम् अस्ति।

**2. विगतपञ्चवर्षेषु शैक्षिकक्षेत्रस्य गुणाभिवर्धने कृताः सफलप्रयासाः ।**

शिक्षैका तु श्रुतेरङ्गं शिक्षान्या श्रुतिचोदिता इति वृद्धवचनम्। संस्कृतशिक्षायाः अर्थात् वेद-वेदाङ्ग-दर्शन-व्याकरण-पुराणेतिहासादीनां पारम्परिकपाठ्यक्रमाणां सञ्चालनाय विश्वविद्यालयः सर्वदा यत्नशीलः अस्ति। द्वादशसु परिसरेषु सर्वाधिकाः पाठ्यक्रमाः पुरी परिसरे सन्ति। सदाशिवपरिसरः विश्वविद्यालयस्य प्राचीनपरिसरेषु तृतीयं स्थानं लभते। अन्येऽपि गुणाभिवर्धने कृताः सफलप्रयासाः यथा -

1. विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रं सर्वदा गुणाभिवर्धनोपायान् संसूचयति। गुणाभिवर्धनस्य मानकान् च निर्धारयति। अस्य केन्द्रस्य प्रभावेण संस्कृतशिक्षणस्य सर्वेषु विभागेषु गुणाभिवर्धनं जायमानम् अस्ति। उपवेशनेषु सर्वदा पुरोगतेः विषयेषु क्रियापराः योजनाः निर्धार्यन्ते। **२०१७ तः २०२२** पर्यन्तम् आन्तरिकगुणवत्ताश्वासनकेन्द्रस्य **३० सङ्ख्याकानि उपवेशनानि**/सभाः संवृत्ताः। एषु उपवेशनेषु विश्वविद्यालयेन संसाधितानां सफलकार्यक्रमाणां चिन्तनं सम्भवति ।
2. विगतेषु पञ्चसु वर्षेषु नूतनानां पाठ्यक्रमाणाम् अनुप्रयोगेण जातस्य गुणाभिवृद्धेः परिशीलनमपि क्रियते। यद्यपि एनं विश्वविद्यालयं विहाय अन्येऽपि संस्कृतोच्चशिक्षासंस्थाः भारते सन्ति तथापि अस्य पाठ्यक्रमाः आभारतं व्याप्ताः सन्ति। आसेतुहिमाचलं व्याप्तस्य विश्वविद्यालयस्य विभिन्नेषु परिसरेषु षट्सहस्राधिकाः छात्राः शिक्षां प्राप्नुवन्ति।
3. संस्कृतशिक्षणे प्रसारे विकासे च केन्द्रसर्वकारस्य माध्यमसंस्थारूपेण अयं विश्वविद्यालयः स्वीयां भूमिकां वहति। छात्रेभ्यः आवासभोजनाद्याः सकलाः व्यवस्थाः सन्ति इत्यतः आवासीयविश्वविद्यालये अस्मिन् शिक्षां प्राप्तुं छात्राणां कृते क्लेशाः न भवन्ति।
4. सार्धैकशतं शोधच्छात्राः प्रतिवर्षं शोधकार्यस्य सम्पादनाय पञ्जीकरणं कुर्वन्ति। संस्कृतेन एव शोधपत्राणि शोधप्रबन्धान् च लिखन्ति। विश्वविद्यालयस्य शोधपत्रिकाः विश्वविद्यालयानुदानयोगस्य मानितसूच्यामपि राजन्ते। श्रीवैष्णवी, जयन्ती, वाक्यार्थभारती, सदाशिवम् इत्याद्याः शोधपत्रिकाः शैक्षिकगुणाभिवृद्धिं साङ्केतिकरूपेण प्रकटयन्ति।
5. शैक्षिकनवाचारेषु अपि विश्वविद्यालयः अग्रेसरः वर्तते। कोरोनाकाले अपि अविच्छिन्नरूपेण शैक्षिकगुणाभिवर्धनाय गूगल मीट, जूम, स्कैपे इत्यादीनाम् अन्तर्जालाश्रितानां माध्यमानां साहाय्येन परोक्षं शिक्षा प्रदत्ता एव । अतः शैक्षिकगुणाभिवृद्धिः अस्खलितरूपेण जायते।

3. **प्रत्यायनोत्तरविकासः**

यद्यपि गतचक्रे एव विश्वविद्यालयस्य मूल्याङ्कनप्रत्यायनादीनि गुणवत्तपरीक्षणपराणि कार्याणि सम्पादनीयानि आसन्। प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनप्रतिवेदनस्य निर्माणाय सिद्धता क्रियमाणा एव आसीत्। परन्तु **वर्षद्वयं ( 2020 तथा 2021) विषमपरिस्थितेः प्रभावेण** अर्थात् कोरोनाकारणेन प्रत्यायनकार्यं नैव जातम् । विषमपरिस्थितेः प्रभावेण एव बहुषु परिसरेषु यद्यपि शिक्षणाधिगमप्रक्रियायाः प्रत्यक्षरूपेण सङ्घटनं न जातं परमधुना सर्वमपि व्यवस्थिरूपेण प्रचलत् अस्ति।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Any additional information | View Document |
| Provide link for additional information | View Document |

**7.Institutional Values and Best Practices**

**7.1 Institutional Values and Social Responsibilities**

***7.1.1 Measures initiated by the Institution for the promotion of gender equity and Institutional initiatives to celebrate/ organize national and international commemorative days, events and festivals during the last five years.***

***विगतेषु पञ्चसु वर्षेषु संस्थया स्त्रीपुंससमतायाः संवर्धनाय आरब्धाः उपायाः अपि च राष्ट्रिय-अन्ताराष्ट्रियस्मारकदिवसेषु कार्यक्रमाणाम् उत्सवानां च आचरणाय/आयोजनाय स्वीकृताः उपक्रमाः***

**Answer:**

स्त्रीपुंसयोः शिक्षणाधिगमप्रक्रियायां सममात्रेण अवसरः विश्वविद्यालयेन परिकल्पितः वर्तते। न केवलं शिक्षणाधिगमप्रक्रियायाम् अपि तु पाठ्यसहगामिक्रियासु विविधेषु उत्सवेषु राष्ट्रियेषु अन्ताराष्ट्रियेषु च कार्यक्रमेषु च समानावसराः परिकल्पिताः सन्ति। एकेन हस्तेन यथा करताडनं न सम्भवति तथैव केवलं बालैः केवलं बालाभिः वा शैक्षिकक्रियाकलापाः पूर्णतां नैव यान्ति।

अतः विश्वविद्यालयः लिङ्गभेदम्/युवयुवतिभेदम् अकृत्वा एव क्रियाकलापान् संयोजयति। केन्द्रीयसंस्कृतविश्वविद्यालयेन **स्त्रीपुंसयोः समतायाः** संवर्धनाय विगतेषु पञ्चसु वर्षेषु समनुष्ठिताः उपक्रमाः यथा-

1. **“सह नाववतु सह नौ भुनक्तु”** इति प्रार्थनामन्त्रं प्रतिदिनं बालकाः बालिकाः मिलित्वा पठन्ति। **प्रार्थनासभायाम्, कक्ष्याम्, ग्रन्थालये, क्रीडाङ्गणे, प्रतियोगितासु, वादविवादस्पर्धासु, वार्षिकोत्सवे च समानावसराः युवयुवतिभ्यः** सन्ति । ते च सममात्रेण सोत्साहं भागं गृह्णन्ति च । सर्वेषु परिसरेषु एतादृशं धनात्मकं वातावरणं प्रतिवर्षं दृश्यते।
2. **वाग्वर्धिनीपरिषत् छात्रपरिषत् छात्रसभा छात्रगोष्ठी छात्रकल्याणपरिषत्** इत्याद्याः परिषदः प्रतिवर्षं परिसरेषु संरच्यन्ते। आसु परिषत्सु यथा **बालकानां प्रतिनिधयः** भवन्ति तथा **बालिकानां पक्षतः** अपि कक्ष्याप्रतिनिधयः नियतरूपेण भवन्ति। एवमेव यथा छात्राणां कार्यदर्शी छात्रसमूहस्य प्रतिनिधिः भूत्वा परिसरीयेषु क्रियाकलापेषु योगदानं प्रयच्छति तथैव बालिकानां पक्षतः अपि कार्यदर्शिनी काचित् अवश्यमेव भवति।
3. **विश्वस्वास्थ्यदिवसः** (07/04/2018) **महिलादिवसः** (08/08/2018) **मातृभाषादिवसः** (21/02/2018) **गणराज्योत्सवः** (26/01/2018) **अम्बेडकर-जयन्ती** (08/12/2017) **हिन्दी-पखवाडा** (14-29/07/2017) इत्यादयः उत्सवाः पुरीस्थेन सदाशिवपरिसरेण महता वैभवेन समाचरिताः । राष्ट्रियः वा भवतु अन्ताराष्ट्रियः उत्सवः वा भवतु ; मङ्गलाचरणे रङ्गवल्लीनिर्माणे पुष्पगुच्छसज्जीकरणे तदितरेषु क्रियाकलापेषु बालिकानां कृते प्राथम्यं दीयते।

बालिकाः अपि सुश्राव्यं मङ्गलाचरणं कुर्वन्ति। क्रीडासु अपि युवयुवतयः सम्भूय अपि क्रीडन्ति। नात्र भेदः अस्ति। स्त्रीपुंसयोः सममात्रेण अवसरः वर्तते कार्यक्रमेषु ।

4. वादविवादे वाक्यार्थे संवादादिषु कार्यक्रमेषु एकस्मिन् पक्षे (पूर्वपक्षे) बालकः तिष्ठति चेत्तर्हि बालिका अपरस्मिन् पक्षे । एवञ्च बालाः सम्भूय एव शैक्षिककार्यं सर्वं सम्पादयन्ति। अद्यत्वे बहुषु परिसरेषु बालिकाः अधिकमात्रेण पठनपाठनादिषु दृश्यन्ते। उत्तीर्णतायाः प्रतिशतता अपि तृप्तिकरी वर्तते।
5. जयपुरपरिसरेण 2017 (27/08/2017) तमे वर्षे (उत्पीडनावरोधकसमित्या) एका सङ्गोष्ठी समायोजिता। बालिकानाम् उत्पीडनाभिः सम्बद्धाः विचाराः अत्र चर्चिताः । पुनः स्त्रीणां समस्याः स्त्रियः एव विज्ञातुं प्रभवन्ति नान्ये पुरुषाः। अतः **स्त्रीणां सबलीकरणाय** तासां (16/12/17) **मूलभूताधिकाराणां ज्ञापनाय** च विशिष्टानि व्याख्यानानि अपि तत्र परिसरे आयोजितानि। बहुत्र परिसराणां पक्षतः एतादृशानि व्याख्यानानि प्रतिवर्षम् आयोज्यन्ते । विश्वविद्यालयस्य वार्षिकप्रतिवेदने एतेषाम् उल्लेखः वर्तते एव।
6. विश्वविद्यालयस्य शिक्षाशास्त्रिणः शिक्षणाभ्यासकार्यक्रमस्य अङ्गतया विद्यालयं प्रतिवर्षं गच्छन्ति। तत्रत्येभ्यः शिक्षकेभ्यः शिक्षिकाभ्यः च **आदर्शशिक्षकः आदर्शशिक्षिका** इत्यादीनि बिरुदानि दत्वा शिक्षकदिवसे तेषां तासां सम्माननम् अपि परिसरपरिवारः प्रतिवर्षं करोति। प्रशिक्षुतासन्दर्भे व्यावसायिकक्षमतोन्नयनकार्यक्रमे च सर्वत्र स्त्रीपुंसयोः सममात्रेण अवसरः दत्तः वर्तते।
7. परिसरेषु **बालिकाप्रकोष्ठः विशेषरूपेण बालिकानां निमित्तं परिकल्पिताः** भवन्ति। बालिकानां विश्रान्तिकाले अयं प्रकोष्ठः उपकारकः सिध्यति। 2019 तमे संवत्सरे (03/08/2019) गुरुवायूरुपरिसरे बालिकाप्रकोष्ठः विशेषरूपेण प्रतिष्ठापितः। एवमेव शास्त्रार्थविचारे नाटके क्रीडासु च अत्रत्याः युवयुवतयः सम्भूय भागं गृह्णन्ति।
8. बालाः विषमसन्दर्भेषु आत्मरक्षणार्थं अभ्यस्ताः भवेयुः। एतदर्थं ताभ्यः (विविधसन्दर्भान् सम्मुखीकर्तुं) प्रशिक्षणं प्रदाय तासु धैर्यं संवर्धयितुं विश्वविद्यालयः सर्वदा यत्नशीलः वर्तते। सदाशिवपरिसरे एतदर्थं प्रशिक्षणं दत्तम्। उत्पीडनावरोधककक्षः, महिलाप्रकोष्ठः इत्यादयः तत्र परिसरे प्रतिष्ठापिताः सन्ति।
9. **अन्ताराष्ट्रियमहिलादिवसः** सर्वेषु परिसरेषु महता उत्साहेन आयोज्यते। पुरीपरिसरे अन्ताराष्ट्रियमहिलादिवसम् उपलक्ष्य 2020 तमे संवत्सरे (08/03/2020) जागरूकता सभा इति काचित् आयोजिता आसीत्।
10. **लैङ्गिकसमतायाः** विषये बालकानां बालिकानां च सुष्ठु परिज्ञानं भवेदिति मत्वा केरलराज्ये वर्तमानेन गुरुवायूरु - परिसरेण राष्ट्रिया सङ्गोष्ठी (वेबिर्ना) समायोजिता। कोरोना कालखण्डः आसीत् इत्यतः वेबिर्ना मध्ये डा. उषा बालकृष्णन् (मलयालम् अध्यापिका) बालिकाभिः कथं वर्तितव्यम्? लिङ्गभेदसम्बद्धाः समस्याः काः काः सन्ति? इत्यादिकं सुष्ठु न्यरूपयत्।
11. लखनऊ परिसरेण 2021 तमे संवत्सरे ( 08/03/2021) अन्ताराष्ट्रियमहिलादिवसम् उपलक्ष्य राष्ट्रिया सङ्गोष्ठी (वेबिर्ना) समायोजिता। “२१ तमे शताब्दौ महिलानां स्थितिः” इति शीर्षकम् अवलम्ब्य आयोजितायां सङ्गोष्ठ्यां (वेबिर्ना) महिलानां सुरक्षा सम्माननं स्वावलम्बनम् इति विषये विस्तरेण चर्चा विहिता। डा. पूजा व्यासः मुख्यातिथिरूपेण भागम् गृहीतवती । युव कल्याण अधिकारी पुष्पा सिंह विशिष्टातिथिरूपेण भागं गृहीत्वा महिलानां सर्वतोमुखविकासदृष्ट्या अनुसर्तव्यान् उपक्रमान् आश्रित्य व्याख्यानं दत्तवती ।
12. सर्वेषु परिसरेषु कालानुगुणम् आयोज्यमानेषु विशिष्टेषु कार्यक्रमेषु महिलाः विशिष्टातिथिरूपेण आगत्य भाषणं विधास्यन्ति ।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Any other relevant information | View Document |
| Appropriate web in the Institutional website | View Document |

***7.1.2 The Institution has facilities and initiatives for***

1. ***Alternate sources of energy and energy conservation measures***
2. ***Management of the various types of degradable and non-degradable waste***
3. ***Water conservation***

4. *Green campus initiatives*
5. *Disabled-friendly, barrier free environment*

***संस्थायाम् अधोलिखितसौविध्यानि यत्नाश्च वर्तन्ते।***

1. ***वैकल्पिकस्य ऊर्जसः स्रोतांसि तेषां संरक्षणोपायाश्च***
2. ***विभिन्नप्रकारकविघटनीय-अविघटनीयापशिष्टप्रबन्धनम्***
3. ***जलसंरक्षणम्***
4. ***हरितपरिसराय यत्नाः***
5. ***दिव्याङ्गजनानुकूलं निर्बाधं च वातावरणम्***

**Answer:** A. 4 or All of the above १. वैकल्पिकस्य ऊर्जसः स्रोतांसि तेषां संरक्षणोपायाश्च

| File Description | Document |
|---|---|
| Upload supporting document | View Document |

***7.1.3 Quality audits on environment and energy regularly undertaken by the Institution.***
***The institutional environment and energy initiatives are confirmed through the following***

1. *Green audit / Environment audit*
2. *Energy audit*
3. *Clean and green campus initiatives*
4. *Beyond the campus environmental promotion activities*

***पर्यावरणस्य ऊर्जसश्च गुणवत्तालेखापरीक्षणं नियमितरूपेण संस्थया क्रियते।***
***सांस्थानिकपर्यावरणस्य ऊर्जसश्च उपक्रमाः अधोनिर्दिष्टैः अंशैः दृढीक्रियन्ते –***

***१. हरितलेखापरीक्षणम्***
***२. ऊर्जोलेखापरीक्षणम्***
***३. पर्यावरणलेखापरीक्षणम्***
***४. स्वच्छहरितपरिसरमान्यताः/पुरस्काराः***
***५ परिसरात् बहिः पर्यावरणप्रचारगतिविधयः***

**Answer:** A. All of the above अ. उपरि निर्दिष्टेषु सर्वे

| File Description | Document |
|---|---|
| Upload supporting document | View Document |

***7.1.4 Describe the Institutional efforts/initiatives in providing an inclusive environment i.e., tolerance and harmony towards cultural, regional, linguistic, communal socioeconomic and Sensitization of students and employees to the constitutional obligations: values, rights, duties and responsibilities of citizens***

***सांस्कृतिक-क्षेत्रीय-भाषिक-साम्प्रदायिक-सामाजिकार्थिक-विविधताः प्रति समावेशिवातावरणं निर्मातुं सहिष्णुतां सद्भावं च संवर्धयितुं सांस्थानिकप्रयत्नानाम् अपि च छात्रेषु कर्मचारिषु च सांवैधानिकदायित्वं प्रति संवेदनशीलतायाः समृद्धिः – नागरिकमौल्यानि प्रति अधिकारान् कर्तव्यानि च प्रति जगरूकतासम्पादनस्य वर्णनं कुरुत।***

**Answer:**

**'सङ्घे शक्तिः कलौ युगे'** इतीदं सत्यवाक्यं सुविज्ञाय विश्वविद्यालयः सर्वेषु परिसरेषु मुख्यालये च समावेशात्मकस्य वातावरणस्य परिरक्षणाय प्रतिपदं चेष्टते।

**सांस्कृतिक - क्षेत्रीय - भाषिक - साम्प्रदायिक - सामाजिक - आर्थिकविविधताः** सत्स्वपि विविधानां कार्यक्रमाणां साहाय्येन मानवीयतत्त्वानां मध्ये सहिष्णुतां सद्भावं संवर्धयितुं च असौ सफलः वर्तते। एवमेव छात्रेषु कर्मचारिषु च सांवैधानिकदायित्त्वं प्रति संवेदनशीलतायाः अभिवर्धनाय नागरिकमौल्यानां विषये कर्तव्यस्य उत्तरदायित्वभावनायाः जागरणाय च विविधान् विशिष्टान् च उपाक्रमान् आवर्षं समायोजयति। क्रमशः यथा -

1. **सतर्कता - जागरूकतासप्ताहः :-** परिसरीयाः सर्वे जनाः भारतस्य नागरिकाः एव। अतः नागरिकत्वेन स्वकर्तव्यानां विषये तेषु जागर्या सर्वदा भवेत् एव । एतदर्थम् एव सर्वेषु परिसरेषु सतर्कता - जागरूकतासप्ताहः प्रतिवर्षं समायोज्यते । एतदनु 30/10/2017 तः 04/11/2017 पर्यन्तं रणबीरपरिसरेण आसप्ताहं विशिष्टाः कार्यक्रमाः सञ्चालिताः । विशिष्टाः अतिथयः छात्रान् सर्वदा उद्दिश्य सांवैधानिकावसराणां विषये नागरिकाणां मूलभूतकर्तव्यानां विषये सुष्ठु न्यरूपयन्।०४ दिनाङ्के आयोजिते सम्पूर्तिसमारोहे जम्मू-काश्मीरराज्यस्य उपमुख्यमंत्रिणः विशेषाधिकारी विशिष्टातिथिरूपेण समागम्य सर्वान् उपादिशन् । वेदव्यासपरिसरेण अपि अयं सप्ताहः सुष्ठु समायोजितः। तैः पञ्चमे दिनाङ्के सम्पूर्तिसमारोहः आयोजितः। 31-10-2017 तमे दिनाङ्के सायं चतुर्वादने प्रतिज्ञास्वीकारसमारोहः आयोजितः। नागरिकाणां सतर्कता - जागरूकता इत्यनयोः विषये सर्वैः प्रतिज्ञा विहिता। एवमेव अन्यपरिसरीयैः अपि विशेषरूपेण अयं सप्ताहः आचरितः।
2. प्रतिवर्षं अक्टोबर मासस्य अन्तिमे सप्ताहे सरदार वल्लभभाई पटेल महोदयानां जयन्तीम् अभिलक्ष्य राष्ट्रियैकतादिवसः सप्ताहश्च समाचर्यते। केरलराज्यस्थेन गुरुवायूरु परिसरेण 31/10/2017 तमे दिनाङ्के मध्याह्ने 02 वादनतः सङ्गोष्ठी समायोजिता। अत्र संस्कृतेन मलयालं भाषया हिन्दी भाषया आङ्ग्लभाषया च वक्तुं मार्गदर्शनं सूचनां च प्रशासकाः प्रायच्छन् । सरदार वल्लभभाई पटेल महोदयानां राष्ट्रसेवाम् अधिकृत्य विविधभाषासु छात्रैः शिक्षकैश्च सूक्तम् । 31/10/2017 तमे दिनाङ्के राष्ट्रियैकतादिवसम् उपलक्ष्य जयपुरपरिसरेण छात्राणां कृते निबन्धप्रतियोगितायाः शीर्षकरचनानिर्माणस्पर्धायाश्च आयोजनं विहितम् । प्रथम-द्वितीयाद्याः पुरस्काराः अपि छात्रेभ्यः प्रदत्ताः। निबन्धप्रतियोगितायाः विषयत्वेन सरदार - वल्लभभाई - पटेलवर्याणां जीवनवृत्तं दत्तम् । एवमेव शीर्षकरचनानिर्माणस्पर्धायां दश शीर्षवाक्यानि राष्ट्रियैकताम् अधिकृत्य देशभक्तिम् अधिकृत्य रचयितुं प्रदत्तानि।
3. मानवाधिकारदिवसः अपि महता वैभवेन सर्वेषु परिसरेषु प्रतिवर्षं समायोज्यते। मानवः मानवाधिकाराणां ज्ञाता सन् मानवीयानि मूल्यानि अधिगम्य आचारे व्यक्तित्वे च तेषाम् आत्मसात्करणं कुर्यात् इति उद्देश्येन मानवाधिकारदिवसः प्रतिवर्षं समायोज्यते। 10/12/2017 तमे दिनाङ्के जम्मूपरिसरीयाः एनं कार्यक्रमं सभामुखेन आयोजितवन्तः। आधुनिकविभागाध्यक्षाः श्री शरच्चन्द्रशर्ममहोदयाः शिक्षाशास्त्रविभागाध्यापकाः मदनसिंहमहोदयाः च मानवाधिकारस्य स्वरूपम् अधिकृत्य सविस्तरम् अब्रुवन्। एकादशे दिनाङ्के (11/12/2017) केरलीयपरिसरे अन्यत्र परिसरेषु अयं कार्यक्रमः सम्पन्नः।
4. नवेम्बर मासे संविधानदिवसः अपि प्रत्येकं परिसरेण समायोज्यते । अस्मिन् दिवसे संविधानस्य महत्वम् अधिकृत्य व्याख्यानानि समायोज्यन्ते। 26/11/2017 तमे दिनाङ्के जम्मूपरिसरीयः वेदविभागाध्यापकः डा. दीपककुमारशर्मवर्यः स्वागतभाषणम् अकरोत्।
5. 20/01/2019 तमे दिनाङ्के गुरुवायूरु परिसरेण राष्ट्रियमतदानदिवसः समाचरितः। निर्वाचनस्य महत्वं मतदानस्य च प्रभावम् अधिकृत्य विभिन्नेषु परिसरेषु विशिष्टाः कार्यक्रमाः काले काले आयोज्यन्ते। 25/01/2020 तमे दिनाङ्के लखनऊ परिसरपक्षतः राष्ट्रियः मतदातादिवसः सवैभवं समाचरितः।
6. प्रयागराजस्थेन गङ्गानाथझापरिसरपरिवारेण नवेम्बर मासे २६ तमे दिनाङ्के संविधानदिवसः वैभवेन आचरितः। अस्मिन् कार्यक्रमे इलाहाबाद उच्चन्यायालयस्य अधिवक्ता श्रीमान् शिवकुमार पाल महोदयः मुख्यातिथिरूपेण समागतः। डा. श्याममोहनमिश्रमहोदयः विशिष्टातिथिरूपेण समागतः। परिसरनिदेशकाः आचार्याः ललितकुमारत्रिपाठीवर्याः अध्यक्षस्थाने आसन्। अतिथयः संविधानस्य महत्वम्, संविधानदिवसाचरणस्य महत्वं न्यरूपयन् । 24/11/2020 तमे दिनाङ्के अगरतला प्रान्ते वर्तमानेन एकलव्यपरिसरेण अपि संविधानदिवसाचरणस्य महत्वम् अधिकृत्य गोष्ठी सञ्चालिता ।
7. गुरुवायूरुपरिसरेण जागरूकता दिवसः तथा संविधानदिवसः च मिलित्वा 29/11/2021 तमे दिनाङ्के आचरितः। राष्ट्रीयः मतदाता दिवसः लखनऊ परिसरपक्षतः 25/01/2022 तमे दिनाङ्के समाचारितः। एवं विश्वविद्यालयस्य विभिन्नेषु परिसरेषु विशिष्टाः कार्यक्रमाः आयोज्यन्ते।

***English version available in the additional information link**

| File Description | Document |
|---|---|
| Upload Additional information | View Document |
| Provide Link for Additional information | View Document |

**7.2 Best Practices**

***7.2.1 Describe two Best practices successfully implemented by the Institution as per the NAAC format provided in the Manual.***

***रा.मू.प्र.परिषदः निदर्शिकायाः प्रपत्रानुसारं संस्थया साफल्येन परिपालितं सर्वोत्तमं परिपाटिद्वयं विवृणुत।***

**Answer:**

**1. सर्वोत्तमपरिपाटेः शीर्षकम्**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वोत्तमपरिपाटिषुसंस्कृतमयाःविशिष्टाः क्रियाकलापाः प्राथम्यं भजन्ते। ते च प्राधान्येन त्रिरूपाः । यथा -

1. **अखिलभारतीयशास्त्रीयप्रतियोगिताः**
2. **संस्कृतनाट्योत्सवप्रदर्शिनी**
3. **अन्तःपरिसरीयः युवमहोत्सवः चेति ।**

**2. सर्वोत्तमपरिपाटेः उद्देश्यानि**

समग्रभारते संस्कृतमाध्यमेन आवर्षं विविधान् विशिष्टान्पाठ्यसहगामिक्रियाकलापान् समायोज्य अधोलिखितानाम् उद्देश्यानाम् अवाप्तये विश्वविद्यालयः प्रतिपदं प्रयतते । तानि उद्देश्यानि यथा -

1. अखिलभारतीयशास्त्रीयप्रतियोगितानाम् आयोजनपुरस्सरं प्राचीनशास्त्रपरम्परायाः संरक्षणं हस्तान्तरं संवर्धनं च।
2. **गुरुकुलस्तरात् प्रारभ्य राष्ट्रस्तरपर्यन्तं** विविधेषु प्रान्तेषु राज्येषु च शास्त्रीयप्रतियोगिताः शलाकापरीक्षाः वाक्यार्थप्रतियोगिताः अन्त्याक्षरीस्पर्धाः च समायोज्य भारतीयज्ञानप्रणाल्याः अनावरणम् ।
3. भासकालिदासभवभूतिप्रभृतिभिः विरचितैः प्राचीननाटकैः सह आधुनिकसंस्कृतनाटककारैः विरचितानां राष्ट्रहित-राष्ट्रविकास -राष्ट्ररक्षापराणां च नाटकानां रङ्गमञ्चे सार्वजनिकस्थानेषु च प्रदर्श्य सामाजिकजागर्यायाः समुत्पादनम्। सामाजिकानां संस्कृतक्षेत्रं प्रति ध्यानाकर्षणम् । तेषु संस्कृतचेतनायाः अभिनिवेशश्च।
    1. **स्वातन्त्र्यवीराणां राष्ट्रसेवकानां** योगदानं देशसेवां च दृश्यश्रव्यसंसाधनानां साहाय्येन संस्कृतप्राकृताद्यासु भाषासु च प्रस्तुतीकृत्य वाङ्मयस्य विषये भारतीयभाषाणां विषये यूनां ध्यानाकर्षणम् ।
    2. अन्तःपरिसरीययुवमहोत्सवे विभिन्नराज्यप्रान्तवर्णजातिधर्मावलम्बिनां प्रतिभाशालिनां छात्राणां कृते समानावसरं प्रकल्प्य संस्कृतभाषा सर्वजनसाधारणी भाषा वर्तते इति ख्यापनम्। विविधतायाम् एकतायाः ख्यापनम् ।
    3. विशिष्टक्रियाकलापान् नियतरूपेण समायोज्य संस्कृतच्छात्राणां शारीरिक- मानसिक- सामाजिक - सांवेगिक - नैतिक - भौतिक- व्यक्तिगतेति विभिन्नपक्षाणां क्रमिकविकासाय अवसरप्रदानम् ।
    4. संस्कृतच्छात्राणां **सूक्ष्मलक्ष्यनिरीक्षणप्रवृत्तेः** उद्विकासपुरस्सरं तेषां प्रतिस्पदन्दनक्षमतायाः उन्नयनम् ।
    5. छात्रेभ्यः मानवजीवनस्य विभिन्नानाम् अवस्थानां स्थितिगतीनां प्रदर्शनपुरस्सरं शुद्धतया स्पष्टतया च भावाभिव्यञ्जनकौशलस्य विकाससम्पादनम् । पुनः तेषां तार्किकसर्जनात्मकचिन्तनक्षमतादीनां प्रचोदनम् ।
    6. परिस्थित्यनुगुणं व्यवहर्तुम् अवसरानुगुणं वार्तालापं कर्तुं परोक्षरूपेण प्रशिक्षणप्रदानम् ।
    7. अर्जितज्ञानस्य कौशलस्य च विभिन्नदेशकालपरिस्थितिषु प्रभावोत्पादकरीत्या अभिव्यञ्जनाय अवसरप्रदानम् ।

8. एकं राष्ट्रम् एका भाषा एका अखण्डसंस्कृतिः इत्येतस्य समष्टिचिन्तनस्य प्रगतिसम्पादनम्।

4. **सन्दर्भः**

सन्दर्भेऽस्मिन् संस्कृतपारम्परिकप्रतियोगिताभिः महोत्सवैः ज्ञानमनोरञ्जनविविधैकैः रूपकैः च विश्वविद्यालयः भारते कथं संस्कृतच्छात्राणां सर्वाङ्गीणविकासाय स्वीयां परिपाटिं सञ्चालयति इत्येतत् सर्वं सप्रमाणं समूलं सोदाहरणं च उल्लिख्यते।

**4. परिपाटिः**

केन्द्रीयसंस्कृतविश्वविद्यालयः भारतस्य विभिन्नेषु संस्कृतविश्वविद्यालयेषु पाठशालासु गुरुकुलेषु महाविद्यालयेषु च अधीयानानां संस्कृतच्छात्राणां सर्वतोमुखाभिवृद्धये आबहोःकालात् आरभ्य प्रयतमानः वर्तते। अतः एव आवर्षं विविधस्तरेषु अखिलभारतीयस्पर्धायाः आयोजनं कुर्वन् अस्ति। अस्याः सर्वोत्तमपरिपाटेः प्रभावेण अद्य **32 संङ्ख्याकाः विशिष्टाः स्पर्धाः गुरुकुलस्तरात् आरभ्य राष्ट्रस्तरपर्यन्तम् आयोजयति।**

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् इति वेदवचनं स्मारं स्मारं देशस्य कोणे कोणे शास्त्राध्ययनरतेषु छात्रेषु धनात्मकस्पर्धात्मकमनोभावस्य जागरणाय विश्वविद्यालयस्य परिपाटिः अविच्छिन्नरूपेण प्रवर्तते । 2022-2023 सत्रयोः क्रियाकलापाः नियमाः गतिविधयश्च विश्वविद्यालयस्य जालस्थानेऽपि समारोपिताः सन्ति। एतद्विषयकविवरणं सङ्ग्रहेण अत्र उपस्थाप्यते।

1. संस्कृतभाषणस्पर्धाः इत्युक्ते केवलं सप्ताहसाध्यः माससाध्यः कार्यक्रमः नैव । स्पर्धाः पारम्परिकशास्त्रमात्रकेन्द्रिताः अपि न सन्ति। एते विविधविषयेषु गहनाध्ययनाभ्यासयोः द्योतकाः समष्टिचिन्तनस्य अभिव्यञ्जकाः च सन्ति। अतः साहित्यव्याकरणन्यायमीमांसादिषु यथा आवर्षं स्पर्धाः आयोजयति तथा भारतीयविज्ञानविशेषेषु अपि स्पर्धाः समायोज्य ' ज्ञानविज्ञानविमुक्तये ' इतीदं वेदवाक्यं सफलीकरोति विश्वविद्यालयः।
2. भारतीये कृषिविज्ञाने पर्यावरणविज्ञाने स्वास्थ्यविज्ञाने प्रबन्धनविधौ अर्थशास्त्रे अन्तरिक्षविज्ञाने दण्डव्यवस्थायाम् भौतिकविज्ञाने रसायनविज्ञाने प्राणिविज्ञाने च संस्कृतच्छात्राणां गतिं मतिं च परीक्षितुं स्पर्धाः समायोजयति विश्वविद्यालयः। वैज्ञानिकेषु पाठ्यक्रमेषु संस्कृतच्छात्राणाम् अध्ययनप्रवृत्तिम् अभिवर्धयितुम् एताः स्पर्धाः पुनर्बलनकार्यं कुर्वन्ति। संस्कृतच्छात्रेषु वैज्ञानिकप्रवृत्तेः विकासः विश्वविद्यालयस्य परिपाटौ समाहितोऽस्ति। द्वादशसु ज्ञानविज्ञानविभागेषु अखिलभारतस्तरीयस्पर्धासमायोजनस्य परिपाटिः अविच्छिन्नरूपेण प्रवर्तते।
3. शलाकापरीक्षाः छात्राणां तीक्ष्णबुद्धेः परीक्षणाय तेषां ग्रहणाभिव्यञ्जनकौशलयोः विकासाय च साहाय्यम् आचरन्ति । अतः एव वेदान्तसाहित्यव्याकरणैः सह भारतीयगणितशास्त्रे अर्थशास्त्रे च पार्थक्येन शलाकापरीक्षाः आयोजयति विश्वविद्यालयः। एतदर्थम् अपेक्षितं पूर्वप्रशिक्षणम् अपि प्रदातुं विश्वविद्यालयः प्रचोदयति। पाठ्यक्रमम् नियमावलिं च सत्रारम्भे एव प्रकटीकरोति स्वीये जालस्थाने आरोपयति च । अनेन छात्राः आवर्षं सम्यक् अभ्यस्य निर्दिष्टग्रन्थान् जिर्णीकृत्य स्पर्धार्थम् उन्मुखाः भवन्ति। दशसु विशिष्टविषयेषु शलाकापरीक्षाणां सञ्चालननिर्वहणप्रशिक्षणप्रोत्साहनाद्याः परिपाटयः विश्वविद्यालयेन स्वायत्तीकृताः सन्ति।
4. शास्त्रार्थविचारेषु भारतीयानां संस्कृतच्छात्राणां गतेः मतेः च संवर्धनाय अपि विश्वविद्यालयः व्यूहात्मकयोजनाः प्रतिवर्षं निर्माति। विशिष्य शास्त्रेषु चर्चितान् गभीरविचारान् आश्रित्य शास्त्रार्थकरणाय प्रचोदनकार्यं करोति। शास्त्रार्थविचारेषु इमे प्रधानाः सन्ति। यथा -
    1. **शाब्दबोधविचारः**
    2. **धात्वर्थविचारः**
    3. **कालनिरूपणम्**
    4. **अन्विताभिधानवादः**
    5. **ख्यातिपञ्चकम्**

यदि एतेषु विचारेषु वाक्यार्थसामर्थ्यं कश्चन अवाप्नोति तर्हि सः शास्त्रेषु गहनाध्ययनशीलः भविष्यति। अतः इयं परिपाटिः विश्वविद्यालयेन समाश्रिता वर्तते।

1. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् इति वचनमनुसृत्य काव्यकण्ठपाठाय भारतीयान् संस्कृतच्छात्रान् विश्वविद्यालयः प्रचोदयति। महाकाव्येषु सन्निहितानां नैतिकमूल्यानां सामाजिकमूल्यानां राष्ट्रियमूल्यानां च सङ्क्रान्तिः

सकाले स्यादिति इति धिया विश्वविद्यालयेन इयं परिपाटिः समाश्रिता। एवमेव अमरकोषे , अष्टाध्याय्याम् , धातुषु , भगवद्गीतायाम् , सुभाषितेषु , कण्ठपाठस्पर्धाः आयोजयति विश्वविद्यालयः। संस्कृतवाङ्मयस्य सर्वविधान् प्रकारान् केन्द्रीकृत्य एव विश्वविद्यालयस्य परिपाटयः प्रवर्तन्ते।

2. समस्यास्फूर्तिस्पर्धाः भारतीयानां संस्कृतच्छात्राणां सर्जनात्मकप्रवृत्तेः रचनात्मकप्रवृत्तेः च विकासाय भृशं साहाय्यं कुर्वन्ति। एवमेव अक्षरश्लोकी शास्त्रीयस्फूर्तिस्पर्धाः च नियतरूपेण सञ्चाल्यन्ते । 2022- 23 सत्रे 32 संङ्ख्याकेषु विविधेषु विभागेषु विविधाः स्पर्धाः आभारतम् आवर्षं प्रचलिष्यन्ति। एतत्सर्वं विश्वविद्यालयस्य परिपाटीः सङ्केतयति।
3. संस्कृतनाटकानि भारतीयभव्येतिहासं सप्रमाणं प्रदर्शयन्ति। सामाजिकसन्देशानां द्रुतगत्या सम्प्रेषणे इमानि साहाय्यं कुर्वन्ति। अतः विश्वविद्यालयः प्रतिवर्षं विशिष्टं सम्प्रत्ययं मनसि निधाय अन्तःपरिसरीयं नाट्यमहोत्सवं भारतस्य विभिन्नेषु स्थानेषु आयोजयति। अष्टादशी अन्तःपरिसरीया नाट्यस्पर्धा भोपालपरिसरे सद्यः समायोजिता। 22/03/2022 तः 24/03/2022 पर्यन्तम् आयोजितायाम् अस्यां स्पर्धायां विभिन्नपरिसरीयाः छात्राः राष्ट्रसेवकानां देशभक्तानां नाटकानि प्रदर्श्य सर्वान् तोषितवन्तः। सामाजिकेषु युवयुवतिषु देशभक्तिभावजागरणे विश्वविद्यालयस्य इयं परिपाटिः बहुभ्यः वर्षेभ्यः प्रचलन्ती वर्तते।
4. अन्तःपरिसरीयः युवमहोत्सवः अपि अत्यन्तं व्यापकरूपेण समायोजयति विश्वविद्यालयः। संस्कृतेन संस्कृताय संस्कृतयुवानः एकत्रिताः भूत्वा स्वीयाम् अनितरसाधारणीं प्रतिभाम् अत्र प्रकटयन्ति। युवयुवतयः विना भेदभावम् एकत्रिताः सन्तः केन्द्रीयसंस्कृतविश्वविद्यालयस्य अखण्डं भव्यं च रूपं प्रदर्शयन्ति।
5. केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वेऽपि क्रियाकलापाः संस्कृतभाषायाः संरक्षणे प्रचारे विकासे च पूरकाः सन्ति। अतः एतेषां क्रियाकलापानाम् आयोजनपरिपाटिः अनुस्यूततया प्रवर्तते । विश्वविद्यालयस्य समयसारिण्यां जालस्थाने च अमीषां परिपाटीनाम् उल्लेखः सर्वदा उपलभ्यते। सम्पर्कसूत्राणि अपि तत्र उल्लिखितं भवति। अतः पूर्वसिद्धतां कर्तुम् महान् अवसरः छात्राणां कृते उपलभ्यते ।
    1. विश्वविद्यालयस्य परिपाटयः सरलमानकसंस्कृतमुखेन प्रवर्तन्ते। विश्वविद्यालयस्य माध्यमभाषा अपि सरलमानकसंस्कृतभाषा एव वर्तते। अनेन सामाजिकाः अपि विशेषरूपेण विश्वविद्यालयस्य क्रियाकलापान् सुखेन अवगच्छन्ति। सामाजिकानां सर्वविधाः संस्कृतेन सम्बद्धाः आकाङ्क्षाः आसां परिपाटीनां माध्यमेन पूरिताः भवन्ति।

### 5. सर्वोत्तमपरिपाटेः साफल्यस्य प्रमाणम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वोत्तमपरिपाटिषु पूर्वोल्लिखिताः त्रिरूपाः क्रियाकलापाः विशेषतः परिलक्ष्यन्ते। क्रमशः प्रमाणानि यथा -

1. अखिलभारतस्तरीयस्पर्धासमायोजनस्य निमित्तम् एव आवर्षं लक्षशः रूप्यकाणि विश्वविद्यालयः व्ययीकरोति। अखिलभारतीयशास्त्रीयस्पर्धा -2022-2023 या आयोज्यमाना वर्तते सा षष्टितमी स्पर्धा वर्तते। 59 संवत्सराणाम् इतिहासः एव अत्र उत्कृष्टं प्रमाणं वर्तते विश्वविद्यालयस्य सर्वोत्तमपरिपाटेः द्योतनाय ।

1. 32 सङ्ख्याकेषु विषयेषु गुरुकुलस्तरात् आरभ्य राष्ट्रस्तरपर्यन्तम् छात्राणां सज्जीकरणाय प्रेषणाय प्रशिक्षणाय च विश्वविद्यालयः विशिष्टां योजनां निर्माति। 32 सङ्ख्याकेषु विषयेषु पुरस्काराः अपि सर्वाधिकाः दीयन्ते। तद्यथा -
2. सङ्ख्याकेषु शास्त्रीयविषयेषु पुरस्कारः पदकानि च यथा -
    - प्रथमस्थानम् - स्वर्णपदकम् , 12000/- रूप्यकाणि च

- द्वितीयं स्थानम् - रजतपदकम् , 8000/- रूप्यकाणि च
- तृतीयं स्थानम् - कांस्यपदकम् , 5000/- रूप्यकाणि च
- विशिष्टपुरस्कारः - 80% अङ्कैः तदुपरि अङ्कैः वा उत्तीर्णेभ्यः 2500/- रूप्यकाणि। 3,30,000 रूप्यकाणि केवलं शास्त्रीयविषयेषु पुरस्कारधनराशिरूपेण विश्वविद्यालयः व्ययीकरोति। पदकानां निमित्तं पुनः लक्षशः व्ययः जायते।

शलाकापरीक्षाः दशसु (10) विभागेषु प्रचलति। तत्र पुरस्काराः यथा -

- प्रथमस्थानम् - स्वर्णपदकम्+ स्वर्णशलाका + 25,000 रूप्यकाणि च।

- द्वितीयं स्थानम् - रजतपदकम्+ 20,000 रूप्यकाणि च।

- तृतीयं स्थानम् - कांस्यपदकम्+ 15,000 रूप्यकाणि च।
- विशिष्टपुरस्कारः - 80% अङ्कैः तदुपरि अङ्कैः वा उत्तीर्णेभ्यः 2500/- रूप्यकाणि। आहत्य 6,25,000 परिमितः धनराशिः शलाकापरीक्षायां पुरस्कृतेभ्यः प्रयच्छति विश्वविद्यालयः। पदकानां निमित्तं पुनः लक्षशः व्ययीकरोति । संस्कृतस्य छात्राणां स्मृतिबलस्य ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यस्य विशिष्टज्ञानस्य च परीक्षणम् अनेन प्रकारेण सम्भवति।

एवमेव शास्त्रार्थविचारे, काव्यकण्ठपाठे, अमरकोषकण्ठपाठे, अष्टाध्यायीकण्ठपाठे, धातुरूपकण्ठपाठे, भगवद्गीताकण्ठपाठे, सुभाषितकण्ठपाठे, समस्यापूर्तौ, अक्षरश्लोक्याम्, शास्त्रीयस्फूर्तिस्पर्धायां च प्रथमद्वितीयतृतीयस्थानेषु विजयिभ्यः पदकानि धनराशिः च दीयते। प्रमाणपत्रम् अतिरिच्य वस्तुरूपेण ग्रन्थरूपेण अपि पुरस्काराः दीयन्ते। एवं छात्राणाम् अभिप्रेरणाय आर्थिकबौद्धिकसहयोगप्रदानाय च विश्वविद्यालयः स्वीयाः विशिष्टाः परिपाटीः अनुसरति।

1. विभिन्नस्पर्धासु स्पर्धालूनां पुरस्कारोपलब्धेः आधारेण अत्यधिकाङ्कभाजे स्पर्धालुगणाय विजयवैजयन्ती अपि प्रतिवर्षं दीयते। एवं विजयवैजयन्त्याः प्रदानपरिपाटिरपि आरम्भकालादेव अनुवर्तते।
2. नाट्यमहोत्सवस्य आयोजनाय अपि लक्षशः रूप्यकाणि विश्वविद्यालयः व्ययीकरोति। सर्वेऽपि परिसरीयाः प्रदत्तं रूपकम् आश्रित्य भारतस्य विभिन्नेषु परिसरेषु आयोजितासु नाट्यस्पर्धासु भागं गृह्णन्ति। प्रथमद्वितीयतृतीयपुरस्कारैः सह सर्वोत्तमनटाय निदेशकाय रङ्गमञ्चसज्जाकाय इत्येवं विभिन्नेषु विभागेषु अपि पुरस्कारान् विन्दन्ति। 18 वारं नाट्यस्पर्धाः सफलतया सम्पन्नाः इत्यतः प्रतिवर्षं नूतनान् सामाजिकसन्देशान् लोकोपदेशान् मनसिकृत्य स्पर्धाः आयोजयति। परिसरस्तरे एतदर्थं विशिष्टं प्रशिक्षणम् अपि दापयति विश्वविद्यालयः। एवं कुशीलवान् छात्रान् सज्जीकुर्वन् अस्ति विश्वविद्यालयः। अन्ताराष्ट्रियस्तरे विदेशेषु च विश्वविद्यालयस्य छात्राः नाटकं प्रदर्शयन्ति। सर्वविधव्ययं विश्वविद्यालयः एव सर्वदा निर्वहति।
3. अन्तःपरिसरीयः युवमहोत्सवः अपि विशिष्टः एव। द्वादशसु परिसरेषु अधीयानाः छात्राः विविधविभागेषु विविधासु प्रतियोगितासु भागं गृह्णन्ति।

विभिन्नस्पर्धासु स्पर्धालूनां पुरस्कारोपलब्धेः आधारेण अत्यधिकाङ्कभाजे परिसरीयाय स्पर्धालुगणाय विजयवैजयन्ती अपि दीयते। शृङ्गगिरिस्थः राजीवगान्धीपरिसरः सर्वाधिकवारं विजयवैजयन्तीम् अवाप्नोत् । साक्ष्यचित्राणां निर्माणाय अन्तर्जाले उपारोपणाय अपि युवमहोत्सवाङ्गतया आयोजितासु स्पर्धासु अवसरः वर्तते। एकं भारतं श्रेष्ठं भारतम्, बेटी बचाओ, बेटी पढाओ, स्वच्छभारतम् अभियानम् इत्यादिषु सामयिकविषयेषु विश्वविद्यालयस्य छात्राः साक्ष्यचित्राणि निर्मान्ति। उपशीर्षकोपेतानि एतानि प्रत्येकं भारतीयः सर्वदा अवलोकयितुं शक्नोति। एवं परिपाटयः सफलतया सञ्चाल्यन्ते।

**6. सर्वोत्तमपरिपाटेः क्रियान्वयनावसरे अभिमुखीकृताः समस्याः आवश्यकसंसाधनानि च।**

विश्वविद्यालयस्य विशिष्टानां क्रियाकलापानां क्रियान्वयनावसरे नैकाः समस्याः अपि समागताः एव । प्राकृतिकविकोपैः विषमपरिस्थितेः प्रभावेण च आवर्षं प्रत्यक्षरूपेण क्रियाकलापानां सञ्चालनावसरे समस्याः समागताः। ते च यथा -

1. COVID-19 कारणेन विश्वविद्यालयस्य क्रियाकलापानां सञ्चालनावसरे बाधा समुत्पन्ना। वर्षद्वयं (2020,2021) युवमहोत्सवः नाट्यमहोत्सवः प्रतियोगिताः समायोजयितुं नैव शक्ताः । कोरोना कारणेन परोक्षशिक्षायाः ( Online) यद्यपि व्यवस्थाः कृताः परन्तु अमीषां क्रियाकलापानां सञ्चालनाय प्रत्यक्षस्य पूरकस्य च कालस्य निमित्तं विश्वविद्यालयेन प्रतीक्षा कृता। यद्यपि आर्थिकसमस्याः 2021,2022 तमयोः संवत्सरयोः मध्ये नैव आसन् तथापि परिस्थितिः एव विषमा आसीत्।
2. **आवश्यकसंसाधनानि**

समस्यानां सम्मुखीकरणाय विश्वविद्यालयेन परोक्षशिक्षासंसाधनानि प्रयुक्तानि। अन्तर्जालाश्रितसंसाधनानां साहाय्येन छात्रेभ्यः प्रशिक्षणं दत्तम् । विश्वविद्यालयस्य क्रियाकलापेषु अधिकाधिकाः अन्तर्जाले उपारोपिताः सन्ति। अतः एतेषां साहाय्येन छात्राः लाभान्विताः अभवन् ।

1. विश्वविद्यालयस्य विविधाः क्रियाकलापाः नाट्योत्सवाः युवमहोत्सवाः प्रतियोगिताः च भारतस्य विभिन्नेषु स्थानेषु आवर्षं प्रचलन्ति। अतः तत्र तत्र सर्वेऽपि छात्राः शिक्षकाः अन्ये सामाजिकाः गत्वा द्रष्टुं न प्रभवन्ति। एतदर्थं विश्वविद्यालयेन दृश्यश्रव्यसंसाधनानां साहाय्येन तेषां क्रियाकलापानां सङ्ग्रहः ( Recording) अपि क्रियते। एतेषां नाट्योत्सवादीनां

यदा कदापि दर्शनाय YouTube माध्यमेन अवसरः अपि कल्पितः। एवं विश्वविद्यालयः अनुष्ठितानां क्रियाकलापानां संरक्षणाय प्रचाराय अपि स्वीयां परिपाटिं सञ्चालयति। YouTube मध्ये विना व्ययं उपारोपयितुं शक्यते इत्यतः मुक्तरूपेण स्वतन्त्ररूपेण च क्रियाकलापाः समावेशिताः । दृश्यश्रव्यसंसाधनानां व्यवस्थाः अपि परिसरेषु विश्वविद्यालयेन परिकल्पिताः सन्ति।

2. राज्यस्तरे अपि विविधाः स्पर्धाः राज्यसर्वकारैः आयोज्यन्ते। एतत्कार्यस्य सम्पादनाय अपि विशेषरूपेण विश्वविद्यालयः आर्थिकसहयोगं ददाति। राज्यस्तरीयस्पर्धासंयोजकाभिः संस्थाभिः उपलब्धानुदानराश्यनुसारेण पुरस्काराः दीयन्ते। विशेषतः विश्वविद्यालयः भारतस्य स्पर्धासंयोजकसंस्थाभ्यः तत्रेभ्यः छात्रेभ्यः प्रतिभाशालिभ्यः च छात्रवृत्त्यादीनां माध्यमेन साहाय्यं करोति।
3. केन्द्रसर्वकारः विश्वविद्यालयाय प्रतिवर्षम् अनुदानं प्रयच्छति। अस्य धनस्य उपयोगः अधुना क्रियाकलापानां सञ्चालने विश्वविद्यालयः करोति। वर्षद्वयात् पूर्वं 2019 पर्यन्तं 68 कोटिः रूप्यकाणि सर्वकारः यच्छति स्म। तदा क्रियाकलापानां सञ्चालनं प्राप्तधनराशेः अनुसारं भवति स्म। अधुना प्रचुरमात्रेण धनम् उपलब्धमस्तीत्यतः सर्वत्र सर्वेऽपि क्रियाकलापान् महता वैभवेन कालानुगुणं विश्वविद्यालयः सम्पादयति । पुरस्कारधनराशिषु अपि अधुना वृद्धिः सञ्जाता।
4. अन्तःपरिसरीयस्य युवमहोत्सवस्य आयोजनाय अपि 55,00000 रूप्यकाणि विश्वविद्यालयः व्ययीकरोति। कोरोना कालखण्डे 2020 तः 2022 पर्यन्तं युवमहोत्सवेन सम्बद्धानां क्रियाकलापानां सञ्चालने बाधा समजनि। अधुना विश्वविद्यालयस्य 2022-23 तमस्य संवत्सरस्य क्रियाकलापानां पट्टिका निर्मिता वर्तते। नवसत्रे क्रियाकलापानां सञ्चालनाय विश्वविद्यालयः सन्नद्धः वर्तते।

**7. टिप्पणी**

**सा विद्या या मदं हन्ति सा श्रीर्यार्थिषु वर्षति।**

**धर्मानुसारिणी या च सा बुद्धिरभिधीयते ।। इति**

श्लोकवचनानुसारं विश्वविद्यालयस्य परिपाटयः विशिष्टलक्ष्यपूर्तये सहायिकाः सन्ति। अतः अन्येऽपि संस्थाः विश्वविद्यालयाः आसां परिपाटीनाम् अनुसरणं कर्तुं शक्नुवन्ति।यथा -

1. केन्द्रीयसंस्कृतविश्वविद्यालयः अखिलभारतस्तरीयस्पर्धासमायोजनस्य निमित्तम् एव आवर्षं लक्षशः रूप्यकाणि व्ययीकरोति। समग्रभारते संस्कृतमाध्यमेन एव सर्वेषां कृते गुरुकुलस्तरात् आरभ्य राष्ट्रस्तरपर्यन्तं स्पर्धाः समायोज्य पुरस्कारान् प्रयच्छति। एतादृशीं परिपाटिम् अन्येऽपि विश्वविद्यालयाः अनुसर्तुं शक्नुवन्ति।
2. नाट्यमहोत्सवस्य स्पर्धायाश्च आयोजनाय अपि लक्षशः रूप्यकाणि विश्वविद्यालयः व्ययीकरोति। सर्वेऽपि परिसरीयाः पूर्वनियोजितं रूपकम् आश्रित्य भारतस्य विभिन्नेषु परिसरेषु आयोजितासु नाट्यस्पर्धासु भागं गृह्णन्ति। प्रथमद्वितीयतृतीयपुरस्कारैः सह सर्वोत्तमनटाय निदेशकाय रङ्गमञ्चसज्जाकाय इत्येवं विभिन्नेषु विभागेषु अपि पुरस्कारान् विश्वविद्यालयः प्रयच्छति। एतादृशीं विशिष्टां परिपाटिम् अन्येऽपि विश्वविद्यालयाः अनुसर्तुं शक्नुवन्ति।
3. विश्वविद्यालयः अन्तःपरिसरीयं युवमहोत्सवम् अपि विशिष्टरूपेण एव आयोजयति। द्वादशसु परिसरेषु अधीयानाः छात्राः विविधविभागेषु विविधासु प्रतियोगितासु भागं गृह्णन्ति।

विभिन्नस्पर्धासु स्पर्धालूनां पुरस्कारोपलब्धेः आधारेण अत्यधिकाङ्कभाजे परिसरीयाय स्पर्धालुगणाय विजयवैजयन्ती अपि दीयते। एवमेव अन्ये अपि विश्वविद्यालयाः युवमहोत्सादीनां सञ्चालनं व्यापकरूपेण कर्तुं शक्नुवन्ति। एवं क्रमेण विश्वविद्यालयस्य परिपाटयः प्रवर्तन्ते।

***English version available in the additional information link***

| File Description | Document |
|---|---|
| Any other relevant information | View Document |

| | |
|---|---|
| Best practices as hosted on the Institutional website | View Document |

**7.3 Institutional Distinctiveness**

***7.3.1 Portray the performance of the Institution in one area distinctive to its priority and thrust within 1000 words***

***संस्थायाः प्राथम्य-प्राधान्यदृष्ट्या वैशिष्ट्यं दर्शयितुं कमपि एकं क्षेत्रविशेषम् आश्रित्य कृतकार्यस्य विवरणं सहस्रेण शब्दैः दीयताम्।***

**Answer:**

संस्कृतभाषायाः **विश्वतोमुखत्वख्यापनं** केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रधानं लक्ष्यम् अस्ति। कक्ष्याशिक्षणमात्रेण औपचारिकशिक्षणप्रदानमात्रेण वा संस्कृतभाषायाः विश्वतोमुखत्वख्यापनं कष्टसाध्यं समयसाध्यं च । किञ्च कक्ष्याशिक्षणमात्रेण आबालवृद्धानां सामाजिकानां संस्कृताध्ययनाकाङ्क्षां परिपूरयितुं न शक्नोति विश्वविद्यालयः। अतः ग्रामं ग्रामं गच्छाम संस्कृतशिक्षां यच्छाम इति यथा नैजसंस्थाभिः आन्दोलनम् आरब्धं तथा समाजं समाजं गत्वा संस्कृतशिक्षां दातुं विश्वविद्यालयः प्रयतमानः वर्तते। एतद्दिशि केन्द्रीयसंस्कृतविश्वविद्यालयः 2002 (14/12/2002) तमात् संवत्सरात् एव स्वीयं यत्नम् आरभत। स्वलक्ष्यपरिपूर्तये अनौपचारिकशिक्षणकेन्द्राणि संस्थाप्य 20 वर्षेभ्यः अविच्छिन्नरूपेण संस्कृतकार्यं कुर्वन् अस्ति। अतः विश्वविद्यालयस्य क्रियाकलापेषु अनौपचारिकसंस्कृतशिक्षणं प्राथम्यं भजते। सत्सु बहुषु संस्कृतविश्वविद्यालयेषु औपचारिकसंस्कृतशिक्षणे एव बहूनां विश्वविद्यालयानां यत्नः परिदृश्यते। परं केन्द्रीयसंस्कृतविश्वविद्यालयः न केवलम् औपचारिकशिक्षणमात्रेण सन्तृप्तः वर्तते। अतः एव अनौपचारिकसंस्कृतशिक्षणकार्यक्रमं प्रारभ्य देशस्य कोणे कोणे अनौपचारिकसंस्कृतशिक्षणस्य केन्द्राणि प्रतिष्ठाप्य सद्यः आभारतं व्याप्तः वर्तते। अस्य विश्वविद्यालयस्य क्षेत्रविशेषेषु अनौपचारिकसंस्कृतशिक्षणकार्यक्रमस्य अग्रभूमिका वर्तते। तदेवात्र क्रमशः निरूप्यते।

1. अनौपचारिकसंस्कृतशिक्षणस्य आरम्भः यद्यपि विंशतिः वर्षेभ्यः प्रागेव प्रारब्धः तथापि तस्य पाठ्यक्रमः 2016 पर्यन्तम् एकविधः एव आसीत्। 2016 तमे वर्षे भागग्राहिणाम् आकाङ्क्षां स्तरम् उत्साहं च संवीक्ष्य द्विविधः पाठ्यक्रमः परिकल्पितः। तदारभ्य अस्य परिवर्धितपाठ्यक्रमत्वेन संस्कृतभाषा- प्रमाणपत्रीय-पाठ्यक्रमः, संस्कृतभाषा-दक्षता-पाठ्यक्रमः इति द्विविधौ पाठ्यक्रमौ सर्वेषु केन्द्रेषु प्रवर्तेते।
2. सर्वादौ 100 केन्द्राणि अनौपचारिकसंस्कृतशिक्षणस्य उद्घाटितानि। कोरोना कालखण्डेऽपि इमानि शिक्षणकेन्द्राणि सुष्ठु सञ्चालितानि। 2021-22 तमे संवत्सरे भारते 77 सङ्ख्याकानि अनौपचारिकसंस्कृतशिक्षणस्य केन्द्राणि सफलतया सञ्चालितानि।
3. 15/07/2022 तः आरभ्य 15/05/2023 पर्यन्तं **अनौपचारिकसंस्कृतशिक्षणस्य नूतनपाठ्यक्रमावधिः** अपि निर्दिष्टः वर्तते। अनौपचारिकसंस्कृतशिक्षणस्य केन्द्राणि अपि आधुनिकविश्वविद्यालयेषु, IIT, IIM इत्याद्यासु उच्चाधुनिकशिक्षासंस्थासु महाविद्यालयेषु इत्येवं भिन्नभिन्नस्थानेषु सर्वदा उद्घाट्यन्ते। कृषकाः आपणिकाः गृहिण्यः युवयुवतयः, चिकित्सकाः, अभियन्तारः, वित्तकोषकर्मिणः, शिक्षकाः, छात्राः इत्येवं समाजस्य विभिन्नाः सदस्याः विना क्लेशं यत्र एकत्रिताः भवितुं शक्नुवन्ति तत्र केन्द्रम् उद्घाट्य संस्कृतशिक्षणं ददाति केन्द्रीयसंस्कृतविश्वविद्यालयः।
4. देशस्य विभिन्नेषु स्थानेषु सावधिककेन्द्राणाम् उद्घाटनाय नवदेहलीस्थायाः केन्द्रीयसमितेः अनुमतिः अनिवार्या। अनौपचारिकसंस्कृतशिक्षणेन सम्बद्धा केन्द्रीयसमितिः अधोलिखितक्रमेण वर्तते। तद्यथा -

- **प्रो. श्रीनिवास वरखेडी, कुलपतिः - अध्यक्षः**
- **प्रो.गोपबन्धुमिश्रः - सदस्यः**
- **श्रीसत्यनारायणभट्टः - सदस्यः**
- **श्रीवेङ्कटेशमूर्तिः - सदस्यः**
- **डा.रणजिततिवारी - सदस्यः**
- **डा.रत्नमोहनझाः - सदस्यसचिवः**

1. अनौपचारिकसंस्कृतशिक्षणप्रदनाय अपेक्षितस्य केन्द्रशिक्षकस्य चयनार्थम् अपि स्पष्टं मानदण्डम् अनुसरति विश्वविद्यालयः। पाठ्यक्रमद्वयस्य सञ्चालनार्थं विश्वविद्यालयः केन्द्रशिक्षकेभ्यः प्रशिक्षणं आदौ ददाति। प्रशिक्षणात् पूर्वं तेषां भाषिकसामर्थ्यस्य परीक्षणाय मौखिकीं लिखितां च परीक्षां नियतरूपेण संयोजयति। तत्र उत्तीर्णेभ्यः प्रशिक्षणं

प्रदाय प्रशिक्षणोत्तरं पुनरपि मौखिकीं लिखितां च परीक्षां संयोज्य तत्र सफलेभ्यः एव अनौपचारिकसंस्कृतशिक्षणाय अर्हतां प्रयच्छति।

2. केन्द्रशिक्षकाः भारतस्य विभिन्नेषु स्थानेषु स्थित्वा केन्द्राणि उद्घाट्य संस्कृतशिक्षां यच्छन्ति। तेभ्यः आवासीयं प्रशिक्षणं वेतनादिकं सर्वविधसौकर्यं विश्वविद्यालयः एव कल्पयति।
3. भारते 2002 तः आरभ्य 2022 पर्यन्तं 12,932 सङ्ख्याकानि अनौपचारिकसंस्कृतशिक्षणस्य केन्द्राणि विश्वविद्यालयेन सफलतया सञ्चालितानि। 4,21,778 सङ्ख्याकाः सामाजिकाः एतेषु केन्द्रेषु प्रविश्य संस्कृतशिक्षणम् अवाप्य प्रमाणपत्राणि अपि अविन्दन्त। एकैकस्य केन्द्रस्य निर्वहणाय एकैकवारं सहस्रशः रूप्यकाणि विश्वविद्यालयः व्ययीकरोति ।
4. अनौपचारिकसंस्कृतशिक्षणस्य आरम्भकाले विश्वविद्यालयः केन्द्रशिक्षकाय १५,००० रूप्यकाणि गौरवधनरूपेण प्रयच्छति स्म। तदग्रे कालानुगुणं २५,००० रूप्यकाणि गौरवधनरूपेण प्रत्येकं शिक्षकाय प्रायच्छत्। सम्प्रति ४०,००० रूप्यकाणि एकैकस्मै केन्द्रशिक्षकाय एकैकस्य केन्द्रस्य सञ्चालनाय प्रददाति। एकैकस्मिन् अपि केन्द्रे एकैकस्यापि पाठ्यक्रमस्य सञ्चालनावसरे 50 संङ्ख्याकाः संस्कृताध्ययनेच्छुकाः सामाजिकाः शिक्षणं प्राप्तुं प्रभवन्ति।
5. समाजस्य सर्वस्तरीयाः जातिधर्मवर्णलिङ्गादीनां गणनां विना एकत्रीभूय संस्कृतशिक्षां प्राप्तुं शक्नुवन्ति इति विशेषः। आहत्य 323,300,000 रूप्यकाणि अद्यावधि 12,932 सङ्ख्याकानां केन्द्राणां सञ्चालनाय संस्कृतविश्वविद्यालयेन व्ययीकृतानि ।
6. सम्प्रति विंशत्यधिकेषु राज्येषु केन्द्राणि चलन्ति सन्ति। न केवलम् उत्तरभारते न वा दक्षिणे भारते अपि तु पूर्वोत्तरराज्येष्वेव 20 संङ्ख्याकानि केन्द्राणि अद्य अविच्छिन्नरूपेण प्रवर्तमानानि सन्ति। पूर्वोत्तरराज्येषु पर्वतीयप्रान्तेषु च संस्कृतशिक्षावसरवञ्चितेभ्यः सामाजिकेभ्यः संस्कृतशिक्षां दातुं विश्वविद्यालयः कृतसङ्कल्पः वर्तते। एवं संस्कृतस्य रक्षणाय प्रसाराय विकासाय च बद्धपरिकरः विश्वविद्यालयः सरलमानकसंस्कृतमुखेन एव लक्षशः जनान् संस्कृतज्ञान् अकरोत् ।
7. लक्षशः सामाजिकाः अनौपचारिकसंस्कृतशिक्षणस्य साहाय्येन संस्कृतभाषायां सामान्यदक्षताम् अवाप्य तदग्रे केन्द्रीयसंस्कृतविश्वविद्यालयस्य विविधपाठ्यक्रमान् अध्येतुम् अपि प्रवेशार्हतां विन्दन्ति। योगे आयुर्वेदे दूरस्थशिक्षामाध्यमेन साहित्ये ज्यौतिषे व्याकरणे च विविधान् विशिष्टान् पाठ्यक्रमान् सञ्चालयति केन्द्रीयसंस्कृतविश्वविद्यालयः । एतेषु पाठ्यक्रमेषु प्रवेशाय अनौपचारिकसंस्कृतशिक्षणं प्राप्तवतां कृते स्वर्णिमः अवसरः वर्तते। एवं विविधपाठ्यक्रमाणाम् अध्ययनस्य प्रवेशद्वारोपमं शिक्षणं नाम अनौपचारिकसंस्कृतशिक्षणम् इति वक्तुं शक्यते।
8. अनौपचारिकसंस्कृतशिक्षणाय अपेक्षितानां कुशलकेन्द्रशिक्षकाणां निर्माणाय एव आवासीयसंस्कृतशिक्षकप्रशिक्षणवर्गान् विश्वविद्यालयः काले काले आयोजयति। शताधिकाः अत्र भागं गृहीत्वा प्रशिक्षिताः भवन्ति।
9. सद्यः बेङ्गलूरुनगरस्थे श्रीस्वामीनारायणगुरुकुले आयोजिते (30/03/2022 तः 21/04/2022) आवासीयसंस्कृतशिक्षकप्रशिक्षणवर्गे 118 सङ्ख्याकाः प्रतिभागिनः प्रशिक्षिताः अभवन् । अमीषां प्रशिक्षणाय विश्वविद्यालयस्य विश्वविद्यालयेतरप्रान्तस्य 21 संङ्ख्याकाः आचार्याः नियुक्ताः आसन्।
10. न केवलं संस्कृतशिक्षकप्रशिक्षणवर्गमात्रेण सन्तृप्तो भवति विश्वविद्यालयः। अतः एव तदा तदा संस्कृतभाषाबोधनवर्गम्, व्याकरणबोधनवर्गम्, आवासीय-उन्मुखीकरणकार्यक्रमम्, शिक्षकाभिमुखीकरणकार्यक्रमम्, प्रगतप्रशिक्षणकार्यक्रमादिकं समायोज्य स्वीयं कार्यक्रमं सर्वतोभावेन सफलीकर्तुं प्रयतते।
11. Indian Institute of Technology कानपुर, वाराणसी इत्यादिषु All India Institute of Medical sciences पटना प्रभृतिषु IIMT मेरठ इत्यादिषु पुनः Pacific Institute of Management, Udaipur, Rajasthan, Ayurvedic College, Telangana, West Bengal इत्येवमादिषु प्रबन्धनसंस्थासु आयुर्वेदमहाविद्यालयेषु च अनौपचारिकसंस्कृतशिक्षणस्य केन्द्राणि सर्वदा प्रचलन्ति सन्ति।

2022 तमे संवत्सरे वैद्यकीयक्षेत्रसम्बद्धेषु संस्थासु प्रबन्धनसंस्थासु कलावाणिज्यमहाविद्यालयेषु अभियान्त्रिकसंस्थासु इत्येवं 16 संङ्ख्याकासु उत्कृष्टोच्चशिक्षासंस्थासु केन्द्राणि प्रचलन्ति सन्ति। एतासु संस्थासु आधुनिकविषयप्रविधयः यद्यपि औपचारिकरूपेण पाठ्यक्रमे वर्तन्ते तथापि अनौपचारिकसंस्कृतशिक्षां प्राप्तुं तत्रत्याः छात्राः समधिकमात्रेण भागं गृह्णन्ति इति विशेषः।

***English version available in the additional information link**

| File Description | Document |
| --- | --- |
| Any other relevant information | View Document |
| Appropriate web in the Institutional website | View Document |

**Extended Profile**

**Program**

*Number of programmes during the last five years (Without repeat count):*

*विगतेषु पञ्चसु वर्षेषु कार्यक्रमाणां सङ्ख्या (पुनरावर्तितगणनां विना):*

**Answer:** 56

*Number of courses during the last five years (Without repeat count):*

*विगतेषु पञ्चसु वर्षेषु पाठ्यक्रमाणां सङ्ख्या (पुनरावर्तितगणनां विना):*

**Answer:** 870

**Students**

*Number of students year wise during the last five years (face-to-face only)*

*विगतानां पञ्चानां वर्षाणां छात्राणां वार्षिकी सङ्ख्या*

**Answer:**

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
| --- | --- | --- | --- | --- |
| 5950 | 5426 | 5045 | 4976 | 4771 |

*Number of outgoing / final year students year wise during the last five years (face-to-face only)*

*विगतेषु पञ्चसु वर्षेषु उत्तीर्णानां छात्राणां वार्षिकी सङ्ख्या*

**Answer:**

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
| --- | --- | --- | --- | --- |
| 2060 | 2125 | 1973 | 1874 | 1729 |

**Teachers**

*Number of full time teachers year wise during the last five years (face-to-face only)*

*विगतेषु पञ्चसु वर्षेषु पूर्णकालिकाध्यापकानां वार्षिकी सम्पूर्णा सङ्ख्या*

**Answer:**

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
| --- | --- | --- | --- | --- |
| 453 | 445 | 446 | 403 | 434 |

*Number of full time teachers during the last five years (Without repeat count):*

*विगतेषु पञ्चसु वर्षेषु पूर्णकालिकाध्यापकानां सङ्ख्या (पुनरावर्तितगणनां विना) :*

**Answer:** 453
**Institution**

*Total Expenditure excluding salary year wise during the last five years (INR in Lakhs) (face-to-face only)*

*विगतेषु पञ्चसु वर्षेषु वेतनं विहाय संस्थायाः वार्षिकः सम्पूर्णः व्ययः (लक्षशः)*

**Answer:**

| 2021-22 | 2020-21 | 2019-20 | 2018-19 | 2017-18 |
|---|---|---|---|---|
| 9199.25 | 8726.01 | 12729.66 | 11342.32 | 12560.01 |

**Conclusion**

*Additional Information :*

- CSU has introduced New National Education policy, 2020 from the academic year of 2022-23.
- It implements the integration of Indian Knowledge Systems with Indian Modern Languages.
- Modern languages like English, Regional language, Hindi, History, Political Science, Economics, Computer Science, Environment Science, Hindi Literature and English Literature, etc., are taught and they are included in the syllabi of UG Courses.
- It has implemented the Choice Based Credit system.
- It starts Academic Bank of Credits very soon in consonance with the education policies of Ministry of Education and UGC etc.
- It has the facility of multi-disciplinary and multi-linguistic approach for holistic development.
- It’s astounding growth in a rapid manner inspires the establishment of many Sanskrit institutions in India.
- It intends to expand its arena by opening courses in Science and Technology relating them to the study of Sanskrit.
- It establishes Chairs sponsored by the Government of India or donors under its Endowment Scheme.
- With its Multidimensional approach and Mini India face as its best practice and nature respectively, it mulls the idea of opening campuses in almost all states including total North East.
- It moots to open the extra campuses in the states where a campus already exists due to heavy demand, like Odisha.
- It wishes to open campuses abroad and thereby to support the idea of Bharat mantling the role of Global Leader through the spread of Sanskrit study.
- It acts as the custodian in protecting, popularizing and propagating study of Sanskrit and thereby India’s rich cultural heritage in India and abroad.
- It just limps back to normalcy after the dreadful Covid-19.

*Concluding Remarks:*

- The Central Sanskrit University, Delhi passed through important phases from its humble beginning in 1970 as Rashtriya Sanskrit Sansthan an autonomous body registered under Societies Act, to the present status Central University through the enactment of Parliament Act in 2020, with twelve campuses under its belt located at significant places across the length and breadth of India including North East.
- It started its journey with courses from Prathama, Madhyama, Purva Madhyama, Uttar Madhyama, Shastri and Acharya to Pedagogy (Siksha Shastra) and Research (Vidya Varidhi) in traditional subjects like

Vyakarana, Sahitya, Jyotisha, Nyaya, Vedanta, Sarva Darshana, Puranetihas, Dharma Shastra, Karma Kanda etc in 1970.

- When it became a Deemed to be University its courses from Prathama to Purva Madhyama were discontinued and programmes from Prak Shastri to Acharya and Pedagogy including Siksha Acharya (2006) were continued.
- As the Nodal agency of MoE, it also manages twenty six Adarsh Mahavidyalayas including four Adarsh Shodha Sansthans under the Central scheme.
- It has many affiliated institutions where Prathama to Shastri/Acharya courses are taught.
- Its Centre for Distance Education called Mukta Swadhyaya Peetham runs programmes from Prak Shastri to Acharya in Vyakarana, Sahitya and Jyotisha besides Bridge Courses. It has a tie up with IGNOU in this regard.
- It runs Correspondence Courses for learning simple Sanskrit.
- Under Non Formal Sanskrit Education (NFSE) it conducts Diploma Courses in Basic Sanskrit and Sanskrit Journalism etc.
- It introduces Simple Standard Sanskrit (Saral Manak Samskrutam) in Prak Shastri course.
- MOOCs awareness is being brought through organizing seminars and workshops etc.
- Under the Central Scheme, it runs diploma courses in Pali and Prakrit etc. In addition it has courses in Baudha and Jain studies.
- It has a dedicated campus exclusively for research programme and publications at Ganganath Jha Campus, Prayagraj (erstwhile Allahabad). The campus conducts the mandatory six month Pre-PhD course. It preserves more than 56000 manuscripts. Even foreign scholars also do their research works. It publishes quality research articles.
- It will attain the status of Centre of Excellence in the study of Sanskrit and Sanskrit Research in near future.
- Ordinances, policies & cadre recruitment rules are available in website.

**EXCLUDED METRICES**

No Metrices are Excluded

**ANNEXURE**